Volume - XXIII July-December 2022 ISSN 2320-2025

# व्यासश्रीः

# VYĀSAŚRĪḤ

*A Bilingual Refereed Research Journal of Indology*



Swami Brahmananda Saraswati

**: Chief Editor :**

Dr. Buddheswar Sarangi

*Publisher*

**Maharshi Vyasadev National Research Institute**

**Vedavyas, Rourkela-4, Odisha**

**email : vyasasri12@gmail.com**

**vist us : www.vyasasri.com**

# व्यासश्रीः
# VYĀSAŚRĪḤ

**Impact Factor 6.812**
**(A Refereed Research Journal)**
**July-December 2022**
**Date of Publication: 30.12.2022**

**This Issue is dedicated to Swami Brahmananda Saraswati**

**: Chief Editor:**
Dr. Buddheswar Sarangi

**: Associate Editors:**

Prof. Prasanta Kumar Mahala
Dr. Saroj Kumar Padhi
Dr.Swetapadma Satapathy
Dr. Jagamohan Acharya
Dr. Bharatbhushan Rath
Dr. Priyabrata Mishra
Dr. Gyanaranjan Panda
Dr. Pradeep Kumar Bag
Dr. Babulal Meena

*Publisher*

**Padmashree Ramaranjan Mukherjee Chair of**
Maharshi Vyasadev National Research Institute
A Unit of Vyasayanam, Regd. No. 1635-IV-477/04
Vedavyas, Rourkela-4, Odisha
Contact No.: 7003415810, 7044016153
Email: vyasasri12@gmail.com
Website: www.vyasasri.com

**Board of Advisors:**

Prof. Abhiraj Rejendra Mishra

Prof. Radhaballava Tripathy

Prof. Harekrishna Satapathy

Prof. Srinivas Varkedy

Prof. Prafulla Kumar Mishra

Prof. Somesh Kumar Mishra

Prof. Chandrakant Shukla

Prof. Arun Ranjan Mishra

Prof. Sukanta Kumar Senapati

Dr. Acharya Devabrata

**Hon'ble Referees:**

**Prof. Kishor Chandra Padhi,**

Ex-Professor, S. J. S. V. Puri

**Prof. Tapan Shankar Bhattacharya,**

Professor in Sanskrit, Jadavpur University, Kolkata

**Prof. Satyanarayana Acharya,**

Professor in Sahitya, National Sanskrit University, Tirupati

**Prof. Dharmananda Rout,**

Professor in Sahitya, LBS National Sanskrit University, New Delhi

**Co-Ordinators:**

Prof. Sarita Sharma (Academic)

Dr. Umakanta Panda (Finance)

Sri Chandradhwoja Majhi (Finance)

Smt. Laxmipriya Pahadi (Publicity)

Dr. Koushik Malakar (Printing)

Dr. Asha Singh Rawat (Printing)

Dr. Biswanath Mahata (Printing)

 ISSN 2320-2025

# समर्पणम्

श्रुतिमन्दाकिनीं प्रवाहयितुं बद्धादराणां कर्मयोगिनां
दिवङ्गतानां परमपूज्यस्वामिब्रह्मानन्दपादानां कृते ..........



कीर्त्तिलक्ष्मीस्सदा येषां गुरुकुलाङ्गणे मुदा।
धृतपीतपरिधाना नृत्यति व्यासमण्डले॥

## KARMAYOGI SWAMI BRAHMANANDA SARASWATI

It is well known that "One Look, one touch, one word" of Mahatma can transform one's life. Swami Brahmananda Saraswati is regarded as one of the world teachers who brought about a spiritual awakening in millions of people.

**BIRTH-29, APRIL 1918 (Akshaya Tritiya)**

Born at Sudampur situated on the bank of Utkal Ganga Baitarani River 30 Kms. South of Bhadrak and 12 kms. North-east of Jajpur a sacred historical town. His father Kalicharan and mother Shovadevi were fortunate parents of the child, his life was sage and suffering.

**EDUCATION 1923-1935**

Primary Education at native village Secondary Education at Jajpur High School Learning of Sanskrit from Scholars in different institutions.

**1936-1946**

Visiting of holy places in India and deeply thought about true knowledge of God.

Joining in Indipendence movement being inspired by Ishwarlal Vyas an associate of Mahatma Gandhi. Participated in 1942 non-violence movement. He was one of the earliest to challenge the British rule in India.

**CAREER 1947-1950**

Left for Calcutta on 15th April 1947

Served as volunteer at Sodpur (24 Pragana) during visit of Mahatma Gandhi. He had an opportunity to visit Nuakhali with Mahatmajee. Joined in Arya Samaj and organized Samities for Vedic Dharma Prachar. Founded voluntary organizations for service to humanity. On Basant Panchami 1950 left Calcutta for Balangir as Nasthik Brahmachari and worked for Arya Samaj.

**1951-1952**

Established Vedic Kutir at Sunamudi and organized Vishwashanti Mahayanja on Maghapurnima 1951 which continued for 7 days in the district of Balangir, Odisha.

**SANNYAS DIKSHA**

On Basanta Panchami day of 1953 at Bankipur, Patna (Bihar) received Sannyas Diksha from Guru Swami Abhedanand Saraswati on the occasion of Annual Day Celebration of Arya Pratinidhi Sabha, Bihar.

**1953-61**

Gurukul pratistha & arya samaj Organisation.

While at Agra (U.P.) Utkal Keshari Dr. Harekrushna Mahatab called him to Odisha through Guru Swami Abhedanandjee.

"Vedvyas" one of famous holy places of Odisha was selected as main centre for his works. The priest Gadadhar Dehuri donated 10 acres of land and Vedic Ashram established on the day of Aunla Navami 1954.

Started his true services among Adivasis and worked to save their origin religion.

Leaders like Nirmal Munda, Sukra Munda, Temba Bhagat and others associated him and then 17 thousand Adibasis returned to their own Sanatan Dharma on conversion.

Established schools at Loaram, Gudhiali, Sorada, Chatta and other places in Sundargarh Districts. His work was linked with Sarvadeshik Arya Pratinidhi Sabha, New Delhi and All India Dayananda Salvation Mission, Punjab.

Arya Samaj, Rourkela and D.A.V School at Bisra Road, Rourkela were started in 1958.

Arya Samaj, Hirakud was also established by his efforts.

**1959-1996**

Gurukul Vedic Ashram at first Gurukul institution in Odisha was inaugurated at Vedic Ashram by Dr. Harekrushna Mahatab on the day of Maha Shivratree, 1960.

Swami Shivananda Tirth, a scholar of Sanskrit became the first Kulapati of the Gurukul. Acharya Harisharan and Pt. Despal Dixit of Gurukul Jhajjar (Hariyana) were engaged as teachers.

**AS FOUNDER OF OTHER INSTITUTIONS**

Institutions one by one opened in different places of Odisha. Gurukul Ashram Amsena in Nuapada District (Presently Managed by Swami Dharmananda Saraswati). Kalyan Ashram,

Thalkudi, (Jajpur), Veda Vidyalaya, Dasarathpur (Jajpur), Arya Kanya Gurukul, Tanarada (Ganjam), Tapobana Shanti Ashram, Raikia (Kandhamal), Arsha Kanya Gurukul, Gundargan (Kandhamal), Maharshi Dayananda High School, Katingia (Kandhamal), Vedvyas Gaushala, Vedvyas, Rourkela S.T.D.A.V. High School, Lungei, Vedvyas, Rourkela, Vedic Satsang Ashram, Thakurhat (Kendrapara), Mahapurush Sanakrit Vidyalaya, Kanjaipal (Bhadrak), Gurukul Sanskrit Vidyapitha, Pinchhabania (Balasore), Vedic Satsang Yogashram, Chitra (Puri), Dayanand Vedic Ashram, Ghens (Bargarh), Patkhanda Primary School, Chanchedi (Kandhamal), Swami Shradhananda M.E. School, Firingia (Kandhamal), Vedic Satsang Ashram Danapadar (Ganjam), Gurukul Vedvyas Sanskrit Maha Vidyalaya (Sundargarh), Bhorukha Health Centre, (Kandhamal).

**Relief work (1960-2001)**

Swamijee could reach with his team with food and clothing in affected areas of flood, cyclone and drought for Arya Samaj Relief work at the actual time when distressed people needed after nature calamity.

**AS RECIPIENT OF DR. MAHATAB AWARD**

Received Mahatab Award from Sri Biju Patnaik, the then Chief Minister of Odisha on 2nd January 1991 for his best services to the society.

Swamiji virtually awakened the moral and spiritual consciousness in the hearts of people. Even in ill health his works inspire greatest thinkers today.

**2001, 6th September, after returning from Relief work he fell ill suddenly and died at Bhubaneswar.**

# प्रास्ताविकम्

**मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा**
**निरशीर्निर्ममो भूत्वा युद्धस्व विगतज्वरः।।**
**ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।**
**श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ।। (श्रीमद्भगवद्गीता-3/30-31)**

तत्त्वद्रष्टृणा व्यासेन श्रीमद्भगवद्गीतायाः कर्मयोगे श्रीकृष्णमुखेन पार्थमोहविनाशात्मिका वाणीरियं गीता। अत्र पद्यद्वये मोहग्रस्तमानवानां मोहनाशाय कृतप्रयासेन व्यासेन सर्वत्र कर्तृत्वं तस्यैव परमेश्वरस्य वयं सर्वे तदिच्छया तत्संपादने रता इति दिव्या वाणी शब्दार्थमयशरीरेण पुष्कलिता। परमार्थोऽयमत्र सहृदयानां हृदये उद्भासते यद् भगवति श्रद्धां प्रदर्श्य तस्मै च सर्वं समर्प्य क्रियमाणं सर्वमनासक्तकर्मजालं परमं फलं प्रयच्छति यदेव ईश्वरसान्निध्याय कारणं च भवति।

अत्रापि व्यासश्रीपरिवारस्य ज्ञानमार्गे याः प्रसृतिः साऽपि परमेश्वराय समर्प्यमाणा सती देववाणीसेवां करोति। संस्कृतवाङ्निबद्धे विशालवाङ्मये यानि तत्त्वानि वर्तन्ते तेषां सम्यक्तया गवेषणां विधाय लोकोपकारपक्षं समुदघाटयितुं व्यासश्रीः सर्वदा यत्नशीला। मायामोहान्धजसंसारसन्तापात् विमोचनाय ये मार्गाः भारतीयदर्शनशास्त्रेषु समाम्नाताः तेषां सरलोपस्थापनमत्र क्रियते । अत्रत्याः गवेषकाः सर्वदा लोकपकारतत्त्वानां परिशीलने रताः सन्ति। प्राप्तेषु प्रबन्धेषु समाजोपकाराका एव अत्र प्रकाशनाय चितास्सन्ति। व्यासश्रीपत्रिकायाः इयं संख्या वेदमन्दाकिनीप्रवाहनाय विहितप्रयासानां संस्कृतशास्त्रावनैकधनानां गुरुकुल शिक्षाप्रचोदकानां दिवङ्गतपरमश्रद्धेयस्वामिब्रह्मनन्दपादानां कृते समर्प्यते। इमे साधवः संस्कृतशिक्षायाः प्रसाराय उत्कलप्रदेशे बहूनां गुरुकुलानां स्थापनं विधाय वनवासिक्षेत्रे शिक्षायाः ज्ञानमधुधारां प्रसारयामासुः। तत्प्रेरणाया लब्धगुरुकुलशिक्षाः नैके विद्वांसः अद्य केन्द्रीयविश्वविद्यालयेषु, राज्यविश्वविद्यालयेषु महाविद्यालय-विद्यालयेषु च वृत्तिभाजः सन्ति। बाल्ये येषां गृहं नासीत् अद्य ते प्रासादवासिनः, ये विद्यालयं न ददर्शुः, तेषां पुत्राः कन्याश्च प्राध्यापकाः शिक्षकाः शिक्षयत्र्यश्च। एतादृशां सतकर्मभाजां कृते शब्दपुष्पाञ्जलिरयं समर्प्य वयं व्यासश्रीपरिवारसदस्याः धन्याः भवामः।

अस्मिन् अङ्के काव्य-व्याकरणदर्शनधर्मशास्त्रादि विषयमुररीकृत्य प्रायः 43 शोधनिबन्धाः प्रकाशिताः भवन्ति। तत्र नवीनगवेषणानियमानुसारेण सर्वाः कृतयः समलङ्कृताः। नवीनतया संपादकसमितौ युवगवेषिका प्राध्यापिका श्वेतपद्माशतपथी योगदानं करोति। तस्याः प्रकाशनानुभवेन पत्रिकेयं ऋद्धिमती स्यादिति हर्षप्रकर्षस्य विषयः। ये गुरवो विचारकत्वेन अस्माकं सहायकाः मार्गप्रदर्शकाः, तान्

नमोवाकं प्रशास्महे। ये मित्रवर्याः संपादनदायित्वं परिपालयन्ति तेभ्योऽपि धन्यवादमर्पयामः। विशेषतः येषां निवन्धकर्त्तृणां कृतयः संस्कृतसारस्वतमन्दिरेन्दिरायाः अलङ्कारभूताः तेभ्यःपुनः पुनः कृतज्ञतां ज्ञापयामः। अन्तिमे मङ्गलमिदमस्तु-

**वाक्सेवनाढ्या बुधकीर्त्तिलक्ष्मीः**
**पर्याप्तभाग्या प्रथिशीष्ट नन्दम्।**
**ज्ञानातुराणां तुषितं च चित्तं**
**तृप्तं यथा शास्त्ररसे सुखि स्यात्।।**

इति
विद्वत्सेवनसुखिनः
बुद्धेश्वरषडङ्गी,
मुख्यस्पादकः तथा व्यासश्रीपरिवारस्य सदस्याः

दिनाङ्कः- 30.12.2022

Scientific Journal Impact Factor

SJIFactor

# CERTIFICATE OF INDEXING (SJIF 2023)

This certificate is awarded to

**VYASASHRIH**

**(ISSN: 2320-2025)**

The Journal has been positively evaluated in the SJIF Journals Master List evaluation process

SJIF 2023 = 6.812

**SJIF (A division of InnoSpace)**

SJIFactor Project Manager
International Advisory Services
INNOSPACE INTERNATIONAL

SJIFactor Project

# GUIDELINE

1. Paper should be prepared with in10 pages.

2. Your paper should be recommended by an eminent scholar (Professor/Associate Professor/PhD Guide) of concern field. Send the pdf and soft copy of your paper with recommendation of the scholar to vyasasri12@gmail. Send a message to the contact no.7003415810 that you have sent the paper.

3. Your paper will be send to our export committee for approval.

***Guide line for the preparation of an article for VYASASHREE, ISSN 2320-2025***

..........................................................................................

**A. PRINTING AREA OF THE PAPER**

Length- **17cm**

Wide-**10.5 cm**

Letter size- **13 for Hindi/Devanagari** (Unicode font)

**11 English (Arial Normal)**

**B. PAPER FORMAT**

1. Title of the Paper (all capital). **Font size-16**

2. Authors' name-**Font size 13**

3. Abstract- Font Size 12

4. Key words (italic). **Font size 12**

5. Introduction**. Font size 12**

6. Main Topic**. Font size 12**

7. Conclusion. **Font size 12**

8. Foot Note. **Font size 09**

9. List of Reference Book s. (Author, Name of the Publisher, Publication year) **Font size 09**

10. Page limit. **6 to 10**

All interested scholars are requested to prepare their research paper as per guide line to avoid the printing hazard.

**The paper not followed the above guide line may be rejected at final stage**.

N. B. The submitted papers are reviewed by the Board of Referees and Editorial Board. Only the selected papers are published in the journal. So, it takes three to six months to publish a paper.

**Dr. Buddheswar Sarangi**

*Chief Editor, Vyasashree*

# सूचीपत्रम्


| | | |
|---|---|---|
| Editorial Board | | (i) |
| Dedication details | | (iii) |
| प्रास्ताविकम् | | (vii) |
| Certificate of impact factor | | (ix) |
| Guideline | | (x) |
| सृष्टिः | स्रष्टा | पृष्ठम् |
| 1.भारतीयसंस्कृतौ तन्त्रसाधना | सुव्रतसाहा | 1 |
| 2. Great Indian Epics: Guidance to Sanskrit Poets | Dr.Subhasree Dash & Ms. Chandini Dalai | 14 |
| 3. माघस्य महाकाव्ये प्रतीयमानम् राजधर्मस्वरूपम् | अनुश्रिता मण्डलः | 25 |
| 4. शिक्षणकौशलविकासे अधिगमसिद्धातानामुपादेयता | Shewli Chakraborty | 35 |
| 5. विवेकानन्दकाव्यामृतम् विवेकलहरी इत्यनयोः तौलनिकमध्ययनम् | अनन्यासरकारः | 43 |
| 6.सांख्ययोगवेदान्ताभिमतसाध्यसाधनविमर्शः | प्रो. रामकिशोर त्रिपाठी | 63 |
| 7. दक्षिणभारतीया श्रीजयदेवकृत्यनुकृतिपरम्परा | Dr. D Ramakrishna | 79 |
| 8. उत्तररामचरितस्याङ्गिरसपर्यालोचनम् | डा.शैलेश कुमार मिश्रः | 88 |
| 9. Vedānta Philosophy in the Viṣṇu Purāṇa | Moumita Banerjee | 95 |
| 10. वेदों में वनस्पति व औषधीय प्रबंधन | डा.दीप्ति वाजपेई & मोनिका सिंघानिया | 107 |
| 11. आधुनिकसंस्कृतकथार्थगौरवम् | डा. शान्तिगोपाल-दासः | 120 |
| 12. The Techniques of Internal Control (Yama): Special Reference to Patanjala –yoga and Hatha-yoga | Dr.Prashanat Kumar Dash | 128 |
| 13. अक्षरसमाम्नायः | डा.सङ्कर्षण पण्डा | 140 |
| 14. देवो याति भुवनानि पश्यन् | डा. भारतभूषणरथः | 148 |
| 15. प्रकृतिप्रत्ययविज्ञानम् | अध्यापिका कादम्बिनी पाढी | 155 |

16. सुपद्मव्याकरणे संज्ञाप्रकरणे परिभाषासूत्राणि – एकम् अध्ययनम्
Atanu Adhya 162
17. गीताव्याख्याने समाधिप्रकाशारण्यमहोदयस्य योगदानम्
बाबलु बर्मनः 172
18. अभूत् इत्यत्र लुङ्लकारे शप् भवति न वेति विचारः Prof.G.S.V. Dattatreya Murthy 189
19. Women in the pages of the Hitopadeśa Dr. Jewti Boruah 198
20. कालिदासनाट्यभारतीषु गजचर्चा डॉ. कृष्णचन्द्रपण्डा 205
21. अद्वैतवेदान्तसिद्धान्तानुसारेण कूटस्थस्वरूपः विचारः राधेश्याम वारिकः 208
22. कुमारसम्भवकाव्ये कालिदासस्य सुविज्ञानप्रतिभानैपुण्यम्
डा.लक्ष्मीकान्तषडङ्गी 217
23. यजुर्वेदे धर्मविचारः डा.सत्यव्रतनन्दः 226
24. श्रीमद्भागवतमहापुराण में मानवाधिकार विमर्श डा.अञ्जना तिवारी 233
25. भामहदृष्ट्या काव्यकारणपर्यालोचनम् वापनरुइदासः 239
26. A Study of Chiranjiva Bhattacharya's Mādhavacampū
– in the light of available textual variants Dr. Preeti Pujara 245
27. उपनिषदि परमाणुनिरवयवत्ववादः डॉ. प्रलय-व्यानार्जी 256
28. Theory of Lord Śiva in the thoughts of Rabindranāth Tagore: A Study
Dr. Husna Parvin 262
29. मुद्राराक्षसनाटके राजनीतिः शिवानी मिश्र 266
30. The development of the figure of speech
*Yathāsaṃkhya* in Sanskrit Rhetoric: A brief study
Dr. Pratim Bhattacharya 276
31. अश्वघोषस्य बुद्धचरितसौन्दरानन्दमहाकाव्ययोः राजधर्मस्य परिशीलनम्
Dr. Gitanjali Nayak 282
32. कालिदाससाहित्ये रसायनविज्ञानम् डॉ. नृसिंहनाथगुरुः 291
33. प्राचीनभारते मानवाधिकारभावनायाः तत्त्वान्वेषणम् देवदास-मण्डलः 298
34. श्रीमद्भागवतदर्शने सृष्टिवैचित्र्यम् भूपेनमण्डलः 302
35. पातञ्जलदर्शनविमर्शः मृण्मयमल्लिकः 310
36. भर्तृहरेः वैराग्यशतकस्यानुशीलनम् डा. गोगिकार प्रकाशः 319

37. अक्षरतत्त्वविवेकः प्रियव्रतमिश्रः 326
38. सायणाचार्यस्य अथर्वसंहिताव्याख्यानविधेः समीक्षणम् डॉ. सपन कुमार पण्डा 333
39. अपादानविमर्शः प्रो. प्रशान्तकुमारमहला 345
40. सुसंस्कृतसमाजनिर्माणे रघुवंशमहाकाव्यस्य प्रासङ्गिकता ममि महान्त 352
41. पाणिनीयव्याकरणागमे वर्णोच्चारणप्रयत्नविवेकः डॉ.जयप्रकाश साहु 365
42. सत्सङ्गदीक्षा डा. दिनेश पां. रसाळ: 372
43. शब्दशक्तिस्वरूपविमर्शः शिवदत्तत्रिपाठी 379
44. ग्रन्थसमीक्षाः- THE BAPS SWAMINARAYAN RESEARCH JOURNAL डॉ.बुद्धेश्वरषडङ्गी 392
45. Writer's World 395

# भारतीयसंस्कृतौ तन्त्रसाधना

सुव्रतसाहा
शोधच्छात्रः
रायगञ्जविश्वविद्यालयः

**भूमिका-** भारतीयसंस्कृतौ तन्त्रसाधनस्य विशिष्टं स्थानं विद्यते। भारतीयसंस्कृतेः विकासविषये यदा चर्चा जायते तदा वैदिकभावनायाः उपरि गुरुत्वं दीयते। तया वैदिकभावनया सह अवैदिकभावनायाः अपि प्रभावः दरीदृश्यते। भारतीयतात्त्विकदृष्ट्या सूक्ष्मविचारः क्रियते चेत् स्पष्टं प्रतीयते यत् वैदिकाऽवैदिकाऽनार्यसंस्कृतयः अपि भारतीयसंस्कृतिं प्रभावयन्ति। प्राचीनकालवत् मध्ययुगे सम्प्रत्यपि वैदिकसाधनायाः आलोचनं मननं च परिलक्ष्यते परन्तु तान्त्रिकसाधनाविषयकं अनुशीलनं प्रायः बहिर्मुखत्वात् तस्य जनसमक्षं प्रचारप्रसारादिकं न जातम्। परमश्रद्धेयाः श्रीयुक्त-शिवचन्द्र-विद्यार्णव-भट्टाचार्यमहाभागाः तेन विरचितेन 'तन्त्रतत्त्वेन' शिक्षितयुवकान् तन्त्रं प्रति आहूतवन्तः। तस्मिन् ग्रन्थे ते ऊचुः - 'नान्यः पन्था मुक्तिहेतुरिहमुत्रसुखप्राप्तये। यथा तन्त्रोदितो मार्गो मोक्षाय च सुखाय च।'[1] ततः तेन प्रचोदितः उच्चन्यायालयाधीशः Sir John Woodroff – महोदयः तन्त्रसाधने आकृष्टः सन् विद्यार्णवमहोदयस्य सकाशे तान्त्रिकदीक्षां गृहाण। स नानातन्त्रग्रन्थान् प्रकाश्य तन्त्रस्य महिमानं दिक्षु प्राचारयत् तन्त्रसाधनायाः धारां च नुतनदृष्ट्या मर्यादया च स्थापितवान्। अखिलविश्वे तन्त्रसाधानस्य प्रचारे प्रसारे उद्भूवर्याणां महिमाप्रसङ्गे Dr.Winternitz – महोदयः उवाच – 'It is Sir John Woodroffe (Under Pseudonym of Arthur Avalaon) who by a series of essays and publication of the most important Tantra Text has enabled us to form a just judgment and an objective historical idea of this religion and its literature.'[2]

परमश्रद्धेयाः स्वामिनः प्रत्यगात्मानन्दमहाराजाः, पण्डितगोपिनाथकविराजवर्याः प्रभृतयः प्राचीनशास्त्रत्वेन तन्त्रशास्त्रं प्रति श्रद्दधानाः आसन्।

**तन्त्रशास्त्रस्य उद्भवकालः -** तन्त्रशास्त्रस्य उद्भवः कदा अभवदिति वक्तुं न शक्यते। यतः मानवानां विश्वासं संस्कारं मानवहृदयानां कामनावासनाश्च अवलम्ब्य तन्त्रमतं सम्भूतम्। अतः ऐतिहासिकाः तन्त्रस्य प्राचीनत्वं परिमातुं क्लेशममनुभवन्ति। पुनश्च शास्त्रज्ञाः साधकाः तन्त्रं सनातनमिति अभिमन्यन्ते। यतः तन्त्रेण प्रतिपाद्यं प्रधानं तत्त्वं ब्रह्म। यथा ब्रह्म अनादि नित्यञ्च तथैव

[1]तन्त्रतत्त्वम्, श्रीयुक्तशिवचन्द्रविद्यार्णवः, पृ. - 16
[2] History of Indian Literature: Dr.Winternitz, Vol – 1, page – 591, University Of Calcutta.

तन्त्रमपि अनादि सनातनं च।[3]अनादेः नित्यस्य च कालनिर्णयस्य प्रश्नः एव न भवति। इतोऽपि तन्त्रं भवति गुह्यं साधनशास्त्रम्। तच्छास्त्रं गुरुगम्यम्। लिपिलेखनात् पूर्वमपि अस्य शास्त्रस्य गुरुपरम्परा प्रचलिता आसीत्। पूर्वं तन्त्रसाधकाः रक्षणशीलाः आसन्। अतः तान्त्रिकसिद्धान्तान् जनसमक्षं नाऽनयन्ति स्म। तथा तन्त्रस्य अपरा ख्यातिरासीत् श्रुतिरिति। गुरुमुखात् श्रूयते इति श्रुतिः। अतः तन्त्रसाधनम् आप्राचीलकालं गुरुपरम्परया सम्प्रदायात् सम्पदायान्तरं प्रचलति। अतः तन्त्रस्य प्राचीनरूपं निर्णेतुं निश्चयेन न शक्यते।

तथापि परवर्तिनि काले नानातथ्यानि आश्रित्य केचन तन्त्रस्य कालं निर्णयन् स्वमतम् उपस्थापितवन्तः, यथा –

1. केचन वदन्ति प्राचीनबुद्धपूर्वयुगात्, प्रागैतिहासिकयुगमारभ्य वा तन्त्रशास्त्रस्य प्रवृत्तिरिति।
2. मध्ययुगात् अर्थात् बुद्धोत्तरवर्तिनः युगात् प्रायः १२००-क्रीस्ताब्दपर्यन्तं विस्तृतः उत्पत्तेःकालः।
3. आधुनिकयुगात् अर्थात् १२००- क्रीस्ताब्दादनन्तरं अस्य युगस्य प्रारम्भः इति अभिमन्यन्ते केचन।

विद्वांसः मन्यन्ते यत् प्रागैतिहासिकयुगात् आरभ्य नानाकालेषु गुरुपरम्परया सम्प्रदायपरम्परया च तन्त्रशास्त्रं परिवर्धितं परिपुष्टं च।

**प्राचीनयुगम्-**

प्राचीनयुगस्य कोऽपि तन्त्रग्रन्थः न प्राप्यते। अतः विद्वांसः अनुमिन्वन्ति प्राचीनकाले तन्त्रशास्त्रं श्रुतिरूपेण अवर्तत। परन्तु तदानीन्तनानां नानावस्तूनां नामानि सम्प्रति प्राप्यमानेषु सूत्रेषु प्राप्यन्ते।

वैदिकसंहितायाः नानासिद्धान्तैः सह मूलतन्त्रस्य साम्यं दरीदृश्यते। केचन तान्त्रिकाचाराः वेदानुगताः। तन्त्रे वैदकाऽवैदिकौ भेदौ दृश्येते। तान्त्रिकाः वैदिकतन्त्रं वेदत्वेन वेदशाखत्वेन वा स्वीकुर्वन्ति। भास्कररायः 'सेतुबन्धे'-महामायादीनि चतुःषष्टिः तन्त्राणि वेदरूपाणि इत्यवोचत्। अतः उक्तम् - 'एतानि महामायादिविशुद्धेश्वरान्तानि चतुःषष्टितन्त्राणि। शास्त्राणि वेदरूपाणि। तन्त्राणामुपनिषच्छेषत्वात्।'[4] तन्त्रं शास्त्रपदवाच्यम्। शास्त्रपदस्य व्युत्पत्तिर्भवति यच्छास्ति तच्छास्त्रम्। शासनं नाम भगवत्याः प्रवर्तनाऽप्रवर्तनरूपा आज्ञा। वेदतन्त्रं यद्यपि शब्दात्मकौ तथापि ज्ञानस्य भेदमात्रम्। इदं ज्ञानं लौकिकं वा पुरुषकृतं नास्ति। अतः दिव्यं अपौरुषेयं च। बहिर्मुखदृष्ट्या वेदतन्त्रयोः भेदः परिलक्ष्यते चेदपि तात्त्विकदृष्ट्या तु वेदः तन्त्रं वा इन्द्रियातीतं शब्दात्मकं सूक्ष्मज्ञानविशेषम्। वस्तुतस्तु वेदः एकः अभिन्नश्च, स बोधात्मकः किन्तु अभिव्यक्तिकाले वागात्मको भूत्वा शब्दक्रमेण प्रकाशते। वेदेनैव ब्रह्मप्राप्तिः सम्भवति। वेदवद् तन्त्रमपि बोधात्मकं वागात्मकञ्च।

[3]Introduction to Karpuradistotra, Tantrik, Texts, Vol.IX, page - 4
[4]रामकेश्वरान्तर्गतः नित्यषोडशिकार्णवः, १/२२ – सेतुबन्धः।

शिवसमवेतशक्तेः द्वे रूपे स्तः – एकं ज्ञानं अपरा च क्रिया। ज्ञानरूपा शक्तिः पराऽपराभेदेन द्विधा। पराज्ञानं बोधात्मकम्, अपराज्ञानं वागात्मकम्। वागात्मकं ज्ञानं शास्त्रस्वरूपेण प्रतिष्ठितम्। बोधात्मकं पराज्ञानम्, वागात्मकम् अपरज्ञानं च शब्दस्योपरि आरुह्य अर्थं प्रकाशते। 'सात्त्वतसंहितायाम्' उच्यते पराज्ञानं साक्षाच्छिवस्य शक्तिस्वरूपम्, अपराज्ञानं च तन्त्रस्वरूपम्। जगत्सृष्टेः उन्मेषकाले भगवान् परापराभ्यां मुक्तये ज्ञानं प्रकाशयत्। सर्वादौ परमकारणस्वरूपात् भगवतः शिवात् अवबोधात्मकस्य नादात्मकस्य ज्ञानस्य प्रकाशः अभवत्। ततः नादात्मकं ज्ञानं सदाशिवरुपमाश्रित्य तन्त्ररूपं गृह्णाति।

तन्त्रं वेदमूलकं प्रामाण्यशास्त्रं एतद् भास्कररायः अपि स्वीकृतवान्। स अब्रवीत्[5] – वेदे पूर्वकाण्डस्य शेषभूतस्वरूपत्वेन आश्वलायनादिकल्पसूत्राणां मन्वादिस्मृतिशास्त्रस्य च प्रवृत्तिः, तथैव उपनिषत्काण्डस्य शेषभूतत्वेन परशुरामादिकल्पसूत्रस्य यामलादितन्त्रस्य च प्रवृत्तिः। तथा च उभयकाण्डस्य शेषभूतत्वेन पुराणानां प्रवृत्तिः। तस्मात् स्मृतिः, तन्त्रं, पुराणानि च वेदमूलकत्वात् प्रमाणानि। आचार्येण रामभट्टेन अपि आगमः तन्त्रं वा वेदस्य उपासनाकाण्डान्तर्भूतम् इति उच्यते। तस्य नये श्रुतेः त्रीणि काण्डानि – कर्मकाण्डम्, उपासनाकाण्डं, ब्रह्मकाण्डं च। एतेषु उपासनाकाण्डम् अगमशास्त्रात्मकम्।[6]

'मेरुतन्त्रे' तन्त्रं वेदाङ्गत्वेन स्वीकृतम्। अत तत्र उक्तम् – 'न वेद प्रणवं त्यक्त्वा मन्त्रो वेदसमुत्थितः। तस्माद्वेदपरो मन्त्रो वेदाङ्गाश्चागमः स्मृतः।'[7] अर्थात् प्रणवं त्यक्त्वा वेदः नास्ति, मन्त्रः वेदात् समुत्थितः। तस्मात् मन्त्रः वेदपरः आगमश्च वेदाङ्गम्। आगमः तन्त्रं वा मन्त्रशास्त्रम्। मन्त्रो वेदपरः। अतः आगमः तन्त्रं वा वेदाङ्गम्। 'निरुत्तरतन्त्रे' उच्यते तन्त्रं पञ्चमो वेदः - 'आगमः पञ्चमो वेदः कौलस्तु पञ्चमाश्रमः।'[8] अतः तन्त्रमपि श्रुतिः। अतः महर्षिः हारितः कथयति – श्रुतिः द्विधा – वैदिकी तान्त्रिकी च, तदुक्तम् – श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च।[9] तन्त्रशास्त्रे वैदिकक्रियायाः तान्त्रिकक्रियायाश्च साकल्येन विधानमुक्तम्। यथा गायत्रीतन्त्रे उच्यते – तान्त्रिकः गायत्रीजपं समाप्य सूर्याय तान्त्रिकम् अर्घ्यं प्रदास्यति। ततः वैदिकं गायत्रीजपं करिष्यति।[10]

पुनश्च बहवः तान्त्रिकमन्त्राः प्रणवोच्चारणानन्तरमारभ्यते। प्रणवः शुद्धवैदिकमन्त्रोच्चारणम्। परन्तु तन्त्रशास्त्रे एतत् सर्वं स्वीक्रियते। 'ज्ञानसङ्कलिनी'इत्याख्ये तन्त्रे उच्यते – अ-उ-म – एतेषां

---

[5]रामकेश्वरान्तर्गतः नित्यषोडशिकार्णवः, सेतुबन्धः, पु. 4.
[6]तत्र सर्वासु श्रुतिषु कल्याणमयं कर्मोपनाब्रह्मभेदेन.....अत एतदुपासनाकाण्डमवागमशास्त्रात्मकं गरीय इति सिद्धम् – शाक्तानन्दतरङ्गिणी, १/१ टीका।
[7]मेरुतन्त्रवचनम्, द्रष्टव्यम् – प्राणतोषणी, काण्डम् – १, परि. – ९, पू. - ६४
[8]निरुत्तरतन्त्रवचनम्, द्रष्टव्यम् – प्राणतोषिणी, काण्डम् – १, परि. – ९, पू. - ६४
[9]मनुसंहिता – २/१ – कुल्लुकभट्टकृतं टीकाधृतं हारीतवचनम्।
[10]गायत्रीतन्त्रम्, पू. - ४

सम्मिलितरूपम् ओम् इति, तथा ओम् इत्येव प्रणवः। अकारः सात्त्विकः, उकारः राजसिकः, मकारश्च तामसिकः त्रयाणां सम्मिलितं रूपं प्रकृतिः, अर्थात् प्रणवः आद्या प्रकृतिः।[11]

मूलतः तन्त्रम् एका साधनप्रक्रिया। तन्त्रग्रन्थेषु समुपलभमानाः साधकाः, महाविद्यायाः उपासकाः सर्वे वैदिका ऋषयः आसन्। ते वैदिकस्तोत्रेण सह तान्त्रिकमन्त्राणामपि साक्षात्कर्तारः आसन्। वशिष्ठ-लोपामुद्रा-दुर्वासा-अगस्त्यादयः 'श्रीविद्यायाः' परमोपासकाः आसन्। 'श्रीविद्यार्णव' इत्याख्ये तन्त्रग्रन्थे श्रीविद्यायाः केषाञ्चन उपासकानां नामानि प्राप्यन्ते, यथा –

मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च कामराट्।
अगस्त्यनन्दिसूर्यश्च विष्णुस्कन्दशिवस्तदा।
दुर्वासाश्च महादेव्याः द्वादशोपासकाः स्मृताः।
शक्रश्चचोन्मना चैव तथा च वरुणस्ततः।
धर्मराजोऽनलो नागराजो वायुर्वधुस्तथा।
ईशानश्च रतिश्चैव तथा नारायनोऽपि ।
ब्रह्मा जीवो महादेव्यास्त्रयोदश उपासकाः।
पञ्चविंशतिसंख्योपासकाना च महेश्वरि।[12]

एवं नानामहाविद्याभिः सह वैदिकसाधकस्य परिचयः प्राप्यते। तान्त्रिकसाधनस्य मूलाऽदर्शभूता अस्ति शाक्तसाधना। तन्त्रे महाशक्तिस्वरूपभूतायाः जगदम्बायाः मातृरूपेण उपासना शिवोपासना वा आसीत् अस्य साधनस्य प्रधानं लक्ष्यम्। ब्रह्मा-विष्णु-इन्द्र-चान्द्र-स्कन्द-वीरभद्रेत्यादयः सर्वे श्रीजनन्याः उपासकाः आसन्। शक्तिपूजायाः प्रारम्भः सर्वप्रथमम् ऋग्वेदे प्राप्यते। असीमक्षमतायुता इयं शक्तिः, इयं तया शक्त्या अखिलं विश्वं धरति स्वर्गे च निवसति।[13] इयं शक्ति इदं विश्वं चालयति। छान्दग्योपनिषदि इयं भक्तानां पूज्यजननीत्वेन, केनोपनिषदि उमा-हैमवतीरूपेण, पुराणेषु च चण्डीजननीरुपेण पूज्यते।

मन्त्रशक्त्या अलौकिकोपायेन अनिष्टपरिहारः इष्टसम्प्राप्तिः च सम्भवा इति पुरा जना विश्वसन्ति स्म। पुरा जनानाम् अस्य विश्वासस्य प्रधानं निदर्शनमासीत् तान्त्रिकोक्तानि षट्कर्माणि। योगिनीतन्त्रमते शान्तिकर्म, वशीकरणम्, स्तम्भनम्, विद्वेषणम्, उच्चाटनम्, मारणं च षटकर्माणि। वैदिकसाहित्ये एते षट्कर्मसम्बद्धा मन्त्राः प्राप्यन्ते, यथा[14] - विषनाशस्य मन्त्रम्[15], शत्रुध्वंसस्य मन्त्रम्[16], सन्तानोत्पादनमन्त्रम्[17], मृतसञ्जीवनीमन्त्रम्[18], राक्षसादीनाम् विनाशमन्त्रं[19] च। 'फट्' –

---

[11]ज्ञानसङ्कलिनीतन्त्रवचनम्, कर्पूरादिस्तोत्रम् – १।
[12]श्रीविद्यार्णवतन्त्रम्, प्रथमो भागः।
[13]ऋग्वेदः, १/१३६/३
[14]योगिनीतन्त्रम्, पूर्वखण्डः, पू. - ४
[15]ऋग्वेदः – १/१९१
[16]ऋग्वेदः – १०/१६६
[17]ऋग्वेदः – १०/१८३
[18]ऋग्वेदः – १०/५८
[19]ऋग्वेद – ७/१०४

इति मन्त्रं तान्त्रिकमन्त्रस्य अंशविशेषः। तन्त्रमते फट् अस्त्रबीजमन्त्रम्। बाजसनेयीसंहितायाम्[20] अयं फट्-शब्दः प्राप्यते। वैदिकयागयज्ञे पञ्च 'म'काराणां व्यवहारः दृश्यते। यथा सौत्रामणीयागस्य प्रधानविशेषत्वमासीत् सूराहूतिः।[21] बाजपेययागेऽपि सूराहूतेः विधानम् अस्ति।[22]वेदज्ञाः नानापशुयागानाम् अनुष्ठानं कुर्वन्ति स्म। तेषु पशुयागेषु आनुष्ठिकरूपेण पशुवधं विधाय मांसं परिपच्य आहूतेः विधानम् दृश्यते। वेदे मत्स्यस्याऽपि उल्लेखः प्राप्यते।[23] वाजसनेयीसंहितायां दैवपैत्रादिकर्मसु मत्सव्यवहारस्य विधिः लक्ष्यते।[24]

नानावैदिकयागेषु पुरोडाशस्य आहूतिः दीयते स्म। तन्त्रस्य परिभाषायां पुरोडाशस्य अपरं नाम मुद्रा इति। केषुचित् यज्ञेषु वैदिकयागानुष्ठानस्य प्रधानम् अङ्गमासीत् मैथुनम्, यथा – महाव्रताख्ये यागे अस्य विधानं प्राप्यते।[25] कुण्डलिनीयोगतन्त्रनये इयं एका विशिष्टसाधनरीतिः। अस्य साधनस्य प्रधानं अवलम्बनं भवति सुषुम्नानाडी। कठोपनिषदि[26]छान्दग्योपनिषदि[27] च सुषुम्नायाः वर्णनं प्राप्यते। उपनिषदि या भावना बीजरूपेण वर्तते परवर्तिनि काले तदेव कुण्डलिनीयोगत्वेन अङ्कुरितः पल्लवितः च इत्यनुमीयते।

पुराणेष्वपि तन्त्रस्य प्रभावो दृश्यते। तादनीन्तने समाजे धर्मानुष्ठानेषु तन्त्रस्य महान् प्रभावः आसीत् अतः पुराणेष्वपि तन्त्रम् उद्धृतं वर्तते। मन्त्रन्यास-[28]वशीकरणाद्यभिचारकर्माणि[29] पूजाकाले मण्डलं तथा पद्माङ्कनम्, वीरव्रते कुमारीपूजा प्रभृतितान्त्रिकवस्तूनि पुराणेषु विवृतानि।[30] शक्तिसाधनेतिहासे अथर्ववेदः अपि मत्स्थानं भजते। यतः शाक्ततन्त्रे प्राप्तानां नानाविधीनां तत्त्वानां मूलम् अथर्ववेदः इत्युच्यते। तन्त्रशास्त्रे उच्यते अथर्ववेदः शक्त्या चासमन्वितः। तान्त्रिकानां दृष्ट्या सर्वेषां वेदानां सारभूतः अथर्ववेदः। तन्त्रोक्तेन धर्मेण सह अथर्वेदोक्तस्य धर्मस्य नैकानि साम्यानि दृश्यन्ते। केचन अथर्ववेदस्य सौभाग्यकाणडाख्यं उत्तरकाण्डं तन्त्रस्य मूलमिति वदन्ति। वैदिकयुगे ऋषयः यज्ञादीन् समाचर्य अतिप्राकृतशक्तिम् अलभन्त। अथर्ववेदे अस्याः शक्तेः ब्रह्म इत्याख्यानम्। एषा एव तपःशक्तिः। कालान्तरे तन्त्रशास्त्रे सिद्धपुरुषाणां या शक्तिरुक्ता सा मूलतः एषा शक्तिरेव। शिवस्य आदिरूपं वैदिकरुद्ररूपम्। यजुर्वेदेः रुद्रः एव प्रथमः शिवः। अथर्ववेदेऽपि असितरुद्रस्य वर्णनमस्ति। रुद्रः श्यामः मृत्युरपि श्यामवर्णीयः। अतः रुद्रेण सह यमस्य सम्बन्धः वैदिकसंहितासु परिलक्ष्यते। रुद्रः संहारस्य सृष्टेश्च देवता। अथर्ववेदे कालस्य स्रष्टृत्वेन रुद्रः प्रोक्तः। महाभारते रुद्रशिवः उच्यते महाकालः। यस्य पुरुषरूपं भवति महाकालः स्त्रीरूपं च महाकाली। रुद्र एव ब्रह्म। अथर्ववेदे

[20]बाजसनेयीसंहिता – ७/३
[21]आपस्तम्ब श्रौतसूत्रम् – १९, आश्वलायन श्रौतसूत्रम् – ३/९, The Religion and Philosophy of the Veda and Upanishads, page - 352
[22]शतपथब्राह्मणम्, ५/१/२/१०-१९
[23]ऋग्वेदः – १०/६८/८, अथर्ववेदः, - ११/२/२५
[24]वाजसनेयीसंहिता – २८/२९
[25]तैत्तरीयसंहिता – ७/५/९/४, काठसंहिता – ३४/५
[26]कठोपनिषद् – २/३/१६
[27]छान्दग्योपनिषद् – ८/६/६
[28]मत्स्यपुराणम् २६६/१९-३०
[29]मत्स्यपुराणम् – ९३/२१-२२
[30]मत्स्यपुराणम्, - १०१/२७-२८, Studies in the Puranic Record on Hindu Rites and customs , 1940, Page – 260-261

आरण्यके च रुद्रस्य परिचयः प्राप्यते। रुद्र एव ब्रह्म इदं तत्त्वं उपनिषद्युगेऽपि सुस्पष्टम् आसीत्। श्वेताश्वतरोपनिषदि रुद्र एव शिवरूपेण वर्णितः। इयं भावना तन्त्रशास्त्रादिषु अनुसृता।

एवं वेदतन्त्रयोः सम्बन्धः दृश्यते। वस्ततस्तु वेदोक्तं धर्मस्तोत्रमेव यथाकालं तन्त्रत्वेन विपरिणतं सत् पुराणे स्मृतिशास्त्रादिषु प्रोक्तम्। वेदतन्त्रयोः मौलिकविरोधः नास्ति। उभयोः मिलितं रूपमेव सनातनधर्मः। श्रीमद्भागवते अतः उच्यते –

'आगमश्चैव वेदश्च द्वौ बाहू मम शङ्कर।
ताभ्यामेव धृतं सर्वं जगत् स्थावरजङ्गमम्।।
यस्त्वेतौ लङ्घयेन्मोहात् कदाचिदपि मूढधीः।
सोऽधः पतित हस्ताभ्यां गलितो नाऽत्र संशयः।।
द्वावेव श्रेयसां हेतु दुरुहावतिदुर्घटो।
सुधीभिरपिदुर्ज्ञेयो पारावारविवर्जितौ।
विविच्य चानयोरैक्यं मतिमान् धर्ममाचरेत्।
कदाचिदपि मोहेन भेदयेन्न विचक्षणः।'[31]

श्रीमद्भागवते एकस्मिन् स्थले वैदिकसाधनेन तान्त्रिकसाधनेन च सह मिश्रसाधनस्याऽपि विषयः आलोचितः। तस्मादनुमीयते भागवत्कालेऽपि तन्त्रसाधना प्रचलिता आसीत्, तथा सम्प्रदायान्तरेषु विरोधः अपि नासीत्। तदुक्तम् –

यात्रावलि विधानं च सर्ववार्षिकपर्वसे।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्॥[32]
वैदिकस्तान्त्रिकी मिश्र इति मे त्रिविदो मघः।
त्रयानामीप्सितेनैव विधिना मां समर्चयेत्॥[33]

अतः वक्तुं शक्यते गच्छता कालेन तन्त्रं विकासशीलपद्धत्या प्रसृतम्। अस्मिन् बाह्याऽन्तरिकयोः साधनयोः समावेशः दृश्यते। तन्त्रे साधनाय योगः, मन्त्रः, लययोगः, नादयोगः, कुण्डलिनीयोगः, हठयोगः, राजयोगः, ज्ञान-क्रिया-भक्तियोगप्रभृतयः नानापद्धतयः उक्ताः।

परन्तु भेदे असत्त्वेऽपि तन्त्रशास्त्रं कलियुगोपयोगीशास्त्रमित्युच्यते। यतः तन्त्रमते कलौ तान्त्रिककृत्यं प्रशस्यं वैदिककृत्यं च वर्जनीयम् – 'प्रशस्यं तान्त्रिककृत्यं वैदिकं वर्जयेत् कलौ।'[34] रुद्यामलस्य नये – सत्ययुगे श्रुतिप्रोक्तः मार्गः, त्रेतायुगे स्मृतिनिर्दिष्टःमार्गः, द्वापरे च पुराणोक्तः मार्गः एवं कलौ आगमोक्तः मार्गः विहितः, तदुक्तम् - 'कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिभाषितः। द्वापरे वै

---

[31]महाभागवतवचनम्, द्रष्टव्यम् – तन्त्रतत्वम्, पृ. - १७८
[32]स्कन्दपूराणम् – २, अध्यायः – २, श्लोकः - ३७
[33]स्कन्दपुराणम् – २, अध्यायः- २, श्लोकः - ७
[34]गायत्रीतन्त्रम् , पु.- ४

पुराणोक्तः कलावागमसम्भवः।।'[35] कुब्जिकातन्त्र-पुरश्चरणसोल्लासतन्त्रप्रभृतिषु इदं मतमुपस्थापितम्। महानिर्वाणणतन्त्रे कलौ तन्त्रोक्तो मार्गः श्रेष्ठः इत्युच्यते –

'कलेर्दोषसमूहस्य महान्येको गुणः प्रिये।
सत्यप्रतिज्ञकौलानां श्रेयः सङ्कल्पमानतः॥
अपरे तु युगे देवि पुण्यं पापञ्च मानसम्।
नृनामासीत् कलौ पुण्यं केवलं न तु दुष्कृतम्॥'[36]

तन्त्रमते कलौ मानवान् प्रति शिवस्य शिवायाश्च कारुण्यात् एतद्युगोपयोगी तन्त्रशास्त्रोक्तस्य धर्मस्य प्रवर्तनम्। परशुरामकल्पसूत्रे उच्यते – ये जनाः अखिलं वेदार्थं ग्रहीतुम् असमर्थाः, अथवा वेदे येषामधिकारः नास्ति, तान् प्रति कृपया परमशिवः तेषां मुक्तये वेदसारभूतं तन्त्रशास्त्रं प्राणयत्, - 'निखिलवेदार्थानभिज्ञानां तत्रानधिकारिणां च मुक्त्युपायं निखिलवेदसाराम्नायविद्यां प्रणिनाय।'[37]

अतःमहानिर्वाणतन्त्रं, परशुरामकल्पसूत्रादिकं सर्वं पर्यालोचनेन इदं स्पष्टं यत् शिवशक्तेः प्रश्नोत्तरछलेनैव तन्त्रस्यावतरणम्।

**मध्ययुगम् –**

भगवतः बुद्धस्य जन्मनः परवर्तीकालं मध्ययुगम् इति स्वीक्रियते। बुद्धस्य जन्मनः परवर्तिनि कालेऽपि बौद्धधर्मस्य प्रचारेण सह तन्त्रसाधनस्यापि प्रचारः अभवत्। भारतीयतन्त्रस्य मूलतत्त्वं बौद्धतन्त्रसाधनायाः अङ्गरूपमिति मन्यते । सनातनधर्मादनन्तरं तन्त्रस्य महान् प्रभावः बौद्धधर्मस्य उपरि अपतत्। अस्य प्रभावात् बौद्धधर्मस्य नूतनं रूपं वयं दृष्टवन्तः। अस्य तान्त्रिकबौद्धधर्मेत्याख्या। तान्त्रिकबौद्धधर्मः महायानबौद्धधर्मादुद्भूतः। वज्रयाने, सहजयाने, कालचक्रयाने च तान्त्रिकबौद्धधर्मः अनुसृतः। तान्त्रिकबौद्धधर्मेण सहजयानकालचक्रयानयोरेव बोधः भवति। वज्रयानमेव प्रधानम्। यतः सहजयानं कालचक्रयानं च वज्रयानस्यैव रूपान्तरम्। नवमशतकात् एकादशशतकं यावत् बौद्धतन्त्रं चीनिभाषायां तिब्बतीभाषायां च अनुदितम्। अनेन ज्ञायते बौद्धधर्मप्रवर्तनात्प्रागपि भारतवर्षे तन्त्रस्य प्रचलनम् आसीत्। बौद्धकाले तान्त्रिकषट्कर्मभिः सह अभिचारादिक्रियाणामपि प्रचलनं परिलक्ष्यते।[38] कथावस्तूनि तान्त्रिकपञ्चमकारान्तर्गतं मैथुनं धर्मः इत्युच्यते, अर्थात् मैथुनम् धर्मसाधनायाः अङ्गभूतम्।[39] बौद्धधर्मावलम्बीनां महायानाचार्याणां सूत्रग्रन्थेषु यथा – कारण्डव्यूहसूत्रम्, सुवर्णप्रभाससूत्रम्, भैषज्यगुरुवैभूर्यप्रभाराजसूत्रम्प्रभृतिषु तन्त्रोक्तानि तत्त्वानि प्राप्यन्ते। इतोऽपि बौद्धधर्मस्य प्रसिद्धाचार्याणां नागार्जुन-आचार्यदेव-असङ्ग-सिद्धाचार्य-धर्मकीर्तिप्रभृतीनां रचनासु तान्त्रिकमतस्य पर्यालोचनं दरीदृश्यते। बौद्धलाम्नः

[35]रुद्रयामलवचनम्, - द्रष्टव्यम् – पुरश्चार्णवतरङ्गः, - १, पृ. - ३१
[36]महानिर्वाणतन्त्रम्, ४/६८ - ६९
[37]परशुरामकल्पसूत्रम् – १/२ – अस्य रामेश्वकृतवृत्तिः।
[38]ब्रह्मजालसूत्रम्, - १/२६
[39]कथावस्तु, - २३/१-२

'तारनाथस्य' मते तन्त्रं प्राचीनकालादेव गुप्तरूपेण जगति आसीत्.किन्तु कालान्तरे धर्मकीर्तेः अनन्तरं पालयुगे अस्य विपुलप्रचारः अभवत्। सप्तमाष्टमशतकयोः आचार्याः नानातन्त्रग्रन्थान् विरच्य जनसमक्षम् उपस्थापितवन्तः।[40]

जैनतीर्थङ्करः महावीरः भगवतः बुद्धस्य समकालिकः इति विद्वांसः मन्यन्ते। 'स्नानाङ्गसूत्रे' महावीरः एकं भोगाभिमुखं धर्मसम्प्रदायम् उल्लिखिवान्। केचन मन्यन्ते एतेषु तन्त्राचारः प्रचलति स्म। 'उत्तराध्यायनसूत्रे'[41]'सूत्रकृताङ्गे'[42] ग्रन्थे च बहुषु मन्त्रेषु तन्त्रस्य प्रभावः दृग्गोचरी भवति। पण्डितः शामशास्त्रीवर्यः देवनागर्याः लिपेः उत्पत्तिप्रसङ्गे अगदत् – तान्त्रिकरेखाचित्रात्(Hieroglyphics)मन्त्रात् वा देवनागर्याः लिपेः उद्भवः।[43]अशोकस्य शिलालेखेषु याः लिपयः दृश्यन्ते तासु नैकाः लिपयः तन्त्रेषु अपि दृश्यन्ते। अशोकस्य शिलालेखे यथा ( △) त्रिकोणविशिष्टस्य 'एकारस्य' प्रयोगः दृश्यते तथैव तन्त्रेऽपि 'एकारः' तन्त्राकृतिरित्युच्यते - 'यदेकादशमाधारं बीजं कोनत्रयोद्भवम्।'[44] अनेन अनुमीयते यत् अशोककालेऽपि समाजे तन्त्रस्य चर्चा आसीत्। एवमेव वर्णोद्धारतन्त्रे[45] द्वाषष्टेः बङ्गाक्षराणां वर्णनं प्राप्यते, अनेन अनुमीयते तन्त्रं बङ्गप्रदेशे एव विरचितम् एवञ्च तन्त्रं यदा रचितं तदा बाङ्लादेशे बङ्गाक्षरस्यैव प्रचलनम् आसीत्।

मध्ययुगस्य इतिहासं पर्यालोच्यते चेत् भारतीयसंस्कृतेः वास्तविकप्रतिनिधित्वविषये श्रीशङ्कराचार्यस्य पूर्ववर्तिषु परवर्तिषु च विराजमानेषु आचार्येषु बहवः तन्त्रस्योपासकाः आसन्। तेषु आचार्यशङ्करस्य परमगुरवः गौडपादाः, गोविन्दपादाश्च विशेषतया उल्लेख्याः। आचार्यः शङ्करः एकतः यथा वैदिकधर्मस्य संस्थापकः आसीत् तथैव तन्त्रस्यापि प्रचारकः उपदेष्टा च बभूव। एतेषाम् आचार्याणां परम्परायां वैदिकतान्त्रिकयोः गभीरः सम्बन्धः दृश्यते। आचार्यशङ्करस्य सौन्दर्यलहर्यां श्रीविद्यायाः तन्त्रसाधनस्य च विवरणं प्राप्यते। सौन्दर्यलहर्याः विचारेण ज्ञायते यत् शङ्कराचार्यकाले चतुषष्टिः तन्त्राणि प्रसिद्धानि आसन्। एवमेव आचार्यशङ्करस्य प्रपञ्चसारादपि नाना तान्त्रिकसिद्धान्ताः प्राप्यन्ते। एतदतिरिच्य आचार्यस्य श्रीक्रमोत्तमम्, सुमूखीपूजापद्धतिः, श्रीविद्यार्णवः, भूवनेश्वरी – इत्याख्येषु चतुर्षु ग्रन्थेषु प्राचीनतान्त्रिकसिद्धान्तस्य विशिष्टानि तथ्यानि प्राप्यन्ते।

कौटिल्यस्य अर्थशास्त्रेऽपि तान्त्रिकमन्त्रादीनां उल्लेखः प्राप्यते।[46] तन्त्रेषु सर्वापेक्षया प्राचीनं आगमतन्त्रशास्त्रम्। अनुमीयते यत् आगमः पञ्चमशतकात् षष्ठशतकपर्यन्तं कुषाणयुगात् गुप्तयुगपर्यन्तं विशेषरूपेण प्रचलितम् आसीत्।[47]चतुःषष्ट्यागमेषु शैवागमवैष्णवागमौ उभौ स्तः।

---

[40]वौद्ध तन्त्रवाङ्मय का इतिहास, - पू. - ४१५
[41]उत्तराद्यायनसूत्रम्, Jaina Sutras, Sacred books of the East, Vol – XLV, Page - 103
[42]सूत्रकृताङ्गम्, २/२, Ibid, Page - 366
[43]The Origin of the Devanagari Alphabet – I, A, 1906
[44]वामकेश्वरतन्त्रार्गतं नित्यषोडशिकार्णव – १/६
[45]प्राणतोषणी, काण्डम् – १, परिच्छेदः - ७
[46]कौटिल्यार्थशास्त्रम्, - १४/३
[47] Evaluation of The Tantras, Cultural Heritage of India, Vol. IV, Page - 216

आष्टमनवमशतकयोः उत्तरभारतस्य लिपिषु कानिचन शैवागमस्य पाण्डुलिपयः प्राप्यन्ते। किन्तु बहवः विद्वांसः मन्यन्ते यत् गुप्तयुगे एव शैवागमस्योद्भवः अभवत्। परन्तु तदा शैवतन्त्रात् पृथक् शाक्ततन्त्रस्य प्रचलनमासीन्नवेति स्पष्टं प्रमाणं किमपि न प्राप्यते। तथापि विश्ववर्मणः शिलालेखात् (आनुमानिकम् – ५२४ – ५२५ क्रीस्ताब्दः) शाक्ततन्त्रस्य कानिचन तथ्यानि प्राप्यन्ते। गुप्तलिप्यां लिखितस्य कुब्जिकमततन्त्रस्य एकः पाण्डुलिपिः नेपालदरवारस्य संग्रहशालायां प्राप्यते। अनेन अनुमीयते यत् ख्रिष्टीयाष्टमशतकात् शाक्ततन्त्राणि लिपिबद्धानि भवन्ति। अन्यान्यतन्त्रमिव शाक्ततन्त्रस्य तु उद्भवकालो वक्तुं न शक्यते। यतः प्राचीनकालादेव तन्त्रशास्त्रं प्रावर्तत। अनुमीयते यत् ख्रिष्टीयदशमशतकात् शाक्ततन्त्रं पूर्णरूपेण प्रावर्तत।[48]

यामलतन्त्रमपि अतीव प्राचीनम्। ड. वाग्चीमहोदयस्य नये षष्ठशतकात् नवमशतकं यावत् अस्य यामलतन्त्रस्य प्रचलनम् आसीत्।[49] वाराहीतन्त्रमते सृष्टिः, ज्योतिषः, नित्यकृत्यस्योपदेशः, क्रमं, सूत्रं, वर्णभेदः, जातिभेदः, युगधर्मश्चेति अष्टौ विषयान् यामलमित्युच्यते।[50] प्राचीनयामलमपि अष्टौ संख्यात्मकानि। षष्टशतकात् नवमशतकं यावत् अस्य तन्त्रस्य प्रचलनमासीदिति विद्वांसः मन्यन्ते। नेपालदरवारस्य ग्रन्थागारे एकादशशतकस्य (१०५२ क्रीस्ताब्दः) ब्रह्मयामलस्य एकः पाण्डुलिपिः रक्षितः अस्ति। अनेन अनुमातुं शक्यते यत् यामलतन्त्रस्य आविर्भावः एकादशशतकात्पूर्वमेव अभवत्। अतः विद्वांसः मन्यन्ते भारतस्य वैदिकसंस्कृतेन सह तान्त्रिकतन्त्रस्यापि विकासः अभवत्। केषुचित् कालेषु तन्त्रस्य पृथक् सत्ता आसीत् केषुचित् च कालेषु तन्त्रं तटस्थरूपेण प्रचारितः अभवत्। पुनः कदाचित् प्रतिकूलतयाऽपि अस्य प्रचारः अभवत्। किन्तु सर्वदा तस्य भारतीयसंस्कृतित्वेन ग्रहणम् आसीत्। भारताद्बहिरपि तन्त्रशास्त्रस्य प्रचारः अभवत्। प्रायः द्वादशसहस्रेशब्याब्दे द्वितीयजयवर्मणः राजत्वकाले कम्बोजनगरे कम्बोडियायां च भारतस्य तन्त्रशास्त्रम् अतनोत्। परन्तु एते तन्त्रग्रन्थाः बौद्धतन्त्रग्रन्थत्वेन न, अपि तु ब्रह्मण्यतन्त्रत्वेनाऽपि प्रचारितः अभवत्। नयोत्तरम्, शिरश्छेदः, विनयशीलः, सन्मोहः एते ग्रन्थाः उल्लेख्याः आसन्। वेदोत्तरयुगे भारते तन्त्रपीठ-मन्त्रपीठ-विद्यापीठाः स्थापिता अभवन्। एतानि स्थानानि विद्याकेन्द्रत्वेन परिगण्यते स्म। नानातान्त्रिकविद्यानां साधनक्षेत्राण्यासान् एतानि पीठस्थानानि। बौद्धयुगेऽपि नालन्दा-तक्षशीला- विक्रमशिलाप्रभृतिषु अपि तन्त्रविद्या प्रदीयते स्म। अतः सर्वं पर्यालोच्य वक्तुं शक्यते मध्ययुगे एव तन्त्रग्रन्थानां अधिकः प्रचारः प्रसारश्च अभवत्।

**आधुनिकयुगम्**

बौद्धयुगोत्तरयुगे नैकेषां तान्त्रिकग्रन्थानां परिचयः प्राप्यते। तेभ्यः ग्रन्थेभ्यः अपि तन्त्रस्य कालं निर्णेतुं न शक्यते। यतः तेषु ग्रन्थेषु पर्याप्तं तथ्यं नास्ति। अस्य मूलं कारणं तु- 1. भारते महम्मदीयाः तेषां शासनकाले बहून् तन्त्रग्रन्थान् नाशयाञ्चक्रुः। 2. तन्त्रशास्त्रं गुप्तशास्त्रम् इति विश्वसन्तः केचन आधुनिकमुद्रणयन्त्रयुगेऽपि तन्त्रग्रन्थान् न मुद्रितवन्तः। तस्मात् नैके तन्त्रग्रन्थाः विलुप्ताः। 3. केचन ग्रन्थाः कालस्य प्रकोपेण जीर्णाः भूत्वा नष्टाः। केचन तन्त्रसाधकाः तन्त्रपूजादिकं तु कुर्वन्ति परन्तु

---

[48] Evolution of The Tantras, Cultural Heritage of India, Vol. IV, Page - 219
[49] Ibid, Page - 216
[50] वाराहीतन्त्रवचनम्, - द्रष्टव्यम् – विश्वकोषः।

तस्य संरक्षणाय तु कदापि न चेष्टितवन्तः। तस्मात् परवर्तिनि काले अज्ञानवशात् तेषां ग्रन्थानां विकासः एव नाभवत्, तस्मात् जनसमक्षं ते ग्रन्थाः प्रायः विलुप्ताः। तस्मात् बहुप्रतिकुलतायाः कारणात् तन्त्रशास्त्रमपि सम्प्रत्यपि गूह्यशास्त्रत्वेन परिगण्यते। तथापि बौद्धोत्तरयुगे कालिकाचन्द्रिका, ताराहस्यम्, तन्त्रसारं, त्रिपुरासारसमुच्चयः, प्राणतोषिणी, शारदातिलकम्, श्रीतत्त्वचिन्तामणिः प्रभृतिभ्यः तन्त्रग्रन्थेभ्यः तन्त्रस्य नानायुक्तानि तथ्यानि वयं प्राप्नुमः। एतेषु ग्रन्थेषु बहवः ग्रन्थाः वांलादेशे रचिताः। बौद्धोत्तरयुगे लक्ष्मीधरः, जीमूतवाहनः, रघुनन्दनः, मित्रमिश्रः, देवनभट्टः, विद्याकर इत्यादयः प्रमुखाचार्यवर्याः बहून् ग्रन्थान् निबन्धान् च व्यरचयन्। एतेषु ग्रन्थेषु तन्त्रस्य प्रभावः स्पष्टं प्रतीयते।[51] रघुनन्दस्य 'अष्टाविंशतितत्त्वे' तन्त्रस्य प्रभावः सुस्पष्टं प्रतीयते। इतोऽपि दुर्गोत्सवतत्त्वं, देवप्रतिषातत्त्वं उद्वातत्त्वम् इत्यादिमपि तन्त्रं प्रभावयत्। अस्मिन् समये अपि भारते तन्त्रचर्चा आसीत् तस्य प्रमाणं वयं रघुनन्दस्य दिव्यतत्त्वात् जानीमः।[52] मध्ययुगादनन्तरं भारतीयाऽध्यात्मिकसाधनस्य विशिष्टक्षेत्रम् अस्ति काशी। अस्मिन् समये बहवः तन्त्रसाधकाः ग्रन्थकाराः च काश्याम् आविर्भूताः, तथा तान्त्रसाधनायाः उन्नतिसाधनाय अचेष्टन्त। परिव्राजकाचार्येण सरस्वतीतीर्थेन विरचिते श्रीशङ्कराचार्यस्य प्रपञ्चसारटीकायां, राघभट्टस्य सरस्वतीतीर्थटीकायां, पदार्थादर्शनामके तान्त्रिकग्रन्थे, सर्वानन्दपरमहंसस्य सर्वोल्लासतन्त्रे, भास्कररायकृते ललितासहस्राख्यटीकायां, सेतुबन्धे, वरिवस्यारहस्ये, वरिवस्याप्रकाश-प्रभृतिषु तन्त्रग्रन्थेषु, शङ्करानन्दनाथकृतसुन्दरमहोदये, माधवानन्दनाथकृते सौभाग्यकल्पक्रमे, क्षेमानन्दकृतसौभाग्यकल्पलतिकायां प्रभृतिषु तान्त्रिकग्रन्थेषु तन्त्रस्य महान्तः विषयाः उपस्थापिताः। नीलकण्ठचतुर्धरः, प्रेमनिधिपन्थप्रमुखाः तन्त्रसाधकाः अपि तन्त्रस्य विपुलप्रचाराय साहाय्यम् आचरितवन्तः। तन्त्रसाधनस्य इतिहासः पर्यालोच्यते चेत् वयं ज्ञातुं शक्नुमः तन्त्रसाधनस्य मुख्यं केन्द्रमासीत् भारतस्य उत्तरपश्चिमप्रदेशः। ततः मध्ययुगस्य प्रारम्भात् भारतस्य उत्तरपूर्वांशेऽपि शनैः शनैः तन्त्रस्य प्रचारप्रसारादिकम् अभूत्। ततः वैदेशिकानां प्रभावात् उत्तरपश्चिमांशे तन्त्रसाधनं क्षीयमानं बभूव, ततः पूर्वांशे विशेषतः बङ्गे तन्त्रस्य क्रियाकलापादिकं प्रारभत।[53]

बङ्गे तन्त्रस्य महान् प्रभावः आसीत्, तस्य प्रभावात् बङ्गे सनातनीयानां शिशवः यदा वर्ण पठन्ति स्म तदा आदौ 'आञ्जी' इति शब्देन पाठः आरभ्यते स्म, अर्थात् लेखनकाले 'आञ्जी' इति चिह्नं विज्ञाप्य अन्ये वर्णाः ज्ञाप्यन्ते स्म। अनुमीयते 'आञ्जी' इति पराशक्ते अवान्तररूपं आञ्जीकला। आञ्जीकला महानादस्य ऊर्ध्वस्था व्यापिका शक्तिः। सृष्टेः आदौ इयं शक्तिः आविर्भूता। तस्मात् विद्यायाः प्रारम्भे आञ्जीप्रतिकचिह्नं व्यवह्रीयते स्म। इतोऽपि अस्मिन् समये बङ्गदेशे ब्रह्मसम्प्रदाय इव एकस्य विशेषधर्मसम्प्रदायस्य प्रचलनम् आसीत्। ब्रह्मधर्मस्य प्रवर्तकः राजाराममोहनरायः महाभागः तान्त्रिकः आसीत् इति केचन विद्वासं मन्यन्ते। स शैवविवाहं चकार, तन्त्रस्यापि उपासनां करोति स्म। राजाराममोहनेन प्रवर्तितस्य धर्मस्य उपजीव्यं महानिर्वाणतन्त्रोक्तं ब्रह्मोपासना इति

---

[51]Studies in the puranic Records on Hindu Rites and Customs - 1914, Page - 264

[52]अष्टाविंशतितत्त्वम्, - रघुनन्दनः, १३४७ क्रीस्ताब्दः।

[53]Studies in the puranic Records on Hindu Rites and Customs – 1914, Page - 264

केचन मन्यन्ते।उक्ततन्त्रस्य आदिमः त्रयः उल्लासाः राममोहनरायेण प्रवर्तितस्य धर्मस्य प्रधाना भित्तिः इति मन्यते।[54] इतोऽपि रामकृष्णपरमहंसस्य शक्तिसाधना तन्त्रसाधना बङ्गस्य तन्त्रसाहित्यं प्रासारयत्।

परन्तु तस्य प्रभावः आभारतम् आसीत्। बङ्गेव काश्मीर-केरलप्रभृतिष्वपि राज्येषु एकदा तन्त्रस्य महान् प्रभावः आसीत्। मन्यते येषु प्रदेशेषु बौद्धादीनां अवैदिकमतानां प्रचलनम् अधिकमासीत्, तत्रैव तन्त्रस्य प्रभावः अधिकम् आसीत्। केवलं स्थानस्य प्राधान्यान्न सनातनधर्मस्य सर्वेषु सम्प्रदायेषु तन्त्रस्य प्रभावः आसीत्। सनाधर्मस्य त्रयः सम्प्रदायाः आसन्, यथा - शैवः, शाक्तः, वैष्णवश्च। एतेषु त्रिषु सम्प्रदायेषु तन्त्रस्य प्रभावं पश्यामः । सम्प्रदायगते प्रभेदे सत्यपि तन्त्रशास्त्रे सर्वेषां सम्प्रदायानां धर्मानुष्ठानगतानां क्रियाकलापानां साम्यं परिलक्ष्यते। गौतमीयकल्पे उच्यते –

यः कृष्णः सैव दुर्गा स्यात् या दुर्गा कृष्ण एव सः।
अनयोरन्तरादर्शी संसारान्न विमुच्यते॥[55]

पुनश्च नारदपञ्चरात्रे उच्यते –

जानात्येका परा कान्ता सैव दुर्गा तदात्मिका।
या परा परमा शक्तिर्महिर्महाविष्णुस्वरूपिणी॥[56]

तन्त्रस्य दश महाविद्याभिः सह विष्णोः दशावताराणां अभेदं पश्यन्ति विद्वांसः। तोडलतन्त्रे उच्यते[57] तारा मीनावतारः, बगला कूर्मावतारः, धूमावती वराहावतारः, छिन्नमस्ता नृसिंहावतारः, भूवनेश्वरी वामनावतारः, मातङ्गिनी श्रीरामावतारः, त्रिपुराजाममदग्नः रामावतारः, भैरवी बलरामावतारः, महालक्ष्मीः बुद्धावतारः, दुर्गा कल्क्यवतारः, स्वयं काली च कृष्णमूर्त्यवतारः। अनेन ज्ञायते सम्प्रदायगते भेदे सत्यपि शैवशाक्तवैष्णवानां च उपास्यदेवता एकः अभिन्नश्च। तन्त्रशास्त्रं अद्वैततत्वस्य साधनशास्त्रम्। अद्वैततत्त्वे ब्रह्मणः द्विधा लक्षणमुपस्थापितम्, - स्वरूपलक्षणं, तटस्तलक्षणं च। महानिर्वाणतन्त्रे गद्यते – स्वरूपलक्षणेन यः वेद्यः तटस्थेनापि स एव वेद्यः। तटस्थलक्षणेन यः ब्रह्माभिलाषी तस्य कृते एव साधनं विहितम्।[58] अतः उच्यते तन्त्रं साधनस्यैव शास्त्रम्।

अन्ततो गत्वा तन्त्रस्य उद्भवविषये उच्यते यत् – तन्तम् अपौरुषेयं ज्ञानविशेषम्। तस्मादेतत् ज्ञानम् आगमः इत्युच्यते। अयं ज्ञानरूपागमः शब्दरूपेण अवतरति। तन्त्रनये परावागेव अखण्डागमः। एष एव भगवतः पराशक्तिः। सृष्टेः उन्मेषकाले परास्थितः शास्त्रादिः यथाक्रमं निम्नभूमिकायां अवतीर्णः अथवा बहिर्मूखत्वेन प्रकाशितः। आदौ परमबोधरूपस्य अज्ञानस्य आदौ हृदये उद्गमो भवति. अस्यां स्थितौ परमबोधः स्फुटं न भवति। अस्मिन् विमर्शात्मके स्वभावे वाच्यवाचकभावौ न तिष्ठतः। पश्यन्तीमध्यभूमेः स्थितौ आन्तरपरामर्शः असाधारणत्वेन उदेति। द्वितीयभूमौ अर्थः इदंरूपेण प्रतीयते। अस्मिन् पर्याये अर्थः

[54] The Great Liberation, 3rd ed. Intro, P – VIII & Principles Of Tantra- Part – II, 2nd ed. Page – 557-558
[55]गौतमीयकल्पवचनम्, द्रष्टव्यम् – ब्रह्मसंहिताग्रन्थस्योपरि जीवगोस्वामीकृता टीका।
[56]नारदपञ्चरात्रवचनम्, द्रष्टवम् – ब्रह्मसंहिताग्रन्थस्योपरि जीवगोस्वामीकृता टीका।
[57]तोडलतन्त्रम्, - उल्लासः - १०
[58]महानिर्वाणतन्त्रम्, - ३/१०

वाच्यः शब्दश्च भिन्नरूपेण वाचकत्वेन प्रकाशते। अस्मिन् स्तरे यावन्तः शास्त्रवाचकाः शब्दाः सूक्ष्मरूपेण आश्रये आविर्भूताः भवन्ति। अत्मा स्वयमेव वक्तृगुरुत्वेन शोतृशिष्यत्वेन च आविर्भवति। अयं मध्यमभूमेः व्यापारः। अस्यां भूमौ सर्वशास्त्राणि नित्यं प्रकाशमानानि। अस्यां मध्यमभूमौ परमेश्वरः स्वयं द्विधा विभक्तः सन् गुरुशिष्ययोः स्वरूपं धरति। अनेन कल्पितेन गुरुशिष्यभावस्य साहाय्येन गुप्तज्ञानं प्रकटयति –

गुरुशिष्यपदेष्वेव वेद्यभेदोऽप्यतात्त्विकः ।
प्रष्ट्री च प्रतिवक्त्री च स्वयं देवी व्यवस्थिता॥[59]

तदानीं सदाशिवाख्यः गुरुः ईश्वराभिधेयः शिष्यश्च आविर्बभूवतुः। गुरुः अथवा सदाशिवः परमेश्वरः आत्मनः पञ्चशक्तिभिः अर्थात् चिद्-आनन्द-ज्ञान-इच्छा-क्रियाभिः प्रकटितो भवति। सदाशिवस्य एतेभ्यः पञ्चशक्तिभ्यः पञ्चस्तोत्रमयः अभेदः, भेदाभेदौ, भेददशा च प्रकाशन्ते। एवं विचित्रं निखिलशास्त्रम् आविर्भवति। किन्तु मध्यमास्थितौ शास्त्रं गूढं तिष्ठति। वैखर्यां स्थितौ शास्त्रं रूपाऽकारं धरति। महास्वच्छन्दे तन्त्रे उच्यते –

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।
प्रश्नोत्तराद्यैर्वाक्यैश्च तन्त्रं समवतारयत्॥

तन्त्रस्य अवतरणक्रमविषये योगी अमृतानन्दः वदति - 'प्रकाशात्मकः पराशिवोऽहमेव विश्वानुग्रहपरः परापश्यन्तीमध्यमावैखरीक्रमेण व्यापृत्य विमर्शांशेन प्रकटौ भूत्वा प्रकाशांशेन प्रतिवचनादपि सन् तन्त्रं समवतारयामि।' अर्थात् अद्वैतागमस्य सिद्धान्तः भवति येषां शास्त्राणां प्रकाशनं जातं, येषां च एतावता न जातं ये च प्रकाशनानन्तरं लुप्ताः ते सर्वेऽपि परावाचि परबोधरूपेण नित्यं विराजते। एतदेव तन्त्रस्य मूलं स्वरूपम्।

**<u>सन्दर्भग्रन्थसूची</u>**

अभिनवगुप्तपादाचार्यविरचित *तन्त्रसारः*, सम्पा. परमहंसमिश्रः, प्रथमः खण्डः, द्वितीयः खण्डश्च चौखम्वासुरबारतीप्रकाशनम, वराणसी, 2017।

उपाध्याय बलदेव, *भारतीयदर्शन*, , शारदामन्दिर, वाराणसी- 1957

कविराज श्रीगोपीनाथ, *भारतीय संस्कृति और साधना*– विहार राष्ट्रभाषा परिषद, पाटना -1936

*कल्याण* – शक्तिअंकः, भाग -6, गीताप्रेस गोरखपुरम् ।

शास्त्री, शिवशंकर अवस्थी, *मन्त्र और मातृकाओं का*, चौखम्वाविद्याभवन, वाराणसी- 1966.

शास्त्री, देवदत्त -*तन्त्र साधना सार*- स्मृति प्रकाशनम्, इलाहावाद, सन-1979

शास्त्री, देवदत्त, *तन्त्र सिद्धान्त और साधना* - संगम प्रकाशनम्, इलाहावाद, सन-1993।

Avalon, A. ( J. Woodroffe), *Principle of Tantra*, Madras, 1955

Avalon, A. ( J. Woodroffe), *Shakti and Shakta*, Madras, 1956

Avalon, A. ( J. Woodroffe*), Introduction to Tantra Sastra*, Ganesh & Co., Madras,

Avalon, A. ( J. Woodroffe*), Kamakalabilash*, Ganesh & Co., Madras,1953

[59]तन्त्रशोकः, - १०/२५६

Bagchi, P.C., *Studies in the Tantras*, Calcutta, 1939

Banerjee, S.G *Tantras in Bengal*, Calcutta, 1978, *A brief History of tantric Literature, Calcutta,* 1988.

# Great Indian Epics: Guidance to Sanskrit Poets

1. Dr. Subhasree Dash
Assistant Professor in Sanskrit
Ravenshaw University, Cuttack

2. Ms. Chandini Dalai
Research Scholar
Ravenshaw University, Cuttack

**Abstract**

The great Sanskrit epic poems (*Upajivyakāvyas*) are finished literary outputs which transmit *Vedic* ideals and vision through the poetic excellence reflected in the *Rāmāyaṇa* and the *Mahābhārata*. These texts are the encyclopaedic literature of human wisdom that lead men to realise the four ends of human life- *dharma* (righteous conduct), *artha* (material prosperity), *kāma* (sensual and other covetable pleasures), *mokṣa* (release from worldly bondages and cycles of life as well). Now with critical study, vision, analysis, and interpretation this article attempts to prove how these long epic poems are endowed with the power to instruct the paths of the generations of common people and uncommon poets simultaneously.

**Key Words:** Epic, *Rāmāyaṇa*, *Mahābhārata, Itihāsa*, *Varnāsramadharma*

## 00. Introduction

The great Indian epic poems are the *Ramayana* and the *Mahabharata*. In India the epic poetry (*Upajivyakāvya*) has got its beginning in the early *Vedic* period. The *Ṛgveda* has the hymns of narrative character and short legends both in prose and poetry known by the terms of *gāthās*, *narāśaṁsis*, *itihāsas* etc. which are seen especially in *Brāhmin* literature. The prose tales found in the Nirukta and the Bṛhaddevatā contain the same in metrical lines. In Vedic literature the stories are found narrated through *atīta*, *ākhyāna*, *purāṇaitihāsa*, and *kathā*. *Itihāsapuraṇa* as a separate branch of study was termed as fifth *Veda* which was meant to please the gods. Its popular character is proved by its close relationship in study with *Atharvaveda*: *Ṛgvedaṁ*, *bhagavaḥ*, *adhyeymi*, *yajurvedaṁ*, *sāmavedam*, *atharvavedaṁcaturtham*, *itihāsapurāṇaṁpañcamam*, *VedānaṁVedam*...(*chāndogya* UP, VII.1-2: Radhakrishnan, 468). In addition to *itihāsapurāṇa* the other texts by which the gods were pleased are *gāthānarāśamsī*(praise songs of men). These are considered to be actual fore-runners of heroic epics. This may be above doubt that during *Vedic* period there were professional story-tellers known by the names *aitihāsikas* and *paurāṇikas*. Having no much essential difference all of them meant old tales. The purpose was the narration of the stories of the famous kings and gods of hoary antiquity. When *purāṇa* means old story (*purānavam*), *itihāsa* (*iti-ha-āsa*) means "as it were" and they are found closely associated with each other in old literature. *Veda-Vyāsa* calls the Jaya part of the Mahābhārata as *saṁhitā*, *purāṇa*, *ākhyāna*, *upākhyāna*, *kathā*, *itihāsa*, *kāvya* etc. *(Mahābhārata 'Mbh'* 1.2.383-389).

The poetic excellences get birth from the nice delineations of *itihāsa* as from the five elements of nature (*Pañcabhūta*) three earthly creations (*ādhyātmika, ādhidaivika, ādhibhautika*) get their manifestation. He had in his mind the subtle differences and special characteristics of all the above genres and used all such terms to project that an epic is a class of literature and an encyclopaedia of vast learning materials:

*Itihāsottamādasmājjāyante kavibuddhayaḥ I*

*pañcabhya iva bhūtebhyo lokasaṁvidhayastrayaḥ II (Mbh, 1.2.385)*

Similarly *Rāmāyaṇa* is also known as *saṁhitā* (*caturviṁśa-sāhastrī-saṁhitā*), *ākhyāna* and *kāvya* (*Rām*, 1.2-9 cf. Krishamachariar, P.2). In the extant Sanskrit literature when *itihāsa* corresponds to an epic, *purāṇa* refers to a series of narrations to explain cosmological and theological tenents. Thus *purāṇa* bears five characteristics or *pañcalakṣaṇas* as it deals with five topics like creation, recreation, geneology of the Gods, period of Manus, and history of royal races. In a broad sense epic literature in India consists of *itihāsas* and *purāṇas* and *Rāmayaṇa* and *Mahābhārata* belong to the former class (Krishnamachariar, P.3) preach the principles of poetry to the poets in making.

**01. The *Rāmāyaṇa***

In India Vālmīki is honoured as *ādikavi*, the first ornate poet and his *Rāmāyaṇa* is the first ornate epic-poem or *ādikāvya*. This epic has always been the model to which the subsequent Indian authors have accepted with admiration. The essential character of this work lies in the fact that it lays greater stress on form that presents matter and content of poetry. The *alṁkāras* (figures of speech) like similes, (poetic figures of sense), alliterations etc.(the figures of sound) are used abundantly. The epic descriptions are heaped up with similes and the description of nature are endlessly woven with ever new metaphors and epithets. Thus the earliest beginning of classical ornate poetry (*kāvya*) is seen in the *Rāmāyaṇa* (Winternitz, 1.455) The second chapter of the *Rāmāyaṇa Bālakāṇḍa* explains the origin of *śloka*-metre which spontaneously got emanated from the mouth of the poet at the sight of a pathetic incident. Once in the morning when Vālmīki went out to the forest for sacrificial grass and faggots, he saw a pair of *Krauñca* birds on the branch of a tree with their joyful twittering notes. Suddenly a hunter mercilessly killed the male bird by the arrow. It was helplessly weltering on the ground in its own blood. The bereaved female bird cried piteously. There the heart of the sage was moved by intense pathos and spontaneously a verse in *śloka*-metre came out from his mouth:

*Niśāmya rudatīṁ krauñcīmidaṁvacanmavravit I*

*mā niṣāda pratiṣṭāṁ tvamagamaḥ śāśvatīḥ samāḥ I*

*yat krauñcamithunādekamavadhiḥ kāmamohitam II* (*Rāmāyaṇa ‘Rām’*, 1.2.14-15)

The sage’s heart was struck with wonder and joy at the involuntary expression of this measured poetry. The critic of his self discovered that it was metrical rhythmic utterance and he said to his pupils with surprise:

*śokārtenāsyaśakuneḥkimidaṁvyāhṛtaṁmayā* II (*Rām.*,1.2.16)

At the sight of the pathetic shirking of this bird what is it that emanated from my mouth ?

*pādabaddho' kṣarasamastantrī-laya-samanvitaḥ* I

*śokārtasyapravṛtto me ślokobhavatunānyathā* II (*Rām*, 1.2.18)

The four steps of the verse is uttered with eight equal syllables. That which got spontaneous manifestation from me who was over powered by pathos shall be nothing but poetry (*śloka*) or rthymic utterance.

This incident explains that:

The function of the poet and critic is idential in their understanding and feeling for the characters, their emotions etc. The poet is superior to the critic, for he possesses the creative genius and the expressive power which furnish to the critic poetry that forces him to have the same understanding and feeling as the poet; the critic falls short of the poet, for he seeks poetry to aid his imagination to think and feel with the poet. The poet is valued to the extent to which his poetry evokes in the critic this understanding and the sense of bliss (Sankaran, 8-9).

That the *Krauñca* incident in the life Vālmīki was the occasion for spontaneous overflow of powerful poetic expressions is accepted and authenticated by the great poets like Kālidāsa and Bhavabhūti (cf. *Raghu*, XIV.70 &*Uttarar*, 11.5). Thus Ānandavardhana believes in this tradition and looks upon Vālmīki as the father of the theory of Rasa in poetry. (Śankaran, 10)

### 01.1 *Rāmayana*: The Grasp of Thematic flow

The story of the *Rāmāyaṇa* begins with an account of the city of *Ayodhyā* with the mighty king Daśaratha as the ruler. He had three wives like Kauśalyā, Kaikei, &Sumitrā who gave birth to four sons. Rāma and Bharata were born to Kauśalyā and Kaikei respectively. Sumitrā had two sons named Lakṣmaṇa and Satrughna. At the approach of old age Daśaratha announced his desire in a great assembly to make Rāma the heir-apparent. Kaikei wishing to make her son Bharata the heir-apparent reminded Daśaratha regarding his offer of two boons which she has not yet availed. She asked the king to appoint Bharata as his successor and to banish Rāma for fourteen years. With great distress and dismay the king on the date of the coronation sent Rāma to exile. Rāmaclamly accepted the order considering father's command as the highest of his duty. Sitā&Lakṣmaṇa accompanied her to the forest. The king shocked by grief separated him from Kaikei, stayed with Rāma's mother Kauśalyā and died lamenting the banished son. Rāma lived with his wife and brother in *Citrakūṭa* forest. In Ayodhyā, when summoned to the throne, Bharata refused and went to the forest to bring back Rāma. Rāma though moved deeply by brotherly love he declined the offer to fulfil the vow of exile. Bharata came back with golden embroidered shoes (*Kaṭhau*) of Rāma and keeping the shoes on the throne started dispensing justice on behalf of his brother.

Thereafter Rāma started combating with many demons in the *Daṇḍakā* forest, who poised terrible threat to the pious hermits. With the advice of the sgeAgastya he procured weapons of Indra and slayed many demons. Their chief Rāvaṇa being revengeful transforms one of his followers to a golden deer which appeared before Sitā. When both Rāma and Lakṣmaṇa were engaged to catch it, Rāvaṇa came in the guise of an ascetic and perforce abducted Sitā through chariot. On the way the vulture king Jaṭāyu terribly attacked Rāvaṇa in the sky and was slayed. On the way of his search Rāma performed the funeral rites of the vulture king. Thereafter he made friendship with Hanumat, and Sugriva, the chief of the monkeys.With their help he killed the terrible giant Bali, who abducted the wife of Sugriva, his brother. Hanumat crossed flying over the ocean by his supernatural power and located Sitā in the Asoka-forest of the demon king Rāvaṇa. There she delivedRāma's ring to Sitā and destroying the groves etc he came back after killing many demons there. Thereafter the monkeys miraculously made a bridge on the ocean and Rāma's army reached lankā. After terrible war Rāma slayed Rāvaṇa and got back Sitā. Sitā had to pass through an ordeal of fire to prove her purity. RāmacorronatedBibhīsaṇa, the brother of Rāvaṇa to the throne there and joyfully returned to Ayodhyā with Sitā and reigned gladly and gloriously over the subjects of Ayodhyā with the co-operation of his loving brother Bharata. Besides, the *Rāmayaṇa* contains very many interesting episodes like the descent of the Ganges to earth, the conflict of Viśvamitra and Vaśiṣtha and many others.

This epic story is very powerful and popular down to the ages. No other Sanskrit literary art has enjoyed a greater popularity in India than this epic. This is the source book (*Upajīvya*) for Sanskrit *kāvyas*, poems and plays, and still captivates the hearts of millions of Indians till date.

*yāvatsthāsyantigirayaḥsaritaścamahītale* I

*tāvadrāmāyaṇikathālokeṣupracariṣyati* II (*Rām*, 1.2.36)

As long as the mountain-ranges are there and as long as rivers flow on earth, so long this story of *Rāmāyaṇa* shall continue to remain on the lips of the people.

### 01.2 *Rāmāyaṇa*: Message to the Poets in Making

The instructions of this epic to the poets and the poets in making may be read as follows:

This epic is modeled after the *Vedic* ideals of the social order of four castes (*Brāhmaṇa, kṣatriya, Vaisya, Śudra*) and four stages of life (*Brahmacarya*, *Gārhastya*, *Vānaprastha*, and *Yativrata*). Observation of *varṇāśramadharma* led man with purity of thoughts and action to meet the four goals of life gradually and successively (*Dharma, Artha, Kāma, &Mokṣa*). The effect of the study of the epic may be noted as follows:

*paṭhan dvijo vāgṛṣavatvamiyāt syātkṣatriyo bhūmipatitvamiyāt I*

*vaṇigjanaḥ puṇyaphalatvamiyā jjanaśca śūdro'pimahatvamiyāt II*

(*Rām*, 1.1.100)

This verse promises justice for the caste-order. By reading this a *Brāhmin* becomes a distinguished orator, a *kṣatriya* (warrior) becomes a landlord, a *vaisya* (businessman) yields pious result, and a *Sūdra* (a person in public service) achieves greatness and excellence.

Keeping the above points in view the text puts that human emotion is the source and the content of poetry. The poetic excellence comes through rhythmic ulterances that surface through metres like *Śloka* (*anuṣṭup*) etc. The poets enjoy the freedom of expression of truth through various narrative devices like *ākhyānas*, *upākhyānas* etc. The figures of speech like *upamā*, *rūpaka*, alliteration etc are the spontaneous natural ways adopted by the poets. The poet must keep in mind the ideal characters for an ideal society of peace, progress, co-operation, and prosperity. In this epic all the characters justify their ideal stand till the end. The characters who are against the social order are bound to meet their end. The ideal society shall take care to eliminate them. The prosperity of an individual citizen is linked to the prosperity of the society at large. The epic instructs that in an ideal society all must have work in hand as per the prescribed social order. The women are to be respected, the children are to be protected, and education be imparted to one and all as per requirement effectively.

The great teaching of *Rāmāyaṇa* is that no matter however powerful, the evil will always be over powered and defeated by good. The sweetest lie has the darkest agenda behind it and the truth always triumphs. It teaches positive attitude towards life with a spirit of service and sacrifice for the common good.

**02. *Mahābhārata***

**Introduction:** Vyāsadeva's*Mahābhārata* is the longest epic poem ever known to literary history. Its present form consists of over one lakh metrical stanzas, equal to about eight times of both Iliad and odyssey put together. Therefore in the *Sabhāparvan* it is said that *Mahābhārata* is a great compendium of mundane and supra-mundane wisdom: *mahattvād bhārvattvācca mahābhāratamucyate* (*Mbh.*1.2.274)

Besides this means the history of the great battle of Bharatas:

*tanmahābhāratākhyānaṁśrutvaivapravilīyate* I

*bharatānāṁmahajjanmamahābhāratamucyate* II

(*Mbh*, 1.62.39 cf. *Mbh.*, 14,81.8)

The epic is divided into eighteen *parvans* (books) with Harivaṁśa, the nineteenth one as the suppliment. All the *parvanas* are also divided into different *adhyāyas* (chapters). This great epic proclaims that it is the *itihāsa* or ancient history of the people of India (*Bhāratavarṣa*):

*itihāsottamādasmājjāyatekavibuddhayaḥ* I

*pañcabhyaivabhūtebhyolokasamvidhyastrayaḥ* II (*Mbh*, 1.2.385)

Rājasekhara considers *itihāsa* of two types- (1) *parikriyā* which explains long story of one great hero like *Rāmāyaṇa*, (2) *purākalpa* having the story of many great heros like that of *Mahābhārata*.

*pari(ra)kriyāpurakalpaitihāsagatirdvidhā* I

*syādekanāyakāpūrvādvitīyābahunāyakāḥ* II (*KM*, 2.3)

**02.1 *Mahābhārata*: The Grasp of Thematic Flow**

In the country of the Bharatas at Hastināpura there lived two princes named Dhṛtarāṣtra and Pāṇḍu. Since elder brother Dhṛtarāṣṭra was blind Pāṇḍu succeeded the throne and reigned the kingdom. He had five sons known as *Pāṇḍavas* like Yudhiṣṭira, Bhīma, Arjuna, Nakula, &Sahadeva. Dhṛtarāṣṭra had hundrend sons known as Kauravas and Duryodhana was the eldest and the chief among them. At the fateful death of Pāṇḍu, Dhṛtarāṣṭra ruled over the kingdom and reared up five *Pāṇḍavas* with his own sons. When *Pāṇḍavas* excelled in warrior deeds the king appointed Yudhiṣṭhira as the crown-prince. Then *Kaurava*-princes started setting foot against the Pāṇḍavas. In due course the *Pāṇḍavas* in a *svayaṁvara* (open choice of husband) won over Draupadī, the daughter of the king of Pāñcāla. They came in contact with Kṛṣṇa, the heroic leader of the Yādavas and made him their close friend and adviser. To propitiate the *Pāṇḍavas*Dhṛtarāṣṭra divided the kingdom into two parts and gave Hastināpura to his sons and a district to his nephews where Yudhiṣṭhira etc. built a city named Indraprastha.

Duryodhana being jealous of the prosperity of *Pāṇḍavas* made plan to destroy them with the help of Śakuni, their uncle and a very skilful gamester. Dhṛtarāṣṭra arranged and inspired the *Pāṇḍavas* to the game of dice at Hastināpura. In the fateful game Yudhiṣṭhira lost his kingdom, wealth, army, brothers and even Draupadī at the end. Finally a compromise was drawn and *Pāṇḍavas* accepted banishment for twelve years and one year more to remain incognito. It is after that they can regain their kingdom.

Then they departed to Kāmyakavana with Draupadī and stayed there near the river Sarasvatī for twelve years. They spent the thirteenth year in disguise as the servants of *Virāṭa*, the king of *Matsyas*. During this period the *Kurus* invaded *Matsya*-kingdom when *Pāṇḍavas* helped the king, defeated the *Kauravas* and restored the throne to the king of *Matsyas*. They revealed their identity and made an alliance with the king.

Now the demand of the *Pāṇḍavas* being refused to get back their possessions a great war was fought at *Kurukṣetra* between *Kurus* and *Pāṇḍavas* having great allies of kings at both the sides. The battle continued for eighteen days when all the *Kauravas* were killed and only *Pāṇḍavas* and Kṛṣṇa, their charioteer escaped alive.

After great reconciliation Dhṛtarāṣṭra made Yudhiṣṭhira the crowned king in Hastināpura. Yudhiṣṭhira made a great horse-sacrifice. Dhṛtarāṣṭra and Gāndhārī stayed at Hastinā for fifteen years and then retired to the forest for the rest part of their lives and perished there in a forest conflagration. The Yādavas who took part with internecine feud, broke out and perished ultimately. Kṛṣṇa with great sorrow retired to the wilderness where accidentally he was shot dead by a hunter. The

*Pāṇḍus* at the last part of their life putting Parīkṣita the grandson of Arjuna in the throne started wandering towards Meru, the mountain of the divine beings and ascended to heaven with their wife. In due course king Parikṣita died of serpent-bite and his son Janmejaya instituted serpent-sacrifice where this epic was recited by Vaiśampāyana, who learnt it from Vedavyāsa. It is told that after editing the *Vedas*, Vyāsa composed *Mahābhārata* which enumerates the excellence of *Pāṇḍavas*, greatness of Kṛṣṇa, and the wickedness of *Kauravas*.

The *Khilabhāga* or the supplementary part of the book beyond eighteenth *parvan* is known as Harivaṁśapurāṇa, the story of the family of Lord Viṣṇu.(cf. Macdonell, pp.244-47)

Around the nucleus of the story of the *Mahābhārata* the reader comes across the gathering of diverse matters in shape of ancient heroic poetry, legends, fables, parables, and moral narratives presented through *ākhyānas* and *upākhyānas* (cf. *Mbh*, 1.62.39 & 1.2.384).

**02.3 The Text: Critical Remarks**

Thus this is said to be the representation of the whole of the prevalent old bard stories of India. The very important portion of the epic is the *Bhagvadgītā* (song divine) which represents the synthesis of various ancient philosophical wisdoms of India. The entire text of the *Mahābhārata* appears to have passed through at least three stages titled (1) *Jaya* (2) *Bhārata*, (3) *Mahābhārata*. Various elements of this work dates back even to the period of the Vedas. However, the complilation of the text in the present form is supposed to have been made towards the end of the Buddhist period between 500-550 B.C. like a mirror this epic reflects the ideas, custom, manners, of ancian India having emphasis on the character and conflict of different cultures and ideals. The *Vedic* scheme of *Varṇāśramadharma* was observed by the citizens and they were required to perform their duties (*svadharma*) in accordance with their own *varṇas*. *Paropakārāyasvargāya* or public well-beig was the divine spirit which served as the foundation to the duty of the citizens. *Kṣatriya* the warrior class of people could fight for the protection of the nation having no attachment on the fruits of actions. Teaching duty of the citizen and the order of the society it is considerd a *Smṛtiśāstra* (Law Book) for the people and the state.

The legendary take of this great epic, written centuries back, continue to remain prominent in every form of art even today. Its poetic grandeur and deep philosophical ideas continue to teach the human beings the art of living even today. The message of *Mahābhārata* is wonderfully woven in its story which enlightens the public life and the poetic merits for ages as follows:

A revengeful instinct leads to one's destruction. The story revolves around the war of duty (*dharma yuddha*), but the cardinal facts behind the destruction of all was revenge. The *Kauravas* lost everything to destroy *Pāṇḍavas*. The war did not spare women and children from destruction. The five children of Draupadī and a very young warrior Abhimanyu lost their lives.

**02.4. The Message of *Mahābhārata***

The epic teaches to stand by what is right and to fight for it . Arjun who initially was attacked by despondency to fight against his kith and kin was shown the righteous path for his duty as a warrior by Lord Kṛṣṇa . He had to fulfil his responsibility even though he had to wage a war against his family members .

It teaches the eternal bond of friendship in life. Śrīkrishna's unconditional friendship, support, and motivation could manage the situations, so that *Pāṇḍavas* came out victorious. During epic's dice-scene Krishna came to rescue Draupadī when her husbands disgracefully gambled her away. The bond of friendship between Karṇa and Duryodhan is also note worthy in this regard.The story of Abhimanyu teaches that half-knowledge can be dangerous. Abhimanyu learnt how to enter *cakravihva* and did not know how to escape.

One must learn to overcome greed. Yudhiṣṭhira lost everything including his kingdom, wealth and possessions. He gambled away even his wife. The greed to win beyond a certain parameter is also dangerous.

It teaches further that life is precious. Despite numerous hurdles one should have the hope and courage to withstand the onsets of life. Karṇa is the brightest example in this regard. Karṇa for non of his fault had to face discrimination and disgrace at every stage of life. Though from a great warrior clan, he was known as a *Suta-Putra* (son of a driver). Against the unfavourable wind of his fate nothing could stop him from pursuing his goal. He was a great giver (donor) and his devotion for his mother was unparallel. He even gave up his life saving support of *Kavajkuṇḍal* on her demand.

Like men women are also respected citizen to get social justice. Draupadī manoeuvred to accept five husbands, Kauravas humiliated her for the fault of her husband. She had to face violation, yet she took a courageous stand to destroy the evil-doers like Duryodhana and Duḥśāsana. The story teaches that the women should not remain passive at the face of injustice and discrimination if any. She must stand out to fight for herself.

The *Mahābhārata* is an ocean of wisdom that covers all the aspects of human life which is noted in the *Svargārohana-parva* itself.

*dharmacārthe ca kāme ca mokṣe ca bharatarṣabhaḥ* I

*yudihāstitadanyatrayannehāstinakutracit* II (*Mbh*, 18.5.50)

On the topics of *dharma*, *artha*, *kāma*, and *mokṣa* (the four ends of human life), what one finds in the *Mahābhārata* may be found else where, but whatever is not found here one may not find anywhere else.

The above statement makes it clear that the *Mahābhārata* is not only the document knowledge about war, but also this is the document of peace at the same time. The unity of mankind is a noble work as it is considered the essence of righteous conduct (*dharma*). The *Anu-Gitā* section of *Mahābhārata* refers to it:

*yovidvānsahavāsaṁ ca vivāsaṁcaivapaśyati* I

*tathaikatvaṁnānātve ca saduḥkhātpratimucyete* II (*Mbh.*, 14.47.7)

The above idea is also noted in the *Gitā*, 18.20 as - *avibhaktaṁvibhateṣu* which means one who sees unity in diversity finds a sure way out of all sorrow.

*Paraspara-prīti* or love for one another is reflection in *Vidura-nīti* as the way to peace:

*sambhojanaṁsaṁkathānaṁ*

*samprītiścaparasparaṁ*

*jñātibhiḥsahakāryāṇi* II (*Mbh*, 5.39.24)

To eat, love, and talk with one another develops human relation and leads the society to peace. *Ahiṁsā* (non-violence) and *satyavacanam* (truth) are said to be to main pillars of *dharma* (righteous conduct / duty) through which highest social good can be achieved. When man is put under difficult circumstances truth is decided by sticking to that course of action which leads to the highest good of beings:

*ahiṁsāsatyavacanaṁsarvabhūtahitaṁparam* I (*Mbh*, 3.207.74)

*yadbhūtahitamatyantaṁtatsatyamitidhāraṇā* II (*Mbh*, 3.209.4)

There is another verse in the *Śāntiparvan* which even puts an ethical dividing lin between truth and good.

*satyasyavacanaṁśreyaḥsatyādapihitaṁvadet* I

*yadbhūtahitamatyantametatsatyaṁmataṁ mama* II (*Mbh*. 12.329.13)

The words of truth are noble and one should speak about good (well-being) that leads over truth. Whatever is meant for the good of being that is the truth that I (Nārada) assert. The of the common well being achieved through *svadharma*&*svakarma*, righteous conduct & duty as per one's caste and stages of life. The prefix *sva* means the limitations of individual capacity for such endeavours and suggests that one should use one's optimum capacity to achieve the best on the path of good for all.

The above educative notes of the epic have enduring effects on the public and the poets. However, the special note of the epics imparting instructions to the poets and the poets in making may be noted as follows:

**03. Conclusions:**

The Krauñca incident before the composition of the *Rāmāyaṇa* speaks that human emotion is the content of poetry: *śokaḥ ślokatvamāgataḥ* (q.v). when Rāmāyaṇa transports us into the regions of pure poetry, the Mahābhārata surprises us with its encyclopaedic proportion of contents and numerous novel themes. It leads the poets to understand the true national genius of India and its rich legacy of cultural traditions. Vālmīki is the first and foremost poet (*ādikavi*), and *Rāmāyaṇa* is a great epic (*mahākāvya*), which deserves high estimation on literary standards. The easy flow of the language through metrical patterns and the grasp of meaning by the readers must be simultaneous and elevating. The reader or the audience is transported to a different world of wonder and joy simutaneously. The epic *Mahābhārata* embodies heterogeneous elements where both *śāstra* (scripture) and

*kāvya* (poetry) are rolled into one (Krishnamoorthy, P.270). The epics suggest that the poet must be a versatile genius having acquaintance with various aspects of human wisdom and must be cultivated enough to comprehend the culture of the society and rules of the land when he wields his pen to focus his wisdom. The merit of a poet may be understood from the wisdom of Vyāsadeva himself:

*vivyāsaikaṁcaturdhāyovedaṁvedavidāṁvaraḥ I*

*parāvarajñobrahmarṣiḥkaviḥsatyavrataḥśuciḥ II* (*Mbh.*, 1.60.5)

Vyāsadeva, the poet was the best among the knower of the *Vedas*, the realisted soul of both *parabrahma* and *aparabrahma* (the absolute reality & the manifested reality). Besides, he was *Kavi* (poet), the seer of past, present and future; pious and hallowed having got the divine vow of truthfulness. The excellence of a poet is further explained when Yudhiṣṭhira is given instructions by the sage Nārada, who was the knower of the *Vedas*, *Vedāṅgas*, *nyāya*, *dharma*, scriptures, songs, music, even warfare. He was a prolific orator, wise and intelligent with strong memory power, well versed in modern and ancient laws, and a *Kavi* (seer) having the eyes of wisdom pervaded to three phases of time (past, present, future). Besides he could realise the truth about the absolute and manifested reality with full proof conclusion.

*vaktā pragalbho medhāvī smṛtimānnayavitkaviḥ I*

*parāparavibhāgajñaḥ pramāṇakṛtaniścayaḥ II* (*Mbh.*, 2.5.4)

Therefore the poet must be learned enough to study the human heart and human nature (*Mbh.*, 2.63.4). He is not tired of duty, never accepts the gifts (presentation), an honoured person who creates no obstacle for anything good. He is good enough not to advertise his goodness, he is a seer and the knower of Brahman (Absolute Reality):

*aśrāntaḥ syādanādātā sammato nirupadravaḥ I*

*śiṣṭo na śiṣṭavat sa syāt brāhamṇo brahmavit kaviḥ II* (*Mbh.*, 5.42.38)

Again the Indian poet must understand the importance of *puruṣārthacatuṣṭayaḥ*, the four ends of human life like *dharma* (righteous conduct), *artha* (material prosperity), *kāma* (sensual and other desirable pleasures), *mokṣa* (release form the bondages of the worldly life and the cycle of life as well), the *paramapuruṣārthaḥ*. The sublime instructions which flow for the future generation of poets are the ways for the use of mythical methods, inexhaustible didactic and legendary materials, fictions, figures of speech, delicate verse-techniques, and many others. Indian epics are the text books of ethics, law, philosophy, social science, which are endowed with the power to instruct the paths meant for the common individuals and uncommon poets simultaneously.

## Works Cited

*Kāvyamimāṁsā* of Rājasekhara, Varanasi: chowkhamba Sanskrit Pratisthan, 2010.

Krishna machariar, K. *History of Classical Sanskrit Litreture*, Delhi: MotilalBanarasidass publishers, private limited, 2016.

Macdonell . A.A. *A History of Sanskrit Literature* , Delhi: MotilalBanarasidass publishers, private limited, 2016.

*Mahābhārata of Vedavyāsa*, (Hindi tr. RamanarayanaSastriPandeya) vol.1-68 Harivaṁsa, ed. Gita Press, Gorakhpur, Samvit 2044.

Radhakrishnan, S. ed. *The Principal Upanisads*, Newyork: Harper-collins, 2012.

*Raghuvaṁśa in the Works of Kālidāsa vol.2*. ed. C.R.Devadhar, Delhi: MotilalBanarasidass Publishers Private limited, 2010.

*Rāmayaṇa of Valmiki*. Vol.I& II (with Hindi tr.) ed. Gita Press, Gorakhpur, Samvit 2040.

Sankaran, A. *Some Aspects of Literary Criticism or Theories of Rasa and Dhvani,* Madras: University of Madras, 1973.

*Śrīmadbhagavadgītā (Gītā)* ed. SvamiRamasukha Das, Gorakhpur: Gita Press, Samvit 2067.

*Uttarrāmacarita of Bhavabhūti*, ed. P.V.Kane&C.N.Joshi, Delhi: MotilalBanarasidass, 1971.

Winternitz, M. *A History of Indian Litreture*, vol.1, trans. V.S. Sarma, Delhi: MotilalBanarasidass, 2009.

# माघस्य महाकाव्ये प्रतीयमानं राजधर्मस्वरूपम्

अनुश्रिता मण्डलः
सहायकाध्यापिका, संस्कृतविभागः,
सुरेन्द्रनाथकलेजः, कोलकाता

**सारसंक्षेपः**

वेदादारभ्य दर्शनादिग्रन्थेषु पर्यन्त्यं धर्मस्य स्वरूपं सदैव परिवर्तितम् तथापि निरन्तरता दृश्यते। अयं धर्मः धर्मशास्त्राकाराणां प्रमुखः विषयः। धर्मशास्त्रकाराः साधारणतः धर्मस्य विभागद्वयं कृतवन्तः यथा साधारणधर्मः सर्वेषाम् कृते आसीत् अपरः तु विशेषधर्मः। साधारणधर्मः सार्वभौमरूपमस्ति। सः देश-काल-जाति-व्यक्तिनिरपेक्षमस्ति। तस्य पालनं मनुष्यमात्रस्य कर्त्तव्यम्। तस्य विपरीतः विशेषधर्मः सापेक्षमस्ति। यस्य पालनं न तु नैतिकभावनया अपि तु सामाजिकभावनया क्रियते। कदाचित् सः धर्मः समष्टिपरकः कदाचित् व्यष्टिपरकः च आसीत्। धर्मशास्त्रानुसारेण समाजस्य परिवर्तनात् प्राग् आत्मपरिष्करणं करणीयम्। तदर्थम् राज्ञमात्रस्य कृते धर्मस्य उपदेशः कृतः। राज्ञः कृते जनकल्यानाय यस्य धर्मस्य स्वरूपं दीयते सोऽस्ति राजधर्मः। माघेन विरचिते महाभारतावलम्बने शिषुपालवधे प्राचीनभारतीयसामजिकजीवनस्य तथा राजधर्मस्य रूपम् प्रतिभासते।

**कुञ्चिकाशब्दाः**

राजतन्त्रं, धर्मः, राज्यं, राजधर्मः, शिशुपालवधम्,

**उपोद्घातः**

संस्कृतसाहित्यस्योज्ज्वलज्योतिष्केण राराज्यमानेन महाकविना माघेन केवलं काव्य-दर्शन-काम-आयुर्वेद-समाजशास्त्राणामाधारभूतं शिशुपालवधमिति महाकाव्यं विरच्य संस्कृतसाहित्यं समलंकृतम्। माघस्यैकस्मिन्नेव काव्येऽनेकतत्त्वानां समावेशो दृश्यते। माघस्य काव्ये कालिदासीयोपमालंकारप्राचुर्यम्, नैषधीयपदलालित्यं तथा च भारवेरर्थगौरवमिति त्रितयस्य त्रिवेणीसङ्गमो विद्यमानः। तस्मादुच्यते - “माघे सन्ति त्रयो गुणाः[i]”।

साहित्यं खलु समाजस्यैव प्रतिफलनम्[ii]। तदानीमपि समाजे विद्यमानस्य प्रजातन्त्रस्य प्रभावः प्रपतितः साहित्याङ्गेषु। अद्यत्वेऽस्माकं संविधाने प्रजातन्त्रं स्वीकृतम्। अद्यतनीयो मन्त्रः – वयं सर्वे

राजानः। अर्थात् सर्वेषां वर्तते समाधिकारः। ननु तदानीन्तनराजधर्मस्याद्यत्वे समाजे किमस्ति स्थानमिति चेज्जिज्ञायाः सदुत्तरज्ञापनार्थं मयका महाकविना माघेन प्रणीतस्य शिशुपालवधाख्यस्य महाकाव्यस्योपजीव्यमाश्रित्य स्थालीपुलाकन्यायेन व्याख्यातुमिष्यते । माघकृतौ कान्तासम्मिततयोपदेशो ध्वनितः इति कृत्वा माघकालीने समाजे राजधर्मस्य स्थितिः कीदृशीसीदिति व्याख्यातुकामाहमिह प्रबन्धे।

प्रश्नः आयाति को नाम राजधर्मः?

'राजधर्म' इति पदगतयोः शब्दयोः स्थानपरिवर्तनेन भवति 'धर्मराजः' इति। अस्यार्थस्तावत् - यत्र धर्मो विशेषणरूपेण राज्ञा सह अवतिष्ठते। तस्याप्युल्लेखो माघेन प्रदीयते –

"सप्ततन्तुमधिगन्तुमिच्छतः कुर्वनुग्रहमनुज्ञया मम।
मूलतामुपगते खलु त्वयि प्रापि धर्ममयवृक्षता मया॥[iii]" इति।

अत्रासीत् युधिष्ठिरो धर्ममयवृक्षः कृष्णस्तस्यैव वृक्षस्य मूलमिति। मानवानां प्रयोजनाभीष्टरूपेषु पुरुषार्थेषु धर्मोऽन्यतमः। ननु को नाम धर्मः इति पृच्छायां धर्मस्य दुर्ज्ञेयत्वात् युधिष्ठिरो भीष्मं ब्रुते – "कोऽयं धर्मः कुतो धर्मस्तन्मे ब्रूहि पितामह[iv]"। साधारणतया धृ-धारणे इति धातुपाठात् धृधातोरुत्तरं मणिन्-प्रत्ययेन निष्पन्नः धर्मशब्दोऽयम्। वेदादारभ्य दर्शनग्रन्थेषु निरवच्छिन्नतया धर्मस्य स्वरूपं किञ्चित् परिवर्तितमभूत्। मानवानां दुःखलाघवाथमस्य धर्मस्य परिकल्पना विहिता शास्त्रकृद्भिः। श्रेयस्करं कर्म हि धर्मः इति धर्मलक्षणानुसारं स्मृतिग्रन्थेषु आचारो हि परमो धर्मो इत्यर्थो लभ्यः। धर्मशास्त्रकाराः धर्मस्य विभागद्वयं कृतवन्तो - तद्यथा मानवधर्मः, साधारणधर्मः, वर्णाश्रमधर्मः, विशेषधर्मो वेति। मानवधर्मस्य सार्वभौमरूपमस्ति। स देश-काल-जाति-व्यक्तिनिरपेक्षः। तस्य पालनं मनुष्यैरेव कर्त्तव्यम्। तस्य विपरीतस्तावदाश्रमधर्मः खलु देशदात्यादिसापेक्षो वर्तते। अस्य पालनं न तु नैतिकभावनया परञ्च सामाजिकभावनया भवितुमर्हति। मनुना धर्मस्य दशलक्षणान्युक्तानि –

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्[v]" ।। इति

अनेन केवलं धर्मस्य दशलक्षणमेवासीदित्येतन्न मन्तव्यम् । अर्थादनेनैव ज्ञायते यन्मानवधर्मः समष्टिपरको, न तु व्यष्टिपरको वर्तते । धर्मशास्त्रानुसारेण समाजस्य परिवर्तनात् प्रागेवात्मपरिष्करणं करणीयम्। अतो मानवमात्रस्य कृते सामान्यधर्मस्योपदेशः कृतस्तैः शास्त्रकारैः। अस्मिन् संसारे महापुरूषाः स्वस्वधारणानुसारेण जनकल्यानाय धर्मस्य स्वरूपं स्वतन्त्रतया प्रदर्शितवन्तः। तस्मादेव भारतीयसमाजे विभिन्नाः सम्प्रदायाः प्रादुरभवन्। उच्यते “Religions are many but Religion is one”[vi]. श्रूयते अस्माभिः साहित्यं नाम समाजस्य दर्पणरूपम्। तस्माद्भारते धर्मादिचतुर्वर्गाणां वर्णना सर्वत्रैवावाप्यते। अतो महाभारतम् धर्मार्थकाममोक्षशास्त्राणां समन्वयात्मकग्रन्थः। तथाहि कथ्यते –

“धर्मे चार्थे च कामे मोक्षे च भरतर्षभः।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥[vii]” इति।

मानवजीवनस्य सर्वावस्थानां दृष्टान्तोऽत्रोपलभ्यते। जन्मनः प्रभृति मानवानां स्वाभाविकी प्रवृत्तिर्भवत्यर्थकामयोरवाप्तिः परन्तु धर्मादृते किञ्चिदपि नास्ति जगत्यस्मिन्। महाभारते धर्मस्य द्विविधोऽर्थः प्राप्यते । धनपूर्वकाद् ऋधातोरनन्तरं मक्-प्रत्ययेन निष्पन्नः धर्मशब्दो नाम यस्मात् पार्थिवापार्थिवानां धनानां प्राप्तिरिति। अर्थशास्त्रे एतद्योगक्षेमनाम्ना व्यपदिश्यते। नृप एव योगक्षेमं वहति।

धर्मस्य प्रमाणानि तावत् श्रुति-स्मृति-शिष्टाचार-बृद्धानुशासनानि। स्वधर्मः[viii] नाम आचार-अहिंसा-सत्य-श्रद्धा-नैतिकगुणानां पालनम्। आपद्धर्मः(rules for times of distress) नाम कश्चिदपरो धर्मो विद्यते शास्त्रेषु। वस्तुतो गुणधर्माद् वर्णाश्रम-राज-स्त्री-जातिकुलधर्माणामालोचनमधिकरूपेण कृतमास्ते शास्त्रेषु । धर्मस्य परिवृत्तिर्बृहती याद्यतने जीवनेऽप्यतीव महत्त्वपूर्णा वर्तते। तत्र चतुर्वर्णानां कार्यविधानपुरःसरं समाजेऽवस्थितानां तदानीन्तनजनानां कार्यैः समाजस्य स्पष्टश्चित्रमस्माकं समक्षं परिस्फुरति। धार्मिकानुष्ठानानां नियमपालनेन राज्ञो धर्मस्तावत् स्वधर्मस्य रक्षणं कृत्त्वा लोकहितकरणं कार्यम्। अयमेव राजधर्मः (rules for the king)। एष धर्मः प्रत्येकं नृपाणामवश्यमेव करणीयः।

शिशुपालवधे वर्णितं राजधर्मस्वरूपम्

विंशतिसर्गात्मके शिशुपालवधे राज्ञः कर्तव्यं, दण्डस्य प्रयोगः, दूतमन्त्रणादीनां नियोजनम्, रणनीतेः दैनन्दिनकार्यस्य च विवरणं तथा राजनीतेर्विविधविषयानाञ्चर्चावाप्राप्यते। धर्मशास्त्रे नियमो विहितो यत् कोऽपि धार्मिकः प्रतिकूलपरिस्थित्यामपि धर्मस्य पालनं कुर्याद्। राज्ञः मर्यादा विपत्तावपि नोल्लङ्घनीया। उदाहरणरूपेण वक्तुमलं यत् –

"निःशेषमाक्रान्तमहीतलो जलैश्चलन् समुद्रोऽपि समुज्झति स्थितिम्।

ग्रामेषु सैन्यैरकरोदवारितः किमव्यवस्थां चलितोऽपि केशवः"[ix]॥

समुद्रः कदाचित् प्रलयकाले जलैः स्वमर्यादां त्यजति परन्तु कृष्णः सैन्यैर्भूमण्डलं विस्तीर्य कदापि स्वमर्यादां न कथमपि लङ्घयति। तस्मान्मनुना गदितम् - "क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्[x]॥" अर्थात् प्रजानां रक्षणमेव क्षत्रियस्य परमो धर्मः। गणतान्त्रिकव्यवस्थायां बहूनि मतान्येव गृहीतानि। व्यक्ति-समाज-राष्ट्राणां विकासः स्वधर्मस्य नाम स्वकर्मपालनेनैव भवति। गीतायामपि स्वधर्मस्य पालनमेव कर्त्तव्यमिति गीतम्-

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वानुष्ठितात्।

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥[xi]"

ननु राज्ञोऽपि स्वधर्मोऽस्तीति चेदुच्यते - स्वधर्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः[xii]। अर्थात् टीकाकारः कुल्लूकभट्टो निगदितवान् - "राज्ञः शत्रुविजयः स्वधर्मो विजयफलं युद्धमित्यर्थः[xiii]"॥ एतस्मात् "न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरण"[xiv]। भारतवर्षे प्रागेव राजधर्मः प्रचलितो बभूव। शास्त्रेण राज-प्रजयोः कर्त्तव्यानां निर्देशं कृत्वा आपदि च कथं ते कार्यं कुर्युरिति तदपि निर्देशितम्। राजधर्मस्य विवेचनं विभिन्नेषु शास्त्रीयग्रन्थेष्वाप्यते। धर्मशास्त्रेषु कर्तव्यकर्माकर्मादिकमेव धर्म। तत्र नृप एव प्रधानः। तमाश्रित्यैव राष्ट्रस्य शासनं प्रचलति। नृपः स्वस्य सहायकान् सचिवान् मन्त्रिन् नियोज्य तैः सह चतुर्विधस्थान-समुदय-गुप्ति-लब्धप्रशमनादिविषये परामर्शं कुर्यात्। मनुना उक्तम् –

"तैः सार्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्।

स्थानं समुदायं गुप्तिं लब्धप्रशमनानि च[xv]"।

माघेन स्वकीये ग्रन्थे राजधर्मस्य लघुतमस्यापि कर्तव्यस्यापि वर्णना विहिता । राजनीतेः जटिलसमस्यानामपि समाधानमतीव सारल्येन भीष्म-युधिष्ठिर-वलरामादीनां मुखेन माघेन कृतम्। माघस्य शिशुपालवधे क्षत्रियधर्मस्य व्यापकरूपं प्रतिफलितमास्ते। तेन उक्तं क्षत्रियस्य किं करणीयं किं नाकरणीयमिति –

"सम्पदा सुस्थिरं मन्यो भवति स्वल्पयापि यः।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम्"[xvi]

मल्लिनाथेन सर्वाङ्कषायां टीकितम् - "पौरुषहीनात् दैवमपि जुगुप्सते[xvii]"। शत्रोः समूलं नाशात् राज्ञः प्रतिष्ठा सम्भवति यतो हि धूलिः पङ्कतां आनयति परं जलं भूमावेवावतिष्ठते। अतः उच्यते माघेन -

"विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते[xviii]॥

अर्थात् शत्रोः ध्वंसादनन्तरमेव प्रतिष्ठा सम्भवेत्। उदासीनतया नृपेण शत्रुर्नोपेक्षनीयः। यद्यपि रिपुः शिशुपालः एकाकी अपि यावत् एकोऽपि शत्रुरवतिष्ठते तावत् पर्यन्तं सुखं नास्तीत्यवस्थायामत्र किमकरणीयमित्येतदप्युल्लिखितम्। यथा धूलिरपि पदाघातस्यापमानाद्यक्तेः शिरसि तिष्ठति, तर्हि का कथा अपमानितानां भूपतीनाम् ? तत्रोच्यते

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवावमानेऽपि देहिनस्तद्वरं रजः॥[xix]

राजनीतेः पारिभाषिकशब्दानामपि प्रयोगो शिशुपालवधस्य नैकेषु स्थलेष्वस्माभिर्दृश्यते- तद्यथा - "षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः"[xx] इति। वयं जानीमो यत् राज्ञः सन्धि-विग्रह-यान-आसन-संश्रय-द्वैधीभावाश्चेति वर्तन्ते षड्गुणाः। तत्र शक्तयः त्रिविधाः प्रभु-मन्त्र-उत्साहाश्च। भूमि-सुवर्ण-मन्त्राः सिद्धयः। चयापचयस्थानमुदयत्रयम्। राज्ञः सहायकारिणां पञ्चाङ्गानां सुस्थितेनैव कार्यसिद्धिर्भवति॥

ननु किं नाम नृपस्य करणीयं कर्मेति चेदुच्यते याज्ञवल्क्यस्मृतेर्व्यवहाराध्याये - दुष्टनिग्रहं शिष्टपालनञ्च राज्ञः प्रधानं कर्म। शुक्रनीत्यामप्युच्यते -

"बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः। चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः[xxi]"

यस्य पुरुषस्य बुद्धिरेव तस्य शस्त्रं स भवति नृपः। अर्थात् यतो हि शस्त्रेण शत्रोर्वधादिकार्यं सम्पद्यते परं तत्र बुद्धिप्रयोगेनैव तत् सम्भवितुमियात्। प्रकृतिस्वाम्यादिसप्तादीनि यस्याङ्गानि, तेषां वैफल्येन राज्ञो वैफल्यं स्यात्। अगम्यरूपा मन्त्रगुप्तिरेव तस्य कवचम् । एतेनात्मरक्षा भवत्येव । राजा अवश्यमेव स्वयञ्चरो भवितुमर्हः। दूतरेव तस्य मुखं येन स राजा स्वस्य वार्तां प्रेषयितुमलम्। पूर्वोक्तलक्षणोपेतः पुरुषो न भवितुमर्हति साधारणो मानवः, स एव राजा। कथ्यते राजा प्रकृतिरञ्जनात्। अत्र प्रकृतिर्नाम प्रजा इति।

मनु-याज्ञवल्क्य-मेधातिथ्यादिधर्मशास्त्रकाराणां नये 'राजधर्म' इति पदार्थः अयमेव यन्नेह क्षत्रियजातिवचनः धर्मशब्दो दृष्टादृष्टार्थानुष्ठेयपरः[xxii] च। याज्ञवल्क्यमतेन अभिषेकादिगुणोपेतस्य राज्ञः प्रजापालनं हि केवलं धर्मः। बलरामो मन्यते –

"सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्॥[xxiii]"

अर्थात् यथा बौद्धानां सर्वेषु शरीरेषु स्कन्धपञ्चकातिरिक्त आत्मा नास्ति, तथैव राज्ञाम् अङ्गपञ्चकातिरिक्तो मन्त्रो नास्ति। अत्र कानि तावत् पञ्चाङ्गानि? तस्मात् बौद्धदर्शने रूप-वेदना-विज्ञान-संज्ञा-संस्काराः पञ्च स्कन्धाः सन्ति। राज्ञां मन्त्रस्यावश्यकता नास्ति, यतो हि तेषां पञ्चाङ्गानि प्रतिष्ठितानि। राजधर्मस्य पञ्चस्कन्धविषये प्राह कामन्दकः – "सहायाः साधनोपाया विभागो देशकालयोः।

विपत्तेश्च प्रतिकारः सिद्धिः पञ्चाङ्गमिष्यते॥[xxiv]"

नृपः प्रभातकाले ब्राह्ममुहूर्ते वा साम-दान-दण्ड-भेदादीनां सम्बन्धे तथा त्रिवर्गाणां प्रयोगविषये विचारं कृत्वा राज्यशासनं कुर्यात्। मनुनापि कथ्यते – "उत्थाय पश्चिमे यामे कृतशौचः समाहितः[xxv]" । मेधतिथिः स्पष्टरूपेण स्वस्य टीकायामुक्तवान् – पश्चिमो यामो ब्राह्मोमुहूर्तः[xxvi]। अधुनापि शुभकार्याय प्रातःकालो हि इह लोके महत्वपूर्णः। तस्मादुच्यते

"क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगा। नुदधिमहति राज्ये काव्यवद्दुर्विगाहे। गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातम्॥[xxvii]"

महाकविर्माघो राज्ञः कर्तव्ये प्रवदति –

"क्षणमयमुपविष्टः क्ष्मातलन्यस्तपादः।

प्रणतिपरमवेक्ष्य प्रीतमह्नाय लोकम्॥

भुवनतलमशेषं प्रत्यवेक्षिष्यमाणः।

क्षितिधरतटपीठादुत्थितः सप्तसप्तिः"[xxviii]॥

उपमानेनात्राशयो यद्राज्ञा धरण्या निरीक्षणमनुपदिनं करणीयम्। चतुरङ्गसेनानामुल्लेखो कृतो महाकविना –

"रथवाजिपत्तिकरिणीसमाकुलं तदनीकयोः समगत द्वयं मिथ।

दधिरे पृथक्करिण एव दूरतो महतां हि सर्वमथवा जनातिगम्॥[xxix]"

सर्वे एते राज्ञो बलरूपाः। राज्ञः स्वभावविषये प्राप्यते तत्र – "तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः[xxx]" । राजा कालं ज्ञात्वा उभयमाश्रयतीत्यनेन तेजसः क्षमायाश्च समन्वयः कविनाभीष्टः। उत्तररामचरितेऽपि एतादृशी नीतिमार्गस्य भावना अस्माकं नयनयोरापतति -- "वज्रादपि कठोराणि मृदुनि कुसुमादपि[xxxi]"।

विजिगीषु (who seeks conquest) राजा उत्साहशक्तिना समग्रभूभागं जेतुमिच्छति। कविना कथ्यते-

"उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि। जिगीषुरेको दिनकृदादित्येष्विव कल्पते॥[xxxii]

सोऽपि द्वादशनृपेषु जिगीषोः राज्ञः प्राधान्यं स्वीकृतवान्। आदित्यानां मध्ये सूर्यस्य स्थितिस्तथैव यथा द्वादशराजमण्डलेषु विजिगीषोः। मनुनापि द्वादशराजमण्डलेषु मूलप्रकृत्यामस्य राज्ञः स्थानं निर्णीतम्। तथैव शाखायां मित्र-अरिमित्र-मित्रामित्र-अरिमित्रमित्र-पार्ष्णिग्राह-आक्रन्द-पार्ष्णिग्राहासार-आक्रन्दसाराणां ग्रहणं भवति। नृपः वेदादिशास्त्रशस्त्रास्त्रप्रशासनिकविद्यासु पारङ्गमो भवेत् । वयं सर्वे जानीमो यत् विद्या ददाति विनयमिति कृत्वा श्रीकृष्णः कथं राज्ञो भूत्वाऽपि विनयी आसीदित्यस्याप्युल्लेखो माघेन कृतः

"अवलोक एव नृपतेः स्म दूरतो रभसाद्रथादवतरीतुमिच्छतः।
अवतीर्णवान् प्रथममात्मना हरिर्विनयं विशेषयति सम्भ्रमेण सः[xxxiii]॥"

धर्मपूर्वकं धनस्य प्राप्तिः, प्राप्तधनस्य रक्षणं, तस्य बृद्धिः तथा च सत्पात्रे तेषां प्रदानश्च क्षत्रियस्य राज्ञः कर्तव्यतया उल्लिखितानि। दानस्य माहाम्यकीर्तने कविना प्रोक्तं –

"स्थापतेयमधिगम्य् धर्मतः पर्यपालयमवीवृधं च यत्।
तीर्थगामि करवै विधानतस्तज्जुषस्व जुहवानि चानले॥[xxxiv]"

उपसंहारः- माघो राज्येन सह सम्बन्धितविषयाणां राज्ञः विशेषाधिकाराणां सम्बन्धस्य व्याख्यानं तथा प्रजानां सर्वविधहितरक्षायै राजनीतेश्चर्चाश्चास्मिन् महाकाव्ये कृतवान्। यतो हि वयमिदानीं प्रजातन्त्रे तिष्ठामस्तथापि एतेषां प्रासङ्गिकता अद्यापि वर्तते। माघकालीने समये यदेव संघटितमभवत्, तेषां पुङ्खानुपुङ्खतया वर्णिनं कृतं तेन स्वके काव्ये । शिशुपालबधस्य द्वितीये सर्गे प्रगाढरूपेण कवेर्माघस्य उद्धवबलरामाभ्यां सह कृष्णस्य कथोपकथानात् राजनीतिज्ञानं प्रमाणीभवति। राजनीत्यां न केवलं तस्य श्रुतिज्ञानमपि तु व्यवहारिकज्ञानं प्रकाशपदवीं गतम् । चरित्राणां माध्यमेन राजनीतेः जटिलसमस्यानां समाधानं कविना विहितम्, येषां प्रयोगः गणतन्त्रेऽपि अधुना सम्भवति। अधुना गणतन्त्रस्यापि मूलमस्ति सर्वजनहितरक्षणम्। शिशुपालवधे यस्य राजतन्त्रस्य वर्णनासीति तद् भारतीयसभ्यतायाः संस्कृतेः परम्परायाश्च अनुकूलमित्यत्र नास्ति संशयः। शिशुपालवधे वर्णिते राजतन्त्रेऽपि अद्यतनकालीयगणतन्त्रराज्यस्य माण्डलीकराज्यस्य वा चित्रं स्पष्टतया स्फुटं काशते इति शिवम् ।

## तथ्यसूची

[i] संस्कृत साहित्य सम्भार-५ (भूमिका, पृ.१)

[ii] 'Literature is the reflection of the society'

[iii] शिशुपालवधम्, १४/६

[iv] महाभारतम्, १२/२५८/१

[v] मनुसंहिता, ७/१२

[vi] धर्मदर्शन की मूल समस्याए, पृ.१०६

[vii] महाभारतम्१/२/३९०

[viii] महाभारतम्, ६/४२/४८

[ix] शिशुपालवधम्, १२/३६

[x] मनुसंहिता, ७/१४४

[xi] गीता, ३/३५

[xii] मनुसंहिता, १०/११९

[xiii] मनुसंहिता, कुल्लूकटीका, १०/११९

[xiv] मनुसंहिता, ७/८७

[xv] मनुसंहिता, ७/५६

[xvi] शिशुपालवधम्, २/३२

[xvii] तदेव, टीका, पृ.३९

[xviii] तत्रैव, २/३४

[xix] तत्रैव, २/४३

[xx] तत्रैव, २/२६

[xxi] तत्रैव, २/८२

[xxii] मनुसंहिता, ७/१

[xxiii] शिशुपालवधम्, २/२८

[xxiv] तदेव, टीका

[xxv] मनुसंहिता, ७/१४५

[xxvi] मनुसंहिता, मेधातिथिटीका, ७/१४५

[xxvii] शिशुपालवधम्, ११/६

[xxviii] शिशुपालवधम्, ११/४८

[xxix] तत्रैव, १३/१७

[xxx] तत्रैव, २/८३

[xxxi] उत्तररामचरितम्, २/७

[xxxii] मनुसंहिता, २/८१

[xxxiii] शिशुपालवधम्, १३/७

[xxxiv] तत्रैव, १४/९

## परिशीलिता सन्दर्भसूची


क. मुख्यग्रन्थाः

- शिशुपालवधम् (माघविरचितम्) - हरगोविन्दशास्त्री, चौखाम्बा विद्याभवन, वाराणसी, १९८४.
- शिशुपालवधम् (माघविरचितम्) - दुर्गाप्रसाद, निर्णयसागर प्रेस, बोम्बे, १९०५.
- शिशुपालवधम् (माघविरचितम्) - सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कोलकाता, १९९७.
- गीता - गीताप्रेस, गोरखपुर, द्वितीय संस्करण, २००८.
- मनुसंहिता- मानुवेन्दु वन्द्योपाध्याय, संस्कृत पुस्तक भाण्डार, २०१२.
- संस्कृत साहित्य सम्भार (५ खण्ड) - नवपत्र प्रकाशन, कलिकाता, २०११.

ख. सहायकाः ग्रन्थाः

- त्रिपाठी, बालकृष्णः - *शिशुपालवधमहाकाव्य के शास्त्रीय सन्दर्भ,* न्यू भारतीय बुक कार्पोरेशन, दिल्ली, २००३.
- त्रिपाठी, श्रीधर - *धर्मशास्त्रीय विषयों का परिशीलन,* मिथिला शोध संस्थान ग्रन्थमाला (नवीन ग्रन्थमाला १२) दारभङ्गा, १९९९.

# शिक्षणकौशलविकासे अधिगमसिद्धातानामुपादेयता

Shewli Chakraborty
E-mail- shewlicharkraborty12@gmail.com

**सारांशः-**

उत्तमशिक्षकस्य कृते अधिगमसिद्धान्तानां ज्ञानम् अत्यन्तम् आवश्यकम्। यतो हि एतेषाम् ज्ञानं विना शिक्षकः शिक्षणकौशलेषु साफल्येन दक्षतामर्जयितुं न शक्नोति। अधिगमः कथं जायते इति निरूपणार्थं बहवो अधिगमसिद्धान्ताः प्रतिपादिताः वर्तन्ते। विविधमनोविज्ञानसिद्धान्तभेदाः, प्रयोज्यानां भेदाः, प्रायोगिकपरिस्थितीनां भिन्नता इत्यादीनि कारणानि बहूनां अधिगमसिद्धान्तानां प्रतिपादने कारणत्वेन निर्देष्टुं शक्यते। अत्र शिक्षणकौशलविकाशे केचित् प्रधानाः अधिगमसिद्धान्तानां उपादेयता विषये चर्चां करोमि।

**प्रधानसूचकानि-** शिक्षणकौशलम्, अधिगमः

**भूमिका-** "अन्तर्निहितशक्तीनां वहिरानयनमेव शिक्षा"।[1] छात्राणां सरलतया शिक्षायाः अवगमनार्थं सर्वाङ्गीणविकासार्थं च विद्यालयेषु शिक्षकेण क्रियमाणा प्रक्रिया 'शिक्षणम्' इत्युच्यते। शिक्षार्थिनां व्यवहारपरिवर्तनार्थं विद्यालयभिन्नस्थलेषु विद्यालयेतरसमयेषु च निरन्तरं जायमाना प्रक्रियाऽपि शिक्षणम् इति पदेन अभिधीयते।

[1] "Education is the manifestation of perfection already in men". –Swami Vivekananda

शिक्षणेन अधिगमः, अधिगमेन व्यवहारपरिवर्तनम्, इति परम्परया प्रक्रियेयं प्रचलन्ती भवति। परन्तु अधिगमः इत्युक्ते किम् ? **अनुभवेन, अभ्यासेन, प्रशिक्षणेन संसूचनैर्वा जीवव्यवहारे सापेक्षकरूपशाश्वतपरिणामः अधिगमः भवति। परिपाकेन, श्रान्त्या, मादकादिभिः जायमानः परिणामः अधिगमः न भवति। (**Learning is a relatively permanent change in the behaviour of an organism which is due to experience, practice, training or instructions etc and not due to maturation fatigue , alcohol and drugs.)। इति साधरणतया अधिगमस्य लक्षणं सर्वैः अङ्गीकृतं वर्तते। एषः अधिगमः शिक्षणेन,प्रशिक्षणेन,अनुभवेन च जायते इति कारणतः अधिगमे एतेषां महत्त्वम् वर्तते । तत्रापि शिक्षणस्य विशिष्टं महत्त्वं विद्यते। शिक्षणं तदा उत्कृष्टं भवितुमर्हति, यदि शिक्षणदाता कुशलो भवति। शिक्षणदाता तदा कुशलो भवति, यदा सः शिक्षणकौशलेषु नैपुण्यं सम्पादयति।अतः शिक्षणकौशलं इत्युक्ते किम् तद् आदौ ज्ञातव्यम्।एकः उत्तमः शिक्षकः शिक्षणसमये वहुविधकौशलानां प्रयोगं करोति, येन तस्य शिक्षणं प्रभावपूर्णं भवति, यतो हि शिक्षणं एकं कौशलं न, अपितु अत्र विविधकौशलानां संमिश्रणं भवति। अतः एव शिक्षणम् एका जटिला प्रक्रिया इत्युच्यते। शिक्षणस्य इमां जटिलप्रक्रियां विविधकौशलेषु विभाजनं कर्तुं शक्यते। शिक्षकः कक्षाशिक्षणे पाठ्यांशावबोधनप्रसङ्गे विभिन्नाननेकाश्च शैक्षिकव्यवहारान् करोति। यथा सः नवीनपाठ्यांशाध्ययनार्थं छात्रान् प्रेरयितुं प्रस्तावनां करोति, पाठ्यांशं वदति, विभिन्नोदाहरणानि प्रस्तौति, सारं कथयति, पाठ्यांशविषयकं छात्रावबोधशक्तिं परीक्षितुं छात्रान् प्रश्नान् पृच्छति, तत् प्रतिक्रियां नियच्छति, दत्तोत्तरान् छात्रान् साधुवादैः सभाजयति, अन्यान् चेतयति, तास्तान् अंशान् श्यामपट्टे लिखति, पाठाभिमुखं कर्तुं छात्रध्यानाकर्षणाय शाब्दिकाशाब्दिकरूपेण विभिन्नसंकेतान् करोति, मौनं भजति, स्वरं परिवर्तयति,छात्रप्रश्नान् समादधाति, समकालमेव कक्ष्यां नियन्त्रयति, अन्ते पाठं

समापयति। शिक्षणप्रक्रियायाम् अन्तर्भूताः एताः क्रियाः एव शिक्षणकौशलानीत्यभिधीयन्ते। पासी(Dr.B.K.Passi-1976) महोदयः शिक्षणकौशलस्य परिभाषामिमां प्रास्तौत्-

**"शिक्षणकौशलं शिक्षणक्रियाणां व्यवहाराणां वा कश्चन समूहः, यः प्रत्यक्षतया परोक्षतया वा छात्राणामधिगमे सौकर्यं कल्पयति।"**[2] इति।

**प्रयत्न पराजयप्रणाली (Trial and Error Method)** –

**प्रवर्तकः-** आमेरिकादेशीय Edward lee Thorndike महाशयः

**सिद्धान्तः-** सर्वेऽपि जीवः प्रथमं कस्यापि कार्यस्य सम्पादनाय बहून् प्रयत्नान् करोति। प्रयत्नेषु क्रियमानेषु दोषाः स्युरेव। परं प्रथमप्रयत्ने यावन्तः दोषाः तावन्तः दोषाः अनन्तरप्रयत्नेषु न भवन्ति। तत्र दोषाणां संख्या न्युनाः भवन्ति।अन्ते एकेनैव प्रयत्नेन निर्दोषं कार्यसिद्धिरपि जायते।

**शिक्षणकौशलविकासे उपादेयता -**

थारण्डैक महोदयस्य अस्य सिद्धान्तस्योपरि एव आधारिकृत्य शिक्षाशास्त्रिकक्षायां छात्राध्यापकानां शिक्षणकौशलेषु दक्षतार्जयितुम् सुक्ष्मशिक्षणस्यायोजनं क्रियते। सूक्ष्मशिक्षणे अपि छात्राध्यापकाः एकैकम् शिक्षणकौशलस्य अभ्यासं कुर्वन्ति ।

थारण्डैक महाशयेन केचिदधिगमनियमाः अपि प्रतिपादिताः। तेषु त्रयः अत्यन्तं प्रधानाः भवन्ति। तद्यथा-

---

[2] "Teaching skills are a group of teaching acts or behaviours intended to facilitate a pupil's learning directly or indirectly" - Dr. B.K. Passi.

**संसिद्धतानियमः (Law of Readiness)-**

एतन्नियमानुसारं मनुष्यः यदा किमपि अधिगन्तुं सन्नद्धं भवति तदा अधिगमाय अवकाशप्रदानं संतोषाय भवति। संसिद्धताभावे बलात्काररूपेण अधिगमाय प्रेरणमपि असंतोषाय भवति।

शिक्षणकौशलविकासे अपि अस्य नियमस्य प्रयोगः क्रियते। शिक्षाशास्त्रिकक्षायाः छात्राः उत्तमशिक्षणवृत्तिं प्राप्त्यर्थम् एव शिक्षणकौशलेषु दक्षता अर्जयितुं स्वतःअभिप्रेरिताः भवन्ति। अतः ते मानसिकरूपेण संसिद्धाः भवन्ति। एतदेव तेषां आन्तरिकसंसिद्धता(Internal readiness) । शिक्षणकौशलप्राप्तौ छात्राध्यापकानां वाह्यसंसिद्धता(External readiness) भवति शिक्षणकौशलसम्बद्धं सैद्धान्तिकज्ञानम् (Theoretical Knowledge)। एतत् द्वयं विना छात्राध्यापकैः शिक्षणकौशलानाम् प्रायोगिकरूपेण अभ्यासं कर्तुं न शक्यते।

**अभ्यासनियमः(Law of Exercise)-**

नियमोऽयं निरूपयति यत् अभ्यासे क्रियमाणे सति अधिगमः स्थिरो भवति। अभ्यासाभावे अधिगमः स्थिर न भवति इति। अयं नियमः अस्मिन्नुपरि वलं यच्छति यत् छात्राणां कृते शिक्षमाणां क्रियां अभ्यासाय पर्याप्तं अवसरं यच्छेत्।

अतः शिक्षाशास्त्रिकक्षायां छात्राध्यापकानां कृते सूक्ष्मशिक्षणमाध्यमेन शिक्षणकौशलान् अभ्यासयितुम् अवसरः दीयते। शिक्षणकौशलानाम् अभ्याससमये छात्राध्यापकाः दोषान् अपि कुर्वन्ति। दोषाणां निवारणाय प्रशिक्षकैः छात्राध्यापकान्सम्यक्तया प्रतिपुष्टिं दातव्यम्। प्रशिक्षकस्य प्रतिपुष्टेः आधारेण एव

छात्राध्यापकाः पुनः पुनः अभ्यासेन दोषाणां निवारणं कुर्वन्ति। अन्ते शिक्षणकौशलेषु दक्षतामर्जयति।

**प्रभावस्य नियमः (Law of Effect)** – कार्ये सफले जाते संतोषानुभवः भवति। असाफल्ये सति संतोषः न भवति। असंतोषः जायते। Thorndike महोदयेन येन प्रकारेण प्रभावस्य नियमः प्रस्तुतः तस्याधारः प्रोत्साहनं प्रेरणा वाऽस्ति। अध्यापकः कामपि क्रियां शिक्षणार्थं यावत् छात्रान् न प्रेरयिष्यन्ति तावत् तस्याः क्रियायाः शिक्षणं प्रभावोत्पादकं न भविष्यति। अतः शिक्षणकौशलाभ्याससमये छात्राध्यपकाः यत्र यत्र दोषान् कुर्वन्ति तत्र तत्र प्रशिक्षकानां प्रतिपुष्टिम् आधारेण तेषां दोषाणां निवारणं कृत्वा पुनः तस्य कौशलस्याभ्यासः करोति। प्रतिपुष्टिः सम्यक् न भवति चेत् शिक्षणकौशलेषु गुणवत्तता नागच्छति। अर्थात् प्रशिक्षकैः प्रदत्ता प्रतिपुष्टिः छात्राध्यापकानां शिक्षणकौशलविकासं अत्यधिकं प्रभावयति।

**अन्तर्दृष्ट्या अधिगमसिद्धान्त (Gestalt theory of learning)** -

**प्रवर्तकाः-** जर्मन् देशीयाः Werthemeir, Kofka, Koholar महोदयाः वर्तन्ते।

**अधिगमसिद्धान्तः-** Gestalt इतीदं पदं जर्मनी भाषायाः अस्ति। अस्य समानार्थकं पदं अन्यस्यां भाषायां नोपलभ्यते इति कथन्ति। परं तदभावसूचकानि आंग्लभाषायां Whole, Pattern, Configuration इति पदानि वर्तन्ते। Whole इत्युक्ते समस्तमिति, Pattern इत्युक्ते पद्धतिरिति, Configuration इत्युक्ते समग्राकृतिः इति स्वीकर्तुं शक्यते। समष्टिवादे अंशानां विश्लेषणस्य कृते महत्त्वं न दीयते। अंशानां समन्वितरूपस्य कृते महत्त्वं दीयते। व्यवस्थीकरण- पुनर्व्यवस्थीकरण प्रक्रिया (Organisation and reorganisation process) अत्र वादे प्रचलति।

अंशानामपेक्षया अंशानां समस्तरूपस्य बलमधिकमिति, संपूर्णज्ञानाय समस्तरूपस्य ज्ञानं आवश्यकमिति च समष्टिवादिनः कथयन्ति। तेषां मतानुसारेण अधिगमः 'अन्तर्दृष्ट्या' जायते इति। अतः समष्टिवादिनः वदन्ति-

**"समग्रपरिस्थितेः अवलोकनानन्तरं जायमानः सम्पूर्णसमस्या-समाधानात्मकः परिष्कारः अन्तर्दृष्टिः भवति।"**

**<u>शिक्षणकौशलविकासे Gestalt अधिगमसिद्धान्तस्य प्रयोगः –</u>** Gestalt अधिगमसिद्धान्तस्योपयोगः स्थूलशिक्षणस्याभ्याससमये क्रियते। Gestalt नाम समष्टिः।अत्र समष्टिः नाम शिक्षणविधिः, पाठः, छात्रः, क्रियाः। एतेषां सर्वेषामपि समन्वयः अत्र क्रियते। एतेषां सर्वेषामाधारेण अध्यापकः कक्षायां समस्यायाः समाधानं करोति। अत्र समस्या अस्ति कक्षायां छात्राणाम् अधिगमसम्पादनम्। यथा तत्र koholer महोदयेन तस्य प्रयोगे शिम्पाञ्जीं एकस्मिन् पञ्जरे स्थापितवान्। पञ्जरात् वहिः कदलीफलानि स्थापितवान्। तस्मिन् पञ्जरे कदलीफलानि प्राप्तुं सर्वानि वस्तूनि आसन्, तेषां समन्वयः करणीयमासीत्। तत् कृत्वा शिम्पाञ्जी कदलीफलानि प्राप्तवान्। अत्रापि तथैव। छात्राः सन्ति, पाठ्यपुस्तकम् अस्ति, पाठः अस्ति, शिक्षणविधयः सन्ति, प्रविधयः सन्ति, क्रियाः सन्ति। एतेषां सर्वेषामपि सन्दर्भानुगुणम् समावेशं कृत्वा कक्षायां छात्राणाम् अधिगमस्पादनं भविष्यति। परम् अत्र समष्टिः नाम केवलं वस्तूनां योजनं नास्ति तत्रापि सन्दर्भानुगुणं क्रमवद्धता भवितव्यम्। अतः शिक्षकप्रशिक्षणे छात्राध्यापकान् शिक्षणाभ्याससमये विषयस्य काठिन्यतानुसारं, सन्दर्भानुसारं, छात्राणां स्तरानुसारं च विविधशिक्षणसम्वद्धक्रियाणां, शिक्षणविधीनां च उपयोगस्य प्रशिक्षणं दीयते। अनेन छात्राध्यापकाः शिक्षणकौशलेषु दक्षतामर्जयन्ति।

**<u>उपसंहारः</u>** - "श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता

यस्योभयं साधु स शिक्षकाणां धुरिप्रतिष्ठपयितव्य एव।।" [3]

कालिदासस्य निर्देशानुसारं शिक्षकः ज्ञानवान् तु भवेदेव। तेन सह ज्ञानस्य सञ्चारार्थं समुचितकौशलवान् च स्यात्। तदा एव कश्चन उत्तमप्रतिष्ठां ख्यातिं वा प्राप्नोति। स्वशिक्षणं प्रभावान्वितं भवेदिति सर्वेषामपि अध्यापकानां मुख्योद्देश्यम्। उत्तमशिक्षकप्रशिक्षणं सदैव स्वप्रशिक्षार्थिषु विशिष्टशिक्षणकौशलानां नैपुण्यं सम्पादयति। अतः छात्राध्यापकैः शिक्षणकौशलानामर्थः अवश्यम् अवगन्तव्यः एव। यदि शिक्षकाः शिक्षणकलायां निपुणाः न भवन्ति, तर्हि ते छात्राणां समुचित मार्गदर्शनं कर्तुं , तेषां व्यवहारान् च परिवर्तयितुं समर्थाः न भवन्ति। अतः शिक्षणकौशलानां विषये, अधिगमसिद्धान्तानां विषये च छात्राध्यापकाः परिचिताः स्युः।तेन ते शिक्षणकौशलेषु पूर्णाधिकारं प्राप्तुं समर्थाः भविष्यन्ति। तदा एव सः कश्चन उत्तमः निपुणशच शिक्षकः भवितुमर्हति।

<u>अनुशीलितग्रन्थसूची</u> –


1. डॉ. मिश्रः रमाकान्तः, 'शैक्षिकप्रविधिः', वाराणसी, चौखाम्बाविद्याभवन, 2006।
2. डॉ.शर्मा,वि.मुरलिधर;'संस्कृतशिक्षकप्रशिक्षणे सूक्षमशिक्षणम्',वाराणसी, चौखाम्बाविद्याभवन।
3. डॉ.वृ-न्दावन, 'शिक्षणस्य वैज्ञानिकाधारः', अनन्ताक्षरप्रकाशनम्,पुरी, 2008 ।
4. प्रह्लाद्.आर.जोशी(२००७) : अध्पकशिक्षा,राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः।


[3] मालविकाग्निमित्रम्

5. शर्मा . डॉ.च.ल.ना., सिंह. फतेह (२००८) : संस्कृतशिक्षणम् नवीनप्रविधयश्च, आदित्यप्रकाशनम् जयपुरम्।

# विवेकानन्दकाव्यामृतम् विवेकलहरी इत्यनयोः तौलनिकमध्ययनम्

अनन्यासरकारः
शोधच्छात्रा, कलिकाता विश्वविद्यालयः

**उपक्रमः-**

सम्पूर्णे विश्वे हिन्दुधर्मस्य भारतीयदर्शनस्य भारतीयजीवनशैल्याश्च मूल्यायनं स्वामिना विवेकानन्देन एव कृतम्। दाराशिकोहादीनामनुवादेन परिचितस्य भारतीयदर्शनस्य प्रत्यक्षव्याख्यानम् ऐदम्प्राथम्येन वैदेशिकैः स्वामिनो विवेकानन्दस्य मुखादेव श्रुतम्। तैत्तिरीयोपनिषदः अनुसरणेन स्वामी विवेकानन्दः स्वावश्यकतानुसारेण तत्र परिवर्तनं विधाय अवदत्- दरिद्रदेवो भव, मूर्खदेवो भव इति। वस्तुतः उपनिषच्चिन्ताधारायाम् अद्वैतवेदान्तस्य परिधौ स्थित्वापि स्वामी विवेकानन्देन तत्र आधुनिकता योजिता।

## विवेकानन्दमधिकृत्य रचितानि काव्यानि-

अस्य युगपुरुषस्य विवेकानन्दस्योपदेशावली रचनावैभवञ्च प्रतिक्षणं प्रत्येकञ्चोद्बोधयतीति निश्चयः। स्वामिनो विवेकानन्दस्य जीवनं, दर्शनं तथा जीवनदर्शनञ्च आधारीकृत्य बहुभिः संस्कृतकविभिः काव्य-नाटकादीनि विरचितानि। कानिचन प्रमुखान्यत्र उलिख्यन्ते। यथा - पी.के. नारायणपल्लिना विरचितं विश्वभानुः महाकाव्यम्, त्र्यम्बकशर्मभण्डारकरेण विरचितं स्वामिविवेकानन्दचरितम्, यतीन्द्रविमलचौधुरिणा विरचितं विवेकानन्दचम्पूः, विश्वविवेकञ्चेति, श्रीधरभास्करवर्णेकरेण विरचितं विवेकानन्दविजयं महानाटकम्, सूर्यनारायण-शास्त्रिणा विरचितं विवेकानन्दम्, गणेशदत्तशर्मणा विरचितं विवेकानन्दचरितामृतम् तथा गजाननबालकृष्णपलसुले-महोदयेन विरचितं विवेकानन्दचरितञ्चेति।

## अनूदितानि स्वामिविवेकानन्दस्य काव्यानि-

स्वामिनः प्रवचनानि बहुधा खण्डशः संकलितानि सन्ति। स्वामिनो विवेकानन्दस्य गानं गीतं वा अत्यन्तं प्रियमासीत्। स स्वयमपि गायति स्म तथा गीतानि लिखति स्म। परन्तु तस्य गीतानि प्रायः आङ्ग्ल-भाषया क्वचिद् वङ्गभाषया वा लिखितानि विलसन्ति। एतानि तस्य काव्यानि प्रायः ऊनविंशशतकस्य अन्तिमे भागे विदेशे एव लिखितानि सन्ति इति विवेकलहर्य्याः कवितावल्याश्च पादटीप्पण्यां सूचना लभ्यते। तदा तदा एतेषाम् आङ्ग्ल-कवितानां वङ्ग-हिन्द्यादि-भाषासु अनुवादोऽपि सञ्जातः। यथा - स्वामिशुद्धानन्द-स्वामिप्रज्ञानन्द-प्रणवरञ्जनघोष-सत्येन्द्रनाथदत्तादिभिः एतेषाम् आङ्ग्ल-काव्यानां वङ्गानुवादः विहितः। सूर्यकान्तत्रिपाठिनिराला-सुमित्रानन्दनपन्त-महोदयाभ्यां विवेकलहरी-नाम्ना कवितावलि-नाम्ना च तेषाम् आङ्ग्ल-बङ्गला-काव्यानां हिन्द्यनुवादः कृतः। गोपालचन्द्रशर्मणा संस्कृते अनूदितः युगाचार्यविवेकानन्दः अपि उलेख्यः एव। सद्य एव निमायि-साधन-बोसवर्यस्य स्वामी विवेकानन्द इत्याख्यः वङ्गीयमूलग्रन्थः सरिताकृष्णशास्त्रिणा अनूदितः

तथा केन्द्रसाहित्येकादम्या प्रकाशितश्च। राणाप्रतापसिंहस्य हिन्दीमूलग्रन्थः स्वामी विवेकानन्द इति रामाशिष-पाण्डेयेनानूदितः तथा संस्कृतभारत्या च प्रकाशितः। एवमेव विवेकानन्दस्य विचारसौन्दर्यम्, संकलकः वि. वि. चिपलूणकरः, मञ्जूषा अनुवादिका कुलकर्णी, उत्तिष्ठत जागृत, संग्राहकः एकनाथ रानडे, अनुवादिका नागरना हेगडे, प्रकाशकः राष्ट्रिय संस्कृत-संस्थानम् (2003) तथा भारतं तस्य समस्याश्च मूलं स्वामी विवेकानन्दः, संकलनकर्ता स्वामी निर्वेदानन्दः, अनुवादकः वे.कुटुम्बशास्त्री च। एवं तस्य काव्यानि भाषान्तरैः अनूदितानि सन्ति इदानीमपि भवन्ति। तस्य समग्रामपि द्वादशखण्डात्मिकां रचनावलीं सद्य एव रामकृष्णमठीयाः अनुवादाय प्रयत्नपरायणाः सन्ति। अन्यैरपि तस्य कृतयः ग्रन्थाः वा खण्डशः अनूदिताः सन्ति। तद्यथा- वर्तमानभारत-प्राच्य-पाश्चात्येत्याख्ययोः स्वामिनो मूलवङ्गीयग्रन्थयोः सीतानाथगोस्वामिकृतः संस्कृतानुवादः सुतरामुपपलभ्यते। विवेकानन्दस्य काव्यानि के. रामकृष्णवारियरवर्येण संस्कृतेन अनूदितानि। साम्प्रतम् आचार्येण बनमालिना बिश्वालेन विवेकानन्दस्य काव्यानि अनूदितानीति निश्चयेन हर्षस्य विषयः। विवेकलहरीति नाम्ना अनूदितानि एतानि विवेकानन्दस्य काव्यानि सर्वथा किमपि वैशिष्ट्यं वहन्ति।

प्रो.बिश्वालवर्यस्य छन्दोबद्धकाव्यानि मुक्तककाव्यानि बिम्बकाव्यानि कथासङ्ग्रहाश्च लसन्ति। अनेन केचन ग्रन्थाः अनूदिताः सन्ति। तेषु आचार्यस्य अरुणरञ्जनमिश्रस्य ओडियामूलस्य अनुवादो जन्मान्धस्य स्वप्नः इति कथासङ्ग्रहः, उषाउपाध्याय-विरचितस्य अरुन्धतिनु तारा इत्यस्य गुर्जरमूलकाव्यस्य तारा अरुन्धती - शीर्षकेण संस्कृत-काव्यानुवादः, विश्वकवेः रवीन्द्रनाथस्य डाकघर-नाटकस्य पत्रालयः - शीर्षकेण अनुवादश्च नितरां हृद्याः सन्ति। अधुना तस्य लेखनीस्पर्शेन विवेकलहरी-विवेककवितावलीति हिन्द्यां सूर्यकान्तत्रिपाठि-निराला-सुमित्रानन्दनपन्ताभ्यां कृतानुवादस्य साहाय्येन विवेकानन्दस्य समग्र-काव्यानि संस्कृते अनूदितानि सन्ति। एतेषु कानिचन काव्यानि संस्कृते प्रथमतः के.रामकृष्णावारियरवर्येण अनूदितानि सन्ति। अतः आदौ तावत्तस्य रामकृष्णवारियरवर्यस्य काव्यानुवादविषये किञ्चित् सूच्यते। 2011 तमे वर्षे एषः काव्यानुवादः **विवेकानन्दकाव्यामृतम्** इति शीर्षकेण रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयात् वेलुर-मठात् प्रकाशितः। रामकृष्णवारियरवर्येण स्वामिनो विवेकानन्दस्य 26 (4 वङ्गीय, 22 आङ्ग्ल) काव्यानामानुवादः कृतः। यथा - ईश्वरम् अन्विष्य, स्वतन्त्रस्य गानम्, अन्यथा गृहीतम्, समाप्तं मम खेलनम्, कोऽपि न दूषणीयः, चषकम्, मा विरम, हे धीरहृत, अकालकुसुमितं पाटलपुष्पं प्रति, जीवन् देवः, शान्तं विश्राम्यताम्, प्रबुद्धभारतं प्रति, जूलैमासस्य चतुर्थदिनं प्रति, आगता देवदूता अकस्मात्, शान्तिः, ममैव हृदयं प्रति, को जानाति कथं माता क्रीडति, त्वं धन्यस्वप्नः, आयुष्मती भव, सागरवक्षसि, सृष्टिः, समाधिः, सखायं प्रति, श्यामा नृत्यतु तत्र च, गायामि गानं त्वां श्रावयितुम्। एतानि काव्यानि आङ्ग्लमूलादनूदितानि वारियरवर्येण अनुष्टुब्भिः।

एतानि काव्यानि विवेकलहर्यां कवितावल्याञ्च संगृहीतानि सन्ति तानि सर्वाणि बनमाली बिश्वालेन संस्कृते मुक्तच्छन्दसा अनूदितानि। अतः छन्दोऽनुरोधेन रामकृष्णवारियरवर्येण कृतं शब्दपरिवर्तनं परिवर्धनञ्चात्र न दृश्यते। अत्र प्रो.बिश्वालेन अनूदितेऽस्मिन् काव्यसंग्रहे स्वामिनः विवेकानन्दस्य 31 काव्यानि अनूदितानि सन्ति। अत्र मूलतः 22 काव्यानि आङ्ग्लभाषया तथा 09 काव्यानि वङ्गभाषया आसन् येषामनुवादः विहितः। एतेषाम् आङ्ग्लकाव्यानि अत्यन्तं प्रेरणादायकानि इति सर्वे अनुवादाय यत्नं कृतवन्तः।

**नामकरणम्-**

अत्र लहरीपदमपि सर्वथा युज्यते यतो हि स्तोत्रकाव्यानां कृते लहरीति पदं शङ्कराचार्यस्य समयात् प्रसिद्धम्। तेन सौन्दर्यलहरीति नाना अभूतपूर्वं स्तोत्रकाव्यं विरचितम्। परवर्तिनि काले पण्डितराजस्य जगन्नाथस्यापि प्रसिध्यन्ति लहरी-काव्यानि गङ्गालहरी-यमुना-लहरी-सदृशानि। स्वामिनो विवेकानन्दस्य कवितासु दार्शनिकी भावभूमिः उपनिषच्चिन्तनधारा च विलसति। अतः विवेकलहरीति शीर्षकं सर्वथा औचित्यं वहति।

**हिन्द्या अनूदिता विवेकलहरी -**

स्वामिनो विवेकानन्दस्य कविताः इतः पूर्वं भाषान्तरेषु (हिन्द्यां) विवेकलहर्य्यां कवितावल्यां च प्रकाशिताः सन्ति। उभयत्र प्रायः समाना एव कविताः सन्ति। किन्तु कुत्रचिदनुवादकाः भिद्यन्ते। एतासाम् आङ्ग्ल-वङ्गीय-कवितानां संस्कृतानुवादः निरालोपनाम्नः सूर्यकान्तत्रिपाठिनस्तथा सुमित्रानन्दनपन्तस्य च हिन्दीकाव्यानुवादाधारेण कृतो विदुषा सम्पादकेन। अतः सर्वप्रथमं हिन्द्यनूदितायाः विवेकलहर्याः संस्करणानां संक्षिप्तः परिचयः प्रस्तूयते।

विवेकलहरीति नाम्ना प्रकाशितोऽयं संस्कृतानुवादः हिन्द्यनूदितायाः विवेकलहर्याः संवर्धित-तृतीय-संस्करणाधारेण निर्मितः। इतः पूर्वमस्य पुस्तकस्य शीर्षकं कवितावलीत्यासीत् यस्य प्रथम संस्करणं 1949 तमे वर्षे प्रकाशितमासीत् तथा 1964 तमे वर्षे तस्य परिवर्धितं संस्करणं प्रकाशितमभवत्। प्रथमे संस्करणे समाविष्टानाम् अधिकांश-काव्यानुवादः सुमित्रानन्दन-पन्तेन कृत आसीत् तथा अल्पांशश्च विनयमोहनशर्मणा कृत आसीत्। प्रस्तुते संस्करणे स्वामिनो विवेकानन्दस्य काव्यरचनानां हिन्दी-काव्यानामनुवादः निरालोपनाम्ना सूर्यकान्तत्रिपाठिना अथवा सुमित्रानन्दनपन्तेन कृतः।

अस्यां कवितावल्यां विवेकानन्दवर्यस्य कासाञ्चित् चितानां कवितानां हिन्द्यनुवादः सम्मिलितः। सूर्यकान्तत्रिपाठिना स्वामिनः आसां कवितानां हिन्द्यनुवादः कृतः तथा श्रीश्यामसुन्दरखत्रिमहोदयेन स्वामिनः The song of the Sanyasin इत्यस्याः कवितायाः। आभ्यां मित्राभ्यामेतदनुवादकार्यं सफलतापूर्वकं कृतम्। ताभ्यां मूल-कविताया भावस्तथा शैली च यथावत् स्थापिता।

अत्र स्वामिविवेकानन्दस्य सर्वासामुपलब्धकवितानां संस्कृतानुवादः सम्मिलितः। अत्रत्येषु चतुर्षु विभागेषु अद्वैताश्रमात्, मायावत्या प्रकाशिते

विवेकानन्दसाहित्ये समुपलब्धानां स्व.सूर्यकान्तत्रिपाठि-स्व.पं.सुमित्रानन्दन-पन्ताभ्यामनूदितानां क्रमशः अंग्रेजी-बांग्ला-हिन्दी-रचनानामनुवादः समाविष्टः। एतदतिरिक्तानां श्यामसुन्दरखत्री-डा.विनयमोहनशर्मभ्याम् अनूदितानां कवितानामनुवादोऽप्यस्मिन् पुस्तके सम्मिलितः।

यथा मूल-विवेकलहर्यां तथा अत्रापि चत्वारो भागाः कल्पिताः सन्ति। प्रथमे भागे आङ्ग्ल-कवितानां संस्कृतानुवादः तथा द्वितीये भागे च बङ्गीयकवितानां संस्कृतानुवादः स्थानितः। अधिसंख्याकानाम् आङ्ग्ल-कवितानां हिन्द्यनुवादः सुमित्रानन्दनपन्तेन कृतः। पक्षान्तरे अधिसंख्याकानाम् बङ्गीय-कवितानामनुवादः निरालोपनाम्ना सूर्यकान्त-त्रिपाठिना कृतः। किन्तु तृतीये भागे अत्र संस्कृतस्तोत्राणां स्थाने हिन्दीकवितानां संस्कृतानुवादः स्थापितः। हिन्द्यनूदितविवेकलहर्याः तुलनानाम् इदमेकं परिवर्तनं जातम्। तृतीयभागे संस्कृत-स्तोत्राणां स्थाने हिन्दी-कवितानां संस्कृतानुवादाः स्थानिताः। अत्र परिशिष्टात्मके चतुर्थभागे एव स्वामिना विवेकानन्देन रचितानां संस्कृत-स्तोत्राणां कृते स्थानं कल्पितमस्ति। अत्र प्रथमभागे स्थानितानाम् अधिसंख्यकानाम् आङ्ग्ल-कवितानाम् हिन्द्यनुवादः सुमित्रानन्दनपन्तेन कृतः कालीमातां विहाय। द्वितीयभागे समाविष्टानाम् अधिसंख्यकवङ्गीयकवितानां हिन्द्यनुवादः सूर्यकान्त-त्रिपाठी-निरालामहोदयेन कृतः, सृष्टि तथा शिवसंगीतम्-१ विहाय। संस्करणेऽस्मिन् संवर्धनरूपेण चतुर्थे विभागे श्रीरामकृष्णस्तोत्रम् 1-4, आमन्त्रणम्, तथा श्रीरामकृष्ण-वन्दनासदृश्यः संस्कृत-रचना अपि समाविष्टाः।

## कवितानां पृष्ठभूमिः –

हिन्दी-काव्यानूदितानां कवितानां शीर्षक-पृष्ठे पादटिप्पण्यां काव्यानुवादकस्य नाम तथा अन्यं तथ्यं च प्रदत्तमस्ति। इयं पाद-टिप्पणी कोलकातातः अद्वैताश्रमात् प्रकाशितात् 'दि कम्प्लीट वर्क्स आफ स्वामी विवेकानन्द' (अंग्रेजी) तथा कोलकातातः उद्बोधनकार्यालयात् प्रकाशितात् 'स्वामी विवेकानन्देर वाणी ओ रचना' (बंग्ला) इति ग्रन्थयोः स्वीकृता। अत्र क्रमशः वयमपि विवरणं करिष्यामः।

**सन्न्यासिनो गीतम्** – इति कविता 'The Song of the Sanyasin' इति आङ्ग्ल-कवितायाः संस्कृतानुवादः वर्तते, यस्य रचना कविवरेण स्वामिना १८९५ ईस्वी, जुलाई मासे न्यूयार्कस्य सहस्रद्वीपोद्याने (Thousand Island Park) कृतः। स्वामिजी १८९५ संवत्सरे सप्तसप्ताहं यावत् (१५ जून तः ७ अगस्त पर्यन्तं) सेंट-लारेंस-नदी-तटे अवस्थिते Thousand Island Park (सहस्र-द्वीपोद्याने) आश्रम-सदृशे निर्जन-स्थाने निवासं कृतवान्। तस्मिन् कालावधौ स्वशिष्यान् एकत्र सामूहिकरूपेण प्रेरणादीप्तमुपदेशं प्रदत्तवान् यः खलु परवर्तिकाले देव-वाणी-(Inspired Talks) शीर्षक-पुस्तक-रूपेण प्रकाशितः। एकेद्युः अपराह्णे त्यागस्य महिमानं, गैरिकान्तर्हितानन्दम्, आत्मस्वाधीनतां च विषयीकृत्य वदन् सहसा स्वामिवर्यः स्वकक्षं प्रविष्टः। यदा स बहिर्गतः तदा एकां

कवितां लिखित्वा आनयत्, तां स्वयं पाठित्वा अश्रावयत्। अस्यां कवितायां वेदान्तोक्तसाधनाजीवन्मुक्त्यादिविषयकतथ्यानि अपूर्वव्यञ्जनापूर्वकशैल्या अभिव्यक्तानि आसन्। एषा कविता परं ब्रह्मवादिन् नामिकायाम् अंग्रेजीपत्रिकायां द्वितीये अङ्के (सितम्बर १८९५) "The Song of the Sannyasin' शीर्षकेण प्रथमवारं प्रकाशिता। अस्य आङ्ग्लमूलं यथा-

Wake up the note! The song that had its birth
Far off, where worldly taint could never reach,
In mountain caves and glades of forest deep,
Whose calm no sigh for lust or wealth or fame
Could ever dare to break; where rolled the stream
Of knowledge, truth, and bliss that follows both.
Sing high that note, Sannyasin bold! Say:
"Om Tat Sat, Om!

स्वामिना शुद्धानन्देन एतस्याः आङ्ग्लकवितायाः वङ्गानुवाद एवं कृतः-

उठाओ सन्न्यासि, उठाओ से तान/ हिमाद्रिशिखरे उठिल ये गान-
गभीर अरण्ये पर्वत-प्रदेशे/ संसारेर ताप यथा नाइ पाशे
ये सङ्गीत ध्वनि प्रशान्तलहरी/ संसारेर रोल उठे भेद करि,
काञ्चन कि काम किम्बा यश आश / याइते ना पारे कभु यार पाश,
यथा सत्य-ज्ञान-आनन्द-त्रिवेणी /साधु यार नान करे धन्य मानि
उठाओ सन्न्यासि, उठाओ से तान/
गाओ गाओ गाओ, गाओ सेइ गान- ओं तत् सत् ॥1॥[1]

अस्य पद्यस्य सुमित्रानन्दन-पन्त-कृतो हिन्द्यनुवादो यथा-

छेडो हे वह गान अनन्तोद्भव अबन्ध वह गान,
विश्वताप से शून्य गह्वरों में गिरि के अम्लान
निभृत अरण्यप्रदेशों में जिसका शुचि जन्मस्थान,
जिनकी शान्ति न कनक-काम-यशोलिप्सा का निःश्वास
भङ्ग कर सका जहाँ प्रवाहित सत् चित् की अविलास
स्रोतस्विनी उमडता जिस में वह आनन्द अयास,
गाओ बढ वह गान, वीर संन्यासी! गुञ्ज व्योम-
ओम् तत् सत् ओम्।

अस्य पद्यस्य कवितावल्यामुपलब्धः हिन्द्यनुवादो यथा-

छेडो सन्यासी, छेडो छेडो वह तान मनोहर

---

[1] स्वामी विवेकानन्देर वाणी ओ रचना, सप्तमखण्ड, पृ. 307।

गाओ वह गान जगा जो अत्युच्च हिमाद्रि-शिखर पर
सुगभीर अरण्य जहाँ है पार्वत्य प्रदेश जहाँ हैं,
भव-पाप-ताप-ज्वालामय करते न प्रवेश जहाँ हैं,
जो संगीत-ध्वनि-लहरी अतिशय प्रशान्त लहराती
जो भेद् जगत् कोलाहल नभ अवनी में छा जाती,
धन-लोभ यशोलिप्सा या दुर्दान्त काम की माया
सब विधि असमर्थ हुई है छूने में जिसकी छाया,
सत् चित् आनन्द त्रिवेणी करती है जिसको पावन,
जिस में करके अवगाहन होते कृतकृत्य सुधीजन
छेडो, छेडो हाँ छेडो वह तान दिव्य लोकोत्तर
गाओ गाओ संन्यासी ! गाओ वह गायन सुन्दर
ओम् तत् सत् ओम्।

अस्यैव पद्यस्य वारीयर्-कृतः संस्कृतानुवादः अनुष्टुप्छन्दसा यथा -

स्वरं जागरय त्वं तु गानं जातं विदूरतः।
अशक्तं यत्र सम्प्राप्तुं लौकिकं दूषणं खलु॥१॥
सञ्जातं यत्तथा शैलदरीषु वनवर्त्मसु।
येषां प्रशान्ततां भक्तुमुत्साहेय कदाचन॥२॥
कामवित्तप्रसिद्धिभ्यो विहितं परिदेवनम्।
सञ्जातं यत्तथा यत्र ज्ञानसत्ये तथैव ते॥3॥
अनुगच्छन् प्रहर्षश्च सर्वदा प्रवहत्यपि।
गाय हे धीर सन्यासिन् त्वमुच्चैरेव तत् स्वरम्।४।
तथैव कथ्यतामेवम् ओं तत् सत् ओमिति त्वया।

एतस्यैव पद्यस्य श्रीबिश्वालकृतः संस्कृतानुवादो द्विधा सन्निवेशितः विवेकलहरी-कवितावल्याधारेण। तत्र च विवेकलहर्याः संस्कृतानुवादो यथा -

सारय तज्गानम्, अनन्तोद्भवमबन्धञ्च तज्गानम्,
विश्वताप-शून्य-गह्वरेषु गिरेरम्लानम्
निभृतेऽरण्यप्रदेशे च शुचिभूतं यस्य जन्मस्थानम्,
यस्य शान्तिर्न कनक-काम-यशोलिप्सानां निःश्वासः
भक्तुं प्राभवच्च यत्र प्रवाहितः सच्चितोरविलासः
स्रोतस्विनी मदमत्ता यत्र स चानन्दोऽनायासः,
गाय संबर्धय च तज्गानम्, वीर संन्यासिन् ! गुञ्जदस्ति व्योम्नि-
ओम् तत् सत् ओम्।

कवितावल्याधारेण संस्कृतानुवादो यथा -

सारय सन्यासिन्, सारय सारय तच्च तानं मनोहरम्,

गाय तज्गानं जागरितं यदत्युच्च हिमाद्रिशिखरम्
सुगभीरमरण्यं यत्रास्ति, यत्रास्ति च पार्वत्यप्रदेशः
भव-पाप-ताप-ज्वालामयान्यपि न कुर्वन्ति यत्र प्रवेशम्,
संगीत-ध्वनि-लहर्यो याश्च सन्त्यतिप्रशान्तास्तरङ्गायिताः
सम्भिद्य जगत्कोलाहलं याश्च सन्त्यवन्यां नभसि च व्याप्ताः,
धन-लोभो यशोलिप्सा या च दुर्दान्त-काम-माया
सर्वोऽपि विधिरसमर्थोऽभवत् स्प्रष्टुं च यस्य छायाम्,
सच्चिदानन्द-त्रिवेणी करोति यच्च पावनम्,
कृत-कृत्याः भवन्ति सुधीजनाः यत्र च कृत्वाऽवगाहनम्,
सारय, सारय, नु सारय तत्तानं दिव्यञ्च लोकोत्तरम्,
गाय गाय संन्यासिन्! गाय तज्गानं सुन्दरम् -
ओम् तत् सत् ओम्॥[2]
अपरं पद्यं यथा-
Strike off thy fetters! Bonds that bind thee down,
Of shining gold, or darker, baser ore;
Love, hate-good, bad-and all the dual throng,
Know, slave is slave,caressed or whipped,not free
For fetters,though of gold,are not less strong to bind
Then off with them, Sannyasin bold! Say-
'Om Tat Sat, Om!'
वारियरवर्यस्य संस्कृतानुवादः इत्थं वर्तते-
उच्छिन्धि शृङ्खलास्तास्त्वं वध्नन्ति त्वां तु या दृढम्॥५॥
भास्वत्स्वर्णेन वा श्यामधातुना या विनिर्मिता।
स्नेहश्चापि घृणाभावः शुभं वाऽप्यशुभं तथा॥६॥
यत्किञ्चिद्भवति द्वैधं तत् सर्वं सम्मिलत्यपि।
दासस्तु दासो भवति लालितस्ताडितोऽथवा॥७॥
निर्मिताः काञ्चनेनापि शृङ्खला बन्धनक्षमाः।
तथैव कथ्यतामेवं ओं तत् सत् ओमिति त्वया॥8॥

श्रीएन्.एन्.भीडेवर्येणापि इयं कविता[3] अनूदिता आसीत् या खलु शारदायाः 1970 संवत्सरे जनवरीमासाङ्के प्रकाशिता। यथा-
रुन्धानान्निर्धुनु त्वं लघु निज-निगडानायसान्वाऽथ हैमान्
प्रीतिद्वेषस्तथा वा सुखमसुखमिति द्वन्द्वरूपं हि सर्वम्।

---

[2] विवेकलहरी, पृ.68।
[3] शारदायाः 1970 संवत्सरे जनवरीमासाङ्के, पृ. 25।

दासः प्रीतोऽपि दासः कथमपि न भवेन्मुक्त एष स्वपाशान्
धुन्वन् ॐ तत्सत्सदोमित्यभयमिह यतिन् गर्ज जीमूतधीरम्॥
अस्य पद्यस्य सुमित्रानन्दन-पन्त-कृतो हिन्द्यनुवादो यथा-
तोडो सब श्रृङ्खला, उन्हें निज जीवन बन्धन जान।
हों उज्ज्वल काञ्चन के अथवा क्षुद्र धातु के म्लान।
प्रेम-घृणा, सद् असद् सभी ये द्वन्द्वों के सन्धान।
दास सदा ही दास, समादृत वा ताडित परतन्त्र।
स्वर्ण-निगड होने से क्या वे सुदृढ न बन्धन-यन्त्र।
अतः उन्हें संन्यासी। तोडो छिन्न करो, गा यह मन्त्र -
ओम् तत् सत् ओम्।
श्रीबिश्वालकृतः विवेकलहर्याधारितः संस्कृतानुवादो यथा -
त्रोटय सर्वांश्च तान् श्रृङ्खल-बन्धान्
ज्ञात्वा तान्निज-जीवन-बन्धान्।
भवेदौज्ज्वल्यं काञ्चनस्य क्षुद्रधातोराहोस्विन् म्लानानि।
प्रेम-घृणाः, सदसद्वा सर्वाण्यत्र द्वन्द्व-सन्धानानि।
दासः सदैव भवेद्दासः समादृतो वा ताडितः परतन्त्रः।
स्वर्ण-परिवेष्टितश्चेत् किं न तत् सुदृढं बन्धन-यन्त्रम्।
अतः हे सन्न्यासिन्! त्रोटय ताः छिनत्स्व, गाय चैतं मन्त्रम् -
ओम् तत् सत् ओम्॥[4]
अस्य पद्यस्य कवितावल्यामुपलब्धः हिन्द्यनुवादो यथा-
तोडो जंजीर जिन से जकडे हैं पैर तुम्हारे
वे सोने के हैं तो क्या कसने में तुमको हारे,
अनुराग-घृणा-सङ्घर्षण उत्तम वा अधम विवेचन
इस द्वन्द्वभाव को त्यागो, हैं त्याज्य उभय आलम्बन,
पारतन्त्र्य का आदर गुलाम पाये कोडों की मार खाये,
वह सदा गुलाम रहेगा, कालिख का-तिलक लगाये
स्वातन्त्र्य किसे कहते हैं, वह जान नहीं है पाता।
स्वाधीन सौख्य जीवन का उसकी न समझ में आता,
त्यागो सन्न्यासिन्! त्यागो तुम द्वन्द्वभाव को सत्वर
तोडो श्रृङ्खल को तोडो, गाओ यह गान निरन्तर -
ओम् तत् सत् ओम्।
कवितावल्याधारेण बिश्वालवर्यस्य संस्कृतानुवादो यथा -

[4] पृ.63।

त्रोटय शृङ्खलाश्च ताः, पादास्ते याभिर्बद्धाः
ताः काञ्चनमय्यश्चेत्तेन किं, बद्धुं किं तास्त्वां हारिताः,
अनुराग-घृणा-सङ्घर्षणानि उत्तममधमं वा विवेचनम्
त्यज त्वमिमं द्वन्द्वभावं त्याज्यञ्चोभयमालम्बनम्,
पारतन्त्र्यस्य प्राप्तमादरं प्रग्रहस्य खादितं प्रहारम्,
स्थास्यति सदा सः दासः, धारयित्वा कृष्ण-तिलकधारम्
किमुच्यते स्वातन्त्र्यं, न ज्ञातुं प्रभवेत्सः
स्थास्यति सदा सः दासः, धारयित्वा कृष्ण-तिलकधारम्
किमुच्यते स्वातन्त्र्यं, न ज्ञातुं प्रभवेत्सः
स्वाधीनं सौख्यं जीवनस्य तन्नायात्यवबोधे तस्य,
त्यज सन्न्यासिन् ! त्यज त्वं द्वन्द्वभावं सत्वरम्
त्रोटय ताश्च शृङ्खला त्रोटय, गाय तज्गानं निरन्तरम् -
ओम् तत् सत् ओम्॥[5]

**यथा सन्न्यासिनो गीतम् इत्यस्य अन्तिमाः पङ्क्तयः-**
**अभयदानं सर्वेभ्यो दद, सन्त्वत्र शान्तिमयाः सुखमयाश्च सर्वे**
**किञ्चिदपिभयं क्वचिन्मत्सकाशात्प्राणिभ्यो न भवेत्,**
**पृथ्व्यां पाताले गगने चैव आत्माऽस्ति चिरसंस्थितः**
**आशां भयं स्वर्गं नरकञ्च त्यक्तवानहमशङ्कितः,**
**कर्तय, कर्तय, कर्तयत्वमेतज्विधि माया-बन्धनं**
**निःशङ्कमाप्राणोद्यमेन त्वं नु गाय एतज्गानम्- ओम्तत्सत् ओम्॥**

**काली माता** - द्वितीया कविता काली माता 'Kali : The mother' इति आङ्ग्ल-कवितायाः संस्कृतानुवादरूपास्ति। अस्याः कवितायाः रचना १९९८ संवत्सरे सितम्बरमासे कश्मीरे श्रीनगरे स्वामिना श्रीअमरनाथस्य दर्शनात् परं तथा श्रीक्षीरभवानीदेव्याः दर्शनात् पूर्वं विहिता। भगिनीनिवेदिताविरचिते 'मास्टर ऐज आई सा हिम' (Master as I saw him) ग्रन्थे क्षीरभवानी इति अध्यायानुसारेण अमरनाथस्य दर्शनात् परं स्वामिनः भावजगति जगन्मातुः ध्यानं निरन्तरं प्रचलति स्म। अस्मिन् प्रसङ्गे एकदा स्वामिना उक्तमासीत्- यत् तस्य मस्तिष्कम् असंख्यभावैः आच्छन्नं वर्तते। यावत् स तान् लिपिबद्धान् न करोति तावत् स उद्वेगरहितः न भविष्यति। तद्दिने सान्ध्यभ्रमणस्य पश्चात् यदा निवेदितया सह अन्यसदस्याः प्रत्यागताः, तदा अस्याः कवितायाः हस्तलिपिः लब्धा। परन्तु तत्र स्वामिजी निश्चेतनावस्थायां भूमौ पतितः आसीत्। तदा अतितीव्रदिव्यप्रेरणाजन्यभावावेगैः कवितां रचयित्वा परिश्रान्तः स्वामी भूमावेव

[5] पृ.69।

शयानः आसीत्। "कालीमाता" इति कवितायामादौ मूलानुसारिशब्दानुवादः जातः। मूले उक्तम्-

The stars are blotted out,
The clouds are covering clouds,
It is darkness vibrant sonant,
In the roaring whirling wind.
Dancing mad with joy,
come, mother come.

तस्य के.रामकृष्णवारियरमहोदयेन कृतः संस्कृतानुवादो यथा-

तारकाः मार्जिताः सन्ति, मेघा मघैः समावृताः।
तमिस्रा कम्पमानास्ति तथा शब्दकरी च सा॥
हर्षेण वातुला सन्ती कुर्वन्ति चापि नर्तनम्।
समागच्छन्तु हे मातः समागच्छन्तु सत्त्वरम्॥

बिश्वालवर्यस्य संस्कृतानुवादो यथा –
विलुप्तास्तारकाः गगने/मेघश्चारोहति मेघः,
कम्पामानश्च घनोऽन्धकारः,
गर्जत्सु चक्रवातेषु/शतं लक्षश्चोन्मत्तप्राणाः मुक्ताः
शीघ्रमेव कारागात्/द्रुमांश्चोत्पाट्य समूलान्
परिष्कृत्य च मार्गस्य प्रत्येकमवरोधम्।
सशब्दमागत्यामिलत् सागरः, परावर्तनैश्च शिखर-तरङ्गाः
उत्तिष्ठन्ति कृष्ण-नभः/स्पष्टुमेव पुनर्वृतम्,
किरणान्यमङ्गलानां/मोचयन्ति यथा सर्वाभ्योऽपि दिग्भ्यः,
मृत्युच्छायाः सहस्रशः/ घनाः कृष्णाः देहगताश्च ताः।
आधि-व्याधीर्विकीरन्ती/नृत्यत्यत्रोन्मत्ता प्रसीद्य
आगच्छ जननि ! आगच्छ जननि ! आगच्छ आगच्छ !!
नाम ते आतङ्कम्/अस्ति पुनर्मृत्युस्तव श्वासे
सततमुत्थाय चरणौ/विश्वमेकं लोपयति,
समयस्त्वमसि, सर्वनाशिन्यपि
आगच्छ जननि ! आगच्छ जननि !! आगच्छ, आगच्छ !!
स एव साहसी, यो वाञ्छति दुःखं,
मिलेत् पुनर्मरणेन, नृत्यत्यत्र विनाशस्य गतिः/
तत्समीपे माता ह्यागताऽस्ति॥[6]

[6] पृ.75-76।

**अज्ञातो देवदूतः-** तृतीया कविता अज्ञातो देवदूतः 'Angels Unawares' इति आङ्ग्ल-कवितायाः संस्कृतानुवादरूपास्ति। १८९८ ईशवीयसंवत्सरे नवम्बरमासे कोलकत्तायां रचितायामस्यां कवितायां स्वामिनः जीवनस्य घातप्रतिघातादि-जन्यानुभवानां सङ्केताः सन्ति।[7]

**जाग्रती देवता-** १८९७ ईशवीयसंवत्सरे जुलाईमासे नवमदिनाङ्के स्वामिना अल्मोडातः कुमारीं मेरीहेलं प्रति अंग्रेजीभाषया लिखितपत्रस्य अंशः 'The Living God' इति कवितारूपेण प्रकाशिता। संग्रहस्था चतुर्थी कविता 'जाग्रती देवता' तस्याः आङ्ग्ल-कवितायाः संस्कृतकाव्यानुवादः वर्तते। यथा-

योऽस्ति त्वयि तथा त्वदतीतः,
साधयति कार्यं यश्च /सर्वेषां नु हस्तेषूपविश्य,
सर्वेषां पादेषु यश्च /प्रचलति नित्यं समाहितः,
वर्ततेऽपि सर्वेषां यो घटेष्वपि व्याप्तः,
कुरुष्व त्वं तस्य समाराधनम्,
त्रोटय तास्तदन्याः प्रतिमाः।
यो वर्तते समकालमुच्चैस्तथा नीचैरपि पुनः,
पापी वा महात्मा पुनः /ईश्वरो वा निकृष्टो वा कीटः,
वर्तन्ते ते समकालमेव, पूजनं कुरु तस्यैव -
यश्च दृश्यमानः, ज्ञेयोऽपि सः, सत्यञ्च तत्, सर्वव्यापी स च,
सर्वाश्चान्याः प्रतिमास्त्रोटय।
यश्चातीत-जीवन-विमुक्तः /भविष्यतोर्जन्म-मरणयोः
परेऽप्यस्ति यश्च, यत्रास्माकं स्थितिः
वयं यत्र सदाऽवस्थास्यामः /आराधनां कुरु तस्य
सर्वाश्चान्याः प्रतिमास्त्रोटय।
अये मूढ, जाग्रतायाः देवताया उपेक्षां न कुरु,
तस्यानन्त-प्रतिबिम्बैरेव विश्वमिदं पूर्णम्।
काल्पनिकच्छायानां त्वं पश्चान्नैव धाव
विग्रहेषु तेषु युष्मान्निक्षिपति या च ,

---

[7] द्र.श्रीरामकृष्णलीला-प्रसङ्ग - दिव्यभाव और नरेन्द्रनाथ, अष्टम अध्याय, प्रथम पाद)। परवर्ती काल में श्रीमती मृणालिनी वसु को लिखित स्वामी जी के पत्र (दिनांक२३, दिसंबर १९००) का अंश भी इस प्रसंग में स्मरणीय है - 'जब हृदय में महा यातना उपस्थित होती है, चारों ओर दुःख-रूपी आँधी आती है, तब लगता है कि इस यात्रामें प्रकाश नहीं देख पाऊँगा, जब आशा भरोसा आदि सब प्रायः छूटे - छूटे लगते हैं- तभी इस महा आध्यात्मिक संकट में से अन्तर्निहित ब्रह्मज्योति स्फूर्ति पाती है (तुल.- २३ मई, १८९३ को स्वामी जी का पत्र) सर्वमपि उद्धृतं विवेकलहरी,पृ.48-9।

उपासनां कुरु तस्य प्रभोः परमस्य /पश्यन्नसि यं समक्षं,
सर्वाश्चान्याः प्रतिमास्त्रोटय॥[8]

**स्वर्गीयस्वप्नः-** इति कविता १९०० ईशवीयसंवत्सरे अगस्तमासस्य १७ दिनाङ्के स्वामिना पेरिसतः भगिनीं क्रिस्टीन-ग्रीनस्टाइलं प्रति लिखितकवितायाः 'Blessed Dream' इत्यस्याः आङ्ग्ल-कवितायाः संस्कृतकाव्यानुवादः अस्ति। १९०० ईशवीयसंवत्सरे २६ दिसम्बरे स्वामिना बेलूडमठात् कुमारीं जोसेफाइन-मेक्लाउडं प्रति प्रेषिते अंग्रेजीपत्रे कवितायाः काश्चन पङ्क्तयः लिखिताः याः 'The light' शीर्षकेण कवितारूपेण प्रकाशिताः। प्रस्तुता कविता '**प्रकाशः**' इति तासां संस्कृतकाव्यानुवादः वर्तते। अग्रिमा कविता '**अकालकुसुमितं वायलेटं प्रति**' स्वामिना, १८९६ ईशवीयसंवत्सरे जनवरीमासे षष्ठदिनाङ्के न्यूयार्कतः एकां पाश्चात्यशिष्यां प्रति लिखितायाः 'To an early violet' इति आङ्ग्ल-कवितायाः संस्कृतानुवादोऽस्ति। वायलेट-पुष्पं पाश्चात्यदेशे वसन्ते ऋतौ प्रस्फुटति। शीत-काले यदि प्रस्फुटति तर्हि तुषारशीत-जलवायुना संग्रामः करणीयः भवति। एवं शीतकालीनदिवसे प्रस्फुटितस्य वायलेट-पुष्पस्य चित्रकल्पनायाम् अवलम्बितायां विशेषभावभूमौ विरचिता एषा कविता पाठकैः आदृता वर्तते।

परवर्ती कविता '**तस्मै शान्त्या विश्रामो मिलेत्**' १८९८ ईशवीयसंवत्सरे जूनमासे श्री.जे.जे.गुडविनवर्यस्य स्मृतौ स्वामिना अल्मोडातः लिखितायाः 'Requiescat in Peace' आङ्ग्ल-कवितायाः संस्कृत-काव्यानुवादः वर्तते। ग्रीष्मकाले हिमालये परिचितैः सह भ्रमणरतः स्वामिजी १८९८ ईशवीयसंवत्सरे जूनमासे तृतीयदिनाङ्के शुक्रवारे समाचारं प्राप्तवान् यत् १८९८ जून द्वितीयदिनाङ्के रात्रौ तस्य दक्षिणहस्तस्वरूपः विश्वस्तः आशुलिपिकः शिष्यश्च श्रीजे.जे.गुडविनः दिवङ्गतः। मर्माहतः स्वामिजी गभीरशोकं विज्ञाप्य गुडविन-मातरं तथा समाचार-पत्रं प्रति जून १८९८ एकं परिच्छेदं प्रेषितवान्, तेन सह एषा कविता अपि आसीत्। आशुलिपिकस्य गुडविनस्य कारणात् स्वामिनः व्याख्यानानि ग्रन्थाकारेण सुरक्षितानि।[9]

अनन्तरं कविता '**मम क्रीडा समाप्ता**' १८९५ ईशवीयसंवत्सरे वसन्ततौं न्यूयार्के लिखितायाः 'My Play is done' इत्यस्याः आङ्ग्ल-कवितायाः संस्कृतानुवादः अस्ति। अस्याः तुलना जोसेफाइन्-मेक्लाउडं प्रति १९९० ईशवीयसंवत्सरे अप्रैलमासे १८ दिनाङ्के लिखितेन पत्रेण कर्तुं शक्यते।

तदनु कविता 'एकः रोचक-पत्रव्यवहारः' अत्यन्तमहत्त्वपूर्णाऽस्ति या 'An interesting letter Correspondence/ The song of the

---

[8] पृ. 82-83।
[9] निवेदिता-रचितग्रन्थस्य 'Notes on some wandering etc' इत्यस्य तृतीये अध्याये उक्तम्।

Free' कवितानुवादः वर्तते। अस्य पत्रव्यवहारस्य यथार्थं ज्ञातुं पत्रप्रसङ्गः, पारस्परिकसम्बन्धश्च ज्ञातव्योऽस्ति। प्रथमपत्रारम्भे स्वामी पत्रव्यवहारं प्रताडनमिति उल्लिखति। वस्तुतः १८९५ ईशवीयसंवत्सरे फरवरीमासे प्रथमदिनाङ्के स्वामिना स्वभूमिका समर्थिता। एकस्य संन्यासिनः स्वाभाविकं तेजस्वितापूर्णमिदं पत्रम् अतीव सुन्दरं वर्तते। वस्तुतः रोचक-पत्र-व्यवहार-पठनात् पूर्वमस्य पठनमावश्यकम्। कुमारीमेरीहाल इत्यस्याः पितरौ स्वामिना 'फादर पोप' तथा 'मदर चर्च' इति सम्बोधितौ। तयोः द्वे कन्ये तथा द्वे भागिनेय्यौ एवं चतस्रः भगिन्यः समानाः आसन्, ताः स्वामिनि अपि श्रद्धां स्नेहं च कुर्वन्ति स्म। स्वामिनः सर्वोत्तमपत्राणि ताभ्यः प्रहितानि। अत्र रोचक-पत्रव्यवहारे स्वामिनः एकं नूतनं रूपं दृश्यते यत् न केवलं मानवीयभावैः पूर्णं किन्तु तस्य विनोदप्रियं व्यक्तित्वमपि चित्रयति। अपिच स्वजीवनस्य केन्द्रीयभावः ब्रह्म-ज्ञानपूर्णरूपेण अवस्थितः वर्तते। अस्य पत्र-व्यवहारस्य प्रथमपत्रं १८९५ ईशवीयसंवत्सरे फरवरीमासस्य पञ्चदशदिनाङ्के न्यूयर्कतः लिखितम्। प्रथमस्तवकत्रयं विहाय इदम् अन्यग्रन्थेषु 'जीवन्मुक्तस्य गानम्' अथवा 'The song of the free' इति कवितारूपेण प्रकाशितम्। परन्तु अस्य सम्पूर्णपत्र-व्यवहारस्य अनुवादः अत्र संस्कृतभाषया कृतोऽस्ति। अत्र एकत्र ल्योन इत्यस्य चर्चा भवति। जन्मना भावैश्च रूसी यहूदी तत्पश्चात् अमेरिकन-नागरिकः ल्योनलैंडसवर्गः स्वामिनः शिष्यः आसीत्। स स्वामिनः प्रचार-कार्ये सहायतां करोति स्म। स थाउजेंड-आईलैंड-पार्के अपि स्वामिनः सत्सङ्गे स्थितः। तत्र स्वामी तं सन्न्यासेन दीक्षितं कृत्वा स्वामी कृपानन्दः इति नाम दत्तवान्।

ततः कविता **प्रबुद्धं भारतं प्रति** 'Awakened India' इति आङ्ग्ल-कवितायाः संस्कृतानुवादोऽस्ति। १८९८ ईशवीयसंवत्सरे अगस्तमासे 'प्रबुद्धभारत' नामिका पत्रिका मद्रासतः, स्वामिना संस्थापितसंघस्य हस्ते मायावतीम्, अल्मोडायां स्थानान्तरिता। अस्मिन् अवसरे तेन 'To the Awakened India' नामिका कविता लिखिता। तेषु दिनेषु स्वामिजी प्रतिदिनं स्वामिनः स्वरूपानन्दस्य सम्पादकत्वेन प्रकाशोन्मुखिनीं 'प्रबुद्धभारत' इति पत्रिकायाः प्रथमसंख्यासम्बन्धे वार्तालापं करोति स्म। एकदा अपराह्णे यत्र निवेदितादयः उपविष्टाः आसन्, तत्र स्वामिवर्यः कर्गजखण्डं नीत्वा आगतः, तत्र पत्रं लिखन् स इमां कवितामेव प्रस्तुतवान्। एषा एव 'To the Awakened India' नामिका कविता वर्तते।[10]

ततः कविता '**चषकः**' 'The Cup' इस आङ्ग्ल-कवितायाः

---

[10] भगिनीनिवेदितायाः Notes of some Wanderings नामकग्रन्थात् Life at Shrinagar इति सप्तमपरिच्छेदात् स्वीकृतम्।

अनुवादरूपा। कवितेयं वीरं भक्तं प्रति जीवन-देवतायाः वाणी वर्तते। कविता '**जुलाई चतुर्थीं प्रति**' 'To the Fourth of July' इति आङ्ग्ल-कवितायाः अनुवादः १९०२ ईशवीयसंवत्सरे जुलाई ४ दिनाङ्के स्वामिनः विवेकानन्दस्य महासमाधिः अभवत्। १८९८ईशवीयसंवत्सरे जुलाईमासे चतुर्थदिनाङ्के यदा अमेरिका-स्वातन्त्र्य-घोषणा-दिवसस्य जयन्ती पाल्यते स्म तदा स्वामिमहोदयः पाश्चात्यशिष्यैः सह काश्मीरे पर्यटति स्म। तदा प्रातः जलपानसमये कौतुकपूर्णे अवसरे वाचयितुं सः 'To The Fourth July' नामिकां कवितां व्यरचयत् या धीरामातुः अथवा स्थिरामातुः (Mrs.ole Bull) समीपे सुरक्षिता आसीत्।[11]

तथैव 'Who knows how the mother plays' इति आङ्ग्ल-कवितायाः संस्कृतानुवादोऽस्ति '**को वा जानाति मातुर्लीलाम्**' इति। परवर्तिनी कविता '**धैर्यं धारय मनाक् अये वीर हृदयम्!**' खेतडी-महाराजम् अजीतसिंहं प्रति लिखितायाः 'Hold on yet a while Brave Heart' आङ्ग्ल-कवितायाः संस्कृतानुवादः वर्तते। तस्य मा विरम हे धीरहृत् इति शीर्षकेण के.रामकृष्णवारियरमहोदयेन कृतः संस्कृतानुवादो यथा-

All blessings pour on thee, great soul
To thee may all come right.
आशीर्वादाः समस्ताश्च प्रवहन्ति तवोपरि,
जानीहि त्वं हे महात्मन्, विना कमपि संशयम्।
तव सम्यग् भवेत् सर्वमवलम्बस्व धीरताम्॥

यद्यपि विवेकानन्दकृतकवितायाः संस्कृतानुवादः न सुकरः, तथापि रामकृष्ण-वारियर्-महोदयस्य एतादृशं दुःसाध्यं प्रतिभासाध्यं च कार्यम्। समग्रोऽनुवादोऽनुष्टुपछन्दसि वर्तते।

तथैव कविता '**मङ्गलाशिषः**' १९०० ईशवीयसंवत्सरे सितम्बरे २२ दिनाङ्के लिखितायाः 'A Benediction' इति आङ्ग्ल-कवितायाः संस्कृतानुवादः अस्ति। ततः कविता '**कस्मै दोषं दद्याम्**' १८९५ईशवीयसंवत्सरे मईमासे १६ दिनाङ्के लिखितायाः 'No one to Blame' इत्यस्याः आङ्ग्ल-कवितायाः अनुवादोऽस्ति। एवं '**स्वकीयमात्मानं प्रति**' न्यूयार्कनगरे रिजलीमैनर इत्यत्र १८९९ संवत्सरे रचितायाः 'To my own Soul' आङ्ग्ल-कवितायाः तथा 'अन्वेषणम्' 'The Search' आङ्ग्ल-कवितायाः संस्कृतानुवादरूपास्ति। शिकागो-विश्वधर्मसम्मेलने स्वामिनः परिचयं कारयितारं बोस्टनवासिनं प्राध्यापकं जे.एच.राइट-महोदयं प्रति १९९३ ईशवीयसंवत्सरे सितम्बर चतुर्थदिनाङ्के स्वामिना अंग्रेजीलिखितपत्रेण सह प्रेषिताः अस्याः कवितायाः

[11] तत्रैव।

काश्चन पङ्क्तयः The Search इति शीर्षकेण कवितारूपेण प्रकाशिताः। प्रस्तुता कविता तासाम् पङ्क्तीनामनुवादरूपास्ति। अत्र प्रयुक्तं 'तत् सत्' इत्यस्य तात्पर्यं – तत् सत्स्वरूपं वर्तते। स्वामी विवेकानन्दः स्वटिप्पण्यामवदत् - Tat sat means : That only real Existence. 'शान्तिः' शीर्षकाङ्किता कविता १८९९ ईशवीयसंवत्सरे न्यूयार्के रिजलीमैनरे लिखितायाः 'Peace' आङ्ग्लकवितायाः संस्कृतानुवादः वर्तते। द्वितीयवारं स्वामिनः पाश्चात्यभ्रमणसमये, न्यूयार्के श्रीलेगेटवर्यस्य गृहे 'रिजलीमैनर' इत्यत्र एकदा भगिनी निवेदिता निर्जनसाधनार्थम् इष्टवती, स्वामिनः सम्मत्या। एकदा भ्रमणस्य पश्चात् प्रत्यागता निवेदिता अपश्यत् स्वामिवर्यः तं शुभसंकल्पं लक्ष्यीकृत्य इमां कवितामरचयत्। परवर्ती कविता - 'निर्वाण-षट्कम्।' श्रीशङ्कराचार्यस्य निर्वाणषट्क-स्तोत्रस्य आंशिकानुवादः स्वामिना Six stanzas on Nirvana नामककवितारूपेण विहितः। तस्यायं संस्कृतानुवादः। १८९४ संवत्सरे ग्रीष्मकालीन-जुलाई-अगस्त-मासयोः ग्रीनेकरे, स्वामीजी प्रतिदिनं प्रातः प्रवचनं करोति स्म। तत्र इयं कविता श्राविता या Greenacre Voice इत्यत्रापि प्रतिवेदिता।[12] प्रथमविभागे अन्तिमा कवितास्ति सृष्टिगानम् 'The hymn of Creation' इत्यस्य संस्कृतानुवादरूपा। प्रबुद्धभारत- कार्यालयात्, अद्वैताश्रमात्, मायावतीतः (बरास्ता, अल्मोडा), स्वामिजी श्रीमती ओली बुलं प्रति १९०१ संवत्सरे जनवरीमासस्य षष्ठे दिनाङ्के लिखितपत्रेण सह नासदीयसूक्तस्य (ऋग्वेद १०.१२९.१-७) अंग्रेजी-अनुवादः 'The hymms of Creation' शीर्षकेण प्रेषितः, अयं तस्य संस्कृतानुवादः।

विवेकलहर्याः द्वितीयभागे बाङ्ला-कवितानां संस्कृतानुवादः स्थानितः वर्तते। अत्रत्या प्रथमा कविता '**सखायं प्रति**' 'सखार प्रति' इति बाङ्ला-कवितायाः संस्कृतानुवादः वर्तते। अत्र प्रयुक्तरोदनशब्दस्य आशयः अस्ति यत् – रोदनमेव शिशोः अस्तित्वस्य प्रमाणम् (अर्थात् अत्र दुःखमेव जगतः परिचयः) है, तत्र बुद्धिमान् कदापि सुखस्य आशां न करोति। 'गायाम्यहं गीतं त्वाञ्च श्रावयितुम्' इति गीतं 'गाई गीत शुनाते तोमाय' इति बाङ्ला-कवितायाः संस्कृतानुवादः अस्ति। १८९० संवत्सरे जनवरी २४ तः १० मई पर्यन्तं परिव्राजकरूपेण गाजीपुरे अवस्थान-समये स्वामिना सिद्धयोगिनः पवहारीबाबा इत्यस्य समक्षं योगशिक्षा-प्राप्तिनिमित्तम् इच्छां प्राकाटयत्। एकस्यां गम्भीररात्रौ स तस्य समीपे प्रस्तुतः भवति स्म तदा सहसा दिव्यालोकेन उद्भासिते कक्षे श्रीरामकृष्णं दृष्टवान्। दिनात् परं दिनं तथैव दर्शन-लाभात् योगशिक्षा-

[12] Swami Vivekananda in the West : New Discoveries, vol. 2, pp. 149-50, Arena October, 1899, P.499 तथा Complete works of Swami Vivekananda, vol.IX PP. 267-70, pp.470-71.

प्राप्तिसम्बन्धे स्वामिजी मनः परिवर्तितवान्। तदा तेन निश्चयः कृतः – कस्यापि समीपे न गन्तव्यम्। ततः परं रचितेयं कविता। अत्र स्वामिनः तत्कालीना अव्यक्तवेदना प्रस्फुटिता। यथा- 'गाइ गीत शुनाते तोमाय' इति वङ्गमूलककवितायाः वारियरवर्यस्य संस्कृतानुवादः इत्थं वर्तते- **गायाम्यहं गीतमेकं त्वां श्रावयितुमुद्दिशन्।**

**शुभं वाऽशुभमित्येदहं न गणयाम्यपि॥1॥**
**लोकनिन्दा प्रशंसा वा गण्यते न मया तथा।**
**अहं भवामि युवयोर्द्वयोर्दासो यथार्हतः॥2॥**
**शक्त्या सह प्रणमामि त्वदीयचरणावहम्।**
**तिष्ठसि त्वं सदाकालं मम पृष्ठभुवि स्थिरम्॥3॥ ....**
**पुत्रोऽहं तव, कोऽन्यस्तु सहेयैतां प्रगल्भताम्।**
**मम प्रभु त्वं भवसि तथा प्राणसखी मम ॥ 16॥ ....**
**अनन्तविस्तृताकाशो मनसा सर्वमीक्ष्यते।**
**कामक्रोधौ तथा लोभमोहादिकमशेषतः॥23॥**
**यतस्तरङ्गलीलैषा समुद्भूतास्ति मूलतः।**
**विद्यायाश्चाप्यविद्याया वासस्थानं यदस्ति च॥ 24॥**
**जननं जरा जीवनं मरणं सुखदुःखयोः।**
**यस्य द्वन्द्वस्य केन्द्रं तु भवत्यहमहंमतिः॥25॥...**
**शक्तिरूपोऽप्यहं न्वस्मि खेलामि मम मायया।**
**एकोऽहं भवाम्यनेको मम रूपं समीक्षितुम्॥63॥**[13]

सूर्यकान्त-त्रिपाठि-कृतो हिन्दी-अनुवादो यथा-
गाता हूँ गीत मैं तुम्हें ही सुनानेको / भले और बुरे की
लोकनिन्दा यशकथा की/नहीं परवाह मुझे/
दास हूँ तुम दोनों का,
सशक्तिक चरणों में प्रणाम हे तुमारे देव॥ (विवेकलहरी)
श्रीबिश्वालकृतानुवादो यथा -
त्वाञ्च श्रावयितुं गायाम्यहं गीतम्
उत्तमस्वरूपमनुत्तमरूपम्,
लोकनिन्दाभूतं यशस्कथागतम्
नैव गणयामि तदप्यहं तथ्यम्
त्वयोर्द्वयोरेव कश्चिद्दासोऽस्म्यहम्
समर्थ-चरणयोस्ते भोः देव ! प्रणामः॥[14]

---
[13] विवेकानन्दकाव्यामृतम्, पृ.55-60।
[14] पृ.142।

अत्र प्रयुक्ताः षड्रिपवः काम, क्रोध, लोभ, मोह, मद तथा मात्सर्यादयः मुण्डकोपनिषदि मस्तकस्थैः केशैः तुलिताः सन्ति।

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्॥ मुण्ड.१.१.७

मेरुप्रदेशे पर्वताः वर्षे बहुसमयं यावत् तुषाराच्छन्नाः भवन्ति। सूर्यालोकं प्राप्य सः तुषारराशिः द्रवीभूय जलेन परिणतः भवति। तथैव भगवद्भक्त्या मनसः समस्ताः वृत्तियः स्थिराः भवन्ति। ज्ञानालोकस्य प्रकाशेन बहिःस्थाः भावाः विगलिताः भवन्ति। परम् एकं मनः परमे सत्ये लीनं भवति। तस्मिन् शुद्धचित्ते भगवद्वाणी ध्वनिता भवति। कवितायाः अन्तिमभागे श्रुता अथवा अनुभूता भगवद्वाणी प्रतिध्वन्यते। **नृत्यति तदुपरि श्यामा** 'नाचुक ताहाते श्यामा' इति बाङ्ग्ला-कवितायाः संस्कृतानुवादः। अत्र यथाक्रमं कोमल-कठोर-मधुर-रुद्र-भावानां चित्रं प्रदर्शितम्। कोमलतां सर्वे इच्छन्ति, परन्तु कठोरभावं कोपि न इच्छति। सर्वे ततः दूरे स्थातुम् इच्छन्ति। परन्तु दारिद्र्य-दुःख-रोग-व्याधीत्यादीन् दृष्ट्वा कोमलप्राणाः भयविह्वलाः भवन्ति चेत् सा कोमलता वास्तवतः दुर्बलता तथा कापुरुषता वर्तते। तां विहाय सदा मृत्योः समक्षं यातुं प्रस्तुतः एव वीरत्वं मनुष्यत्वञ्च वर्तते। तथैव कठोरभावानामुपासकानां हृदये श्यामा अर्थात् माता काली नृत्यति। स्वामिजी बहुधा प्राञ्जलभाषया गम्भीरभावैः तस्य वर्णनमकरोत्। कवितायां प्रथमस्तवके जगतः नयनाभिरामं माधुर्यं तथा द्वितीयस्तवके पृथिव्याः निर्मम- भयंकर-पक्षाः प्रकाशिताः सन्ति। तृतीयस्तवके ललितसौन्दर्यमयं वर्तते जगत् तथा चतुर्थे स्तवके जीवनस्य घात-प्रतिघात-मुखराः संग्रामाः वर्णिताः। पञ्चमस्तवके कोमलतां प्रति मनुष्यस्य स्वाभाविकाकाङ्क्षायाः काव्यरूपमस्ति। अन्ते कथयति- हे मृत्युस्वरूपे मातः, त्वमेव सत्यस्वरूपा काली। चन्द्रस्य प्राणरूपः सूर्यः। परन्तु सूर्यं विहाय चन्द्रमेव सर्वे इच्छन्ति। सर्वेषां कोमलभाव एव प्रियः अस्ति। चण्डप्रतापशालिनि मध्याह्ने सूर्य-किरणान् कः इच्छति। प्रचण्डसूर्यकिरणाः यथा सत्यं, स्निग्धचन्द्रकिरणाः तु छायामात्रम्, तथैव रुद्रभाव एव यथार्थतः सत्यस्वरूपः, प्राणस्वरूपश्च वर्तते परन्तु कोमलभावः (सुख-वनमाली) तस्य रुद्रभावस्य छायामात्रमेव। '**प्रलयो वा गभीरसमाधिः**' इति कविता 'प्रलय वा गभीर समाधि' इति बाङ्ग्ला-कवितायाः संस्कृतकाव्यानुवादः अस्ति। अस्यां कवितायां प्रयुक्तः अवाङ्मनसोगोचरः शब्दः महत्त्वपूर्णः वर्तते। संगीतरूपेण रचिते अस्मिन् गाने कवितायां वा स्वामिजी स्वस्य आध्यात्मिकानुभूतीनाम् आधारेण एकस्याः परमपरस्याः ध्यानावस्थायाः वर्णनं करोति। प्रथमतः ध्यानप्रारम्भे विश्वजगतः छविः छायासमाना मनसि उद्भासिता भवति। द्वितीयावस्थायां तस्य लयेन केवलमात्रं तस्य सूक्ष्मांशः अस्फुटप्रकाशः वा मनसि उदेति सहैव लयं याति। तृतीयावस्थायां तस्य

अस्फुटप्रकाशस्य विरामेन केवलमात्रम् एका अहं-धारा अनुभूयते। चतुर्थावस्थायां सा अहंधारा अपि मनसः विविधक्रियासुं लयं याति। तदा यद् अवशिष्यते तद् वाण्या मनसा वा प्रकाशयितुं न शक्यते, अवाङ्मनसोगोचरं भवति। अत्र सूर्यः अपि नास्ति। अयं भावः 'न यत्र सूर्यो भाति न चन्द्रतारकं' (कठोपनिषद् २.२.१५) प्रभावितः। अस्य विभागस्य 'सृष्टि' तथा शिवसङ्गीतम्-1 इत्यनयोः कवितयोः हिन्द्यनुवादः सुमित्रानन्द-पन्तेन कृतः। अन्यासां कवितानां हिन्दी-काव्यानुवादश्च सूर्यकान्त-त्रिपाठी निराला' महोदयेन विहितः। **सृष्टिः** इति कविता 'सृष्टि' इति बाङ्ग्ला-कवितायाः संस्कृतानुवादो वर्तते। स्वामिजी स्वध्यानलब्धदृष्ट्या स्वीयया अनुपमभाषया अस्यां कवितायां वर्णयति यत् कथम् अनादि-अनन्त-नामवर्णहीनात् ब्रह्मणः जगत् उद्भूता। एवंरूपेण एकस्मात् ब्रह्मणः कारणरूपेण, सूक्ष्मरूपेण तथा स्थूलरूपेण जगतः सृष्टिः भवति। ब्रह्म विना तेषां कापि स्वतन्त्रा सत्ता नास्ति। यथा-

रूपमेकम् अरूप-नामवरणम् अतीतागामि-कालहीनम्।
देशहीनं सर्वहीनम्, नेति नेति यत्रास्ति विरामः।
तत एव निर्गत्य प्रवहन्ति कारणस्य धाराः।
धाराणां वासना वेशाः समुज्ज्वलाः।
गर्ज गर्जमुत्तिष्ठति तस्य वारि, सर्वक्षणा सर्वमिति अहमहमिति।
तस्य पुनरपारेच्छासागरस्य मध्ये, अयुतोऽनन्तश्च राजते तरङ्गः॥
कियद्रूपम्, कियती च शक्तिः
केन च च गणना कृता, कियत्यौ च गति-स्थिती इति।
कोटि-चन्द्रः कोटि-तपनानि, लभन्तेऽत्र सागरेऽस्मिन् जन्मनि,
महाघोरे प्रचण्ड-गगने छायाः, अकरोच्च ज्योतिमग्नाः दश दिशश्च ताः।
वसन्ति प्राणिनस्तत्र केचिज्जडजीवाः, सुखदुःखे जननमरणजराः।
स च सूर्यः यस्य किरणानि, सोऽपि सूर्यः किरणानि यानि॥[15]

**सागर-वक्षसि** कवितापि 'सागर वक्षे' इति बांला-कवितायाः संस्कृतानुवादः। १९०० संवत्सरे दिसम्बरमासे पाश्चात्यदेशात् द्वितीयवारप्रत्यावर्तनसमये स्वामिजी इमां कविताम् अलिखत्। सम्भवतः तदा समुद्रपोतः भूमध्यसागरस्य पूर्वभागस्य पारं गच्छन् आसीत् यत्र स्वामिजी यात्रां करोति स्म। पाश्चात्यसभ्यतायाः कलकोलाहलापेक्षया भारतीयसभ्यतायाः शान्तभावः स्वामिनं स्वदेशं प्रति आकर्षति स्म। **शिवसङ्गीतम्-१** शीर्षकाङ्किता कविता 'शिवनृत्यम्' इति बाङ्ग्ला-कवितायाः अनुवादोऽस्ति। अस्याः हिन्दीकाव्यानुवादः कर्णाटी-एकतालादिरागेण सुमित्रानन्दनपन्तेन कृतः।

[15] पृ.156-157।

**शिवसङ्गीतम्-२** 'समाधौ शिवः' इति बाङ्ग्ला-कवितानुवादो वर्तते। अस्याः हिन्दीकाव्यानुवादः कृतः सुर-फाँकतालादिरागेण सूर्यकान्तत्रिपाठिनिरालावर्येण।

**श्रीरामकृष्ण-आरात्रिकं भजनम्** तन्नामकबाङ्ग्लाकवितानुवादोऽस्ति। अस्य हिन्दी-काव्यानुवादो मिश्रकल्याण-तालफिरता-चतुस्ताल-त्रितल-एकतालादि-रागैः सूर्यकान्तत्रिपाठि'निराला'महोदयेन कृतः। अस्य विभागस्य अन्तिमा कविता सृष्टिगानम् (नासदीयसूक्तम्) 'The hymn of Creation' इत्यस्या वांला-कवितायाः संस्कृतानुवादो वर्तते। अस्य विभागस्य द्वितीयां कवितां विहाय अन्यासां कवितानां हिन्द्यनुवादः सुमित्रानन्दपन्तेन कृतः। द्वितीयकवितायाः हिन्दीकाव्यानुवादश्च सूर्यकान्त-त्रिपाठी निराला' महोदयेन विहितः। विवेकलहर्याः द्वितीये भागे बामा-कवितानां संस्कृतानुवादः स्थापितः। तत्र च प्रथमा कविता सखायं प्रति 'सखार प्रति' इत्यस्या बांला-कवितायाः संस्कृतानुवादोऽस्ति।

तृतीयविभागे स्वामिनो विवेकानन्दस्य मौलिकहिन्दीरचनायाः संस्कृतानुवादः कृतः। मुलतान-धीमा-त्रितालादि-रागैः लिखितमिदं हिन्दीकाव्यं श्रीकृष्णस्तोत्रमपि हिन्दीस्तोत्रपरम्परायां विशिष्टस्थानमधिकरोति। चतुर्थविभागे स्वामिनो विवेकानन्दस्य संस्कृत-स्तोत्राणि यथावत् संगृहीतानि सन्ति। अत्र श्रीरामकृष्ण-स्तोत्रम् इति शीर्षके चत्वारि लघुस्तोत्राणि संकलितानि। यथा- श्रीरामकृष्णस्तोत्रम्-१, श्रीरामकृष्णस्तोत्रम्-२, श्रीरामकृष्णस्तोत्रम्-३ तथा श्रीरामकृष्णस्तोत्रम्-४। तदनु श्रीरामकृष्णप्रणामः स्थानितः अस्ति। अन्यानि तस्य प्रसिद्धानि स्तोत्राणि अपि अत्र सन्ति। यथा-आमन्त्रणम्, श्रीरामकृष्णवन्दना, शिवस्तोत्रम् तथा अम्बास्तोत्रम्। आध्यात्मिकजनानाम् अलौकिकानुभवानामभिव्यक्तिः क्वचित् तेषां काव्यप्रतिभां मुखरीकरोति। स्वामिनः काव्यरचनासु अपि दिव्यानुभूतीनां प्रत्ययः भवति। स्वामिनः प्रतिभा तु सर्वतोन्मुखिनी आसीत्। न केवलं सः कश्चन देशभक्तः तथा उच्चकोटिकः महात्मा आसीत् अपितु कश्चन श्रेष्ठः कविः अपि आसीत्। दैवी प्रेरणा एव तस्य काव्यानां मूले आसीत्। आचार्यः बनमालिबिश्वालः महोदयः विविधभाषासु पाटवमर्जितवान् इति तस्य काव्यानामनुवादे समर्थः अभवत्। अपित तस्य सरलसंस्कृतवाग्धारा पाठाकान् नितरां प्रभावयति। सत्यमेवोक्तमासीत्- While comparing all these versions of Vivekananda's poetry together what I found that the present Sanskrit version of Prof. Biswal is so simple in language and style that even a non-Sanskritist or a common reader like me, knowing little bit of Sanskrit, can also very well understand the essense of these poems of Swami Vivekananda. I sincerely believe that the

divine or rather liberated soul of Swāmiji will bless all of us including the translator poet Prof. Biswal for spreading and propogating his spiritual as well as philosophical thoughts among the common mass.[16]

अपिच विवेकलहर्याः कवितासु उपनिषद्विषयकं दार्शनिकञ्च तत्त्वं द्रष्टुं शक्यते। प्रथमे विभागे यथा - संन्यासिनो गीतम्, नासदीयं सूक्तम्, निर्वाणषट्कम्, प्रकाशः, स्वकीयमात्मानं प्रति इत्यादि-कवितासु। एवमेव द्वितीयभागे गायाम्यहं गीतं त्वाञ्च श्रावयितुमित्यत्र कामक्रोध-लोभमोहादयः षड् रिपवः वर्णिताः यस्य तुलना मुण्डकोपनिषदः (1.1.7) वचनैः कर्तुं शक्यते। सखायं प्रति इत्यत्र विहगरूपेण बद्धः जीवः सम्बोधितः तथा समाधिः इत्यत्र अन्तिमा पङ्क्तिरपि अस्मिन् सन्दर्भे मनन-योग्या वर्तते। इतः ज्ञायते यच्छन्दोऽनुरोधेन पूर्वतनानुवादकः बहुत्र अधिकपदानां सीमितपदानां वा प्रयोगं कृतवान्। अत्र अनुवादकेन समग्रं काव्यं समर्थमूलपदैः अनूदितं वर्तते।

**सन्दर्भग्रन्थाः**


- विवेकलहरी, निरालोपनाम्नः सूर्यकान्तत्रिपाठिनस्तथा सुमित्रनन्दनपन्तस्य च हिन्दीकाव्यानुवादाधारेण संस्कृतेनानूदिता, संस्कृतानुसर्जकः बनमाली बिश्वालः, पद्मजाप्रकाशनम्, प्रयागः, 2016।
- स्वामी विवेकानन्देर वाणी ओ रचना, ...........।
- शारदायाः 1970 संवत्सरे जनवरीमासाङ्के, पृ. 25।
- श्रीरामकृष्णलीला-प्रसङ्ग - दिव्यभाव और नरेन्द्रनाथ, ..........।
- Complete works of Swami Vivekananda, ............
- Swami Vivekananda in the West : New Discoveries.
- Recreation of Swamiji's Poems into Sanskrit, Richa Biswal, संस्कृतसाहित्ये स्वामी विवेकानन्दः, सम्पादकाः- बनमाली बिश्वालः, नारायणदाशः, राकेशदाशश्च, विवेकानन्दशोधकेन्द्रम्, रामकृष्णमिशन रेसिडेण्डाल कलेज, नरेन्द्रपुरम्, कलिकाता-103।


[16] Recreation of Swamiji's Poems into Sanskrit, Richa Biswal, संस्कृतसाहित्ये स्वामी विवेकानन्दः, p.281.

# सांख्ययोगवेदान्ताभिमतसाध्यसाधनविमर्शः

प्रो. रामकिशोरः त्रिपाठी
आचार्योऽध्यक्षश्च वेदान्तविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

**यस्याज्ञानविवर्धितं जगदिदं यत्राश्रितं भासते**
**सत्यज्ञानसुखात्मकं श्रुतिशिखाजन्यात्मवृत्त्या सदा ।**
**व्यक्तं सत् सकलप्रपञ्चविलयं मायामयं कुर्वते**
**तं मायापतिमाश्रयेऽद्वयवपुर्जन्मादिबन्धच्छिदम् ।।१।।**

**यत्सांख्ये प्रकृतिप्रधानविषयः ख्यातः प्रकृत्याश्रितः**
**वेदान्ते प्रकृतिः सदात्मविषया ब्रह्माश्रिता कारणम् ।**
**मायामात्रमिदं विभाति वितथं ब्रह्मैव सच्चिन्मयो**
**मोक्षोऽसङ्गवपुःसमस्तनिलयाद्वैतात्मबोधो मतः ।।२।।**

**सांख्ये या प्रकृतिः प्रोक्ता सैवाविद्या श्रुतौ मता ।**
**उभयत्रापि सर्गादिः कारणं शास्त्रविन्मतम् ।।३।।**

**सांख्ये पुरुषसङ्गेन वेदान्ते पुरुषाश्रिता ।**
**प्राणिकर्मानुरूपं सा जायते जगदात्मना ।।४।।**

**पुरुषासङ्ग एवात्र मोक्षसाधनमुच्यते ।**
**सांख्ये प्रकृतिर्हेतुर्वेदान्ते तत्त्वनिश्चयः ।।५।।**

तथ्यातथ्यात्मकप्रपञ्चानुविद्धव्यवहारानुभवजन्यदुःखक्लेशविपाकनिमग्ना जना जन्मजरामरणादिक्लेशबीजसंसारादुद्धारमिच्छन्ति। तादृशसंसारसागरोद्धार-हेतवो दर्शनशास्त्राणि सन्ति। तानि च वेदप्रामाण्यपरलोकसत्तावादिभिर्निर्मितानि सांख्ययोगन्यायवैशेषिकपूर्वमीमांसोत्तरमीमांसाऽऽख्यानि षडास्तिकदर्शनानि। सौत्रा-न्तिकवैभाषिकायोगाचारमाध्यमिकभेदेन चतुर्धा विभक्तं बौद्धदर्शनं चार्वाकदर्शनं जैनदर्शनञ्चेति षड्वेदप्रामाण्यमस्वीकुर्वद्भिः परलोकसत्तामनन्यमानैर्निर्मितानि

वेदान्तमतेऽविद्यैव प्रकृतित्वेनाभिमता ।

**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।**
**तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ।।**[१]

''मायामात्रं जगत्कृत्स्नं तदा भवति निर्वृत्तिः''[२] ''मायामात्रमिदं द्वैतमद्वैतं परमार्थतः''[३] ''माया सत्त्वरजस्तमोमयी''[४] ''मायावशादेव देवा मोहिता ममतादिभिः''[५] ''माया वा एषा वैनायकी सर्वमिदं सृजति, सर्वमिदं रक्षति, सर्वमिदं संहरति''[६] एताः श्रुतयोऽविद्यायाः प्रकृतित्वे मानानि ।

सा चाविद्या ब्रह्मण्यध्यस्ता ब्रह्मविषया ब्रह्माधीना च भूतभौतिकप्रपञ्चाकारेण परिणमते । शुद्धबुद्धमुक्तस्वभावस्य स्वयंप्रकाशरूपस्यात्मनोऽविद्याऽधिष्ठानत्वेनोपादानत्वमुच्यते।

## कर्तृत्वस्वरूपविचारः

सांख्यनये प्रकृतेरेव कर्तृत्वमस्ति। प्रकृतेर्जडरूपत्वेऽपि चित्सङ्गात्तत्र चैतन्यमारोप्यते। आरोपितचैतन्यवती प्रकृतिः कर्त्री। तत्र प्रकृतेः सत्त्वांशस्य चित्प्रतिबिम्बग्राहित्वात्तदंशभूताया बुद्धेरेव कर्तृत्वमभिमन्यते। तदभिसङ्गात् पुरुषः स्वस्मिन् कर्तृत्वमनुभवति। ''उपरागात् कर्तृत्वं चित्सान्निध्याच्चित्सान्निध्यात्''[७] पुरुषस्योपभोगसाधकत्वाद्बुद्धिः कर्त्री।

**सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।**
**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ।।**[८]

बुद्धिरेव पुरुषोपभोगार्थं सर्वमुपभोगोपभोगसाधनभूतं जगत् सृजति। कर्मभोगोपशान्तौ सर्वं स्वस्मिन्नुपसङ्क्रामति। भोगोपगमः सर्ग एव बन्धस्तन्निवृत्तिर्मोक्षः। सर्गः प्रकृतिपुरुषसङ्गनिमित्तकः, मोक्षश्च प्रकृतिपुरुषवियोगाज्जायते। भोगे भोगनिवृत्तौ च पुरुषकृतकर्मैव हेतुः। ''पुरुषार्थं संसृतिर्लिङ्गानां सूपकारवद्राज्ञः''[९]

---

१. श्वेता०उप० १०/४ २. जा०द० १०/१२ ३. आगम १७
४. हेरम्बो० ६ ५. शरभो० २८ ६. ग०पू० ता० २/३
७. सा०सू० १/१६५ ८. सां०का० ३७ ९. सा०सू० ३/१६

लिङ्गशरीरस्य गमनागमनेऽपि कर्मानुसङ्गाद् बुद्धिरेव हेतुः ।

**पुरुषार्थहेतुकमिदं निमित्तिनैमित्तिकप्रसङ्गेन ।**

**प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ।।**[१]

तस्मात् सांख्यशास्त्रे चित्प्रतिबिम्बिता प्रकृतिरेव भोगापवर्गसाधकत्वात् कर्त्री। असङ्गोऽपि पुरुषो नृत्यमञ्चगतनटकलां पश्यन् परिषद्य इव दृष्टिमात्रेण भोक्ता भवति। प्रकृतेर्विकारभावं पश्यन् पुरुषः स्वस्मिन् विकारतामनुभवति। ''यथा हि नटस्तां तां भूमिकां विधाय परशुरामो वाऽजातशत्रुर्वा वत्सराजो वा भवति, एवं तत्तत्स्थूलशरीरपरिग्रहणाद्देवो वा मनुष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरमित्यर्थः''[२] यतः प्रकृतिः कर्मानुरूपं भोगजातं सृजति। अतो लोकलोकान्तरगमनेऽधोगमने च कर्मैव निमित्तम् । अपवर्गे च तत्त्वज्ञानं हेतुः ।

**धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।**
**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ।।**[३]

तस्मात् सांख्यशास्त्रे प्रकृतेरेव कर्तृत्वमीष्यते।

## वेदान्तदर्शनाभिमतोपादानस्वरूपविचारः

वेदान्तमते उपादानं द्विविधं परिणाम्युपादानं विवर्त्तोपादानञ्चेति। तत्र परिणामाण्युपादानमविद्या विवर्त्तोपादानञ्च ब्रह्म। यदुपादानसमसत्ताकं कार्यं तस्य परिणाम इत्युच्यते। यदुपादानविषमसत्ताकं तस्य विवर्त इत्युच्यते। प्रातिभासिकं रजतादिकमिदमवच्छिन्नचैतन्यविषयकाविद्यासमसत्ताकत्वादविद्यापरिणामः अविद्या च परिमाण्युपादानम्। इदमवच्छिन्नचैतन्यापेक्षया विषमसत्ताकत्वेन तस्य विवर्तः। प्रातिभासिकं रजतादिकं ब्रह्मप्रमातिरिक्तशुक्त्यादिप्रमाबाधिताविद्यासमसत्ताकम् । एकबाधप्रमाविषयत्वादविद्यातत्कार्ययोरिति। इदमवच्छिन्नं चैतन्यं तु ब्रह्मप्रमाऽतिरिक्तप्रमया न बाध्यते। अतो व्यावहारिकम् । तद्विषमसत्ताकं शुक्तिरजतादिकमिदमवच्छिन्नचैतन्यस्य परिणामः ।

एवं व्यावहारिकप्रपञ्चो ब्रह्मप्रमाऽतिरिक्तप्रमाऽबाधिताद्वयात्मविषयाविद्या-

१. सा०का० ४२ २. सांख्यतत्त्वकौमुदी ३. सा०का० ४४

समसत्ताकत्वात्तस्याः परिणामः। अद्वयात्मसत्ताविषमसत्ताकत्वात्तस्य विवर्त इत्युच्यते। अयमेव प्रातिभासिकप्रपञ्चव्यावहारिकप्रपञ्चयोर्भेदः। यद्वा अविद्यातिरिक्तदोषजन्यत्वं प्रातिभासिकत्वम्। अविद्यातिरिक्तदोषाजन्यत्वं व्यावहारिकत्वम्। प्रातिभासिकप्रपञ्चजननेऽविद्यातिरिक्तकाचकामलादिदोषाः कारणानि सन्ति। स्वाप्निकप्रपञ्चजनने निद्रा दोषत्वेनाभ्युपेयते। व्यावहारिकप्रपञ्चजननेऽविद्यैव दोषत्वेनाभिमन्यते। यद्वा सत्त्वेन प्रतीयमानत्वे सति व्यवहारानर्जत्वे च सति ब्रह्मप्रमाऽतिरिक्तप्रमाबाध्यत्वं प्रातिभासिकत्वम्। एतेन ब्रह्मप्रमाऽतिरिक्तप्रमाऽबाधिते वन्ध्यापुत्रादौ नातिव्याप्तिः, तेषां सत्त्वेन प्रतीयमानत्वाभावात्। सत्त्वेन प्रतीयमानत्वे सति व्यवहारार्हत्वे च सति ब्रह्मप्रमाऽतिरिक्तप्रमाऽबाध्यत्वं व्यावहारिकत्वम्। व्यवहारोऽत्रार्थक्रियाकारित्वरूपो गृह्यते। तेन सत्त्वेन प्रतीयमाने ब्रह्मप्रमाऽतिरिक्तप्रमाऽबाधिते ब्रह्मणि नातिव्याप्तिः। तस्योक्तव्यवहारानर्हत्वात्।

**ब्रह्मणोऽधिष्ठानत्वविचारः**

न ब्रह्म साक्षाज्जगदुपादानम्। प्रपञ्चोपादानाविद्याऽधिष्ठानत्वेन प्रपञ्चोपादानं गीयते। भ्रमोपादानाज्ञानविषयत्वमधिष्ठानत्वम्। तथा हि शुक्तिरजतादिज्ञानं भ्रमस्तदुपादानमिदमवच्छिन्नचैतन्यविषयकमज्ञानम्, तद्विषय इदमवच्छिन्नचैतन्यमधिष्ठानम्। एवं देहादिव्यावहारिकज्ञानं भ्रमस्तदुपादानमद्वयात्मविषयकमज्ञानम्, तद्विषयोऽद्वयचैतन्यमधिष्ठानमुच्यते। अविद्यापरिणामभूतस्य प्रपञ्चस्य स्वोपादानाविद्याऽधिष्ठानेऽध्यस्तत्वादनुपादानमपि चैतन्यमुपादानत्वेन व्यवह्रियते।

यतो जातं कार्यं यत्र स्थितं सद् यत्र लीयते, तदुपादानमुच्यते। अविद्यातो जायमानं कार्यमविद्याऽधिष्ठाने ब्रह्मण्यध्यस्ततया प्रतीयते। उपादेयस्योपादानसत्तातो भिन्नसत्ता न भवति। अत्राप्युपादानभूताविद्यायास्तत्कार्यभूतप्रपञ्चस्य चाधिष्ठानस्वरूपब्रह्मसत्तातो भिन्नसत्ता नास्ति। आरोपितस्याधिष्ठानसत्ताऽतिरिक्तसत्ताकत्वाभावात्। अथ च स्वोपादाने कार्यलयो भवति। अधिष्ठानसाक्षात्कारेणाधिष्ठानविषयकाज्ञाननिवृत्तौ प्रपञ्चनिवृत्तिरभिमता। प्रपञ्चनिवृत्तिकालेऽविद्याया अविद्यमानत्वात्तदधिष्ठाने ब्रह्मणि कार्यलयो भवतीति चैतन्यस्यारोपितोपादानत्वं सिद्ध्यति। तदेव ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

यत्प्रयन्त्यभिसंविशन्ति''[१] इति श्रुत्या ''जन्माद्यस्य यतः''[२] इति सूत्रेण बोध्यते।

## वेदान्तशास्त्राभिमतकर्तृत्वविचारः

वेदान्तनयेऽविद्योपहितचैतन्यस्य कर्तृत्वमभिमतम्। ''तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत''[३] ''स ईक्षते लोकान्नु सृजा इति। स इमाँल्लोकान-सृजत''[४] ''स ईक्षाञ्चक्रे। स प्राणमसृजत''[५] श्रुतयः सोपहितस्यैव कर्तृत्वं दृश्यपदार्थप्रकाशत्वेन न तु ज्ञानक्रियाश्रयत्वेन। सर्वज्ञत्वञ्च सर्वप्रपञ्चप्रकाशत्वेन न तु सर्वविषयकज्ञानाश्रयत्वेनेति। भोक्तृत्वञ्चान्तःकरणधर्माध्यासेन। तदित्थं सर्वविकल्पातीतस्य सकलसङ्गवर्जितस्य चित्स्वभावस्य कर्तृत्वभोक्तृत्वादिधर्मा अध्यासिकाः सन्ति।

तत्र मायावृत्तीक्षणशक्त्यधिष्ठानत्वेन ब्रह्मणः कर्तृत्वम्। मायोपहितसाक्षि-त्वेन सर्वप्रकाशकत्वं द्रष्टृत्वञ्चेति। अन्तःकरणपरिणामत्वेन नैकजीवज्ञानानि साक्षिचैतन्येन प्रकाश्यन्ते। सकलवृत्तिज्ञानानां प्रकाशकत्वेन सर्वज्ञत्वमात्मन उच्यते। अन्तःकरणात्मनोस्तादात्म्याध्यासेऽन्तःकरणधर्मस्य भोक्तृत्वस्य चैतन्ये-ऽध्यासाद् भोक्ता जीव इत्युच्यते।

## समीक्षा

सांख्यमतेऽचेतनं प्रधानं पुरुषसङ्गात् प्राणिकर्मवशगं महदादिरूपेण परिणमते। स्वतन्त्रेण तस्योपादानत्वं नास्ति। वेदान्तमते च ब्रह्मण्यध्यस्ताऽविद्या प्राणिकर्मवशंगता भूतभौतिकप्रपञ्चाकारेण परिणमते। अनध्यस्तायास्तस्या उपादानत्वं नास्ति। उभयत्रापि प्रकृतेः परिणामाय पुरुषसङ्गताऽऽपेक्ष्यते। एकत्र पङ्ग्वन्धवत् संसर्गाकाङ्क्षा, एकत्र चाधिष्ठानाध्यस्तयोः संसर्गाकाङ्क्षा। अधिष्ठानेन सहातात्त्विकसंसर्गाभावेऽविद्याया अध्यासासम्भवः। उभयत्रापि पुरुषसङ्गतैव प्रकृतिः परिणमते।

एवं सांख्यनयेऽचेतनभूताया बुद्धेः पुरुषप्रतिबिम्बाश्रयतया कर्तृत्वम्।

---

१. तैत्ति०उप० ३/१ २. ब्र०सू० १/१/२ ३. छान्दो० ६/२/३

४. ऐत०उप० १/१/१ ५. प्रश्नो० ६/३

 ISSN 2320-2025

चित्प्रतिबिम्बिता बुद्धिश्चेतनापन्ना सती कर्त्री भवति। बिम्बप्रतिबम्बयोरैक्याध्यासाद् बिम्बभूते पुरुषे कर्तृत्वानुभवो भवति। वेदान्तमते च शुद्धचैतन्यस्य कर्तृत्वाभावेऽप्यविद्यावृत्तीक्षणशक्त्यधिष्ठानत्वेन कर्तृव्यम्। ईक्षणं त्रिगुणात्मिकाया मायाया सत्त्वगुणः। स च मायाऽध्यासपूर्वकं ब्रह्मण्यध्यस्यते। प्रकृतिगुणस्येक्षणस्य चैतन्येऽध्यासादीक्षणगुणहीनमपि चैतन्यमीक्षणवद्भाति। यथा दग्धृत्वधर्महीनमयो दग्धृत्वाश्रयवह्नितादात्म्याध्यासाद् दग्धृत्ववद् भवति। इत्युभयत्रापि पुरुषप्रकृतितादात्म्यं कर्तृत्वप्रयोजकम् । एकत्र पुरुषसङ्गात्प्रकृतेरेव कर्तृत्वम्, पुरुषे तदध्यासः। एकत्र च सोपहितचैतन्यस्यैव कर्तृत्वं प्रकृतिसंसर्गो निमित्तमात्रमिति विवेकः।

**भोक्तृस्वरूपविचारः**

सांख्यमते पुरुषोपभोगार्थं प्रकृतिर्भोगभोग्यतत्साधनरूपेण परिणमते। यथा नृत्यशालां गता नर्त्तकी परिषद्यानामानन्दबोधाय गात्रचालनादिकं तनुते। तद्वत् पुरुषस्योपभोगाय विषयगुणापन्ना सती महदादिरूपेण परिणमते। असङ्गोऽपि पुरुषः प्रकृतिसङ्गाद् भोक्ता भवति। एवं वेदान्तमतेऽपि शुद्धबुद्धमुक्तस्वभावः कर्तृत्वभोक्तृत्वादिधर्मशून्यः पुरुषोऽविद्याकृतान्तःकरणाध्यासादन्तःकरणधर्मकर्तृत्वभोक्तृत्ववानिव भवति। भोक्तृत्वमन्तःकरणधर्मः स चाविद्यया पुरुषेऽध्यस्यते। अध्यासिकधर्ममादाय भोक्तृत्वं पुरुषस्येति। अन्तःकरणानां नानात्वात् पुरुषनानात्वमपि सिद्धम्। अतोऽत्राप्युभयसाम्यमिति।

**वृत्तिस्वरूपविचारः**

सकलोपभोगभूतव्यवहारस्य ज्ञानाधीनत्वात् । ज्ञानस्वरूपं तत्साधनं दृष्टमनुमानमाप्तवचनरूपं प्रमाणञ्च निरूप्यवृत्तिस्वरूपं निरूपयति। ''वृत्तय पञ्चतय्यः क्लिष्टाक्लिष्टाः''[१] वृत्या गृहीतरसादिविषयान् पुरुषो भुङ्क्ते। तत्रेन्द्रियसन्निकृष्टविषयाकारेण चित्तं परिणमते। चित्तस्य विषयाकारपरिणामो वृत्तिरित्यभिधीयते। विषयाकारपरिणते चित्ते चित्स्वरूपः पुरुषः प्रतिबिम्बते। बिम्बप्रति-

---

१.सा०सू० २/३३

बिम्बतादात्म्याज्ज्ञाता पुरुष उच्यते। वेदान्तमतेऽन्तःकरणस्य विषयाकारपरिणामो वृत्तिः। तैजसमन्तःकरणमिन्द्रियद्वारा विषयदेशं सङ्गत्य विषयाकारेण परिणमते स च परिणामो वृत्तिरुच्यते। तत्प्रतिबिम्बितं चैतन्यं वस्तुप्रकाशकत्वाज्ज्ञानमुच्यते।

वृत्तिरियं विषयाकारेण परिणता भोगस्य ब्रह्माकारेण परिणता मोक्षस्य हेतुर्भवति। विषयाकारवृत्तिर्बन्ध ब्रह्माकारवृत्त्याऽविद्यानिवृत्तिर्मोक्षः। ब्रह्माकारवृत्तिः स्वस्वेतरवृत्तिनिवृत्तिहेतुरुदेति। अहं ब्रह्मास्मीति ब्रह्माकारवृत्त्या देहेन्द्रियाद्यनात्मविषयावृत्तयो निवर्तन्ते। ब्रह्माकारवृत्तिस्तु स्वोपादानाविद्यानिवृत्तौ निवर्तते। तन्निवृत्तये वृत्यन्तरं नापेक्ष्यते। ब्रह्मविषयीकुर्वाणा वृत्तिर्ब्रह्मवृत्त्यविद्याऽवरणमपाकरोति। ब्रह्मावरणभूताया अविद्याया निवृत्तौ तदुपादानकस्य सकलप्रपञ्चस्य निवृत्तिर्मोक्षः। ''तन्निवृत्तावुपशान्तोपरागः स्वस्थः''[१] ''रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।

**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ।।**[२]

''निवृत्तिरात्मा मोहस्य ज्ञातत्त्वेनोपलक्षितः''[३] ''तरति शोकमात्मवित्''[४] ''विद्वान् नामरूपाद्विमुक्तः''[५] ''भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसर्वसंशयाः। क्षीयन्ते सर्वकर्माणि तस्मिन्दृष्टे परावरे''[६] इत्यादिश्रुतयो वृत्तीनामविद्यानिवृत्तिद्वारा मोक्षमुपवर्णयन्ति।

## पुरुषानेकत्ववादः

पुरुषस्यैकत्वे बन्धमोक्षव्यवस्था न सिद्ध्येदतःपुरुषबहुत्वं साख्या अभ्युपगच्छन्ति। **''जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**

**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव''**[७]

''जन्मादिव्यवस्थातः पुरुषबहुत्वम्''[८] वेदान्तमतेऽन्तःकरणप्रतिबिम्बितं चैतन्यं जीव इति प्रतिबिम्बावादे। अन्तःकरणावच्छिन्नं चैतन्यं जीव इत्यवच्छेदवादे

१. सा०सू० २/३४ २. सा०का० ६३ ३. भा० वार्त्तिकम्
४. छा०उप० ७/१/३ ५. मुण्ड० ३/२/८ ६. मुण्ड० २/२/८
७. सा०का० १८ ८. सा०सू० १/१५०

चान्तःकरणोपाधीनामनेकत्वात् पुरुषनानात्वं सिद्धम् । अविद्यायां प्रतिबिम्बितं चैतन्यं जीव इति पक्षे प्रतिबिम्बोपाधेरविद्याया एकजीववादः । तत्र बन्धमोक्षव्यवस्थाया अनुपपत्तौ जीवनानात्वं सिद्धान्तितम् ।

**बन्धस्वरूपविचारः**

सर्वविकल्पातीतः शुद्धबुद्धमुक्तस्वभावोऽसङ्गोऽपि पुरुषः प्रकृतिसङ्गाद् बध्यते। तत्र प्रकृतिरेव पुरुषस्य बन्धमोक्षयोर्हेतुर्भवति। तत्र प्रकृतिगत रजोगुणतादात्म्यात् पुरुषो बन्धमनुभवति। "मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः"[१]

**वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात् ।**

**ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ।।**"[२]

योगशास्त्रे च पूर्वपूर्वजन्मकृतकर्मणां संस्कारा वासनारूपेणोत्तरोत्तरजन्मनि विद्यमानाः सन्ति। अतो देहादिभिरसङ्गोऽपि पुरुषो देहादिसङ्गतामनुभवन् बध्नाति। "ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्"[३] तासां संस्काररूपाणां वासनानां सातत्यमविवेकज्ञाननिमित्तकम्, विवेकख्यात्याऽविवेक ज्ञाननिवृत्तौ वासना निवर्तन्ते। "हेतुफलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः"।[४]

वेदान्तमतेऽपि जीवः स्वरूपतया शुद्धबुद्धमुक्तस्वभावोऽप्यविद्यया देहाद्यनात्मप्रपञ्चाध्यासात्तद्धर्मान् स्वस्मिन्ननुभवन् बध्नाति। देहधर्माध्यासाज्जन्मजरामरणादिधर्मान्, इन्द्रियधर्माध्यासात् कारणत्वकुब्जत्वादिधर्मान्, अन्तःकरणधर्माध्यासात् कर्तृत्वभोक्तृत्वादिकं भजते। श्रवणमनननिदिध्यासनाद्यात्मज्ञानसाधनैस्तत्त्वसाक्षात्कारे जाते सत्यविद्यानिवृत्तौ सकलाध्यासनिवर्तनात् स्वरूपावाप्तिर्मोक्षः । "अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः"[५] "अविद्याभूतवेष्टितो जीवो देहान्तरं प्राप्य लोकान्तरं गच्छति"[६] "मायामात्रमिदं द्वैतमद्वैतं परमार्थतः"[७] तदित्थं बन्धव्यवस्थाविषये सांख्ययोगवेदान्तमतसाम्यमस्ति।

---

१. सा०सू० १/९४ २. सा० का० ४५ ३. यो०सू० ४/८
४. यो०सू० ४/११ ५. वार्तिकम् ६. पैङ्गलो० २/९
७. आगमे १७

**मोक्षस्वरूपविचारः**

आध्यात्मिकाधिदैविकाधिभौतिकभेदेन त्रिविधं दुःखं लोके प्रसिद्धम्। तेषां निवृत्तिः सर्वैरभिकाङ्क्ष्यते। तन्निवृत्तिर्मोक्षः स च सर्वशास्त्राणामुद्देश्यं भवति। तत्र स्वरूपतो जीवात्मनो मुक्तरूपत्वेऽपि प्रकृतिसङ्गाद् देहादितादात्म्येन देहसंसर्गि-कान्तःकरणसंसर्गिकदुःखानि जायन्ते। प्रकृतिसंसर्गादेव प्रकृतेर्जायमानभौतिक-पदार्थतादात्म्येनाधिभौतिकदुःखानि जायन्ते। तेषामात्यन्तिनिवृत्तेरुपायमनु-चिन्तयन्ति मानवाः। स चोपायो दर्शनज्ञानमृते न सिद्ध्यतीति दर्शनज्ञानाय प्रवर्तन्ते जनाः। यद्यपि शरीरव्याधिकृतमाधिदैहिकं दुःखं भैषजादिना निवर्तते। तथापि यावद्भैषजप्रभावस्तावदेव दुःखात्यन्ताभावः सति शरीरे व्याधिकृतदुःख-स्यात्यन्तिकनिवृत्तिरसम्भवा। वातपित्तकफशमननिमित्तभूतेन भैषजेनैकस्य व्याधे-र्हानेऽपरव्याधेरुद्भवसम्भवात्। शैत्योष्णसंसर्गजन्यमाधिभौतिकं दुःखं शैत्योष्ण-निवारकलौकिकसाधनेन किञ्चित् कालं शाम्यति। सर्वतोभावेन शमनमशक्य-मिति सबीजमाधिदैहिकदुःखनिवृत्तये दर्शनशास्त्रमेव शरणम्। मनःकृतस्या-ध्यात्मिकदुःखस्य निवृत्त्युपायश्चित्तैकाग्रतासम्पादकदर्शनशास्त्रमृते नास्तीति त्रिविध-दुःखानामात्यन्तिकनिवृत्तये दर्शनशास्त्रमेव सेवन्ते जनाः।

तथा चोक्तम्— **दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्॥**[१]

दुःखत्रयस्याभिघातः बन्धकारणीभूतसंयोगरूपस्तस्य निवृत्तिः तत्त्वज्ञानेनैव सम्भवति। तत्त्वनिश्चयश्च दर्शनशास्त्रजन्यज्ञानेन भवतीति दर्शनशास्त्राणामुपयोगित्वं दुःखनिवृत्तौ। वेदविहितयागादयोऽपि दृष्टोपायवदनित्या अविशुद्धिक्षयातिशय-युक्ताश्च सन्ति। तद्विपरीत उपाय एव श्रेष्ठः। स चोपायो व्यक्ताव्यक्तज्ञ-विज्ञानाद्भवति। व्यक्तश्चाव्यक्तश्चज्ञश्चेति व्यक्ताव्यक्तज्ञाः, तेषां विज्ञानम्, व्यक्ता-व्यक्तविज्ञानम्। तस्माद्दुःखत्रयस्यात्यन्तिकनिवृत्तिरिति। व्यक्तं महदादिविकृतिः, अव्यक्तं प्रकृतिः, ज्ञश्चपुरुषः, तेषां यथार्थस्वरूपज्ञानेन दुःखत्रयोपशमो भवति।

१.सा०का० १

वेदान्तनयेऽविद्यैव दुःखत्रयस्य बीजमस्ति। अविद्याकृतदेहाद्यनात्मप्रपञ्चाध्यासात्तद्धर्मान् स्वस्मिन्नानुभवन्नात्मरूपोऽपि जीवो देहवृत्तिव्याधिजन्यदुःखानि, आत्मन्यन्तःकरणाध्यासात्तद्वृत्तिकामक्रोधादिजन्यमानसदुःखानि, आत्मन्यारोपितभौतिकपदार्थसंसर्गजन्यानि बाह्यदुःखानि चानुभवति। लौकिकोपायेनैकस्य दुःखस्य निवृत्त्युत्तरमपरं दुःखमुदेतीति दुःखतारतम्यं दृश्यते। अथ च रूपरसादिविषयसन्निकर्षे सति स्वाभीष्टविषयाकारवृत्तिर्जायते। तस्यां वृत्तावानन्दस्वरूपं चैतन्यं प्रतिबिम्बते। तच्च वैत्रिकं सुखं वृत्तिकालं यावदुपतिष्ठते। वृत्तिरूपोपाधेर्लये च लीयते।

**सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।**
**सुखदुःखे मनुष्याणां चक्रवत् परिवर्ततः ।।**[१]

लौकिकं सुखमनित्यं सातिशयञ्चास्ति। तच्च दुःखधाराया निवर्तकं नास्ति। सबीजं दुःखनिवर्तकमद्वयात्मरूपं सुखम्। तच्च वेदान्तवाक्यजन्याखण्डचैतन्याकाराहं ब्रह्मास्मिवृत्त्याऽविद्यानिवृत्तावात्मसाक्षात्कारेण भवति। ''अविद्यातत्कार्यहीनः स्वात्मबन्धहीनः स्वात्मबन्धहरः सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमो मोहोऽहमेवेति तस्मादेवमेवमात्मानं परं ब्रह्मानुसंदध्यादेष वीरो नृसिंह एव''।[२]

द्वैतज्ञानं दुःखमद्वैतज्ञानं निरतिशयात्यान्तिकं सुखमुच्यते। ''द्वितीयाद्वै भयं भवति''[३] ''द्वैतभाावविमुक्तोऽस्मि सच्चिदानन्दलक्षणः''[४] ''द्वैताद्वैतविहीनोऽस्मि द्वन्द्वहीनोऽस्मि सोऽस्म्यहम्''[५] यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्''[६] इत्यादिश्रुतयो द्वैतस्यैव बन्धकारणत्वं वदन्ति। तन्निवृत्तिश्च मोक्षः। द्वैतनिवृत्तिश्च द्वैतबीजभूताविद्याया निवृत्तौ सत्यां भवतीत्यविद्यानिवृत्तौ वेदान्तशास्त्रं प्रवर्तते।

**जीवन्मुक्तिस्वरूपविचारः**

फलोन्मुखानां प्रारब्धकर्मणामवशेषावस्थायामात्मसाक्षात्कारेणाविद्यानिवृत्ति-

---

१. शान्तिपर्वणि २५/२३ २. नृसिंहो० २/८ ३. बृ०उप० १/४/२
४. अ०पू० ५/६८ ५. मैत्रेयीब्राह्मणे ३/४ ६. बृ०उप० ४/५/१५

जीवन्मुक्तिरुच्यते। श्रवणमनननिदिध्यासनाादिना जायमानाहं ब्रह्मास्मीति वृत्त्या-ऽद्वयात्मविषयाया अविद्याया निवृत्तावद्वयात्ममात्रावस्थानं मोक्षः। तत्राहं ब्रह्मास्मीति वृत्तिकालः सविकल्पकसमाधिकालः। तदानीमनात्मविषयकवृत्तीनां लयेऽप्यन्तःकरणपरिणामभूताया अहं ब्रह्मास्मीति वृत्तेर्जायमानत्वात्। अहं ब्रह्मास्मिवृत्तिकाले वृत्त्युपहितमेवात्मतत्त्वं नानुपहितमिति। अनुपहितमद्वयात्म-तत्त्वं मोक्षः। अतोऽहं ब्रह्मास्मिवृत्तिः सविकल्पकसमाधिः। स च मोक्षसाधनम्। तया वृत्त्या सबीजं प्रपञ्चनिवृत्तिर्निर्विकल्पकसमाधिर्मोक्षः। तदानीं ज्ञातृज्ञानज्ञेयाद्य-विद्याजन्यप्रपञ्चस्य निवृत्तावात्ममात्रमवशिष्यते। आत्मज्ञानेन प्रारब्धकर्मणां नाशो न भवति। आत्मसाक्षात्कारेण प्रारब्धकर्मनाशाभ्युपगमे देहनाशप्रसङ्गः स्यात्। ''तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये''[१] ''विमुक्तश्च विमुच्यते''[२] ''विमुक्तं मन्येतात्मानं मुच्यते नात्र संशयः''[३] विमुक्तः सर्वपापेभ्यः कैवल्यायोप-कल्पते''[४] इति श्रुतयः, ''विमुक्तो मामुपैष्यसि''[५] ''विमुक्तोऽमृतमश्नुते''[६] ''विमुच्य निर्ममः शान्तः''[७] इत्यादिस्मृतयश्च जीवन्मुक्तौ प्रमाणानि सन्ति।

सांख्यशास्त्रे तत्त्वज्ञानरूपविवेकख्यातेरुदयाद् धर्माधर्मादिसञ्चितकर्मणां विनष्टबीजभावानां फलोपादानशक्तेरभावान्नूतनसंसारासत्त्वेऽपि संस्कारवशात्पूर्व-कृतसंसारश्चक्रभ्रमिवदनुवर्तते। ''सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।

**तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः।।**[८]

अत्रापि मते तत्त्वज्ञानेन फलोन्मुखानि प्रारब्धकर्माणि न नश्यन्ति। यथा चक्रभ्रम्युत्पादकव्यापारापगतेऽपि भ्रमेराश्रयीभूतं चक्रं वेगाख्यसंस्कारवशाद्-भ्रमिरूपव्यापारवद् भवति। तथैव प्रारब्धस्वरूपस्थूलसूक्ष्मशरीरद्वयसत्त्वे प्रारब्ध-फलोपभोगो विरक्तस्यापि भवति। प्रारब्धकर्मोपभोगो भोगेनैव क्षीयते। तथा चोक्तम् ''शरीरस्थितौ च प्रारब्धकर्मपरिपाकौ धर्माधर्मौ संस्कारौ, तौ च भोगेन

---

१. छा०उप० ६/१४/२   २. कठो० ५/१   ३.अमन० २/४५
४. गुह्यका० ८४   ५. भग०गी० ९/२८   ६. तत्रैव १४/२०
७. तत्रैव १८/५३   ८. सां०का० ६७

क्षेतव्यौ''[१] जीवन्मुक्तौ ''जीवन्मुक्तश्च''[२] ''चक्रभ्रमणवद् धृतशरीरः''[३] संस्कार-लेशतस्तत्सिद्धिः[४], सांख्यसूत्राणि मानानि सन्ति। योगशास्त्रविदोऽपि तत्त्वज्ञानेन प्रकृतिपुरुषविवेके जातेऽपि प्रारब्धकर्मविपाकानुरूपं वासनानामभिव्यक्तिं मन्यन्ते। ''ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्''[५] तथा स्मृतिः ''नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥''[६] तदित्थं सांख्ये योगे वेदान्ते च जीवन्मुक्तिरभिमतास्ति।

**विदेहमुक्तिः**

प्रारब्धसमाप्तिसमकालीनया चरमवृत्त्याऽविद्यानिवृत्तिर्विदेहमुक्तिरुच्यते। चरम-वृत्तिक्षणोत्पन्नाहं ब्रह्मास्मीतिब्रह्माकारवृत्तिः ससंस्कारमविद्यां निवर्तयति। वृत्तिप्राग-भावानधिकरणक्षण चरमवृत्तिक्षणः। यत्क्षणोत्तरं वृत्तिरुपद्यते, स क्षण उत्तर-कालीनवृत्तेः प्रागभावाधिकरणक्षणः। यत्क्षणोत्तरं वृत्तिर्नोदेति, स क्षणो वृत्ति-प्रागभावानधिकरणक्षणः। प्रारब्धकर्मावशेषेऽहं ब्रह्मास्मिवृत्त्याऽनात्मवृत्तीनां निवृत्तिहेतुभूताया अहं ब्रह्मास्मिवृत्तेर्निर्विकल्पकसमाधौ लयेऽपि समाधेरुत्थितस्य पुनर्वृत्तेरुदयसम्भवात् प्रारब्धकर्मावशेषसमकालीननिर्विकल्पकसमाधिक्षणोवृत्ति-प्रागभावानधिकरणक्षणो नास्ति। तत्राविद्यासंस्कारस्य विद्यमानत्वात्। ''अविद्या-स्तमयो मोक्षः'' इत्यत्र ससंस्काराविद्यानिवृतित्तर्मोक्षोऽभिमतः। यावदविद्या-संस्कारात्मना संसारवासना अवतिष्ठन्ते, तावत्कालं न विदेहमुक्तिः। ''यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता। अथ मर्त्योऽमृतो भवत्यत्र समश्नुते''[७] इति वेदान्तमते ससंस्काराविद्यानिवृत्तिर्विदेहमुक्तिरुच्यते।

सांख्यनये तु तत्त्वज्ञानेन प्रकृतिपुरुषयोर्विवेकज्ञाने जातेऽपि प्रारब्धकर्मजन्य-स्थूलशरीरसूक्ष्मशरीरयोः सत्त्वे तद्वशीभूतकर्मविपाका अनुवर्तन्ते। प्रारब्धकर्म-व्यपगते सकलकर्मविपाकोपरतिर्विदेहमुक्तिः। तथा चोक्तम्—

---

१. सांख्यतत्त्वकौमुदी २. सा०सू० ३/७८ ३. तत्रैव ३/८२
४. तत्रैव ३/८३ ५. यो०सू० ४/८ ६. स्मृतिः
७. कठो० ६/१४

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।**
**एकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ।।''**[८]

''अनारब्धविपाकानां तावत् कर्माशयानां तत्त्वज्ञानाग्निना बीजभावो दग्धः । प्रारब्धविपाकानां तूपभोगेन क्षये सति''[२] प्रारब्धविपाकानां तत्त्वज्ञानाग्निना दाहोऽशक्यः । तेषामुपभोगेनैव क्षयो भवति। ततश्च विदेहमुक्तिरिति। ''विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात्''[३]। योगशास्त्रे च प्रारब्धरूपं संसारचक्रं वासनाहेतुः । तस्य हेतुरविद्या । यथा कुलालोत्पादित-व्यापारेण चक्रे वेगाख्यः संस्कारो जायते। यावत्कालं वेगाख्यसंस्कारस्य स्थितिस्तावत् कालं घटादिकार्यं सम्पद्यते । व्यपगते वेगाख्यसंस्कारे न कार्य-संसृतिः । तद्वत् प्रारब्धकर्मणां सत्वे संसारचक्रं प्रवर्तते । प्रारब्धकर्मणामुपभोगेन क्षये संसारचक्रमुपरमते । अविद्यानिवृत्तौ च विहितनिषिद्धसञ्चितकर्मणां सत्त्वेऽपि संसारचक्रभ्रमणाभावान्नवासनोदयो भवति । अविद्यैव हेतुर्वासनायाः । यं पुरुषार्थमु-द्दीश्य धर्माद्युत्पन्नं तदेव वासनानामपि फलं भवति। प्रारब्धकर्मवासनयोर-न्योन्यसहकारित्वात् । तथा चोक्तम् ''हेतुफलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः'' ।[४]

## मोक्षसाधनस्वरूपविचारः

बन्धबीजभूताविद्यायानिवृत्तिर्मोक्षः । सा चाधिष्ठानस्वरूपज्ञानैव निवर्त्यते। आत्मसाक्षात्कारो मोक्षसाधनम् । ''तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय''[५] ''तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चयामृतस्यैष सेतुः''[६] ''तमेव ज्ञात्वा विद्वान् मृत्युमुखात् प्रमुच्यते''[७] ''ज्ञात्वा देवं मुच्यते सर्वपाशैः''[८] इत्यादिश्रुतयः ज्ञानं लब्ध्वा परां शान्तिम्''[९] ''ज्ञानाग्निदग्धकर्माणम्''[१०] ''ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते''[११] ''ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्''[१२] इत्यादिस्मृतयश्च ज्ञानमेव मोक्षसाधन-

१. सा०का० ६८ २. सांख्यतत्त्वकौमुदी ३. सा०सू० ८४
४. यो०सू० ४/११ ५. श्वेता० ३/८ ६. मुण्ड० २/२/५
७. ना०प० ९/१ ८. श्वेता० १/८ ९. भग०गी० ४/३९
१०. तत्रैव ४/१९ ११. तत्रैव ४/३७ १२. तत्रैव ५/१६

त्वेनामनन्ति।

नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसम्पत्तिः मुमुक्षुत्वञ्चेति ब्रह्मजिज्ञासोदये हेतुत्वात् सहकारिकारणानि सन्ति। एतेषु सत्सु ब्रह्मजिज्ञासा जायते। एतेषु असत्सु ब्रह्मजिज्ञासा न जायत इत्यन्वयव्यतिरेकाभ्यामेते ब्रह्मजिज्ञासाहेतवो भवन्ति। ब्रह्मजिज्ञासायां सत्यां वेदान्तशास्त्राध्ययने प्रवर्तन्ते जनाः। तत्र नित्यानित्यवस्तुविवेकः इहामुत्रार्थभोगविरागे हेतुः। ब्रह्मैव नित्यं वस्तु तदतिरिक्तं सर्वमनित्यमिति ज्ञाने सति ब्रह्मातिरिक्तानात्मविषयेभ्यो विराग उपजायते। नित्यानित्यवस्तुविवेके सत्यपि अनादिवासनावशीभूतं मनो विषयेषु प्रवर्तते। तन्निग्रहः शमः। बाह्येनिग्रहोदयो दमः। ब्रह्मातिरिक्तविषयेभ्य मन आदीन्द्रियाणामुपरमणमुपरतिः। शमदमोपरतितितिक्षादयः सविकल्पकसमाधौ कारणानि। वेदान्तमते सविकल्पकसमाधिरहं ब्रह्मास्मीति ब्रह्माकारान्तःकरणपरिणामात्मिका वृत्तिः। तया वृत्याऽविद्यानिवृत्तिरूपात्ममात्रावशेषावस्थितिर्निर्विकल्पकसमाधिः। स च प्रारब्धशेषकाले जीवन्मुक्तिः, प्रारब्धसमाप्तिसमकालीनो निर्विकल्पकसमाधिर्विदेहमुक्तिः।

सांख्यदर्शनेऽपि तत्त्वज्ञानस्यैव मोक्षहेतुत्वमभिमतम् ''ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः''[१] वैराग्यादयस्तत्त्वजिज्ञासायां हेतवो भवन्ति। ''वैराग्यात् प्रकृतिलयः''[२] शुद्धबुद्धमुक्तस्वभावाश्चित्स्वरूपः प्रकृतिसङ्गादबद्धोऽपि बद्धवद्भाति। ''तस्यान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥''[३] प्रकृतिपुरुषयोरविवेके का प्रकृति कश्च पुरुष इति ज्ञानाभावे प्रकृतिबन्धं पुरुषः स्वस्मिन्ननुभवति। पुरुषविविक्तप्रकृत्यादिपञ्चविंशतिपदार्थस्वरूपज्ञानान्मुक्तात्मकं स्वस्वरूपमनुभवति पुरुषः। ''एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्। अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्॥''[४] ''विमुक्तमोक्षार्थं स्वार्थं वा प्रधान.....''[५] ज्ञानान्मुक्तिः''[६] ''बन्धो विपर्ययात्'[७] इत्यत्र साक्षाज्ज्ञानस्य मोक्षसाधनत्वमज्ञानस्य च बन्धहेतुत्वमुक्तं

१. सा०का० ४४    २. सा०का० ४५    ३. सा०का० ६२
४. सा०का० ६४    ५. सा०सू० २/१    ६. सा०सू० ३/२३
७. सा०सू० ३/२४

सांख्यशास्त्रे।

योगशास्त्रेप्यविद्याया बन्धहेतुत्वमविद्यानिवृत्तिश्च मोक्षाऽभिमन्यते। ''अविद्याऽस्मितरागद्वेषाभिनिवेशा: पञ्च क्लेशा:''[१] क्लेशेष्वादिक्लेशोऽविद्या सा च क्लेशान्तरहेतु:। अस्मितादिक्लेशानामविद्याजन्यत्वात् । ''अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्''[२] तथा चोक्तं भाष्ये ''सर्वेष्वविद्यैवाभिप्लवते, यदविद्यया वस्त्वाकार्य्यते, तदेवानुशेरते क्लेशा:। विपर्य्यासकाले उपलभ्यन्ते, क्षीयमाणां चाविद्यामनुक्षीयन्ते''[३] अनित्ये नित्यत्वम्, अशुचौ शुचित्वं दु:खे सुखरूपञ्चाविद्याप्रयुक्तं भाति। ''अनित्याशुचिदु:खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या''[४] अत: सकलानर्थभूतबन्धमूलमविद्या तस्या निवृत्तौ सकलबन्धनिवृत्ति:।

ते च क्लेशा: क्रियायोगादिना क्षीणभावमापन्ना: प्रसंख्यानेन सविकल्पकसमाधिजन्यप्रज्ञारूपेण ध्यानेन समूलं नश्यन्ति। ''ध्यानहेयास्तद्वृत्तय:''।[५]

**विषया विनिवर्तन्ते निराहास्य देहिनः।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।।**[६]

अतोऽत्राप्यविद्यानिवृत्ति: साक्षान्मोक्षसाधनम्, क्रियायोगादय: सहकारिकारणानि। तदित्थं सांख्ययोगवेदान्ताभिमतसाध्यसाधनविमर्श: संक्षेपेण प्रतिपादित:।

**यत् सांख्ये कथितं साध्यं योगशास्त्रेण सम्मतम्।**
**तद्वेदान्तमते ज्ञेयं त्रिषु साध्यं सुसङ्गतम्।।१।।**
**अविद्याध्वंस एवात्र साधनं शास्त्रसम्मतम्।**
**सहकारणभेदश्च शास्त्रसिद्धान्तभेदतः।।२।।**

**

१. यो०सू० २/३ २. यो०सू० २/४ ३. व्यासभाष्यम् यो०सू० २/४
४. यो०सू० २/५ ५. यो०सू० २/११ ६. भग०गी० २/५९

# दक्षिणभारतीया श्रीजयदेवकृत्यनुकृतिपरम्परा

डा. डि रामकृष्णः,
मारिस् श्टिला कलेज, विजयवाडा.

मुक्तेरप्यतिदुर्लभा हिमगिरिप्रस्यन्दिमन्दाकिनी
धारातोऽप्यतिशीतलातिमसृणा चान्द्रान्मयूखादपि ।
वाञ्छातोऽप्यतिविस्तृता विषयिणां त्वत्पादचिन्तापर
स्वान्तादप्यतिनिर्मला मयि कृपादृष्टिस्तवास्तां प्रभो ।।[१] इति

मधुसूदनसरस्वतीस्वामिपादैः प्रोक्तदिशा भक्त्युद्रेक प्रवणमनसां भगवत्कृपादृष्टिप्राप्त्यैकनिष्ठानां भक्तकवीनां भक्तिरसप्लावितकृतिकाराणामग्रेगण्यस्य श्रीजयदेवमहाकवेः गीतगोविन्दकृत्यनुकरणं दाक्षिणात्यैर्बहुभिर्विहितमिति निवेदयितुमेवाऽयमारम्भः ।

सांप्रदायिकसङ्गीतकाराणं 'वाग्गेयकारका' इति पारिभाषिकपदेन निर्देशः प्रवर्तते ।

वाङ्मातुरुच्यते-गेयं धातुरित्यभिधीयते ।
वाचं गेयं च कुरुते यस्स वाग्गेयकारकः ।। [२] इति वचनात्

'मातु' इति व्यवह्रियमाणं साहित्यं, तथा 'धातु' इति व्यवह्रियमाणं स्वरप्रस्तारादिकं रचयितुं सामर्थ्यं, तथा रसिकरञ्जन पूर्वकं तद्गानकौशलं यस्य तस्यैव वाग्गेयकारक पदप्राप्तिः नान्यस्येति सिद्ध्यति ।

शिलालेखादिप्रामाण्यवशात् जयदेवस्य समयादिनिर्धारणेन तस्य प्रथमवाग्गेयकारक पदं ऐतिहासिकदृष्ट्या सुस्थिरमित्यत्र नास्त्येवावसरः शङ्कायाः । तदस्तु ।

सर्वातिशायिप्रतिभादिसनाथितेन महाकविना जयदेवेन प्रणीतं गीतगोविन्दमहाकाव्यं तत्परवर्ति सकल वाग्गेयकारक पदभाजामादर्शग्रन्थं बभूव ।

गीतगोविन्दं शुद्धगीतिकाव्यशुद्धनाट्ययोरन्तरे वर्तते, यद्यपीदं द्वादशशताब्द्यां निरमीयत, अथापीदं पक्वतामुपयास्यतो नाट्यस्योदाहरणस्वरूपतया प्रथमं निदर्शनं मन्तव्यम्, यदीया परम्परा उत्कलेषु वङ्गेषु च सम्प्रत्यपि जीवति । इदं शुद्धनाट्यस्यानुगामि मन्तुं शक्यते यद्यपि संवादोऽत्र नास्ति ।

गीतगोविन्दस्य द्वादशापि सर्गाः गीतमयाः । सर्गाणां कथां परस्परं योजयितुं कतिचन श्लोका अपि सन्ति । सरसमधुरकवितायाः पराकाष्ठाऽत्र निदर्शिता ।

भक्तेः सरसकवितायाश्चैकत्र समावेशो यथा गीतगोविन्दे न तथा क्वापि परत्रेति कथनं नानुपयुक्तम् स्वयमुक्तं जयदेवेन -

'यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलिं श्रृणु तदा जयदेवसरस्वतीम् ।।' [3]

महाप्रभुश्चैतन्यदेवोऽस्य गीतगोविन्दस्य परमभक्त आसीत् । तच्छिष्यान्यतमो षोडशशताब्दीसम्भूतो राजा प्रतापरुद्रः उत्कलीयमन्दिरेषु गीतगोविन्दस्य नियमितगानार्थं भूमिदानं कृतवान् ।

वाग्गेयकारकेषु आन्ध्रप्रदेशीयेषु तिरुमल श्रीवेङ्कटेश्वर परमभक्ताग्रगण्यो ताल्लपाक अन्नमाचार्यः सर्वोन्नतं स्थान माक्रमति । येन श्रीवेङ्कटेश्वरप्रीत्यै द्वात्रिंशत्सहस्र पदानि विरच्य समर्पितानि । तस्य पदाख्य सङ्कीर्तनेषु बहुषु भगवतः केलि रहस्यानि श्रृङ्गाररससंपूर्णानि संदृश्यन्ते । ईसवीय पंचदश शताब्दीयः सः भगवतः श्रीवेङ्कटाचलधीशस्य चम्पकप्रदक्षिणोपक्रमे स्वरसहित प्रथमसंस्कृतसूळादिं शिलालेखरूपेण संस्थापितवान् । यथा जयदेवमहाकवेः श्रृङ्गाराष्टपदिषु दशावताराष्टपदि प्रथमा रचना, तथैव सूळादिषु

अन्नमय्यस्य दशावतारसूळादिः प्राथम्यं भजते। अनन्तरं पुरन्दरदासस्य कल्याणिरागे दशावतारमङ्गळम्, त्यागराजस्वामिनः भूपालरागे दशावतार दिव्यनामसङ्कीर्तनं, स्वातितिरुनाळस्य दशावतारागमालिका प्रसिद्धिं गताः। पुरन्दरदासः कर्नाटक राज्याभिजनः, त्यागराजस्तु तमिळनाडुप्रदेशे स्थितोपि आन्ध्र एव, स्वातितिरुनाळ् केरलीयो भवति। एवं जयदेव गीत गोविन्दानुकरणमान्ध्रैरारब्धम्। पश्चादितरे दाक्षिणात्या अपि तदनुसृत्य दशावतारविषयक सङ्गीतं प्रसारयामासुः।

समग्रे विश्वे प्रथमोपलब्ध स्वरसहितसङ्कीर्तन शिलालेखः संस्कृतभाषायाम् अन्नमय्यनिर्मितः दशावतारसूळादिः जयदेवस्य दशावताराष्टपदिमनुकरोतीत्यहो जयदेवस्य गीतगोविन्दप्रभावः सङ्गीतकारेषु संमुद्रितोस्ति। तदेवत्तिरुमल तिरुपतिदेवस्थानेन ग्रन्थरूपेणावि मुद्रापितमस्ति। [४]

नर्तनानुकूलसङ्कीर्तन योग्य पदरचनानां 'चौपद' व्यवहारः। अन्नमय्यः चौपदाख्यपदानां कर्ता आसीत्। जयदेवस्य अष्टपदिषु विद्यमान ध्रुवस्य, पदानां पञ्चधातुषु स्थितस्य ध्रुवस्य, पश्चात्कालीन पल्लवि, अनुपल्लविषु साम्यं परिणामक्रमं च परिशीलनार्ह मस्ति। एवं तत्र क्रमविकासः दृश्यते। सर्वस्यास्य आरम्भः जयदेवादेव जात इति निश्चप्रचम्।

जयदेवमहाकवेरवतारत्वेन संसेव्यमानाः "श्रीकृष्ण-लीलातरङ्गिणी" कारा श्रीनारायणतीर्थस्वामिपादाः ईसवीय १६७५ तः १७४५ पर्यन्तमिमं भुवं भूषयांचक्रुरिति निर्धारितम्। एतेषां जन्मस्थानम् आन्ध्रप्रदेशान्तर्गत विजयवाडा-गुन्टूरु नगरयोर्मध्यगत 'काज' इति ग्रामः। तमिळनाडु राज्यान्तर्गत तिरुप्पुन्दुर्तिग्रामे विदेहमुक्तिं गताः। यौवने एव तुरीयाश्रम स्वीकारानन्तरं तीर्थयात्रामाचरन्तः काश्यां बहुकालं स्थित्वा पूर्वोत्तरमीमांसा न्याय सांख्य योगादि सकलशास्त्रेषु ग्रन्थान् निर्माय पुनः दक्षिणभारतं प्रतिनिवृत्ताः श्रीजगन्नाथक्षेत्रं संप्रापुः। तत्र श्रीजयदेवमहाकवेः गीतगोविन्द महाकाव्यप्रभाववशात् श्रीकृष्णलीलातरङ्गिणीप्रणयने बद्धादराः संवृत्ता इति परम्परागतवृत्तान्तः प्रचलति। स्वकृत्यारभ्भे गणेशगरुड भागवतान् प्रणम्य श्रीजगन्नाथ मित्थं कीर्तयामासुः। यथा -

सुभद्राबलभद्र सुदर्शनसहित
इभराजतारक ईश मामव देव
लवणजलधितीर ललितनीलाचल
नवमणिपरिशोभि नव्यदिव्यभवन
वटविटपिनिकट वरसिंहासन
निटलाक्षविधिकृत नित्यमङ्गलाचरण
मार्कण्डेयजलधि मध्यगणेशहित
दुर्गतिहर अष्ट दुर्गापरिवेष्टित
पतितजनपावन परमदिव्यमङ्गल
अतिकरुणाकर अद्भुतमहाप्रसाद
जगन्मोहनमण्टप जयशब्दबहुल
जगदेकनायक जितसुरारिमण्डल
विनतातनयसेव्य विनतमङ्गलकर
विदलितभवबन्ध वेदवनसञ्चार
नारदादिमुनिगेय नामधेय सुखद
नारायणानन्दतीर्थभावितानन्द ।।इति।। [५]

एवमेव गीतगोविन्दे अपि तेषां महानादरः कण्ठतः एकस्मिन् गीते प्रकटितश्चेत्थम्-

श्रीगोपालकमेव दैवतं हृदये
आगमारविन्दबृन्दहंसमाकलये
सर्वलोकैकशरण्यचरणारविन्दं

दुर्विनीतमदभङ्गदोर्दण्डबृन्दं
निर्विशेषनिरन्तर निर्मलानन्दं
गीर्वाणगन्धर्वकोटि **गीतगोविन्दम्** ।।इति।। [६]

एवं जगन्नाथजयदेवयोर्भक्तिं वहन्तः द्वागशतरङ्गसमुपेतां देवकीकल्याणात् रुक्मिणीकल्याणपर्यन्त भागवतीय दशमस्कन्धगाथायुतां सङ्गीत नाट्याभिनय साहित्य वेदान्त सङ्गमरूपां श्रीकृष्णलीलातरङ्गिणीं रचयामासुः । आन्ध्रदेशे अद्यंकि, कूचिपूडि इत्यादिस्थलेषु सर्ववर्णसमभावेन बहूनध्याप्य, कलौ केशव कीर्तनादेव मुक्तिं प्रबोध्य भगवदादेशेन तमिळराज्ये वरहूरं प्राप्य तत्र वेङ्कटेशसेवा माचरन्तः स्वकृतिं तत्र वेङ्कटेशार्पणं विधाय तत्रापि बहूनध्यापितवन्तः । तत्र जन्माष्टमीत्यादिपर्वसु शिक्योत्सवादिसन्दर्भेषु. भगवतः नित्योत्सवादिषु प्रथमतः गीतगोविन्दगानं पश्चात् तरङ्गिणीगानं च व्यवस्थापयामासुः ।

श्रीकृष्णशिक्योत्सवप्रबन्धे श्रीनारायणकविरेवमाह । तथा हि ।
श्रीनारायणतीर्थ इत्यभिधया ख्यातः पुरान्ध्रद्विजो
ग्रामान्प्राक्तनकर्मपाकजनितादृहृद्रोगतः पीडितः ।
तत्तत्पुण्यनदीसुरालयपरिश्रान्तिं विधित्सुर्हरिं
भक्त्या संततमर्चयन्गदनिरासार्थं प्रतस्थे गृहात् ।। [७]

श्रीनारायणतीर्थनामकयतिर्गत्वा वराहाध्वना
कंचिद्विप्रवराग्रहारनिकटं लीने क्कचित्पोत्रिणि ।
तत्र प्राङ्मुखगेहपंक्तिसरणौ मध्येऽग्रहारं हरेः
क्षेत्रं जीर्णतमं सनन्दनवनं वीक्ष्य प्रपेदे मुदम् ।। [८]

हृद्रोगेण यदा व्यमुच्यत दयालोकेन लक्ष्मीपते
र्विप्रेन्द्रः स तदा स्वशासनकरग्रामीणधात्रीसुरान् ।
प्रोत्साह्य स्वयमस्य वेङ्कटपतेः कारुण्यमुद्घोषयन्
शिक्याघातमहं प्रवर्त्य भजनं चासीद्धरौ निर्वृतः ।। [९]
कृष्णावतारदिवसस्य दिने परस्मिन्
शिक्यप्रहारकलनाभिनयं विनोदम् ।
ग्रामे वराहपुरनामनि विप्रवर्गः
सम्यक्प्रवर्तयति शौरिमनः प्रसत्त्यै ।। [१०]

आन्ध्रदेशीय कूचिपूडि नाट्याभिनयेऽपि गीतगोविन्दाभिनयं प्रकल्पयामासुः । कूचिपूडिभागवतानां यो गुरुः सिद्धेन्द्रयोगी, सः तीर्थपादानां शिष्यः । तमिळराज्ये मेलत्तूर् इत्यादिस्थलेष्वपि भागवतानां भजनसम्प्रदाये, नाट्याभिनयादिषु च गीतगोविन्दम्, कृष्णलीलातरङ्गिणीं च संस्थापयामासुः । एवमेते जयदेवगीत गोविन्दस्य दक्षिणभारते सम्प्रदायरूपेण प्राचुर्यसाधने प्रथमाः प्रसिद्धा अभूवन् । एतेषां गीतगोविन्दानुरागविषये श्री वि नटराजन् महोदयानां वचांसि समादरणीयतां भजन्ते । यथा

PuriShould have made a tremendous impression on Narayana Tirtha, particularly the rituals and Jayadeva's Gita Govindam tradition.

Devadasis danced before Jagannatha and Jayadeva's Gita Govindam was sung every day before the Lord by four brahmanas. The Gita Goviendam was incorporated into the rituals of the Jagannatha temple and, by an edict inscribed on the gateway to the temple, no other song than from the Gita Govindam may be sung and no other dance

should be performed before the Lord. Jayadeva's Gita Govindam had made a great impact not only on Puri but also on Andhra territory and the different parts of South India. Narayana Tirtha, Who is himself regarded as an incarnation of Jayadeva, derived inspiration from Jayadeva's Gita Govindam. For many centuries it has been used in the Andhra Country, particularly in the "KuchipudiNatya" tradition as an important part of its repertoire.

Even in the ten-day "Sikyotsavam" (Uriyadi festival) at Varahur (in Tamil Nadu) during Janmashtami (Krishna's birthday), Where Narayana Tirtha finalised the text and placed " Sri Krishna LeelTarangini" at the feet of Lord Venkatesa of Varahur and the Lord is said to have danced to the Tarangam pieces, it is notieced that considerable importance is given to the chorus singing at this shrine of Jayadeva'sAshtapadis and they are accorded priority in the local BhajanaSampradaya even over Narayana Tirtha'sTarangams. The order of priority in singing Jayadevs'sAshtapadis over even Narayana Tirtha'sTarangams may in itself be ahandome acknowledgement of Narayana Tirtha's devotion to Jayadeva and Gita Govindam and the integrated loyalty of the varahur tradition to both Jayadeva and Narayana Tirtha.[११]

नारायणतीर्थ समसामयिका स्तथानन्तरकालीना अपि नामसिद्धान्तप्रवर्तकाः तत्प्रभावात् गीतगोविन्द गानसम्प्रदायं परिपालयामासुः । टि.एस्. पार्थसारथि महोदयानां प्रमाणवचनानि अत्र उपादेयानि भवन्ति । तानियथा -

The Bhajanasampradaya of South India was almost exclusively nurtured by a few Advaitic scholars and musicians, most of whom were Telugus. Some of them were sanyasins. To this group belonged Narayana Tirtha, Bodhendra Swami (of Govindapuram), SridharaVenkatesa(Ayyaval) of Tiruvisainallur, SadasivaBrahmendra of Nerur, Sadguru Swami of Marundanallur, who established firmly the tradition of "NamaSiddhanta" in Tamil Nadu.[१२]

ततः उपनिषद्ब्रह्म योगिवर्यः अष्टोत्तरशतोपनिषदामपि विवरणकर्ता स्वेष्टदैवं राममुद्दिश्य रामतरङ्ग, रामाष्टपदी प्रणयनेन स्वस्य जयदेवनारायणतीर्थयोः भक्तिं प्राकटयत् । अस्य विषये प्रथितयश सां डा.वि.राघवन् महोदयानां वचांसि अवलोकनीयतां प्राप्नुवन्ति । तथा हि -

Upanishad Brahman of Kanchi, an elder Contemporary of Tyagaraja (1767-1847 AD) and MuthuswamiDikshitar (1776-1835 AD), was known by this name because he had written commentaries on the 108 Upanishads. The bulk of the musical compositions of Upanishad Brahman relate to Rama and fall into four categories:

1. DivyanamaSankirtanams; 2. the Rama Taranga; 3. the Ramashtapadi and 4. Other songs on Rama, his IshtaDevata. The names Ashtapdi and Taranga are no doubt derived from Jayadeva's Gita Govindam and Narayana Tirtha's Sri Krishna LeelaTarangini.[१३]

विशेषतो वक्तव्योयं विषयः यत् गीतगोविन्दस्य जयदेवकालीनाभिनयनिरुपक पाण्डुलिपिद्वयं तञ्जपुरस्थ सरस्वतीमहल् पुस्तकालये उपलभ्यते ।

It is a noteworthy feature of the Ashtapadies that they have all been composed for the express purpose of being used for Nritya(Dance with Abhinaya). This is indicated by the reference, in the text of the Astapadi, to the fact that Sri jayadeva sang these Ashtapadies to the accompaniment of Nritya by his devoted wife padmavati. He calls himself in introductory verse No.2 an expert in directing the feet of Padmavathi in her dance. (PadmavathiCharanaChaaranaChakravarti); and again he refers to the collabration of Padmavathi in his recital in Ashtapadi. 21(VihitaPadmavatisukhaSamaje-Bhanati. JayadevaKavirajaraje)

Fortunately for us however, the Abhinaya for every word is found in two manuscripts, preserved in the SaraswatiMahal. But in both the manuscripts, the text breaks off at the 17th Ashtapadi. Incomplete as it is, it is presented to the public on account of the rarity and value of genuine traditional practice of Nritya. The fact that the Abhinayagiven here agrees well with the practice of the Art in the Tanjore District which is now the home of the the purest tradition of BharataNatya, is itself sufficient to conclude that the work is pretty old. This conclusion is strengthened by another circumstance. Both the manuscripts are in paper and pretty old.

Palmleaf has solely been in use in the Tamil and Telugu land in general and in Tanjore in particular, till the advent of the Maharattas and the British. The fact that both these manuscripts are in paper show that both are from North India. After the advent of the Afghans and Moghuls, the pure tradition of BharataNritya had been mixed up with Persian forms in North India. But this work contains the BharataNatya tradition in a very pure form. It is therefore clear that this work must have been composed before the mixing up of the Indian and Persian styles of Dance, under the Afghan and Mughal rule of the 14th to 17th century in Northern India. It is extremely probable ***that this work was composed by the direct disciples of Sri Jayadeva himself or those just after them.***[१४]

तञ्जापुरं हि भरतनाट्यस्य प्रमुखं स्थानमस्ति । यत्र तेलुगुभाषायाः तेलुगुजनानां च प्राचुर्यं बहुशताब्द कालादासीत् । नटराजन् महोदया निरूपयन्ति । यथा -

The interaction of the Telugu culture and the Tamil Culture inherited from the Chola period and the hoary past was quite complete in the Tanjore region in the fields of music, literature, dance and drama by the fourteenth Centurey AD; and it reached its zenith under the Nayaka rulers and the Mahratha rulers of Tanjore right upto the middle

of the ninteenth century AD. The impact of the Telugu language on the traditional learning, music and dance forms and drama of Tanjaore region was remarkable. Even under Maharatha rule. Telugu continued to be a powerful factor in the fields of Literature, Music, Drama and Dance in the Tanjore Region. While Telugu continued to be a popular medium, with the added advantage of its being the court language, in the fileds of literature, music, dance and drama, the spectrum was also enlivened and enriched by a touch of Maharatha influence.[१५]

श्रीकाञ्चीकामकोटिपीठस्य श्रीमदाचार्य गुरुपरम्परायां दिषष्टितमाचार्य भगवत्पादैः श्रीचन्द्रशेखरेन्द्र सरस्वतीस्वामिपादैः विरचिता जयदेवीयाष्टपदीरीतिमनुसरन्ती शिवगीतिमालापरनामधेया शिवाष्टपदी श्रीमदेकाग्रनाथस्य कम्पानदीविराजमानायाः श्रीकामाक्षीदेव्याश्च अन्योन्यप्रेमबन्धं सम्यक् वर्णयन्ती सहृदयहृदयङ्गमा वरीवर्ति। शिवाष्टपदीयं तमिळनाडुराज्यस्य तिरुवारूर् क्षेत्रे विराजमान त्यागराजदेवालस्यातीव सम्बद्धाऽस्ति। प्रख्यातवाग्गेयकारस्य श्री मुत्तुस्वामिदीक्षितस्य पितुः श्रीरामस्वामिदीक्षितस्य सूचनानुसारं तत्रस्थ भगवतः त्यागराजस्वामिनः समर्प्यमाणेषूपचारेषु गानमस्याः नियमितरूपेणाद्यापि प्रचलति। यथा पुरूषोत्तमक्षेत्रे श्रीजगन्नाथ सन्निधौ श्री जयगेवस्य गीतगोविन्दगानं प्रचलति तथा। ग्रन्थकारात्वस्याः काञ्चीमठाधीशाः स्वामिपादाः अक्षरशः पादशः स्वरशः गीतगोविन्दमनुसरन्तः स्वीयां कृतिं प्राणिन्युः। ग्रन्थान्ते कण्ठशः -

विद्याविनीतजयदेवकवेरुदारं
गीतिप्रबन्धसरणिप्रणिधानमात्रात्।
एषा मया विरचिता शिवगीतिमाला
मोदं करोतु शिवयोः पदयोजनीया॥ [१६]

इति स्वयमेव प्राकाशयन्। प्राथमिकमिदंगीतं जयदेवकृत्यनुरागिणां मोदायाऽत्रप्रदर्श्यते। तथा हि -

(प्रलयपयोधिजले इतिवत्)

कनकसभासदने वदने दरहासं
नटसि विधाय सुधाकरभासं
शंकर धृततापसरूप जय भवतापहर ॥१॥

जलधिमथनसमये गरलानलशैलं
वहसि गलस्थमुदित्वरकीलं
शंकर धृतनीलगलाख्य जय भवतापहर ॥२॥

विधुरविरथचरणे निवसन्नवनिरथे
पुरमिषुणा हतवानितयोधे
शंकर वर वीरमहेश जय भवतापहर ॥3॥

कुसुमशरासकरं पुरतो विचरन्तं
गिरिश निहिंसितवानचिरं तं
शंकर मदनारिपदाख्य जय भवतापहर ॥४॥

वटतरुतलमहिते निवसन्मणिपीठे
दिशसि परात्मकलागतिगाढे
शंकर धृतमौन गभीर जय भवतापहर ।।५।।

जलनिधिसेतुतटे जनपावनयोगे
रघुकुलतिलकयशः प्रविभागे
शंकर रघुराममहेश जय भवतापहर ।।६।।

तनुभृदवनकृते वरकाशीनगरे
तारकमुपदिशसि स्थलसारे
शंकर शिव विश्वमहेश जय भवतापहर ।।७।।

निगमरसालतले निरवधिबोधघन
श्रीकामाक्षीकुचवलयाङ्कन
शंकर सहकारमहेश जय भवतापहर ।।८।।

कच्छपतनुहरिणा निस्तुलभक्तियुजा
संततपूजितचरणसरोज
शंकर शिव कच्छपलिङ्ग जय भवतापहर ।।९।।

शंकरवरगुरुणा परिपूजितपाद
काञ्चिपुरे विवृताखिलवेद
शंकर विधुमौळिमहेश जय भवतापहर ।।१०।।

श्रीविधुमौलियतेरिदमुदितमुदारं
श्रृणु करुणाभरणाखिलसारं
शंकरारुणशैलमहेश जय भवतापहर ।।११।।

श्लो।। कनकसभानटाय हरिनीलगळाय नम-
स्त्रिपुरहराय माररिपवे मुनिमोहभिदे ।
रघुकृतसेतवे विमलकाशिजुषे भवते
निगमरसाल कूर्महरिपूजित चन्द्रधर ।।

पापं वारयते परं घटयते कालं पराकुर्वते
मोहं दूरयते मदं शमयते मतासुरान् हिंसते ।
मारं मारयते महामुनिगणानानन्दिनः कुर्वते
पार्वत्या सहिताय सर्वनिधये शर्वाय तुभ्यं नमः ।।[१७]

एवमेव
जय जानकीदयित जयजगत्त्रयमहित
जय दिव्यगुणभरित जयदेवविनुत [१८]
इत्यारब्धा रामाष्टपदी श्रीरामकविकृता आदिकविं श्रीवाल्मीकि महर्षिं विषयेषु शैल्यां च अनुसरन्ती श्रीजयदेवगीतगोविन्दमनुकुर्वन्ती विराजत। रामकविरयं तञ्जपुराधीशानां नायकप्रभूणाममात्यस्य

श्रीगोविन्ददीक्षितस्य दौहित्रः, महिषशतककर्तृः वाञ्छेश्वराख्य कुट्टिकवेश्वानुजश्चाऽसीत् । तत्रस्थेयं प्रथमाष्टपदी । यथा -

(प्रळयपयोधिजले इतिवत्)

श्लो॥ वंशे जन्मवते रवेर्मुनिपतेः यज्ञावनं तन्वते
शैवं भञ्जयते धनुर्जनकजापाणिग्रहं कुर्वते ।
रामौजो हरते वनं प्रचलते नक्तञ्चराञ्निघ्नते
लङ्केशं जयते स्वराज्यमवते रामाय तुभ्यं नमः ॥

श्रीमति सूर्यकुले अकरोः अवतारं
प्रापयितुं भुवनं भवभारं (अभारम्?)
राघव धृतमनुजशरीर जय जय राम हरे ॥

सुरगणसाह्यविधौ करुणारससान्द्र
दशरथदुग्धपयोनिधिचन्द्र (राघव)
कौशिकमखपाल भावितमुनिदार
पुरहरकार्मुकभञ्जन धीर (राघव)
भार्गवगर्वहर पालितपितृवचन
विरचितखरमुखराक्षसहनन (राघव)
विदलितकनकमृग गळितवधूसौख्य
कल्पितदिनकरसुतवरसख्य राघव)
स्तम्भितवारिनिधे सीतासोत्कण्ठ
रणहतसानुजसुतदशकण्ठ (राघव)
भूमिसुतारमण विधिमुखसुरपूज्य
चिरपरिपालितरघुकुलराज्य (राघव)
इति तव रामकवौ कथयति शुभचरितं
कुरु हृदयं सदयं सुखचरितं [१९] (राघव)

एवम् श्रीजयदेवमहाकवेः, तत्कृतेः गीतगोविन्दस्य च प्रभावः अनुकृत्यादिनिर्माणे दाक्षिणात्येष्वप्रतिहतं प्रचलतीत्यानन्दातिशयेन निवेद्यत इति शम् ॥

## उपयुक्तग्रन्थसूची


१. कृष्णकुतूहलम् *VII.40, P.258,* महाविद्यापीठम्, दुण्डिगल्, एयर्फोर्स अकादमी रोड्, हैदराबाद्, *2015*
२. सङ्गीतकलाप्रदर्शनी, प्रथमभागः, *P.120,* ए.सत्यनारायणमूर्तिः हिन्दीवीथी, गान्धीनगरम्, विजयवाडा, *1979*
३. श्री गीतगोविन्दमहाकाव्यम् *I.3, P.10,* संस्कृतपरिषत्, हैदराबाद्, *2003*
४. The Tirumala Music Inscription, *P.54-55, TTD Publication, 1999*
५. श्रीकृष्णलालातरङ्गिणी *Volume I; I.3,P.226, MudgalaTrust,Madras, 2001*
६. *Ibid IV.I2, P.453*
७. श्रीकृष्णशिक्योत्सवप्रबन्धः, *I.71, Published by A.RamaswamiIyer, Krishnarajsagar,Mysore State, 1941*
८. श्रीकृष्णशिक्योत्सवप्रबन्धः, *I.81, Published by A.RamaswamiIyer, Krishnarajsagar,Mysore State, 1941*
९. श्रीकृष्णशिक्योत्सवप्रबन्धः, *I.91, Published by A.RamaswamiIyer, Krishnarajsagar,Mysore State, 1941*
१०. श्रीकृष्णशिक्योत्सवप्रबन्धः, *I.99, Published by A.RamaswamiIyer, Krishnarajsagar,Mysore State, 1941*

११. श्रीकृष्णलालातरङ्गिणी *Volume I; I.3,P.195-196, MudgalaTrust,Madras, 2001*
१२. *Ibid, P.69*
१३. *Ibid, P.80*
१४. Gita Govindam with Abhinaya, Introduction, *P.15-16, TanjoreSaraswatiMahal Series: No.6,1950*
१५. श्रीकृष्णलालातरङ्गिणी *Volume I; P.9*
१६. Sri Sivagitimala (XII.51) & Sri Ramashtapadi, *P.32,* Published by Kamakoti math, Kanchi, 1969
१७. Sri Sivagitimala (I.1-7) & Sri Ramashtapadi, *P.2-4,* Published by Kamakoti math, Kanchi, 1969
१८. Sri Sivagitimala& Sri Ramashtapadi (I), *P.33,* Published by Kamakoti math, Kanchi, 1969
१९. Sri Sivagitimala& Sri Ramashtapadi (I), *P.34-35,* Published by Kamakoti math, Kanchi, 1969

# उत्तररामचरितस्याङ्गिरसपर्यालोचनम्

डा.शैलेश कुमार मिश्रः
असिस्टेंट प्रोफेसर,
राजकीयसंस्कृतमहाविद्यालयः, राँची

'कारुण्यं भवभूतिरेव तनुते' 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इत्यादिभिः समीक्षावचनैः यो नाट्यकारः अपूर्वां विश्रुतिं लभते स महान् द्रष्टा स्रष्टा च कविः भवभूतिरेव वर्तते। तस्य तिसृषु नाट्यकृतिषु उत्तररामचरितं नाम नाटकं अशेषसंस्कृतनाट्यसाहित्ये श्रेष्ठत्वं लोकप्रियतां च भजते। एतस्मिन्नेव नाटके तादृशी करुणा तादृशी शोकसरिता प्रवाहिता यत्र ग्रावापि रोदिति वज्रहृदयं चापि विदीर्यते।

उत्तररामचरितं नाम नाटकमेतत् स्वकीयरसपरिपाकदृष्ट्या समालोचकेषु विवेचनाविषयः सञ्जातः। उत्पत्तिपरिपूतायाः सीतायाः परित्याग एव उत्तररामचरिते प्रधानरसस्याधारः वर्तते। एष एव परित्यागजन्यः शोकः अशेषनाटके करुणामपूर्वां सृजति। नाटकेऽस्मिन्कोऽयं रसोऽङ्गित्वमुपैतीत्यालोच्यविषयः विचारणीयः। केचित्करुणरसमङ्गित्वेन स्वीकुर्वन्ति केषाञ्चनमते तु करुणविप्रलम्भोऽत्र विराजते। उत्तररामचरितास्याङ्गिरसविवेचनायां प्राथम्येन विवेचनीयं स्यात् करुणकरुणविप्रलम्भयोः शास्त्रीयस्वरूपम्।

आचार्याः शृंगारस्य द्वैविध्यमुद्घोषयन्ति - सम्भोगो विप्रलम्भश्चेति। तत्र सम्भोगोऽनुरागात्मकः आह्लादपरश्च। अतएव करुणस्तु सम्भोगाद्दूरतामापद्यते। विप्रलम्भोऽप्यनुरागात्मकः किन्तु वियोगजन्य-क्लेशपरो विद्यते करुणस्य निकटतरश्च। साहित्यदर्पणकारो विश्वनाथश्चतुर्विधं विप्रलम्भं वर्णयति-

**स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात्।**[1]

इत्थं हि पूर्वरागात्मको मानात्मकः प्रवासात्मकः करुणात्मकश्चेति चत्वारो भेदाः विप्रलम्भस्य प्रोक्ताः। करुणात्मको विप्रलम्भः करुणस्य निकटतरः। करुणविप्रलम्भे विरहोद्भूता तीव्रा वेदना शोकसम्भृतवेदनायाः प्रतिवेशिनीव भवति किन्तु सा विरहोत्पन्ना रत्यात्मिका च भवति। तस्य स्थायिभावः रतिर्वर्तते। अपरश्च करुणः शोकजन्यो भवति। तस्य स्थायिभावः शोको वर्तते। तत्रापि शोकोद्भूता वेदना भवति अतएव द्वयोर्वैभिन्न्यमतीव सूक्ष्मतरं प्रतिभाति। करुणविप्रलम्भविषये विश्वनाथः कथयति-

**यूनोरेकस्तस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।**
**विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः।।**[2]

करुणविप्रलम्भकरुणौ द्वावपिचित्तवैकल्योद्भूतौ स्तः। करुणे तु अभावात्मिका सत्ता करुणविप्रलम्भे च भावत्मिका सत्ता विद्यते। करुणविप्रलम्भे आशातन्तुः वियोगपीडितं प्रणयिहृदयं मिलनप्रत्याशया जीवयति यथा मेघे-

**आशाबन्धः कुसुमसदृशः प्रायशो ह्यङ्गनानां**
**सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।**[3]

एष एव आशाबन्धः करुणे खण्डितो भवति। करुणे आशाज्योतिः पूर्णरूपेण तिरोभवति किन्तु करुणविप्रलम्भे दारुणव्यथास्वपि आशाभङ्गो नैव जायते।करुणस्तु नैराश्यतमसाऽऽच्छन्नो भवति। करुणविप्रलम्भे क्षीणाप्याशा भासते एव। विप्रलम्भे तु सापेक्षता करुणे च निरपेक्षतावर्तते इति नाट्यशास्त्रीयोक्तिः-

**"करुणस्तु शापक्लेशविनिपतितेष्टजनविभवनाशवधबन्धसमुत्थो निरपेक्षभावः। औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भकृतः एवमन्यः करुणोऽन्यश्च विप्रलम्भ इति।**[4]

अत्र सापेक्षभावः आशान्वितभावं निर्दिशति निरपेक्षभावश्च नैराश्यभावं द्योतयति। करुणविप्रलम्भे तु कस्यचिदेकस्य अल्पकालिकं लोकान्तरगमनं भवति पुनरपि मिलनं सुनिश्चितञ्च। करुणे तु मृत्योरनन्तरं काप्याशा नैव तिष्ठति। भोजराजः शृंगारप्रकाशे एतयोर्द्वयोर्वैभिन्न्यं वर्णयति-

**रत्येकहेतुः करुणः प्रीतिदयाद्यनेकहेतुः शोकः**
**पुनः सङ्गमफलः करुणः अपुनः सङ्गमफलः शोकः**
**स्त्रीपुंसविषयः करुणः अस्त्रीपुंसविषयः शोकः**
**सप्रत्याशारूपः करुणः निष्प्रत्याशारूपः शोकः।**[5]

इत्थं शास्त्रीयपरीक्षणे द्वावपि रसौ भिन्नौ वर्तेते।

'एको रसोऽङ्गी कर्तव्यो वीरः शृंगार एव वा[6]' इत्येतच्छास्त्रवचनमनुसृत्य केचिदालोचकाः उत्तररामचरिते करुणविप्रलम्भरसमङ्गित्वेन स्वीकुर्वन्ति। नाट्येषु काव्येषु च कविः शास्त्रनियमान् तावदेव पालयति यावत्तस्य भावना सुरक्षिता भवति। अत्राप्युत्तररामचरिते करुणावरुणालयस्य भवभूतेः समीहितः करुण एव वर्तते न तु शास्त्रोपदिष्टः शृंगारो वीरो वा। अतएवात्र करुणविप्रलम्भस्य कल्पना नास्ति समीचीना। नाटकस्य तृतीयाङ्के आद्यश्लोक एव रामस्य करुणं वर्णयता कविना निगदितम्-

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः।।**[7]

अन्यच्च-

**एको रसः करुण एव निमित्तभेदाद्**
**भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।**
**आवर्त्तबुद्बुदतरंगमयान्विकारा-**
**नम्भो यथा सलिलमेव हि तत्समस्तम्।।**[8]

एको रसः करुण एवेति पद्येनानेन भवभूतिकवेः अभिप्रेतमिदं वर्तते यद् अन्येषां सर्वेषां रसानां पर्यवसानं करुणरसे एव भवति वा करुणम् एव पोषयन्ति रसाः सर्वे। रामस्य चरित्रं वर्णयता भवभूतिना इदमपि सङ्केतितं यद् रामस्य चरित्राभिव्यञ्जनायां अत्र करुण एव प्राधान्येन विवक्षितः। रामस्य अन्तःकरणे जायमानस्य शोकस्य पूर्णतावाप्तये रामे चैतन्यम् आहितम् इति स स्वयमेव नाटके रामस्य मुखेन प्रकटयति-

**दुःखसंवेदनायैव रामे चैतन्यमाहितम्।**
**मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि।।**[9]

अनेन उत्तररामचरितकारेण इयं स्थापना कृता यत् चैतन्योद्रेकःयावान् तीव्रः भवति वेदनानुभूतिः अपि तावती तीव्रतरा भवति। न च मूर्च्छासु पीडानुभूतिः जायते। संज्ञाशून्यता मृत्युर्वावेदनामुक्तिः ननु। अतएव चरमव्यथामनुभवन् रामो मृत्युं कामयमानः वदति-

**दलति हृदयं गाढोद्वेगः द्विधा तु न भिद्यते**
**वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।**
**ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्**
**प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।।**[10]

रामस्य अशेषे जीवने एतादृशी वेदना वर्तते यथा विश्वामित्रस्य यज्ञरक्षायै कैशोर्ये गृहत्यागः, विवाहानन्तरं अल्पकाले एव वनवासः, वनवासे वैदेह्याः अपहरणम्, लंकायुद्धे शक्तिप्रहतस्य लक्ष्मणस्य जीवनसंघर्षः इत्येतानि सावधिदुःखानि सन्ति किन्तु सीतापरित्यागस्य दुःखं समयसीमाविहीनम्।एतन्निरवधिदुःखमेव रामस्य हृदयस्य तीक्ष्णतमं शल्यंवर्तते।अत एव इदमत्र सङ्केतितं यन्नाटके अस्मिन् करुण एव अङ्गित्वेन विराजते रसा अन्ये विवर्तभूताश्च सन्ति। उत्तररामचरितस्य टीकाकारः घनश्यामः एतदेव स्वीकरोति-

**अत्र करुण रस एव अन्यरसत्वेनापि परिणत इति फलितोऽर्थः। क्वचिद्द्वीपे भस्मसात्कृतवेत्रलताजालेषु स्थलेषुस्वतः कदलीवनाविर्भाव इति प्रसिद्धिः तद्वदिहाप्युन्नेयमिति कवेस्तात्पर्यम्। तथा च आवर्त्तबुद्बुदतरंगाद्युपाधिभिः भिन्नं सदप्यम्भः वस्तु एकमेव। तथा शृंगारादिरसोपाधिभिर्भिन्न इव दृश्यमानोऽपि करुणो रसः अन्यस्तदभिन्नः सन् एक एवेति भावः।**[11]

पुटपाकप्रतीकाशं रामस्य हृदयं सततम् अंतर्ज्वालया दहति। लोकस्य आराधनाय सीतापरित्यागस्य यद् हृदयविदारकं कर्म तेन कृतं तत्कृते तस्य हृदि महती वेदना वर्तते किन्तु लोके निजहृदयगतवेदनां प्रकटयितुमप्यनर्हः खलु सः। आत्मनैव सीतानिर्वासनकर्मणा दग्धहृदयः रामः पञ्चवट्याः गहने कान्तारे रोदिति। सीतापरित्यागावसरे आत्मानं धिक्कुर्वन् रामः कथयति-

**अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः।**[12]

शम्बूकवधप्रसंगेऽपि स्वस्य कृते तस्य धिग्वचनम् अस्ति - कृतं रामसदृशं कर्म।[13]

वेदनाऽऽहतहृदयस्य रामस्योक्तिभिरेभिः भवभूतिना रामस्य चरित्रे सर्वत्र करुण एव रसो योजितः। अनेन भवभूतिः इदमपि प्रदिपादयितुं सयत्नोऽस्ति यत् करुणरसस्याङ्गित्वेनैव नाटकस्य कथावस्तु इदमानुकूल्यं भक्ष्यति।नाटकस्य अन्येषामपि पात्राणाम् अभिव्यक्तिः करुणस्यैवाङ्गित्वं परिपोषयति। यथा च तृतीयाङ्के मुरलायाः कथनमिदम्-

**अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ इति।**[14]

इत्यत्रापि शोकमात्रद्वितीयो रामः प्रदर्श्यते अतएव करुण एवात्र वर्तते। सप्तमाङ्के गर्भनाटकप्रसङ्गे लक्ष्मणस्य उक्तिमिमाम् -'दिष्ट्या गङ्गापृथिवीभ्यामुत्पन्ना आर्या', इति श्रुत्वा रामो वदति- 'करुणतरं खल्वेतद्वर्तते।' तत्रैव च रामस्योद्गारोऽयम्-

**क्षुभितां कामपि दशां कुर्वन्ति मम साम्प्रतम्।**
**विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः।।**[15]

तृतीयाङ्के कविना रामस्य मुखात् करुणविप्रलम्भयोर्वैभिन्न्यं प्रदर्शयता उक्तमिदम्–

**उपायानां भावादविरतविनोदव्यतिकरै-**
**र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः।**
**वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्**
**कथं तूष्णीं सह्यो निरवधिरयं त्वप्रतिविधः।।**[16]

सीतापहरणजन्यो वियोगः सावधिः आसीत्। तत्र शत्रुविनाशानन्तरं पुनर्मिलनप्रत्याशाऽऽसीदेव। एषः निरवधिः जीवनपर्यन्तस्थायी शोकः करुणोत्पादकः।

उत्तररामचरिते यत्र कुत्रापि सीतारामयोः सम्मिलनं प्रदर्श्यते तत्तु क्षणिकमेव। तच्चाल्पकालिकं मिलनं भाविकरुणस्य पोषकमेव। प्रथमाङ्के यत्र तत्र कविना निजकौशलेन द्वयोः सम्भोगशृङ्गारात्मकं चित्रणं प्रस्तुतीकृतं तच्च करुणपोषणार्थम्।

रामस्य हृदये तु सीतायाः वियोगो निरवधिस्तिष्ठति तस्य मनसि नैराश्यस्यान्धकारः सञ्जातः। तत्रान्धकारे सीतासंयोगस्य प्रोज्ज्वलकिरणाः प्रकाशमानाः भवन्ति किन्तु नैराश्यान्धकारवैपुल्यात् खद्योतस्येवाल्पकालिकाऽऽशाभासोऽपि शीघ्रमेव क्षीणतां याति।

वस्तुतः रामस्य नैराश्यमेव नाटकस्य पोषकं परिवर्धकं तत्त्वं वर्तते। नाटकेऽस्मिन् रामस्य व्यक्तित्वं द्वैविध्यं भजते। एकस्तु प्रेमी रामोऽपरश्च राजा रामः। एक एव रामो नायकः प्रतिनायकश्च। द्वयोः रामयोरन्तर्द्वन्द्व एव नाटकीयवृत्ते सरसतामानयति। एष एव अन्तर्द्वन्द्वः मुख्यरसपरिपाके आधारो वर्तते। एकस्यैव रामस्य द्विविधं रूपमस्ति - राजा रामः शरीरे वसति प्रेमी रामश्च हृदये वसति। रामस्य दृश्यमानं बाह्यस्वरूपं राज्ञः रामस्य अदृश्यमन्तःस्वरूपं च प्रेमिणो रामस्य।

इत्थं प्रतीयते यद् रामस्य शरीरन्तु प्रजानुरञ्जने हृदयञ्च सीतानुरञ्जने निरतम्। प्रथमाङ्के एव प्रेमी रामः सीतया सह प्रदर्शितः। तत्रैव राज्यभाराक्रान्तो लोकाराधनतत्परश्च राजा रामः प्रदर्शितः। विवाहानन्तरं रामेण सीताऽधिगता राज्यासनं च प्राप्तम्। इत्थं द्वयोरुत्तरदायित्वमङ्गीकृतम्। अनेन शरीरस्य हृदयस्य च पारस्परिको विरोधः प्रकटितःयतो हि द्वावपि भिन्नमार्गानुगामिनौ वर्तेते। 'रामस्य गात्रमसि दुर्वहगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते'[17] इति शम्बूकवधप्रसङ्गेऽपि रामस्योक्त्याऽनया इदमित्थं प्रतीयते यत् सीतानुरञ्जकं हृदयं रामस्य प्रजानुरञ्जकं गात्रमुपालभते। एषा उक्तिः रामस्य हृन्निसृतोद्गारःकरुणमेव पोषयतियतो हि रामस्तत्र शरीरेणैव वर्तमानो मनसा तु सीताचिन्तने निरतः।

इदमत्रावधेयं यत् करुणार्द्रहृदयस्य रामस्य हृदि आशासञ्चारो भवेच्चेत् नाटकमिदं मुख्यरसानुकूलत्वं नैवाप्स्यति। अतएव नाटकेऽस्मिन् सप्तमाङ्कपर्यन्तं रामः सीतायाः आत्यन्तिकं वियोगं सहते।सप्तमाङ्कवर्णितगर्भनाटकात्पूर्वं रामस्य मनसि यदि सीतासम्मिलनस्य प्रत्याशाकणिकाऽपि भवेच्चेत् तत्र विप्रलम्भशृङ्गारस्य भूमिर्भवेत्। रामस्य मतौ तु सीता दिवङ्गता एव अतः कथं तत्रालम्बनाभावे शृङ्गारस्य पोषणं वर्धनं वा भवेत्। यद्यपि सीता नैवोपरता तथापि रामस्य कृते सा विलुप्तैव इत्यत्र शुद्धशोकस्यैव स्थानं वर्तते।

सीतासम्मिलनादपि न सुखमनुभूयते यतो हि अपूर्वदुःखैश्छिन्नहृदयौ द्वावपि सुखं नानुभवतः। वस्तुतः दीर्घकालिकदुःखदुःखितानि हृदयानि अकस्मादागतमभ्युदयं न विश्वसन्ति। प्रेक्षावतां दृष्टौ तु नाटकान्ते सुखमनुभूयते परं तु शोकाब्धिनिमग्नयोः सीतारामयोः कृते एतदभ्युदयमपि न विश्वासयोग्यं नापि सुखदम्। रामोऽत्र कथयति - 'सर्वमिदमनुभवन्नपि न प्रत्येमि यद्वा प्रकृतिरियमभ्युदयानाम्।'[18] महद्दुःखानन्तरं यदि सुखं प्राप्यते तत्तु विश्वासभूमौ नावतिष्ठति यतो ह्यभ्युदयानां प्रकृतिरेव एतादृशी भवति यत्कृते मनः सर्वदा शङ्कते एव। 'सर्वमिदमनुभवन्नपि न प्रत्येमि' इत्येषा रामस्योक्तिः तस्य दीर्घकालिकं शोकं निर्दिशति। भारतीयनाट्यपरम्परायाः शास्त्रीयविधानमनुपालयता कविना नाटकस्य सुखान्तता प्रदर्शिता यद्यपि रामायणे प्रसङ्गोयं करुणमय एव। शोकस्तु अभीष्टनाशजन्यो भवति। रामस्य द्वे अभीष्टे - सीतानुरागो लोकाराधनञ्च। तत्रापि लोकाराधनं अभीष्टतरं वर्तते। यथा स स्वयमेव कथयति-

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।**[19]

यद्यपि प्रजानुरञ्जनं रामस्याभीष्टतरं वर्तते तथापि सीतानुरागोऽपीदृशो वर्तते यत् प्रजानुरञ्जनाय यदप्यकरणीयं कृतं तत्तु रामस्य हृदयविदारकम् एव। सीतापरित्यागावसरे तेन कथितम्- 'अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः।'[20]

इत्थं एकस्याभीष्टस्य रक्षणेऽपरं विनश्यति इत्येव रामस्य विवशता। यद्यपि लोकप्रसादमाप्तुं राजधर्मरक्षणतत्परो रामस्तथा करोति। लोकः तत्कर्मणो महत्त्वं न गणयति रामस्याशाभङ्गः शोकोत्पत्तिश्च विद्यते। अत्र रामस्य द्वावप्यभीष्टौ विनष्टौ। सप्तमाङ्के पृथिवीभागीरथ्योः सीताविषयिणी-

**जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे।**
**आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते।।**[21]

इत्युक्तिमाकर्ण्य रामः निश्शंकः एव किन्तु लोकानां सन्तुष्ट्यर्थं कथयति - 'शृणोतु लोकः।'[22] रामस्यवचनमिदं तस्य अन्तर्वर्तमानं दुःखं प्रकटयति यद् दुःखं तस्य हृदये पुटपाक इवाहर्निशं ज्वलति। वस्तुतः अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः सीतारामयोःप्रेमातिशयः सीतापरित्यागानन्तरं रामस्य विषादमुत्तरोत्तरं वर्धयत्येव।

अशेषनाटकानुशीलनादिदं प्रतीयते यद् राज्ञो रामस्य मार्गःप्रेमिणो रामस्य कृते दुःखजनकः प्रेमिणो रामस्य च पन्थाः राज्ञो रामस्य कृते। इत्थं रामस्य हृदयास्यान्तर्ज्वलनं नाटके आद्योपान्तमपूर्वां करुणां

सृजति। तस्य चिरकालिकं दुःखमशेषनाटकेऽङ्गित्वेन पुटपाकप्रतीकाशं करुणमेव पोषयति नापरमिति शम्।

सन्दर्भ सङ्केतः


1. साहित्यदर्पणे - 3.191
2. तत्रैव - 3. 211
3. पूर्वमेघे - 10
4. नाट्यशास्त्रे -षष्ठाध्याये
5. शृंगारप्रकाशे - द्वात्रिंशप्रकाशे
6. दशरूपके - 3.33
7. उत्तररामचरिते -3.1
8. तत्रैव - 3.47
9. तत्रैव - 1.47
10. तत्रैव - 3.31
11. तत्रैव – घनश्यामकृतटीकायाम् पृष्ठ 83
12. तत्रैव – 1.44 इत्यस्य पश्चाद् रामस्योक्तिः
13. तत्रैव - 2.10 इत्यस्य पश्चाद् रामस्योक्तिः
14. तत्रैव – तृतीयाङ्के
15. तत्रैव -7.12
16. तत्रैव - 3.44
17. तत्रैव - 2.10
18. तत्रैव – सप्तमाङ्के
19. तत्रैव - 1.12
20. तत्रैव – प्रथमाङ्के
21. तत्रैव -7.8
22. तत्रैव - सप्तमाङ्के

सन्दर्भ ग्रन्थ सूची

1.उत्तररामचरितम् - सं. एम. आर. काले, मोतीलाल बनारसीदास 1993
2.उत्तररामचरितम् - सं. पी. वी. काणे, मोतीलाल बनारसीदास 1962
3.दशरूपकम् - सं श्रीनिवास शास्त्री, साहित्य भण्डार मेरठ, 1994
4.नाट्यशास्त्रम् -सं.आर. एस. नागर, परिमल पब्लिकेशंस 2012
5.मेघदूतम् - सं. शेषराज शर्मा रेग्मी, चौखम्बा विद्याभवन, वाराणसी 1990
6.शृंगारप्रकाश - सं. वी. राघवन मध्य प्रदेश हिन्दी ग्रन्थ अकादमी,
7. साहित्यदर्पण - सं. सत्यव्रत सिंह, चौखम्बा विद्याभवन, वाराणसी, 1997

**पत्रसंकेत**

**डॉ. शैलेश कुमार मिश्र**
**11-शिवपुरी, दूरदर्शन केंद्र के निकट,**
**लीला कृष्ण अपार्टमेंट के सामने**
**काँके रोड, राँची-834008**
**मो.-7541933637**

# Vedānta Philosophy in the ViṣṇuPurāṇa

Moumita Banerjee

**Abstract**

Since the Viṣṇu Purāṇas were originally written for the public, they have a popular nature. Philosophy is generally considered to be a very abstract subject for human beings so it is not considered as one of the major themes explained in the Purāṇas. Yet, however, the Purāṇas are not entirely free from philosophical thought.

Among the eighteen Purāṇas the *ViṣṇuPurāṇa* is one of the most sacred and authoritative treatises of the Vaiṣṇavas. It is one of the earlier Purāṇas. Five characteristics are clearly visible in this Purāṇa. H. H. Wilson says "*There is not one to which it belongs entirely as to the ViṣṇuPurāṇa and it is one of the circumstances which gives to this work a more authentic character than most of its follows can pretend*". Many diverse topics extended here. Among the various subjects, this Purāṇa is quite rich in philosophical aspects. There are several theistic philosophies in *ViṣṇuPurāṇa*, but in many research, I have reflected the Vedāntaphilosophy in them. In my abstract, I have briefly discussed the basic theories of Vedāntaphilosophy. The nature of soul, rebirth, *māyā* and *avidyā*, bondage and liberation etc. these are highlighted here.

**Keywords:***ViṣṇuPurāṇa*, Vedānta philosophy, Soul, Rebirth, *Māyā*, *Avidyā*, Bondage, Liberation

# Vedānta Philosophy in the Viṣṇu Purāṇa

The Purāṇas have an important place in our religious and secular literature. After the Vedic literature, the Purāṇas are given the highest importance. Like the Vedas, the Purāṇas are very ancient and scared. Ancient two epics and Smṛtisanhitās bear a resemblance to the Purāṇas in both form and content. So it has been said about the Purāṇas– *"Taken collectively, they may be described as a popular encyclopaedia of ancient and medieval Hinduism, religious, philosophical, historical, personal, social and political."*

The Purāṇas, as is well known, do not only contain mythology; they also address a wide range of philosophical issues, including the nature of the supreme reality, conceptions of various deities, descriptions of the process of creation, etc., the nature of the self, slavery and liberation, the law of known, and numerous other issues. The numerous Purāṇas are not systematic philosophical treatises, and neither do they take an analytical nor a critical approach to philosophical issues. Their philosophical contents are also too varied to allow for simple synthesis and evaluation.All the philosophical problems are stated in poetic and allegorical language which is not so suitable language for philosophical exposition. Thus it seems very difficult to being out the systematic philosophical obtainment of the Puranas.

Through the *Viṣṇu Purāṇa* presents its contents in *viṣṇu* worship even so the text related *pañcalakṣaṇa* format. Not only this, in the discussion of this Purāṇa also continuity is noticeable. That is why this *Viṣṇu Purāṇa* is very rich and significant among the ancient Purāṇas.

Philosophically the *Viṣṇu Purāṇa* is very rich. Its philosophical importance can be attested from the fact that the great philosophers like Saṅkarācārya, Rāmānuja and other have quoted from and referred to this Purāṇa in order to establish their own view or to refute other's view. The *ViṣṇuPurāṇa* is mainly based on *Sāṁkhya* and Vedāntaphilosophy. However in a very small part, the effect of Yoga philosophy and *Vaiṣṇava* sects can be noticed.

In this single research paper, I have highlighted some of the notable aspects of Vedāntaphilosophy that are evident in the *ViṣṇuPurāṇa.*

## The nature of soul:

In *ViṣṇuPurāṇa* the soul is called *nitya*. It has no specific features. It is pure, indestructible, tranquil, devoid of qualities and beyond *Prakṛti*. All living things are inextricably linked with a particular soul.[1] The word '*ātman*' is used in two different senses in the *ViṣṇuPurāṇa*. These are individual self and transcendental self. In most of the cases they are identified. The real nature of self is that it is one in all bodies and all

**व्या.भा-** यथाऽर्थे वाङ्मनसे, यथा दृष्टं यथाऽनुमितं यथा श्रुतं तथा वाङ् मनश्चेति, परत्र स्वबोधसङ्क्रान्तये वागुक्ता सा यदि न बञ्चिता भ्रान्ता वा प्रतिपत्तबन्ध्या वा भवेदिति, एषा सर्वभूतोपकारार्थं प्रवृत्ता न

[12] .मुण्डक.उ.3.1.6
[13] .यो.सू.2.36
[14] .यो.का.2.65

भूतोपघाताय, यदि चैवमप्यभिधीयमानाभूतोपघातपरैव स्यान्न सत्यं भवेत् पापमेव भवेत्, तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टतमं प्राप्नुयात्, तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात् ।[15]

With constant following of the truth and the commensurate behavior, one gets वचसिद्धि. That means without performing any religious rites, the results of the karma accrue to him and to others due to his speech and blessings.

"सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" ।[16]

I promise that, I will never lose the celibacy in my life, and should practice it forever. Those are lake of celibacy; they will never get the emancipation and self-realization. Therefore Bahmachaya must be practiced in a life.

iii.**अस्तेयम् (Honesty) -**

'न स्तेय अस्तेय' Steya means theft and Asteya means not stealing anything. However, अस्तेय has a comprehensive meaning and is not limited to not stealing something from the other and keeping it in possession. It means not keeping anything with self, which does not belong to the self. The pressure generated in the process does have bad effects on the body and the internal glands. If asteya is observed, the body and the mind do not have to undergo such strain. This is the meaning and conclusion of asteya.

**प.सू- "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्"**[17]

अस्तेयो ह्यस्पृहारूपः स्तेयस्यापि प्रवर्जनम् ।।[18]

**व्या.भा-** स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्; तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति ।[19]
"तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्वद्धनम्"[20]

---

15 . यो.सू.व्या.भा.2.30
16 . मुण्डक.उ.3/1/5
17 . यो.सू.2.37
18 .यो.का.2.66
19 .यो.सू.व्या.भा.2.30
20 .ईशा.उ.1.1

This is an effect of the actual physical process of theft. But even if a thought of the theft peeps into the mind, it can affect the mental and thereby the physical health. If the electronic impulses generated through the brain are measured with the help of a machine, it is observed that there are wide changes while being in such a state. Hence, yoga states that one should not even imagine the theft. The following aphorism states the effects. A साधक is endowed with all jewels (virtues) when he practices asteya.

iv. **ब्रह्मचर्यः (Sexual Continence): –**

Yoga sadhaka should follow continence, but this does not mean that he should renounce family life and become a monk; such an action is not expected in Yoga science. When a sadhaka progresses on the path of Yoga, on his own he feels that he should renounce the worldly activities and he will be free from all desires and hence can easily study dhyana and dharana. Desires, their fulfillment and enjoyment do have a place in the family life, but there should be some limit. It is we who should control the desires and not desires controlling us. Once the desires start ruling us, we lose our freedom. If the desires are not fulfilled, then we lose our mental and physical well being.

**iv.प.सू.- "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः"**[21]

सर्वेन्द्रियेषु गुप्तेषु चोपस्थेन्द्रियसंयमः ।

ब्रह्मचर्य्यं समाख्यातमष्टाङ्गमपि तद्भवेत् ।।[22]

व्या.स.- ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः ।[23]

If observing such continence seems difficult initially, when we think deeply about it, it is not as difficult as it seems. However, one has to make an effort. One should deliberately avoid consumption of items, which increase the desire or reading material, which excites the feelings. Old religious texts have detailed clarification on this point. One who has renounced worldly matters, should abstain himself from the following matters and one who is following family life should avoid the following with other women excluding his wife :

---

21 .यो.सू.2.38

22 . यो.का.2.67

23 . यो.सू.व्या.भा.2.30

"स्मरणं कीर्त्तनं केलिः प्रक्षणं गुह्यभाषणम्।

संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।।

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।

विपरीतं ब्रह्मचर्यमनुतिष्ठेयं मुमुक्षुभिः ।।" (दक्षस्मृति.7/31,32)

1. Thinking about her in the mind

2. Hearing stories about her

3. Conversing with her

4. Seeing her

5. Smiling with or at her

6. Conversing with her alone

7. Touching her

8. Making love to her

However, in today's world avoiding all these, one may not be able to live. Hence, instead of literally following the instructions, one should try to understand the logic behind it. If such desires are not controlled and not fulfilled, they can prove harmful to the mind and the body. To avoid this, one must follow continence. One, who observes continence, gets illuminated and acquires various siddhis.

"सत्येन लभ्यस्तपसा ह्येष आत्मा सत्यज्ञानेन ब्रह्मचर्येण नित्यम्"[24]

The bright and pure self within the body, that that monks with (habitual effort and) attenuated blemishes see, is attainable verily trough, concentration, complete knowledge, and continence, practice constantly.

[24]. मुण्डक.उ.3/1/5

v.अपरिग्रहः **(Non Possessiveness)**

प.सू.- "अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।"[25]

देहरक्षाऽतिरिक्तानां पञ्चधा दोषदर्शनात् ।

अस्वीकारस्च भाग्यानामपरिग्रह उच्यते ।।[26]

व्या.भा.- विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रह इति।[27]

Aparigrah means not hoarding anything. Storing things, which are not required by us, is known as parigrah. We can also say that when we are able to satisfy our hunger by eating the various bulbs and fruits grown by the nature, why do we strive so much? In fact, it is not essential. But yet we strive to grow food crops, and put in a lot of efforts to process them afterwards. To make up for all these efforts, we go on eating more. This circle continues endlessly. Yoga aims at not giving rise to such circles at all. We should enjoy only what is necessary and that too in a controlled manner. Not to store or hoard the things is aparigrah.

Of course, we should think about this by using common sense. To observe aparigrah, one should not run behind acquiring things, which are not necessary. The point is illustrated by a common example. We have food when we are hungry, to satisfy the hunger. Even when the hunger is satisfied, sometimes we tend to eat more, just because we like the taste and it satisfies the tongue. When we consume such excess, it affects the body harmfully. The food does not get digested well and then diseases such as non-digestion, constipation etc arises. If we consume only the necessary amount, then we do not have to suffer. Hence, yoga sadhaka should try to follow aparigraha with efforts. The results are described as follows: "जातिदेशकालसमयानवच्छिन्नाः सार्भौमा महाव्रतम्"[28] Yogi should religiously follow the five yams. When the yams are to be followed, it is stated in this aphorism that they are to be followed irrespective of caste, country, period, time etc. Yoga states that these yams should be followed by all castes, all over the country in any place and at whatever period and time. Rishi Patanjali in the Ashtangyoga has given five yams, but Hathapradeepikkar in their text have stated ten yams.

---

[25] . यो.सू.2.38

[26] यो.सू.का. 2.68

[27] . यो.सू.व्या.भा.2.30

[28] . यो.सू.2.31

The basic principles are the same; however the description is a little bit different. The following ten yams are stated in Hathapradeepika:

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः।
दयार्जवमिताहाराः शौचं चैव यमा दश ।।[29]

Ahimsa, Satya, Asteya, Brahmacharya, Kshama, Dhruti, Daya, Arjav, Mitahar and Shoucha. We have already reviewed Ahimsa, Satya, Asteya and Brahmacharya. Shoucha is included in Niyama, so we will consider the rest of the Yam.

vi.**क्षमा (Pardon) -**

Kshama is a big virtue. Common people err quite a few times, which hurts or proves troublesome for others. Then the others react by getting angry. Again the reaction is met with another reaction. In this process, the calmness of the body and the mind gets lost. Hence, the yoga sadhaka should not resist or react against the improper attitude of another or some mistake committed by another. Resistance leads to further disputes and the results are to be faced by everyone. Kshama from the point of view of sadhaka is not reacting or not resisting. Because of this sadhaka does not have to face the disturbances, which arise out of such resistance. Also, when there is mental as well as physical preparation for not reacting, the effect of the blow also gets reduced and the mind turns calm. Generally, when the people realize the magnitude of the mental preparation, they also stay away from affecting any blows on the sadhaka.

**vii. धृतिः (Courage) -**

Dhruti means courage. It is essential for performing or achieving anything. If there is no courage, great things cannot be achieved. In human life, there are several incidences where one gets attacked by many emotions. We have to fight such feelings. Many lose courage while doing so and fall prey to these feelings. They repent afterwards. So while leading the life, whenever such incidents occur, one should have the courage to face the emotions and gain victory over them. By turning away from such emotions does not solve any problems, but increases them.

[29] .ह.प्र.1/55

**viii. दया (Pity) -**

While kshama is a reaction on any action, daya is not a reaction but an action itself. To assist someone with sympathy is daya. Like ahimsa, daya is also physical, oral and mental. To help someone with bodily actions or by giving money is physical action. To console someone by sympathising with kind words is oral daya. And to think kindly in mind about the poor and wishing them all the best in life is mental daya. Daya not only leads to peace of the body as well as the mind, but also gives mental satisfaction.

**ix. अर्जवम् (Humbleness) -**

To behave humbly with everyone after casting aside the ego is aarjav. Casting aside of one's ego is important. Many problems in our day-to-day life arise out of ego. When there is no ego, there are no problems and one does not have to search for their solutions. When the ego is forsaken, the heart, tongue and mind turn soft and simple. That is known as aarjav. It is expected that sadhaka should be humble and modest. Due to this humble attitude, sadhaka goes nearer to the God.

**x. मिताहारः (Restricted Diet) -**

The body needs food, but many times we tend to consume more than necessary. Sometimes, just it tastes good to the tongue, sometimes due to the wish in the mind, or sometimes just out of habit. Yoga sadhaka should make it a point to avoid such excess consumption. The intake of such excess food affects the body in a harmful manner. The physical health is also affected and the mental health too is lost. One should take the necessary diet at proper times. This is known as mitahar.

## Conclusion

This topic is useful for all the types the people; because it is mandatory for all human being of the world; this is like a vaccine for all, so that every person can do the practice easily it. Yama is not for the animals; but animal have own consciousness and they have natural duty and routine; for example a tiger is eating food till full his stomach; then he leaves the place Immediately, but it is not happing for the human beings life, we are taking access or overeating,

but it not applicable for human life; that is why we learn from the animals and other creatures, by the practice of Yama, is control of the mind and save our body. When we do not have control our mind it is fact that many diseases can be increased in our cells. The accessibility is some negative impact, so can each of the work and action have positive and negative aspect, we may judge and calculate all the effective motions of nature and mind or body. By the end we find that according nature we move forward not for our motto.

**BIBLOGRAPHY**

1. Yoga Philosophy of Patanjali of Swami Hariharanada Aranya Translated into English by P.N Mukharji. Culcutta: Culcutta University Press 1963

2. Patanjaliyogadarsanam, Sri Narayana Mishara, Bharatiya Vidyaprakasan Varanasi-1992

3. Patanjaliyogadarsanam, Damodar Shastree, Choukhamba Prakasan Varanasi.

Yoga Vasista, Choukhamba Praksan Varanasi

4. Yogasurta of Patanjali with commentary of Vyasa, Bengali Baba, Motilal Banaridass-1976

5. The Original Yoga as Expounded in Siva-sanhita, Gheranda –sanhita and Patanjali Yoga-sutra, Shyam Ghos. Munishram Monoharlal, New Delhi-1980

6. Yagavartika of Vijanabhikshu: Traslated by T.S. Rukmini; Text with translation and Critical note alons with the Text and English Translation of The Patanlali Yogasutra and Vyasabhasya. Vol.1: Samadhipada (1981). Vol.2: Sadhanapada (1983); Vol.3: Vibhutipada(1987); and Vol4: Kaivalyapada (1989). New Delhi: Munishram Manoharlal

7. Patanjaliyogadarsanam, Suresh Chandra Srivassrab, Choukhamba Surabharati Prakasan Varanasi

8. Patanjaliyogadarsanam, ewuth Vyasa Bhasya, Vachaspati Mishra's Tattva-Vaisaradi and Vijnnana Bhikshu Yogo-Vartika. Edited by Sri Narayan Mishara. Varanasi Choukhanmaba 1971

9.Patanjaliyogadarsanam, with the Yoga-sidhanta-Chandrika and Sutrartha-Bodhini of Vachaspati Mishtra and Raja-Martanda of Bhoja-Raja1904. Edited by Kasinath Dshasrti Agaste. Anada Sharma Sanskrit Series, on 47.Poona: Anadsasharam

# अक्षरसमाम्नायः

डा.सङ्कर्षण पण्डा
सहायकाचार्यः, कालियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
कालियाचकः, पूर्वमेदिनीपुरम्, पश्चिवङ्गः

संस्कृतवाङ्मये पाणिनिव्याकरणस्य महत्त्वं सर्वातिशायि वर्त्तते। तदुक्तं–

**पाणिनिर्भगवानेव स्वयं चन्द्रार्धशेखरः।**

**प्रतिष्ठापयते कोऽन्यो दिव्यं व्याकरणं भुवि।।**

भगवता पाणिनिना योगवलेन महेश्वरात् अक्षरसमाम्नायः प्रत्यक्षीकृतः। येन सर्वाणि सूत्राणि प्रणीतानि। पाणिनीये हि व्याकरणे नैकोऽपि वर्णो निष्प्रयोजनः। अतएवोक्तं भगवतापतञ्जलिना-प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण।[१] पुनरपि इको यणचि[२] इति सूत्रे–सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् इति। प्रसङ्गेऽस्मिन् वृत्तिकारः उक्तवान् यत्-महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य।[३] भाष्यकारोऽपि आह-पाणिनीयं महत् सुविहितम्।[४] इत्याभ्यां वचनाभ्यां ज्ञायते यत् पाणिनीयं शब्दशास्त्रं प्रमाणभूतम्। तत्र व्याकरणशास्त्रेणैव शब्दानां साधुत्वासाधुत्वज्ञानं भवति। उक्तञ्च भर्तृहरिणा–

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।**

**अविच्छेदेन शब्दानामिदं स्मृतिनिबन्धनम्।।**[५]

अपिच

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**

**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।**[६]

अद्यत्वे तु पाणिनीयव्याकरणानुसारेणैव शब्दानां साधुत्वासाधुत्वव्यवस्था भवति। तदुक्तं-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।**

पाणिनिव्याकरणस्य चतुर्दशसंख्यकानि माहेश्वरसूत्राणि मुख्यरूपेण आधारभूतानि सन्ति। इमानि चतुर्दशसूत्राणि महेश्वरवरप्रसादात् भगवता पाणिनिना लब्धानि।तदुक्तं –

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**

**उद्धर्तुकामःसनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।**

किं चात्र-

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।**

**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।**[७]

अतएव माहेश्वराणि सूत्राणि पाणिनिव्याकरणस्य मूलभूतानि सन्ति। इमानि सूत्राणि वर्णसमाम्नायः, अक्षरसमाम्नायः, अक्षरवेदो वेत्युच्यते। तत्र समाम्नायशब्दो वेदार्थरूपेण प्रयुक्तो भवति। पूर्वाचार्यैः वर्णस्याक्षरमिति संज्ञा क्रयते। उक्तञ्च भाष्यकृता-वर्णं वाहुः पूर्वसूत्रे।[८] तत्र अक्षरं नक्षरं विद्यात्। अर्थात् न क्षीयते न क्षरतीति वाऽक्षरमिति व्युत्पत्त्या क्षरसंचलने[९] इति भ्वादिगणीयधातोः पचाद्यच्[१०] इत्यचि कृते अक्षरशब्दो निष्पन्नः। अविनाशि निर्विशेषं प्रणवाख्यं ब्रह्म इत्युच्यते। उक्तञ्च-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[११]

किञ्च -

**पूतात्मा परमात्मा च मुक्तानां परमा गतिः।**

**अव्ययः पुरुषःसाक्षी क्षेत्रज्ञोऽक्षर एव च ।**[१२]

स एव न क्षरतीति अक्षरः परमात्मा।श्रीमद्भगवद्गीतायामपि-

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।**[१३]

कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते। अकारादिक्षकारान्तैकपञ्चाशद्वर्णः इति मेदिनी। मोक्षेऽपवर्गे औंब्रह्मण्यच्युतेऽक्षरम् इत्यनेकार्थकोषः। अशूङ् व्याप्तौ[१४] धातोः अशेःसरः[१५] इति औणादिकेन सूत्रेण सरन् प्रत्यये अक्षरः। अर्थमश्नुते व्याप्नोतीत्यक्षरम्। अतः चतुर्दशसूत्राणामपरनाम अक्षरवेदः। भाष्यकारेणापि "यो वा इमाम्" इति व्याकरणाध्ययनस्य प्रयोजनावसरे आर्त्तिजीनस्य लक्षणमेवं प्रतिपादितम् – यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्तिजीनो भवति।[१६]

ऋक्तन्त्रव्याकरणे इमानि चतुर्दशसंख्यकानि सूत्राणि वेदस्यांशभूतानि। अतएव एषामध्ययनपद्धतिविषये उक्तं यत् –इदमक्षरछन्दो वर्णशः समनुक्रान्तं ब्रह्मा वृहस्पतये प्रोवाच, वृहस्पतिरिन्द्राय,इन्द्रो भरद्वजाय, भरद्वाजो ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः, तं खल्विममक्षरसमाम्नायमित्याचक्ष्यते। न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः। अनेन ज्ञायते इमानि ब्रह्मणः प्रतिपादकानि ब्रह्मविद्या। प्राचीनाचार्याः इमानि सूत्रणि वेदरूपेणाङ्गीकृत्य पाणिनीयव्याकरणं वेदाङ्गत्वेन स्वीकुर्वन्ति। श्रीमता नागेशेन प्राचीनमतमाश्रित्योक्तं यत् –

सोऽयमक्षरसमाम्नायः पुष्पितःफलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः इति।[१७] ऋमङणनम् सूत्रस्थभाष्यवचनमाश्रित्य श्रीमता भर्त्तृहरिणा उक्तं यत् –

यथैवेदमव्युछिन्न्नं चन्द्रतारकादि,एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ताऽस्ति। एवमेव वेदपारम्पर्येण स्मर्यमाणः इति।श्रीमता नागेशेन निम्नलिखितप्रकारेण वर्णसमाम्नायस्य आधारो वर्णितः।

(क) वर्णसमाम्नायः अनादिसिद्धः।

(ख)इमानि सूत्राणि ब्रह्मविद्यारूपेणोपदिष्टानि अतःश्रुतिपदवाच्यानि।

(ग)चतुर्दशसूत्रेषु येऽनुवन्धास्ते न वेदभागाः।

(घ) एषां सूत्राणामाधारभूतं पाणिनिव्याकरणम्।

(ङ) अनुबन्धानाधारीकृत्य प्रत्याहारा भवन्ति।

अतएव प्रत्याहारसिद्ध्यर्थं वर्णक्रमस्य परिवर्त्तनं जातम्। अयमक्षरसमाम्नायःवर्णमालायाः रूपान्तरं भवति।अस्यां वर्णमालायां

कतिपयवर्णानामभावः परिलक्ष्यते।तत्र अच् प्रत्याहारे दीर्घवर्णानां प्लुतवर्णानाञ्चाभावो दृश्यते। चतुर्दशसूत्रेषु अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयानां वर्णानां पाठो नास्ति।माहेश्वरसूत्रेषु सर्वे वर्णाः सकृदेवोपदिष्टाः।परन्तु हकारस्य द्विवारमुच्चारणं भवति।अन्तःस्थवर्णानां स्वाभाविकक्रमोऽस्ति।वर्गीयव्यञ्जनानां क्रमस्य परिवर्त्तनं जातम्। वर्गस्य पञ्चमवर्णेभ्यः आरभ्य प्रथमवर्णं यावत् पाठोऽस्ति।अन्तिमे उष्मवर्णाःसन्ति। सूत्राणामन्त्यवर्णाःइत्संज्ञकाः सन्ति।ते च अनुवन्धाः।अनुवन्धकरणं प्रत्याहारनिर्माणार्थम्।वर्णोपदेशप्रयोजनाधिकरणे भाष्ये भगवता भाष्यकरेण वर्णोपदेशस्य त्रीणि प्रयोजनानि उक्तानि।वृत्तिसमवायः,अनुबन्धकरणार्थः,इष्टबुद्ध्यर्थश्च।वृत्तिसमवायो नाम शास्त्रप्रवृत्त्यर्थं वर्णानामानुपूर्व्येण संनिवेशार्थञ्च। द्वितीयतः अणादिप्रत्याहाराणामनुबन्धानतिरिच्य न सम्भविष्यति।इष्टबुद्ध्यर्थश्च इष्टान् वर्णान् भोत्स्यामहे इति न हि अनुपदिश्य वर्णान् इष्टाः वर्णाः शक्या विज्ञातुम्।अतएव भाष्यकारेण प्रतिपादितं यत्-वृत्तिसमवायश्चानुबन्धकरणञ्च प्रत्याहारार्थम्।प्रत्याहारो वृत्त्यर्थः।[१८]

चतुर्द्दशसूत्रेषु स्थितानामनुबन्धाननां योगे द्विचत्वारिंशत् प्रत्याहाराः प्रयुक्ता भवन्ति।

१)अइउण् -इति सूत्रस्य णकारेण अनुबन्धेन एकः प्रत्याहारः- अण्

२)ऋलृक् – इति सूत्रस्य ककारेण त्रयः प्रत्याहाराः- अक्,इक्,उक्

३)एओङ् – इति सूत्रस्य ङकारेण एकः प्रत्याहारः- एङ्

४)ऐऔच् -इति सूत्रस्य चकारेण चत्वारः प्रत्याहाराः- अच्,इच्, एच्, ऐच्

५)हयवरट् -इति सूत्रस्य टकारेण एकः - अट्

६)लण् – इति सूत्रस्य णकारेण त्रयः प्रत्याहाराः - अण्,इण्, यण्

७)ञमङणनम् -इति सूत्रस्य मकारेण त्रयः प्रत्याहाराः - अम्, यम्, ङम्

८)झभञ् -इति सूत्रस्य ञकारेण एकः प्रत्याहारः - यञ्

९)घढधष् -इति सूत्रस्य षकारेण द्वौ प्रत्याहारौ - झष्, भष्

१०)जबगडदश् -इति सूत्रस्य शकारेण षट् प्रत्याहाराः - अश्,हश्,वश्,झश्,जश्,बश्

११)खफछठथचटतव् -इति सूत्रस्य वकारेण एकः प्रत्याहारः - छव्

१२)कपय् -अस्य सूत्रस्य यकारेण पञ्च प्रत्याहाराः - यय्,मय्,झय्,खय्,चय्

१३)शषसर् -अस्य सूत्रस्य रेफेण पञ्च प्रत्याहाराः - यर्,झर्,खर्,चर्,शर्

१४)हल् – अस्य सूत्रस्य लकारेण षट् प्रत्याहाराः - अल्,हल्,वल्,रल्,झल्,शल्

एतानतिरिच्य लण् इति सूत्रेण रप्रत्याहारो निष्पन्नो भवति।उक्तञ्च-लण्[१९] सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा। रप्रत्याहारस्तु उरण रपरः[२०] इत्यत्र रपरपदे एव नान्यत्र। नागेशमते लकारस्य इत् संज्ञा नास्ति। भाष्यकारेणाऽपि लकारस्य इत् संज्ञा नोक्ता। उरण् रपरः इत्यनेन सूत्रेण तवल्कारः इत्यत्र लपरत्वं तुल्यास्य इति सूत्रे लपरत्वं वक्ष्यामि इति वचनेन "लपरश्चेति वक्तव्यम्" इति वार्तिकेन बोध्यम्। कैयटभट्टोजिदीक्षितादिमते तु लपरत्वं वक्ष्यामि इति भाष्यस्य लण् सूत्रस्थाकारस्येत्संज्ञकत्वेन उरण् रपरः इति सूत्रस्थरपदस्य रलवोधकप्रत्याहारपरतया व्याख्यानं करिष्यामीत्यर्थमाश्रित्य लपरत्वं साधितम्।[२१] तत्र वर्णानां चतुर्दशसूत्रेषु विभागीकरणस्य तात्पर्यं भवति चतुर्दशानुबन्धानाश्रित्य प्रत्याहाराणां सिद्धिः प्रत्याहारेषु ईप्सितवर्णानां समावेशश्च। अतएव अनुबन्धानामत्यन्तोपयोगित्वमस्ति। उदाहरणरूपेण हल् इति सूत्रं न कृत्वा शर् मध्ये हकारे पाठे लानुबन्धस्योच्छेदे का क्षतिः इत्यस्मिन् विषये तत्त्वबोधिनीकारेण उक्तं यत् -ननु पुनर्हकारोपदेशस्यावश्यकत्वेऽपि शर् मध्ये एव हकारं पठित्वा अलोऽन्त्यस्य[२२] हलोऽनन्तराः संयोगः[२३] झलो झलि[२४] शल इगुपधादनिटःक्सः[२५] इत्यादिसूत्राणि यावन्ति लानुवन्धानि तानि अरोऽन्त्यस्य हरोऽनन्तरासंयोगः इत्येवं रूपेण रेफानुबन्धान्येव च कृत्वा हल् इति पृथक् सूत्रं त्यज्यताम्।मैवम्। तथाहि सति हरिर्हसति हरिर्हरिरित्यादि न सिध्येत्।तत्र खरवसानयोर्विसर्जनीयः[२६] वा शरि[२७] इत्यादि प्रसङ्गात्। अतो हल् इति सूत्रमावश्यकमेव।[२८] अस्मात् प्रतीयते माहेश्वरसूत्राणां सरचनं वैज्ञानिकचिन्तनस्य फलस्वरूपम्।माहेश्वरसूत्रेषु हयवरट् सूत्रेऽपि वर्णानां या आनुपूर्विकस्थतिः सा वैज्ञानिकदृष्ट्या शृङ्खलिता।विषयेऽस्मिन् भगवता भाष्यकारेण उक्तं यत्-अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत हरयवट् इति,पर एव वा हयवरट् इति।तत्र भाष्यसिद्धानुसारेण परोपदेश एव हयवरट् इति सूत्रं समिचिनम्। किञ्च "ञमङणनम्",

"झभञ्" इति सूत्रद्वयं न कृत्वा एकेनानुबन्धेन सूत्रद्वयं सम्मिल्य ञमङणनझभञ् इति सूत्रं स्यादिति भाष्यकारेण आशङ्का कृता। मानुबन्धाभावे मकारमाश्रित्य अम् ,यम् ,ङम् प्रत्याहारत्रयाणां कृते दोषनिराकरणं ञमङणनम् इति सूत्रे भाष्यकारेण स्पष्टं समाहितम्। अस्मिन् विषये श्रीमता नागेशेन उक्तं यत् -भगवता तु स्पष्टप्रतिपत्तयेऽनुबन्धद्वयमदर्शि। ञमङणनम् सूत्रस्यान्तिमभागे भाष्यकारेण स्पष्टतया प्रतिपादितं किमर्थमक्षराणामुपदेशः –

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते।

तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते।।

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भबति,मातापितरौ चास्य स्वर्गे लोके महीयेते।[२१]

अतः सर्वे वेदाः सर्वाणि च ज्ञानानि वर्णज्ञाने सन्निहितानि सन्ति। तस्मात् वर्णज्ञानेन सह ब्रह्मज्ञानस्य तुल्यत्वं परिलक्ष्यते। यथा ब्रह्मज्ञानेन सर्ववेदपुण्यफलप्राप्तिर्भबति तथैव वर्णज्ञानेनापि सकलाभीष्टार्थसिद्धिर्भवतीति दिक्।

## पादटीका

[१] म. भा. ,तृ. आह्नि. पृ.सं.१२७

[२] पा.सू. (६.१.७६ )

[३] का. उदक् च विपाशः४/२/७४)

[४] म. भा., पा. सू.,४/३/६६

[५] वा. प. ,का. सं.- १/१४२

[६] तत्रैव का. सं.-१/१३

[७] पा. शि., का. सं.- ५७

[८] म. भा. द्वि. आ. पृ. सं.- ११८
[९] सि. कौ. भ्वा प्र., पृ. सं.- १०६, धा .सं. २६
[१०] पा .सू . ३.१ . १३४
[११] वा. प., ब्र.का. १. १
[१२] श्रीविष्णु. स., श्लो.सं.-१५
[१३] श्रीमद् गव. १५/१६
[१४] वृ. धा. कु. , स्वा .प्र , धा .सं.-१२६४, पृ .सं .४९७
[१५] सि .कौ .उणादिप्र. ३/३५०पृ.सं .३३०
[१६] म. भ. , पस्प.,पृ .सं.११
[१७] ल. श. शे., पृ .सं ६
[१८] म. भा. पस्प. पृ.सं. ४६
[१९] मा.सू.६
[२०] पा. सू.१. १. ५१
[२१] सि . कौ. लक्ष्मी टीका , पृ. सं. १०
[२२] पा. सू.१. १. ५२
[२३] पा. सू. १. १. ७
[२४] पा. सू.८. २. २६
[२५] पा. सू.३. १. ४५
[२६] पा. सू. ८. ३. १५
[२७] पा. सू.८. ३. ३६
[२८] सि. कौ., बा. त., पृ. सं. ५ -६
[२९] म. भा. द्वि. आ. पृ. सं. ११९

## सन्दर्भग्रन्थसूची

**व्याकरणमहाभाष्यम्**-(नवाह्निकम्) चारुदेवशास्त्रिणः हिन्दीटीकोपेतम् मोतीलाल,बनारसीदास,दिल्ली (१९६८)।

**अष्टाध्यायीसूत्रपाठः**-महर्षिपाणिनिप्रणीतः, वृत्तिकारः **श्रीनारायणमिश्रः**,चौखम्भा पब्लिशर्स, वाराणसी(२००६)।

**काशिका (प्रथम भागः)-** विद्वद्वर वामन-जयादित्यविरचिता,व्याख्याकारः श्रीनारायणमिश्रः,चौखम्भा संस्कृत संस्थान, वाराणसी (१९९६)।

**वाक्यपदीयम्(ब्रह्मकाण्डम्)-** श्रीभर्तृहरिविरचितम्, व्याख्याकारः श्रीसूर्यनारायणशुक्लः,चौखम्भा संस्कृत संस्थान, वाराणसी (१९९०)।

**पाणिनीयशिक्षा-** व्याख्याकारः शिवराज आचार्यः कौण्डिन्त्यायनः, चौखम्भा विद्याभवन, वाराणसी (१९९८)।

**वैयाकरणसिद्धान्तकौमुदी**-(भ्वाद्यादि-चुराद्यन्तः, तृतीयोभागः) सविमर्श-रत्नप्रभाहिन्दीव्याख्या सहिता,चौखम्भा संस्कृत सीरीज आफिस, वाराणसी।

**श्रीविष्णुसहस्रनामस्त्रोत्रम्**-श्रीआद्यशंकराचार्यकृतभाष्य हिन्दी-अनुवादसहित, अनुवादकः भोला, गीताप्रेस, गोरखपुर।

**श्रीमद्भगवद्गीता**-गीताप्रेस, गोरखपुर।

**लघुशब्देन्दुशेखरः**-(अव्ययीभावान्तः)म.म.श्रीनित्यानन्दपन्तपर्वतीयविरचितेनशेखरदीपिकाख्येन टिप्पणेन समुज्ज्वलितः,चौखम्भा संस्कृत संस्थान, वाराणसी (१९८४)।

**वैयाकरणसिद्धान्तकौमुदी**-(प्रथमोंशः),पण्डितश्रीसभापतिशर्मोपाध्यायविरचिता, लक्ष्मीटीका, मोतीलाल वनारसीदास,वाराणसी (१९६६)।

**वैयाकरणसिद्धान्तकौमुदी**-(कारकान्तःप्रथमो भागः)बालमनोरमातत्त्वबोधिनीविभूषिता, चौखम्भा विद्याभवन, वाराणसी (२००८)।

**बृहद्धातुकुसुमाकरः**- पं.हरेकान्तमिश्रः,चौखम्भा संस्कृत प्रतिष्ठान, वाराणसी (१९९९)।

**वैयाकरणसिद्धान्तकौमुदी**-(मूलमात्रम्)सम्पादकः श्रीगोपालदत्तपाण्डेयः,चौखम्भा विद्याभवन, वाराणसी (१९९३)।

कलियाचक-विक्रमकिशोर-आदर्श-संस्कृतमहाविद्यालयः,
कलियाचकः, पूर्वमेदिनिपुरम् ,पश्चिमवङ्गः

# देवो याति भुवनानि पश्यन्

डा. भारतभूषणरथः
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति, आ.प्र

विश्वे विद्यमानेषु नानाविध तत्त्वेषु 'सूर्यः' अन्यतमः। अमरकोषप्रभृतिषु कोषेशु आदित्य – मार्तण्ड – भैरव - रवि प्रभृतीनि वहूनि नामान्तराणि सूर्यस्य कृते वर्त्तन्ते । प्राणीषु जीवनसञ्चारं करोति इति हेतोः सूर्यस्य अपरं नाम जीवनमित्यपि वक्तुं शक्यते।

वेदादिषु समस्त शास्त्रेषु सूर्यस्य वैशिष्ट्यं प्रतिपादितमस्ति । ऋग्वेदे सूर्यसूक्ते सूर्यः जगतः आत्मा इति मन्त्रः वर्तते। यथा –

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।। ऋग् - 1.115.1

सूर्यसूक्ते सूर्यवन्दनं कृत्वा ऋषिः लिखति यद् – सूर्यः प्रेरकशक्तिविशिष्टः। स्वर्णरथेन उपविश्य अन्तरीक्षस्य अन्धकारपथि नित्यं विचरणं करोति सूर्यः। सर्यस्य विचरणवेलायां देवाः मानवाश्च स्वस्वकार्येषु संलग्ना भवन्ति। सूर्यः तान् सर्वान् दृष्ट्वा अग्रे सरति। स सूर्यः संसारे सुखं वितनोति। मन्त्रः यथा –

आकृष्णेन रजसा वर्तमानो निवेश्शयन्नमृतम्मर्त्यञ्च।
हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्यन्।। ऋग्

सूर्योपनिषदि सूर्यवर्णनं महत्तपूर्णमस्ति। तद् यथा –

सूर्य आत्मा जगतस्तस्थुषश्च।
सूर्याद् वै खलु इमानि भूतानि जायन्ते।
सूर्याद्यज्ञः पर्जन्य अन्नम् आत्मा नमस्त आदित्य।
त्वमेव प्रत्यक्षं कर्मकर्तासि।
त्वमेव प्रत्यक्षं ब्रह्मासि।
त्वमेव प्रत्यक्षं विष्णुरसि।
त्वमेव प्रत्यक्षं रुद्रोऽसि।

त्वमेव प्रत्यक्षमृगसि।
त्वमेव प्रत्यक्षं यजुरसि।
त्वमेव प्रत्यक्षं सामासि।
त्वमेव प्रत्यक्षमथर्वासि।
त्वमेव सर्वं छन्दोऽसि।
आदित्याद्वायुर्जायते। आदित्याद्भूमिर्जायते। आदित्यादापो जायन्ते। आदित्याज्ज्योतिर्जायते।

एवम् आदित्यवर्णनेन विविधतत्त्वानां विचारविमर्शः सूर्योपनिषदि परिलक्षते।तथैव पुराणवाङ्मये सूर्यः सर्वत्र पूज्यो भवति। पुराणवर्णितं सूर्यस्य द्वादशनामानि प्रसिद्धानि। यथा –

वैकर्तनो विवस्वांच मार्तण्डो भास्करो रविः
लोकप्रकाशकः श्रीमान् लोकचक्षुः ग्रहेश्वरः।
लोकसाक्षी त्रिलोकेशः हर्ताकर्तात्रमिश्रहाः
तपनः तापनः चैव सूचिः सप्ताश्ववाहनः
गभस्ति हस्तो ब्रह्मा च सर्वदेवो नमस्कृतः।।

अनेन क्रमेण सूर्यवर्णनं विना कवेः काव्यमपि न पूर्णतां याति। प्रायः सर्वेपि कवयः स्वकाव्येषु प्रत्यक्षरूपेण परोक्षरूपेण वा सूर्यमभिवर्णयन्ति। कदाचित् साक्षात् सूर्यस्य प्रभावर्णनं कुत्रचित् उपमाप्रभृतिषु अलङ्कारेषु परोक्षरूपेण वा सूर्यस्य महिमानं वर्णयन्ति कवयः। रसानुबन्धवर्णनपूर्वकं सूर्यतत्त्वपूर्णं काव्यं समाजमुपदिशति एव ।आदिकाव्ये रामायणे सूर्यवंशप्रदीपस्य श्रीरामचन्द्रस्य गुणगणान् वर्णयित्वा आदिकविर्वाल्मीकिः सूर्यस्य महिमानं वर्णयति। विशेषतया आदित्यहृदयस्तोत्रे श्रीरामेण कृता सूर्यस्तुतिः सर्वलोकानुग्राहिणी भवति। रावणेन सह युद्धं कृत्वा श्रान्तः श्रीरामः चिन्तामग्नो भवति। युद्धभूमौ चिन्ताग्रस्तं श्रीरामम् उपदिष्टवान् ऋषिः अगस्त्यः। समरे यदि विजयम् इच्छति तर्हि आदित्यं हृदि धारय इति। सः आदित्यः सर्वशत्रुविनाशकः तथा परममङ्गलकारी देवो भवति। ऋषेः उपदेशेन श्रीरामः आदित्यं स्मरति। श्रीरामः ज्ञातवान् यद् शकलशक्तेः आधारभूतः सूर्यः यदि ऩोपास्यते तर्हि रावणेन सह युद्धं कर्तुं न शक्यते विजयश्च असम्भवः। तदेव वाल्मीकिः आदित्यहृदयस्तोत्रे अलिखत् -

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्।।
राम राम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसि।।
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्।।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम्।।
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्।। आ.हृ. – 1-6

एवम् ऋषेः अगस्त्यस्य उपदेशेन श्रीरामः आदित्यं पूजितवान् अपि च अनायासेन रावणात् विजयं प्राप्तवान्।

महाभारते वनपर्वणि सूर्यस्य महत्वपूर्णगुणानां विषये वर्णयति व्यासदेवः। तद् यथा –

निषिक्तश्चन्द्रतेजोभिः सूयते जगतो रविः।
औषध्यः षड्रसा मेध्यास्तदन्नं प्राणिनां भुवि।।
एवं भानुमयं ह्यन्नं भूतानां प्राणधारणम्।
नाथोऽयं सर्वभूतानां तस्मात्तं शरणं व्रज।। महा.

अस्मिन् वर्णने वैज्ञानिकता वर्तते। चन्द्रः सूर्यस्य किरणेन आलोकितः इति विज्ञानं प्रतिपादयत्यत्र कविः। रात्रौ चन्द्रस्य अंशुः तथा दिवसे सूर्यस्य रश्मिः विविध वृक्षाणाम् अभिवर्द्धकाः भवन्ति। सूर्यस्य प्रभावात् वृक्षलतासु षड् रसानां सृष्टिः जायते। इमे वृक्षाः समाजस्य कृते भोजनं निर्मान्ति।अतः प्रत्यक्षरुपेण सूर्यरश्मिः प्राणीनां जीवनदाता अस्ति। पितृवत् परिपालयति इति हेतोः सूर्यः अस्माकं पिता इति संबोध्यते। तं सूर्यं शरणं व्रजामः यः अस्माकं सुरक्षादाता अस्ति। एतादृशः सूर्यः संसारं पोषयतीति वर्णनम् आदित्यहृदयस्तोत्रे अपि उक्तमस्ति। तद् यथा –

नाशयत्येष वै भूतं तदेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः।। आ.हृ

सूर्ये निहितं पौराणिकं तत्त्वं वैज्ञानिकं तत्त्वं च श्रवणानन्दवर्द्धकं भवति । मयूरभट्टविरचितं सूर्यशतकम् एतस्य अन्यदेकम् उदाहरणम्।सूर्यशतकस्य वैज्ञानिकं तत्त्वं वलिष्ठं वर्तते। वयं जानीमः यदि एकमपि दिनं नभोमण्डले सूर्यः नागच्छेत् तर्हि संसारस्य सुरक्षा असम्भवो भवति। सूर्यः एव प्राणवायुसञ्चारकः। समस्त ऐश्वर्यदायकः। अतः मयूरभट्टः स्वकाव्ये मङ्गलपद्ये अलिखत् –

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवोधैरुदयगिरितटीधातुधाराद्रवस्य।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासु र्भासयन्तो भुवनमभिनवा भानवो भानवीयाः।। सू.श -1

पद्येऽस्मिन् सूर्यस्य कान्तिः अभिनवा इति कविः अभिवर्णयति। अरुणवर्णस्य स सूर्यः यदा उदेति तदा समस्त ऐश्वर्येण सह नभोमण्डलम् आकर्षितं करोति। नभसि विविधधातुनां द्रव इव शोभा दृश्यमाना भवति।तादृशः उदयकालीनसूर्यः युष्माकम् ऐश्वर्यं सम्पादयतु इति कवेः वर्णनम्।अस्मिन् शतके सूर्यस्य अरुणवर्णस्य वर्णनं गुरुत्वमावहति। सूर्योदय एव समाजस्य अभुदयसमयः इति कविः प्रत्यक्षरुपेण प्रतिपादयति। अतः अरुणवर्णनमिति स्वतन्त्रतया एकादशश्लोकाः कविना विरचितम् अस्मिन् शतके। वस्तुतः अरुणो भवति सूर्यस्य सारथि। कविः यदा अरुणं वर्णयति तदा प्रथमे पद्ये मानवशरीरेण सह अरुणस्य सम्पर्कविषये सूचयति। अरुणः सकलरोगस्य प्रशमनं करोति। विशेषतया यः मानवः प्रतिदिनम् अरुणं दर्शनं करोति सः आरोग्यं प्राप्नोतीति भेषजविज्ञानस्य तत्त्वं प्रतिपादयति कविः। अतः लिखति –

प्रातः शैलाग्ररङ्गे रजनिजवनिकापायसंलक्ष्यलक्ष्मी-
र्विक्षिप्याप्यापूर्वपुष्पाञ्जलिमुडुनिकरं सूत्रधारायमाणः।
यामेष्वङ्केष्विवाह्नः कृतरुचिषु चतुर्षेव जातप्रतिष्ठा –
मव्यात् प्रस्तावयन् वो जगदटनमहानाटिकां सूर्यसूतः।। सू.श – 50

एवम् अरुणस्य विविधगुणगणान् वर्णयित्वा अरुणोदयदर्शनाय जनान् प्रबोधयति कविः।

कविकुलगुरुः कालिदासः स्वकाव्ये सूर्यं सर्वथा अभिवन्दति। कविः सूर्यस्य महनीयतां वर्णयित्वा सूर्यस्य सुरक्षाविषये समाजं सचेतयति। विशेषतया अभिज्ञानशाकुन्तलनाटके मङ्गलपद्ये विश्वस्य अष्ट प्रमुखतत्त्वेषु सूर्यः एकः इति

प्रतिपादयति कविः। अष्टसंख्यकाभिः तनुभिः सेवितः शङ्करः इति कालिदासस्य अभिप्रायः। ताः अष्ट शक्तयः भवन्ति – 1. जलम्, 2. हविः (घृतादि देवर्पितं भोज्यम्), 3. अग्निः, 4. होत्री (यजमानरूपा हवनकर्त्री) 5. कालरूपः सूर्यः 6. कालरूपः चन्द्रः 7. शब्दगुणः आकाशः तथा 8. पृथिवी। सूर्यः विश्वस्य एकं प्रमुखतत्त्वरूपमिति चिन्तयति कविः। कविः लिखति –

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।। अ.शा – 1.1

एवमेव ऋतुसंहारे सर्वादौ ग्रीष्मवर्णनं करोति कालिदासः। यत्र वहुधा सूर्यस्य तेजोमयस्वरूपं वर्णितम्।

उत्तररामचरितस्य कर्ता भवभूतिः सूर्यं विजयस्य प्रतीकभूतो देवता इति संबोधयति। अतः पञ्चमाङ्के यदा चन्द्रकेतुः रथाद् अवतीर्य सुमन्त्रं प्रणमति तदा सुमन्त्रः सूर्यस्य आशीर्वादेन विजयप्राप्तिर्भवतु इति स्वाभिप्रायं प्रकटयति। तद् यथा –

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि।
ऐन्द्रावैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम्।। उ.च – 5.29

अर्थात् यः ते गोत्रस्य पिता सः साक्षात् सविता अस्ति। स एव सविता समरे त्वां धुनोतु इति उक्त्वा कविः सूर्यं विजयस्य प्रतीकरुपेण सम्मानयति।

एवमेव वहुत्र सूर्यस्य अविश्रान्तं मार्गं वर्णयति कविः। सूर्यः यथा समाजहितायै आदिनम् आत्मानं समर्पयति तथा मानवाः सूर्यम् अनुकृत्य स्वदिनचर्यायां समाजमङ्गलमेव चिन्तयन्तु इति श्रीरामस्य मुखेन उपदिशति कविः। तद् यथा –

न तेजस्तेजस्वी प्रसृतमपरेषां विषहते
स तस्य स्वोभावः प्रकृतिनियतत्वादकृतकः।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति।। उ.च – 6.14

ऋतुसंहारे प्रथमे पद्ये कालिदासेन कृतं ग्रीष्मवर्णनं रुचिरं वर्तते। यत्र सूर्यदेवस्य प्रचण्डशक्तेः वर्णनं सर्वादौ वर्तते । यथा –

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ।। ऋतु.1.1

रघुवंशे सूर्यवंशस्य प्रभावं सम्मानयति कविः। अतः प्रथमे सर्गे मङ्गलपद्य समनन्तरं लिखति –

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।। रघु. 1.2

तथा च सूर्यस्य समाजमङ्गलं गुणं वर्णयित्वा राजधर्मपालन सूर्यः कथमस्मान् उपदिशति इति कविः लिखति। यथा –

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।। रघु.1.18

उक्तं च सुभाषिते –

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता।।

न केवलं पद्यकाव्येषु अपि च गद्यकाव्ये समासवहुलकाव्यशैलीमाधारीकृत्य सूर्यवर्णनं स्थाने स्थाने परिदृश्यते। काव्यप्रकाशप्रभृतिषु आकरग्रन्थेषु काव्यप्रयोजननिरुपणावसरे "आदित्यादेः मयूरादीनाम् अनर्थनिवारणमिति" वृत्तिमाध्यमेन सूर्यमाहात्म्यमभिवर्णयति मम्मटाचार्यः। अतः संस्कृतसाहित्यवाङ्मये सूर्यवर्णनं सुविस्तृतं सुपरिचितं च। विविधकाव्यनाटकानां च पठनावसरे सूर्यमहिमाम् आधारीकृत्य वर्णनं परिलक्षते एव। एवं विविध शास्त्राणाम् अध्ययेनन ज्ञायते यद् सूर्यः जगतः प्राणस्वरूपः। सूर्यः यदि प्रतिदिनं भूवनं न पश्यति तर्हि विश्वं न तिष्ठति । अतः वैदिकऋषिभिः सुष्ठु प्रतिपादितम् - देवो याति भुवनानि पश्यन्।

**सङ्केताक्षरसूची –**

अ.शा – अभिज्ञानशाकुन्तलम्

आ.हृ - आदित्यहृदयस्तोत्रम्
उ.च – उत्तररामचरितम्
ऋ.सं – ऋतुसंहारम्
ऋग् – ऋग् वेदः
महा – महाभारतम्
सू.श - सूर्यशतकम्

# प्रकृतिप्रत्ययविज्ञानम्

अध्यापिका कादम्बिनी पाढी
अध्यापिका, व्याकरणविभागः
अनन्तनारायणसंस्कृतमहाविद्यालयः, केन्द्रापडा

लोके प्राणिनां सर्वोपि व्यवहारः शब्दैरेव प्रचालितो दृश्यते। यद्यपि मूकानां व्यवहारः चेष्टादिना सम्पद्यते तथापि ध्वन्यात्मकः शब्दोनुभूयते। व्यवहाराय भावादानप्रदानाय भाषा भवति परमं साधनम्। सा च भाषा वाक्यरूपा भवति। वाक्यादेव अर्थावबोधो जायते। तदुक्तं न्यायभाष्ये महर्षिवात्स्यायनेन – **पदसमूहो वाक्यमर्थसमाप्तौ**[1]। वाक्यञ्च पदसमूहात्मकम्। वर्णसमूहः पदम् । पदसमूहो वाक्यम् । तदुक्तं साहित्यदर्पणे – **स्याद्योग्यताकाङ्क्षासत्तियुतः पदोच्चयः वाक्यम्**[2]। अर्थानुगुणतया परस्परं सम्बद्धानां पदानां समूहः वाक्यम्।

यद्यपि शाब्दिकसिन्धान्ते वाक्यस्फोटो मुख्यः। अखण्डवाक्यादेव अर्थबोधः, तत्र वाक्ये वर्णानां पदानां च स्थितिर्नास्ति तथापि लघूना उपायेन वाक्यज्ञानं न सम्भवतीति काल्पनिकः पदविभागः स्वीक्रियते। प्रतिपत्पाठद्वारा पदज्ञानं न सम्भवति। विषयेस्मिन् पतञ्जलिरपि आह यत्- **अनभ्युपाय एषः शब्दानां प्रतिप्रत्तौ प्रतिपदपाठः**[3]। अतः पदेपि प्रकृतिप्रत्ययविभागः परिकल्पितः वैयाकरणैः। तदुक्तं भर्तृहरिणा –

**उपायाः शिक्षमाणानां बालानामुपलालनाः**
**असत्ये वर्मनि स्थित्वा ततः सत्यं समीहते**[4]।

वर्ण-पद-वाक्यानि विभज्यान्वाख्यानं क्रियते वैयाकरणैः। सर्वाणि पदानि द्विधा विभक्तानि। यथा- नामपदानि, क्रियापदानि च। अतः पाणिनिना **सुप्तिङन्तं पदम्**[5] इति पदसंज्ञाविधायकं सूत्रं प्रणीतम्। निपातानां नामपदेषु अन्तर्भावो भवति। सर्वेषां पदानां पुनः द्वेधा अन्तर्विभागो भवति। यथा - प्रकृतिः, प्रत्ययश्च। तत्र नामप्रकृतेः प्रातिपदिकात् सुप्प्रत्ययाः विधीयन्ते। क्रियाप्रकृतेः धातोः तिङ्प्रत्ययाः विधीयन्ते।

प्रातिपदिकं द्विविधं वर्तते। यथा- रूढम्, यौगिकञ्च। यौगिकं धातोरेव निष्पाद्यते । तदुक्तं महाभाष्ये – **सर्वं नाम धातुजमाह**[6]। प्रातिपदिकसंज्ञाविधानाय सूत्रद्वयं प्रणीतं पाणिनिना। यथा- **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[7] , **कृत्तद्धितसमासाश्च**[8]**।** धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत्शब्दस्वरूपं प्रातिपदिकसंज्ञं भवतीति प्रथमसूत्रस्यार्थः। कृत्तद्धितसमासानां प्रातिपदिकसंज्ञा द्वितीयसूत्रेण विधीयते। प्रातिपदिकरूपप्रकृतेः[9] सुप्प्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाश्च विधीयन्ते। धातुरूपप्रकृतेः[10] तिङ्प्रत्ययाः, कृत्प्रत्ययाश्च विधीयन्ते।

**प्रकृतित्वञ्च प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वम्**[11]। प्रत्ययविधानमष्टाध्याय्यां तृतीयाध्याये, चतुर्थाध्याये, पञ्चमाध्याये च वर्तते। तत्र प्राधान्येन धातुरूपप्रकृतिमुद्दिश्य प्रातिपदिकप्रकृतिमुद्दिश्य प्रत्ययो विधीयते। एवञ्च प्रत्ययविधौ उद्देश्यं धातुः प्रातिपदिकञ्च, उद्देश्यता धातौ प्रातिपदिके च, उद्देश्यतावच्छेदकं धातुत्वं प्रातिपदिकत्वञ्च , धातुत्वेन प्रातिपदिकत्वेन आक्रान्तं युक्तं धातुः प्रातिपदिकम्, आक्रान्तत्वं धातौ प्रातिपदिके चेति प्रकृतित्वलक्षणस्य समन्वयः। एवं धातुत्वयुक्तो धातुः, प्रातिपदिकत्वयुक्तं प्रातिपदिकमेव प्रकृतिः।

अतः प्रकृतिः मूलं भवति। प्रकृतेः परः प्रत्ययो भवति। न हि लोके केवलेन प्रत्ययेनार्थो गम्यते। विशुद्धानां धात्वादीनामपि लौकिकोर्थो न विद्यते। किन्तु सप्रकृतिकेन प्रत्ययेनार्थो गम्यते। **परश्च**[12] इति सूत्रे प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृतेः पठ्,पच् इत्यादेः प्रयोगो मा भूदिति प्रत्ययः परो भवत्येवेति नियमः कल्पितः। एतन्मूलकमेव **न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः इति** भाष्यवचनं संगच्छते।

तर्हि को नाम प्रत्ययः इति जिज्ञासोदेति। स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वं प्रत्ययत्वम्। अर्थात् स्वकीयमर्थम् अथवा स्वप्रकृतेरर्थं यः प्रतिपादयति स प्रत्ययः। यथा- तृच्प्रत्ययः कर्तरि अर्थे भवति।

अतः तृच्प्रत्ययस्यार्थः कर्तैव। स्वकीयार्थप्रत्यायकत्वेन तृचः प्रत्ययत्वं विद्यते। बाल एव बालकः इत्यत्र स्वार्थे कन्प्रत्ययो विधीयते। अस्य स्वकीयार्थो न विद्यते। परन्तु कन्प्रत्ययः स्वप्रकृतेरर्थं प्रत्याययति। अतः कनः अपि प्रत्ययत्वं समागच्छति।

वस्तुतः प्रत्ययाधिकारविहितत्वं प्रत्ययत्वम्। **प्रत्ययः**[13] इति तृतीयाध्यायस्य प्रथमपादस्य प्रथमं सूत्रम्। इतः ऊर्धमापञ्चमाध्यायस्य परिसमाप्तेः प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते। तेन विकारागमानां प्रत्ययसंज्ञा न भवति। परश्च इति सूत्रमपि आपञ्चमपरिसमाप्तेः अधिकृतम्। प्रकृतेः परः प्रत्ययः प्रवर्तते इत्यर्थः।

अधुना केचन विशिष्टाः प्रत्ययाः तेषाञ्च भेदाः विविच्यन्ते। प्रतियन्त्यनेनेति करणव्युत्पत्त्या, प्रत्याययतीति कर्तृव्युत्पत्त्या , प्रत्याय्यते इति कर्मव्युत्पत्त्या च तत्तदर्थप्रत्यायकाः प्रत्ययाः विभक्ति- धात्वंश-तद्धित-कृत्-टाबादिभेदेन पञ्चधा विभज्यन्ते। सुप्-तिङ्भेदेन विभक्तिप्रत्ययाः द्विविधाः।

1 **सुप्प्रत्ययाः** – विभक्तिकार्येषु सुप्प्रत्ययाः विधीयन्ते। एकविंशतिः सुप्प्रत्ययाः वर्तन्ते। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्**[14] इति सूत्रेण एकविंशतिः सुप्प्रत्ययाः विहिताः। यथा- सु,औ,जस्,अम्,औट्,शस्,टा,भ्याम्,भिस्,ङे,भ्याम्,भ्यस्,ङसि,भ्याम्,भ्यस्,ङस्,ओस्,आम्,ङि,ओस्,सुप्। उदाहरणं यथा- राम इति प्रातिपदिकात् प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे सस्य रुत्वे विसर्गे च रामः इति रूपं सिध्यति। एवंप्रकारेण प्रत्येकस्यां विभक्तौ त्रयः प्रत्ययाः विधीय़न्ते। इत्थं सर्वे सुप्प्रत्ययाः प्रातिपदिकेन सह संयुज्य सुबन्तपदानि निष्पाद्यन्ते।

2 **तिङ्प्रत्ययाः** – धातोः यः प्रत्ययः विधीयते सः कृद्भिन्नः प्रत्ययः तिङिति कथ्यते। **तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासथांध्वमिड्वहिमहिङ्**[15] इति सूत्रेण अष्टादश तिङ्प्रत्ययाः धातोः विधीयन्ते। तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्

एते नवप्रत्ययाः परस्मैपदस्य। यथा- भवति, भवतः, भवन्ति, भवसि, भवथः, भवथ, भवामि, भवावः, भवामः। त-आताम्-झ-थास्-आथाम्-ध्वम्-इड्-वहि-महिङ् एते नवप्रत्ययाः आत्मनेपदस्य। यथा- एधते, एधेते, एधन्ते, एधसे, एधेथे, एधेध्वे, एधे, एधावहे, एधावहे।

3 **धात्वंशप्रत्ययाः** – प्रत्ययेषु धात्वंशशब्देन ते प्रत्ययाः गृह्यन्ते ये विभक्तिकृत्तद्धितटाबादिव्यतिरिक्ताः सन्तो धात्वंशभूताः भवन्ति। यथा सनादयः प्रत्ययाः। प्रत्ययाधिकारत्वाच्चास्य प्रत्ययत्वं स्यादेव। ते च सन्-क्यजादिभेदेन द्वादश प्रत्ययाः भवन्ति। तदुक्तम् –

**सन्क्यच्काम्यच्क्यङ्क्यषोथाचारक्विब्णिज्यङौ तथा**

**यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः**[16]।

सन्-क्यच्-काम्यच्-क्यङ्-क्यष्-क्विप्-णिच्-यङ्-यक्-आय-ईयङ्-णिङ् इत्येते द्वादश सनादयः प्रत्ययाः भवन्ति।

4 **कृत्प्रत्ययाः** – धातोः तिङ्प्रत्ययाः कृत्प्रत्ययाश्च विधीयन्ते। धातोः विधीयमानान् तिङ्प्रत्ययान् विहाय अन्ये ये प्रत्ययाः विहिताः ते भवन्ति कृत्प्रत्ययाः। अष्टाध्याय्याः तृतीयाध्यायो भवति धात्वधिकारः। तत्रापि अधिकारद्वयमस्ति। द्वितीयाधिकारस्तु धातोरिति सूत्रादारभ्य छन्दस्युभयथेति सूत्रं यावदधिकरोति। अस्मिन् अधिकारे तिङ्प्रत्ययाः कृत्प्रत्ययाश्च कल्पिताः सन्ति। अत्र **कृदतिङ्**[17] इति सूत्रानुसारं तिङ्भिन्नाः प्रत्ययाः कृत्प्रत्ययाः भवन्ति।

कृदन्तरूपेण कदाचित् क्रियार्थमसमापिकाक्रियार्थं वोधयन्ति कृत्प्रत्ययाः। कृदन्तानां क्वचिदव्ययत्वेनापि व्यवहारो भवति।

कृत्य- पूर्वकृदन्त-उणादि-उत्तरकृदन्ताः इति कृदन्तप्रकरणं चतुर्धा विभज्यन्ते। तत्र कृत्यप्रत्ययाः सप्त भवन्ति। यथा- तव्य,तव्यत्, अनीयर्, केलिमर्, यत्, क्यप्, ण्यत् इति। **तयोरेवकृत्यक्तखलर्थाः**[18] इति पाणिनिसूत्रेण एते

प्रत्ययाः भावे कर्मणि च विधीयन्ते। पाणिनिव्याकरणे 124 कृत्प्रत्ययाः विवेचिता। विभिन्नेष्वर्थेषु एते प्रत्ययाः विहिताः भवन्ति।

5 **स्त्रीप्रत्ययाः** – संस्कृतभाषायां लिङ्गदृष्ट्या शब्दाः द्विविधाः भवन्ति। यथा- अलिङ्गाः, लिङ्गयुक्ताश्च। सर्वाणि अव्ययानि अलिङ्गानि सन्ति। अव्ययशब्दान् विहाय अन्ये शब्दाः लिङ्गयुक्ताः भवन्ति। लिङ्गयुक्तशब्देषु केचन नियतलिङ्गकाः केचन अनियतलिङ्गकाश्च सन्ति। नियतलिङ्गकाः शब्दाः पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गभेदेन त्रिधा विभक्ताः। स्त्रीलिङ्गशब्देभ्यः कतिपयशब्दाः मूलत एव स्त्रीलिङ्गका भवन्ति अर्थात् ते नित्यस्त्रीलिङ्गशब्दाः। यथा- धेनु, मातृ, बधू, वाक्, दिक् इत्यादयः। एवंभूताः अनेके शब्दाः सन्ति तत्र स्त्रीप्रत्ययसंयोगेन स्त्रीलिङ्गकाः भवन्ति। यथा- कुमारी , ब्राह्मणी, गोपा,गोपी,।

| **स्त्रीप्रत्ययाः** | **स्त्रीप्रत्ययान्तशब्दाः** |
|---|---|
| टाप् | अजा, एडका |
| डाप् | सीमा |
| चाप् | सूर्या |
| ङीप् | कुमारी, नदी |
| ङीष् | नर्तकी, गोपी |
| ङीन् | नारी |
| ऊङ् | कुरूः, वामोरूः |
| ति | युवतिः |

6 **तद्धितप्रत्ययाः** – प्रातिपदिकेभ्यः सुबन्तेभ्यश्च तद्धितप्रत्ययाः विधीयन्ते। अत्र पक्षद्वयं वर्तते। प्रातिपदिकेभ्यः तद्धितोत्पत्तिः इत्येकः पक्षः। सुबन्तात्

तद्धितोत्पत्तिरिति अपरः पक्षः। यथा- उपगोः अपत्यं पुमान् इति विग्रहे उपगु इति प्रातिपदिकात् अण्प्रत्यये औपगवः इति तद्धितान्तं पदं सिध्यति। अथवा उपगोः इति षष्ठ्यन्तात् सुबन्तात् अण्प्रत्यये औपगवः इति पदं सिध्यति। अत्र पक्षे सुपो धातुप्रातिपदिकयोः[19] इति सूत्रेण ङस्विभक्तेः लुक् भवति। संज्ञा-सर्वनाम-विशेषणादिस्थलेषु येषां प्रत्ययानां योजनेन कश्चन विशिष्टार्थः आगच्छति त एव तद्धितप्रत्ययाः । एतेषां प्रयोगेण शब्दे साधुता , सौन्दर्यता, नवीनता, श्रुतिमधुरता चायाति।

तेभ्यः प्रयोगेभ्यः हिताः तद्धिताः इति महामंज्ञा स्वीक्रियते। तद्धिताः इत्यधिकारे एते प्रत्ययाः विहिताः भवन्ति। प्रियतद्धिताः दाक्षिणात्याः इति भगवता भाष्यकृता प्रोक्तम्। व्याकरणशास्त्रे तद्धितप्रकरणं व्यापकं भवति। अण्-ठक्-ढक्-यत्-ण्य-इञ्-फक्-इलच्-धा-विनि-त्व-तल्-तसिल्-मतुप्-दा-थाल्प्रभृतयः तद्धितप्रय्ययाः भवन्ति।

इत्थं प्रकृतिप्रत्यययोः विभागेन सर्वत्र अन्वाख्यानप्रक्रिया समुपलभ्यते। व्याकरणशास्त्रं पदनिष्पादनेन वाक्यार्थबोधमुपकरोति। भाषासंस्कारं विदधाति।

## पादटिपन्नी-

1 न्या.भा.
2 साहि.द. द्वितीयपरिच्छेदे .का.1. पृ.30
3 म.भा पश्. आ.
4 वा.प. 2. 238
5 पा.सू. 1.4.14
6 म.भा.
7 पा.सू. 1.2.45
8 पा.सू. 1.2.46.
9 ङ्याप्प्रातिपदिकात् 4.1.1
10 धातोः 3.1.92

11 ल.श.शे. परश्च इति सूत्रे
12 पा. सू. 3.1.2
13 पा.सू. 3.1.1
14 पा.सू. 4.1.2
15 पा.सू. 3.4.78
16 सि.कौ.बालमनोरमाटीका. 3.1.32 सूत्रे
17 पा.सू 3.1.93
18 पा.सू. 3.4.70
19 पा.सू. 2.4.71

**सहायकग्रन्थाः**

1 अष्टाध्यायी – पाणिनिः
2 महाभाष्यम् – पतञ्जलिः
3 काशिकावृत्तिः – जयादित्यः वामनश्च
4 वैयाकरणसिद्धान्तकौमुदी – भटोजिदीक्षितः

कादम्बिनीपाढी
अध्यापिका, व्याकरणविभागः
अनन्तनारायणसंस्कृतमहाविद्यालयः
केन्द्रापडा

# सुपद्मव्याकरणे संज्ञाप्रकरणे परिभाषासूत्राणि – एकम् अध्ययनम्

Atanu Adhya
Assistant Professor, Dept. of Sanskrit,
Rajganj University, Uttar Dinajpur, WB

*शोधसारः - संस्कृतव्याकरणशास्त्रेतिहासे पाणिनीयव्याकरणं मुख्यरत्नम्। व्याकरणपरम्परायां परवर्तीकाले पाणिनिमुनिराश्रित्य बहवः वैयाकरणाः तेषां व्याकरणग्रन्थैः सह प्रचलिताः। अर्वाचीनकाले बहूनि अपाणिनीयव्याकरणानि रचितानि। तेषु अन्यतममस्ति पद्मनाभदत्तस्य "सुपद्मव्याकरणम्" इति। व्याकरणेऽस्मिन् बहवः अध्यायाः सन्ति। प्रथमे अध्याये संज्ञापरिभाषादिविविधव्याकरणविषयाणां सूत्राणि सन्ति। सुपद्मव्याकरणस्य प्रथमोऽध्यायस्य प्रथमपादे परिभाषासूत्राणि सन्ति। मम शोधरचनया परिभाषासूत्राणां समीक्षात्मकमध्ययनं वयं करिष्यामः। परिभाषासूत्राणामालोचनया सूत्राणां तथा ग्रन्थानां का उपयोगिता विद्यते वयं यदि , अष्टाध्यायीति परम्परया विविधव्याकरणविषयान् ज्ञास्यामः तर्हि सुपद्मव्याकरणस्य का प्रयोजनीयता सुपद्मे ,परिभाषाविषये कीदृशमभिनवत्वम् सर्वा एतानि –णि आलोचनार्थं मम शोधलेखस्य धृष्टता।*

संकेतसूची – लुक्, सदृशतमः, परविधिः, अङ्गस्य

पाणिनीयपरम्परायाम् आचार्यः पद्मनाभदत्तः वङ्गीयछात्राणां सरलत्वेन संस्कृतशिक्षाप्रदानाय "सुपद्मव्याकरणम्"ग्रन्थं प्रणीतवान्। ग्रन्थेऽस्मिन् प्रथमेऽध्याये मूलतया संज्ञासूत्राणां आलोचना कृता अस्ति। पुनः एतदपि वक्तव्यं यत् अन्येषु अध्यायेषु अपि संज्ञासूत्राणामालोचना समुपलभ्यते। परवर्तीकाले श्रीविरेशनाथविद्यासागरमहोदयेन छात्रोपयोगीसंस्करणत्वेन "सुपद्मव्याकरणम्" प्रणीतम्, यत्र च खण्डद्वयमस्ति, अत्र प्रथमे

खण्डे संज्ञापरिभाषादिसूत्राणां वर्णनं व्याख्यानञ्च प्राप्यते। यः ग्रन्थः भट्टपल्लीनिवासी - श्रीब्रह्ममोहनभट्टाचार्येण 1345 बङ्गाव्दे प्रणीतम्।

सुपद्मव्याकरणस्य प्रथमाध्यायस्य शेषार्धे केचन परिभाषासूत्राणां उल्लेखं उपलभ्यते। यद्यपि परवर्तीकाले 'परिभाषापाठः' नाम्ना स्वयं पद्मनाभदत्तेन ग्रन्थः एकः प्रणीतः। "अनियमे नियमकारिणी परिभाषा"इत्यादिषु उक्तिषु परिभाषापदस्य अर्थः सुस्पष्टते। संज्ञासूत्रवत् परिभाषासूत्राणि अपि विधिसूत्राणां नियामकानि भवन्ति। 'परि'उपसर्गपूर्वकं 'भाष्'धातोः 'घञ्'प्रत्ययेन 'परिभाषा' इति शब्दः निष्पद्यते। महाभाष्यस्य "समर्थः पदविधिः"[1] इत्यस्मिन् सूत्रे "परिभाषा"इत्यस्य सुस्पष्टवर्णनं प्राप्यते। पुनः श्रीकालीजीवनदेवशर्मामहोदयेन अपि तस्य स्वकीये ग्रन्थे "परिभाषा"विषये पूर्वाचार्याणां मतानि एकत्रीक्रियते।

यथा---------"अनियमे नियमकारिणी या सा परिभाषा – उपाध्याय
परिभाषा पुनरेकदेशस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत् – महाभाष्य 2.1.1
अव्यक्तानुक्तलेशोक्तसन्धिग्धार्थप्रकाशिकाः।
परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः।। वैद्यकशास्त्र
भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः। - भावशर्मा
एकदेशस्थिता शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते।। - म. प्र. उद्योत 2.1.1
ग्रन्थस्य संक्षेपनिर्वाहार्थं संकेतविशेषः परिभाषा – वोपदेव
सा च पदार्थविवेचकाचार्याणां युक्तियुक्ता वाक् । - पद्मनाभदत्त
तत्राधुनिकः सङ्केतः परिभाषा – गदाधरः (शक्तिवाद) ।"[2]

आचार्यपद्मनाभदत्तकृतः सुपद्मव्याकरणस्य प्रथमाधम्यायस्य प्रथमपादस्य परिभाषासूत्राण्येयम् वर्णनं समीक्षात्मकमध्ययनम् वा अत्र क्रियते, येन वयं ज्ञास्यामः यत् पाणिनीय-अष्टाध्यायाः परिभाषासूत्रैः सह सादृश्यं वैसादृश्यं चेति। यथा---

**1. उदितह्रस्वश्च सवर्णनाप्रत्ययोऽतत्परः(1.1.19)**

सूत्रेऽस्मिन् उदित्, ह्रस्वः, च, सवर्णेन, अप्रत्ययः, अतपरः चेति षट् पदानि सन्ति। वृत्तिः – प्रयोगे उदित्वर्णो ह्रस्वस्वरश्च गृह्यमाणः सवर्णेन सह ग्राह्यो भवति। अर्थात् व्याकरणसूत्रप्रयोगकाले उदित्वर्णः एवञ्च ह्रस्वस्वरः स्थिते तस्य गृह्यमाणसवर्णेन सह ग्राह्यः स्यादिति, परन्तु प्रत्ययस्य उदित् ह्रस्वस्वरस्य वा एवञ्च येषाम् वर्णानां परम् लृकारः संयुक्तं भवति तेषां सवर्णानां ग्रहणं नैव स्यादिति। अस्मिन् विषये पाणिनीयसूत्रमस्ति -अणुदित् सवर्णस्य चाप्रत्ययः[3]। यथा कु-चु-टु-तु-पु एते उदित् , पुनः एतेषां ओकारः नैव भवतीति। कु – इत्युक्ते कवर्गम् अववोध्यते। “चु”इत्युक्ते चवर्गः, “टु”- इत्युक्ते टवर्गः, “तु”- इत्युक्ते तवर्गः एवञ्च “पु”- इत्युक्ते पवर्गः इति। यथा - “अ”इति एकः ह्रस्वस्वरः, अस्य उत्तरं ङसि स्थाने “आत्”करणेन आत् अभवत्, सम्प्रति आत् इत्युक्ते अ आ इत्यादौ प्राप्यते। देव+इन्द्रः- इत्यत्र अकारः, पुनः खट्टा + ईहा – इत्यत्र आकारः, “आदिको गुणः”इत्यनेन आत् इत्युक्ते अ आ इत्येतयोः वोधः भवति, एवञ्च इक् परेस्थिते अवर्णस्य परं इक् स्थिते उभयोः गुणो भवेत्। देवेन्द्रः इत्यत्र देवस्य अकारस्य तथा खट्टेहा इत्यत्र ‘खट्टा’इत्यस्य आकारस्य इक् परे स्थिते गुणः एकारः अभवत्। अत्र जिज्ञास्यते अप्रत्यय इति किम्? उच्यते – ‘वुभुषु’इत्यत्र आगमः अपि अत्र प्रदीयमानत्वात् स्वरूपेण गृह्यते यथा – इक् पुः आदि। पुनः ‘अतपरः’ इति किम्? उच्यते – अतऐस् वृक्षैः इति। वृक्षशब्दस्योत्तरे भिस् स्थाने ऐस् कार्यस्थले केवलं अकारोत्तरे भिस् स्थाने ऐस् भवति। खट्टाभिः इत्यत्र आकारस्य उत्तरे भिस् स्थाने ऐस् न स्यात्।

2. मिदचोऽन्त्यात् परः (1.1.28)

सूत्रेऽस्मिन् मित्, अचः, अन्त्यात्, परः चेति चत्वारि पदानि सन्ति । अष्टाधाय्यामपि अनुरूपं सूत्रमस्ति[4]। वृत्तिः- अचां मध्येऽन्त्यादचः परोमिद् भवति। अर्थात् अन्त्यात् अचः परं मिद् संज्ञकः भवति। शब्दादौ अनेकः स्वरवर्णाः सन्ति। तर्हि तेषां अन्त्यस्वराणां

पदानां परं मिद् कार्यं नाम नुमागमादि भवति। यथा – पयांसि इत्यत्र पयस्+जस् – पयांसि इति रूपं सिध्यति। सिञ्चति इत्यत्र अन्त्यस्वरवर्णः इकारः। अतः इकारात् परं नुमागमः भवति। अत्र एकमाद्यन्तवत् इत्यनेन अन्त्यः भवति।

3. विधये विशेषणमन्त्यमुत्तरेत्वाद्यञ्च (1.1.31)

सूत्रेऽस्मिन् विधये, विशेषणम्, अन्त्यम्, उत्तरे, तु आद्यम्, च चेति सप्तपदानि सन्ति। वृत्तिः- विध्यर्थं यद्विशेषणं तद्विशेषणवतोऽन्त्यं वोद्धव्यम्। अर्थात् – विध्यर्थं यद्विशेषणं तत् विशेषणयुक्तपदस्य अन्त्यप्रयुक्तं स्यादिति, परन्तु पञ्चम्यन्तपदस्य परं प्रयोगे आदेः प्रथमस्य वा कार्यं स्यात्। यथा - "अद्वाह्वादेस्नि"[5] इत्यनेन सूत्रेण "अद्वाह्वादेः"विशेषणं अत् वाह् प्रभृतीनां प्रातिपदिकानां परं 'इन्'भवति। अत्र पूर्वसूत्रात् 'प्रातिपदिकात्'इत्यस्य पदस्य अनुवृत्तिः तथा अत् वाह्वादि च तस्य विशेषणम्। अत्र अत् इत्युक्ते अकारः वोध्यते, अतः अनेन परिभाषया उच्यते यत् – अकारान्तप्रातिपदिकमिति। पुनः 'ऋतोरी'[6] इत्यत्र 'ऋतः'इत्यस्य अनुवृत्तधातोः विशेषणम्। अनेन सूत्रेण 'री'इत्युक्ते ऋतः इत्यस्य ऋतारान्तवोधः स्यात् न तु ऋकादि। यथा "आदिको गुणः"इत्यत्र आत् इति प्रथमविशेषणम्, तथा इकः इति द्वितीयविशेषणम्, प्रथमार्थेः भवति – अकारात् परमिति, तथा इक् नाम इ ओ आदि।

कुत्रचित् 'परवर्ती'इत्यर्थेः अन्त्यापि स्यात्, यथा -"आतः प्रादे कः"इत्यत्र प्रादेः भवति प्रथमः विशेषणम्। तथा 'आतः'इति द्वितीयविशेषणम्। अत्र आतः नाम अकारान्तः न तु अकारादि इति। अर्थात् प्रादेः आतः कः अर्थः भवति प्रादेः उत्तरं आकारान्तधातोः परं 'क'इति भवति इति

4. स्थाने सद्दशतमोऽव्यक्तयोगे (1/1/32)

सूत्रेऽस्मिन् स्थाने, सद्दशतमः, अव्यक्तयोगे चेति पदत्रयमस्ति। अस्मिन् विषये पाणिनीयसूत्रमस्ति – 'स्थानेऽन्तरतमः'। अर्थात् – अव्यक्तसंयोगे सति स्थाने सद्दशतमः

आदेशः भवेदिति। अर्थात् कस्य स्थाने किम् भवेत् एवं यत्र स्पष्टं स्यात्। तत्र येन सह यस्य स्थानगतः अत्यन्तः सदृशः प्रदीयते, आदेशोऽपि तथैव कर्तव्यम्। यथा वृद्धिरादैजारालोऽक ऐजेचश्च [7] इत्यनेन एचः स्थाने ऐच् भवेत् एवं निर्दिष्टमस्ति, परन्तु 'एच्' इत्यत्र ए ओ ऐ औ चेति चत्वारः वर्णाः ज्ञायन्ते, पुनः 'ऐच्' इत्युक्ते ऐ तथा औ इति वर्णद्वयस्य ग्रहणम्, अतएव अत्र सम्वन्धः अव्यक्तः अभवत्। ए स्थाने औकारः? न च ऐ स्थाने ओकारः? अत्र वक्तव्यं यत् – येषां उच्चारणस्थानं कण्ठताल्वादि तादृशः ए ऐ स्थाने ऐ कारः एवञ्च कण्ठे ओष्ठे च उच्चार्यमाणः ओ औ च स्थाने औकारः भवेदिति।

5. न लुब्लुका लुप्ते प्रत्यये तल्लक्षणं कार्यमसङ्गस्य (1-1-33)

सूत्रेऽस्मिन् न, लुव्लुका, लुप्ते प्रत्यये, तल्लक्षणम्, कार्य्यम्, अङ्गस्य चेति सप्तपदानि सन्ति। तस्य लोपः इति पाणिनीयसूत्रमस्ति। वृत्तिः – लुव्लुक्शब्दाभ्यां लुप्ते प्रत्यये तत् प्रत्ययलक्षणं प्रकृत्यवयवस्य कार्य्यं न भवति। अर्थात् – लुप् शब्देन लुक् शब्देन वा प्रत्ययस्य लोपे, तद् प्रत्ययेलक्षितकार्यं प्रकृतेः अवयवस्य नैव भवेत्। यथा बङ्गशब्दस्योत्तरे तस्य निवासः (5-2-206) इत्यनेन अण् इति , जनपद-वरणादिभ्यो लुप् (5-2-223) इत्यनेन अण लुप्, अत्र तेन सूत्रेण लुप् करणेन णिति वृद्धिरचामादेः (5-1-2) सूत्रानुसारेण बङ्गशब्दस्य अङ्गकार्यं वृद्धिः आकारदेशः नैव स्यात्। अङ्गस्येति किम् ? उच्यते – "पञ्च, साम, पयः" – इत्यत्र समुदायस्य सुब् लुक् अपि पदत्वम् भवति । सुव् लुका लुप्ते निषेधात् लोप् शब्देन प्रत्ययलोपे तत्र अङ्गकार्यम् स्यादिति। यथा – अग्नि + चि – क्विप् चिह्नार्थमित् (2-3-11) इत्यनेन क्विप् लोपः, पुनः तुक् आगमे अग्निचित् इति अभवत्।

6. विप्रतिषेधे परं कार्यम् (1.1.34)

सूत्रेऽस्मिन् विप्रतिषेधे, परम्, कार्यम् चेति त्रीणि पदानि सन्ति। वृतिः- तुल्यवलविरोधे परं यत् कार्यम तद् भवति। अष्टाधाय्यामपि अनुरूपं सूत्रमस्ति[8]। अर्थात् – उभयविधे तुल्यकार्यस्य सम्भावनायां परविधि-अनुसारेणैव कार्यं सम्भवति। यथा – धौतः इत्यत्र आदि को गुणः (1-2-3) तथा वृद्धिरेजुठः (1-2-4) उभयोः सूत्रयोः तुल्यवलः वर्तते, अत्र केन

कस्यानुसारेण वा कार्यम् भवेदिति प्रदर्शयति यत् परविधिः वलमानत्वे परविधिः वृद्धिरेजुठः (1-2-4)इति सूत्रकार्यम् वृद्धिरेव अभवत्।

7. इष्टसिद्धये प्रायः प्रक्लृप्तिः(1.1.35)

सूत्रेऽस्मिन् इष्टसिद्धये, प्रायः, प्रक्लृप्तिः. चेति त्रीणि पदानि सन्ति। वृत्तिः- इष्टार्थसिद्ध्यै प्रायो वाहुल्येन प्रक्ळप्तिः प्रकल्पनं कार्य्यं भवति। अर्थात् – इष्टपदसाधनाय प्रायः कल्पना कर्तव्या। कुत्रचित् स्थाने एकस्य वर्गस्य आदिकार्य-अन्त्यकार्यद्वयमेव द्वि राद्येकाषादेशः स्थानिवच्च द्वि राद्येकाषादेशः स्थानिवच्च (3-4-2) इत्यनेनभवतीति। 'इयाय' अत्र इकारस्य आदिकार्यं भवति। अध्येयम्' इत्यत्र एक-इकारस्य अन्त्यकार्यं भवदीति तु सूत्रेण निर्दिशति। आदेशस्थले स्थानिवत् कार्यं भवेत्। यस्य स्थाने कार्यं भवति तस्यैव अस्तित्वस्वीकारे कार्य्यन्तरः सिद्ध्यते। 'अस्' धातोः स्थाने भू, व्रू धातोः स्थाने 'वच्' आदेशे भवितव्यम् वक्ता च पदद्वयं सिद्ध्यते। अत्र अस् व्रु चेति धातोः अस्चित्वस्वीकीरे तव्य ता च भवति। अयं स्थानिवदत्वं कुत्रचित् नैव स्वीक्रीयते। यथा – "दिव उत् सो त्वोत्"[8] इत्यनेन सूत्रेण दिव् पदस्य उत्तरं सु विभक्तौ 'व' स्थाने औकारे 'द्यौः' पदं भवति। अत्र वस्थाने औकारादेशे स्थानिवत्वस्वीकारे "हल्ङ्यापः सुलोपो दीर्घात्" (2-3-17) इत्यनेन हल्-उत्तरं सु लोपः । अत्र नैव लोपः इति। यदि लोपः स्यात् तर्हि द्यौ एवं विसर्गहीनः स्यादिति।

उपर्युक्तादालोचनातः ज्ञायते यत् पाणिनीयव्याकरणस्यानुकरणेनैव पद्मनाभदत्तः तस्य सुपद्मव्याकरणं रचितवान्। बङ्गलिप्यां व्याकरणमिदं रचितमस्ति। तुर्किणामाक्रमणात् पाणिनीयव्याकरणस्य रक्षार्थं व्याकरणमिदं लिखितम्। प्रायतः प्रतिपदे प्रतिसूत्रे पाणिनिव्याकरणस्य प्रभावो दृश्यते। बहुषु स्थलेषु पाणिनिव्याकरणस्य सूत्राणां योऽर्थः तमेवार्थमाधारीकृत्य पद्मनाभेन स्वस्य ग्रन्थे सूत्राणि प्रणीतानि। कुत्रचित् साक्षात् सूत्राण्युद्धृतानि कुत्रचित् वा अनुवादकत्वेन सूत्राणि प्रणीतानि। सिद्धान्तगतो नास्ति कोऽपि भेदः। परन्तु सरलीकरणार्थं स्पष्टार्थम् एव तस्य धृष्टता इति सारः।

| पाणिनीयपरम्परायां सुपद्मव्याकरणे संज्ञाप्रकरणे परिभाषासूत्राणि | पाणिनीयपरम्परायां अष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादस्य परिभाषासूत्राणि |
|---|---|
| 1. उदितह्रस्वश्च सवर्णेनाप्रत्ययोऽतत्परः (1.1.19)<br>2. मिदचोऽन्त्यात्परः (1.1.28)<br>3. विधये विशेषणमन्त्यमुत्तरेत्वाद्यञ्च (1.1.31)<br>4. स्थाने सदृशतमोऽव्यक्तयोगे (1/1/32)<br>5. न लुब्लुका लुप्ते प्रत्ययेतल्लक्षणं कार्यमसङ्गस्य (1-1-33)<br>6. विप्रतिषेधे परं कार्यम् (1.1.34)<br>7. इष्टसिद्धये प्रायः प्रक्लृप्तिः(1.1.35) | 1. इको गुणवृद्धी (1.1.3)<br>2. आद्यन्तौ टकितौ (1.1.46)<br>3. मिदचोऽन्त्यात् परः (1.1.47)<br>4. एच इग्घ्रस्वादेशे (1.1.48)<br>5. षष्ठी स्थानेयोगा (1.1.49)<br>6. स्थानेऽन्तरतमः (1.1.50)<br>7. उरण् रपरः (1.1.51)<br>8. अलोऽन्त्यस्य (1.1.52)<br>9. ङिच्च (1.1.53)<br>10. आदेः परस्य (1.1.54)<br>11. अनेकाल् शित्सर्वस्य (1.1.55)<br>12.तस्मिन्निति निर्दिष्टे पूर्वस्य (1.1.66)<br>13. तस्मादित्युत्तरस्य (1.1.67)<br>उभयविधसूत्राणि<br>1. न धातुलोप आर्धधातुके(1.1.4) |

| | |
|---|---|
| | निषेधः-परिभाषा<br>2. क्ङिति च(1.1.5) निषेधः-परिभाषा<br>3. येन विधिस्तदन्तस्य(1.1.12) संज्ञा-परिभाषा<br>4. आद्यन्तवदेकस्मिन्(1.1.21) अतिदेश-परिभाषा<br>5. स्वं रूपं शब्दस्याशब्दसंज्ञा(1.1.68) संज्ञा-परिभाषा<br>6. अणुदित् सवर्णस्य चाप्रत्ययः(1.1.69) संज्ञा-परिभाषा |

तथ्यसूत्रम्

1. अष्टाध्यायी , 2-1-1

2. शब्दशास्त्रेर-इतिहास, श्रीकालीजीवनदेवशर्मा, प्रथमसं., पृ.-580।

3. अष्टाध्यायी , 1-1-691

4. अष्टाध्यायी , 1-1-47

5. सुपद्मव्याकरणम् , 5-2-78

6. सुपद्मव्याकरणम् , 1-2-3

7. सुपद्मव्याकरणम् , 1-1-21

8. सुपद्मव्याकरणम् ,2-3-95

<u>*ग्रन्थपञ्जी*</u>

दत्तः पद्मनाभः ,*सुपद्मव्याकरणम्,* सम्पा . 1306 ,कलिकाता ,श्रीमन्मथनाथभट्टाचार्यश्रीउपेन्द्रनाथभट्टाचार्यश्चवङ्गाब्दः।

दत्तःपद्मनाभः 1320 ,कलिकाता ,त्रैलोक्यनाथभट्टाचार्यः .सम्पा ,*सुपद्मव्याकरणम्* , वङ्गाब्दः।

दत्तःपद्मनाभः ,*सुपद्मव्याकरणम्,* सम्पा ,भारतीयविद्याप्रकाशन् ,सैनि.एस्.आर .ड . दिल्ली.1989

*पाणिनेरष्टाध्यायीसूत्रपाठः,* सम्पा ,दशमसंस्करणं ,पण्डितब्रह्मदत्तजिज्ञासुः . 1977,हरियाणा ,रामलालकपूरट्रास्ट।

भट्टोजिदीक्षितकृता *वैयाकरणसिद्धान्तकौमुदी* ,(सहिता वालमनोरमातत्त्ववोधिनी) सम्पा . ,(1977) प्रथमोभागः ,मोतीलालबनारसीदास ,च गिरिधरशर्मापरमेश्वरशर्मा द्वितीयोभागः ,(1971)तृतीयोभागः ,(1971)चतुर्थोभागः ।(1967)

हालदार ,गुरुपद ,*व्याकरणदर्शनेरइतिहास* 1350 ,कलिकाता ,प्रथमखण्ड ,वङ्गाब्द।

दाहालः ,लोकमणिः ,*व्याकरणशास्त्रेतिहासः* ,द्वितीयसंस्करणम् ,भारतीयविद्याप्रकाशनम् , 2018 ,वाराणसी।

मीमांसकः ,युधिष्ठिरः ,*संस्कृतव्याकरणशास्त्र का इतिहास* ,रामनाथत्रिपाठी .सम्पा , 2006 ,वाराणसी ,पावलिशार्स चौखाम्बा।

वर्मा प्रथम ,*विकास और उद्भव का संस्कृतव्याकरण* ,सत्यकामः ,संस्करणम् , 1971 ,दिल्ली ,दास मोतीलालबनारसी।

सेनगुप्तः ,श्रीशैलेन्द्रनाथः ,*संस्कृतशब्दशास्त्रेर मूलकथा* ,फार्मा ,प्रथमप्रकाश , 1957 ,कलिकाता ,मुखोपाध्यायः.एल्.के।

यास्काचार्यः ,*निरुक्तम्* ,आसुतोषसंस्कृतग्रन्थमाला ,अमरेश्वरठाकुरः .सम्पा , ,कलिकाताविश्वविद्यालयःप्रथमभागः ,(1955)चतुर्थभागः।(1970)

नागेशभट्टस्य *परमलघुमञ्जूषा* ,जयशङ्करलालत्रिपाठी .सम्पा ,
।2061 विक्रमसंवत् ,तृतीयसंस्करण ,वाराणसी ,चोखम्बाकृष्णदासअकादेमी
पतञ्जलेः *पाणिनीयव्याकरणमहाभाष्यम्* ,(संवलितम्भाष्यप्रदीपोद्योत)प्रथमखण्डः ,
चौखाम्बास ,भार्गवशास्त्रींस्कृतप्रतिष्ठान1987 ,दिल्ली ,।
पतञ्जलेः *पाणिनीयव्याकरणमहाभाष्यम्* ,(भाष्यप्रदीपोद्योतसंवलितम्) द्वितीयखण्डः ,
।1988 पुनर्मुद्रणम् ,दिल्ली ,चौखाम्बासंस्कृतप्रतिष्ठान ,शिवदत्तशर्मा
पतञ्जलेः *पाणिनीयव्याकरणमहाभाष्यम्* ,(भाष्यप्रदीपोद्योतसंवलितम्) चतुर्थखण्डः ,
भार्गवशास्त्री।1988 पुनर्मुद्रणम् ,दिल्ली ,चौखाम्बासंस्कृतप्रतिष्ठान ,

--------------------------------------------------------------------------------

# गीताव्याख्याने समाधिप्रकाशारण्यमहोदयस्य योगदानम्

बाबलु बर्मनः
अतिथि अध्यापकः
रायगञ्जविश्वविद्यालयः

ऋषिभूमिः। आसृष्टेः ऋषिणां पादरेणुभिः वयं धन्याः। ते ऋषयः पर्वतकन्दरेषु गहनारण्येषु च साधनाकार्यं कृत्वा मोक्षम् आप्नुवन्ति। मोक्षप्राप्तेरनन्तरं ते लोकालयं आगच्छन्ति मुक्तिप्रदानार्थम। मुक्तिप्रदानकर्मणा ऋषयः समाजस्य उन्नतिं साधयन्ति। अद्यपि ते योगसूत्रं रक्षन्ति। अधुना श्रीस्वामीसमाधिप्रकाशारण्यमहोदयःस्वस्य ज्ञानगर्भालोचनामाध्यमेन विश्ववाङ्मयमालोडयति। स च समाजसंगठकः खलु दार्शनिकः। वैराग्यवशात् स संसारं परित्यज्य मधुपुरस्थिते कपिलमठे अध्यक्षस्य स्वामीहरिहरानन्दमहोदयस्य शिष्यत्वं शिरोधार्य्य सांख्ययोगसाधनायां सिद्धिं प्राप्नोति। स भगवतो बुद्धदेवस्य अनुप्रेरणायां लोककल्याणे ब्रती भवति।

समाधिस्तावत् चित्तस्यैकाग्रम्। समाधेः लक्षणं पतञ्जलिना कृतम्- “तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः”[1] इति। अस्य सूत्रस्य भाष्यं वेदव्यासेन स्फुटिकृतम्- “ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते। तदेतद् धारणा-ध्यान-समाधित्रयमेकत्र संयमः”[2] इति।

[1] योगदर्शन-3/3

[2] योगदर्शन, व्यासभाष्य-3/3

पुनः अस्य सूत्रस्य भाष्यकृतवता भोजराजेन उक्तम्- "तदेवोक्तलक्षण ध्यानं, यत्रार्थमात्रनिर्भासम् अर्थाकारसमावेशादुद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यतामिवापद्यते, स समाधिरित्यच्यते, सम्यक् आधीयत एकाग्रीक्रियते विक्षेपान् परिहृत्य मनो यत्र स समाधिः"[3] इति। अस्य सूत्रस्य व्याख्यानवसरे हरिहरानन्देन समुद्घोषितम्- "ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात् तदा समाधिरित्युच्यते समाधि नाम योगः"[4] इति। जीवात्मना सह परमात्मनः संयोगः योगः। जीवावस्थानात् समाध्यवस्यायां योगिनः मुग्धा अवस्था भवति। मुग्धावस्था एव समाधिरिति अन्ये।

किं नाम समाधिः— भगवद्गीतायां द्वितीयोऽध्याये शङ्करभाष्ये समाधिविषये उक्तमस्ति यत् –"समाधीयते चित्तमस्मिन् इति समाधिः"[5]-इति। समाध्यवस्तायां चित्तवृत्तिनिरोधे सति द्रष्टुः स्वरूपे अवस्थानं सिद्ध्यति। आशयोऽयम् पतञ्जलिना सूत्रद्वयेन उद्घोषितः। तत्र प्रथमं सूत्रं – "योगश्चित्तवृत्तिनिरोधः"[6]इति। अस्य सूत्रस्य भाष्यं वेदव्यासेन स्फुटिकृतम्- "सर्वशब्दाग्रहणात् सम्प्रज्ञातो अपि योग इत्याख्यायते। चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टम् ऐश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति।

[3] योगदर्शन, भोजवृत्ति-3/3

[4] योगदर्शन, हरिहरानन्द-3/3

[5] श्रीमद्भगवद्गीता, शङ्करभाष्य-2/53

[6] योगदर्शन-1/2

तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति। तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघ-ध्यानोपगं भवति।

तत् परं प्रसंख्यानमित्याचक्षते ध्यायिनः। चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च, सत्त्वगुणात्मिका चेयम् अतो विपरीता विवेकख्यातिरिति। अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरूणद्ध, तदवस्थं संस्कारोपगं भवति, स निर्वीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायत इत्यसम्प्रज्ञातः। द्विविधः स योगश्चित्तवृत्तिनिरोध" इति।[7]

योगसूत्रस्य भाष्ये भोजराजेन प्रासेधि- "चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयो अङ्काङ्कगिभावपरिणामरूपाः तासां निरोधो बहिर्मुखतया परिणतिविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग इत्याख्यायते। स च निरोधः सर्वासां चित्तभूमीनां सर्वप्राणिनां धर्मः कदाचित् कस्याञ्चिद् भूमौ आविर्भवति। ताश्च क्षिप्तं मूढं विक्षिप्तम् एकाग्र निरुद्धमिति चित्तस्य भूमयः , चित्तस्यावस्थाविशेषाः। तत्र क्षिप्तं रजस उद्रेकादस्थिरं बर्हिमुखतया सुखदुःखादिविषयेषु विकल्पितेषु व्यवहितेषु वा रजसा प्रेरितम्, तच्च सदैव दैत्यदानवादीनाम्। मूढं तमस उद्रेकात् कृत्याकृत्यविभागमन्तरेण क्रोधादिभिः विरुद्धकृत्येष्वेव नियमितम्, तच्च सदैव रक्षः पिशाचादीनाम्। विक्षिप्तं तु सत्त्वोद्रेकाद् वैशिष्ट्येन परिहृत्यः दुःखसाधनं सुखसाधनेष्वेव शब्दादिषु प्रवृत्तम्, तच्च सदैव देवानाम्। एतदुक्तं भवति-रजसा

[7] योगदर्शन, व्यासभाष्य-1/2

प्रवृत्तिरुपम, तमसा परापकारनियतम्, सत्त्वेन सुखमयं चित्तं भवति। एतास्तिस्रश्चित्तावस्थाः समाधावनुपयोगिन्यः, एकाग्रनिरुद्धरूपे द्वे च सत्त्वोत्कर्षाद् यथोत्तरमवस्थितत्वात् समाधावुपयोगं भजते। सत्त्वादिक्रमव्युत्क्रमे त्वयमभिप्रायः, - द्वयोरपि रजस्तमसोरत्यन्तहेयत्वे अप्येतदर्थं रजसः प्रथममुपादानम यावन्न प्रवृत्तिर्दशिता तावन्निवृत्तिनं शक्यते दर्शयितुमिति द्ययोर्व्यत्ययेन प्रदर्शनम्। सत्त्व त्वेतदर्थं पश्चात् प्रदर्शनं यत्, तस्योत्कर्षेणोत्तरे द्वे भूमी योगोपयागिन्याविति। अनयोर्द्वयोरेकाग्रनिरुद्धयोर्भूम्योर्यश्चित्तस्यैकाग्रतारूपः परिणामः, स योग इत्युक्तं भवति। एकाग्रे बहिर्वृत्तिनिरोधः, निरूद्धे च सर्वासां वृत्तीनां संस्काराणां च प्रविलय इत्यनयोरेव भूम्योर्योस्य सम्भवः” इति[8]। अस्य सूत्रस्य व्याख्यानवसरे हरिहरानन्देन समुद्घोषितम्- “सर्वशब्दाग्रहणात् सम्प्रज्ञातोपि योग इत्याख्यायते। चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टम् ऐश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति। तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति। तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति। तत् परं प्रसंख्यानमित्याचक्षते ध्यायिनः। चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च, सत्त्वगुणात्मिका चेयम् अतो विपरीता विवेकख्यातिरिति। अतस्तस्यां विरक्तं चिक्तं तामपि ख्यातिं निरुणद्धि, तदवस्थं संस्कारोपगं भवति, स निर्वीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायत इत्यसम्प्रज्ञातः। द्विविधः स योगश्चित्तवृत्तिनिरोध”

[8] योगदर्शन, भोजवृत्ति-1/2

[9]इति। द्वितीयसूत्रं यथा – "तदा द्रष्टुः स्वरूपेऽवस्थानम्"[10] इति। अस्य सूत्रस्य भाष्यं वेदव्यासेन स्फुटिकृतम्- "स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये, व्युथ्थानचित्ते तु सति तथापि भवन्ती न तथा"[11] इति।

पुनः अस्य सूत्रस्य भाष्यकृतवता भोजराजेन उक्तम्- "द्रष्टुः पुरुषस्य तस्मिन् काले स्वरूपे चिन्मात्रतायामवस्थानं स्थिति भवति। अयमर्थः-उत्पन्नविवेकख्यातेः चित्सङ्क्रमाभावात् कर्तृत्वाभिमाननिवृत्तौ प्रोच्चन्नपरिणायामां बुद्धावात्मनः स्वरूपेणावस्थानं स्थितिर्भवति"[12] इति। अस्य सूत्रस्य व्याख्यानवसरे हरिहरानन्देन समुद्घोषितम्- "स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये, व्युथ्थानचित्ते तु सति तथापि भवन्ती न तथा"[13] इति। युज-समाधौ इति पाणिनेः धातुः। समाधि योगः। समाधिना चित्तवृत्तिनिरोधे योगः सम्पद्यते। तेन योगो भवति चित्तवृत्तिनिरोधः। तथा च सूत्रम्- "योगश्चित्तवृत्तिः निरोधः" इति। चित्तवृत्तिनिरोधे योगिनः द्रष्टुः वा स्वरूपे अवस्थानं भवति। तथा च निगदितं- "तदा द्रष्टुः स्वरूपेऽवस्थानम्"- अस्यामवस्थायां चित्तवृत्तिनिरोधे क्लेशकर्मविपाकाभावे द्रष्टुः स्वात्मनि अवस्थानम्। इदन्तु अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् –"समाधिरात्मा"[14] इति शंकरमते। मधुसुदनोऽपि वदति-"परमात्मनि निश्चला"[15]- इति।

---

[9] योगदर्शन, हरिहरानन्द-1/2

[10] योगदर्शन-1/3

[11] योगदर्शन, व्यासभाष्य-1/3

[12] योगदर्शन, भोजवृत्ति-1/3

[13] योगदर्शन, हरिहरानन्द-1/3

[14] श्रीमद्भगवद्गीता, शङ्करभाष्य-2/53

[15] श्रीमद्भगवद्गीता, मधुसूदनीव्याख्या-2/53

"समाधिः परमेश्वरः"[16] इति श्रीधरस्वामि। गीतायामपि उक्तम्- "समाधावचला-बुद्धिस्तदा योगमवाप्स्यसि"[17]-अर्थात् समाधौ यदा बुद्धिरचलावस्था भविष्यति, तदा योगो भविष्यति। भारतीयजीवनमानसे अध्यात्मवादस्य भूमिकास्ति। ते च भारतीयाः अध्यात्मवादमनुसारतः जीवनमतिवाहितं कुर्वन्ति, तथा च मानवोन्नयने नियोजिताः भवन्ति। सर्वजीवे दया समता च भारतीयानामादर्शः। यथोक्तं गीतायाम्-

विद्याविनयसम्पन्न ब्राह्मणे-गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।[18]

अर्थाद् विद्वानब्राह्मणः आचण्डलात् सर्वेषां प्राणीनां कृते समदर्शी भवति। शिक्षाप्रसारे, आदौ आत्मविद्या-अध्यात्मविद्या-ब्रह्मविद्या-धर्मविद्या-चेत्यादिषु व्यक्तेः चेतन्योदयो भवति। अनेन आदर्शेन यदि वा नरो मन्त्रस्य साधनं शरीरस्य पातनं वेति मन्यते, तर्हि परार्थे जीवनं त्यजति न संशयः। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् "विद्याविनयसम्पन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके, मध्यमायां च राजस्यां गवि, संस्कारहीनायाम् अत्यन्तम् एव केवलतामसे हस्त्यादौ च सत्त्वादिगुणैः तज्जैः च संस्कारैः तथा राजसैः तथा तामसैः च संस्कारैः अत्यन्तम् एव अस्पृष्टम् समम् एकम् अविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिनः"[19]इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्-"कीदृशास्ते ज्ञानिनो येऽपुनरावृत्तिं गच्छन्तीत्यपेक्षायामाह- विद्याविनयसम्पन्नेति। विषमेष्वपि

---

[16] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-2/53

[17] श्रीमद्भगवद्गीता-2/53

[18] श्रीमद्भगवद्गीता-5/18

[19] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/18

सम ब्रह्मैव द्रष्टु शीलं येषां ते। पण्डिता ज्ञानिन इत्यर्थः। तत्र विद्याविनयाभ्यां युक्ते ब्राह्मणे च शुने यः पचति तस्मिंश्वपाके कर्मणा वैषम्यम्। गवि हस्तिनि शुनि चेति जातितो वैषम्यं दर्शितम्" [20] इति। तदुक्तं हितोपदेशे-

"धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति"।।[21]

उन्नतादर्शैः तथा च धर्मभावैः आबद्धो नरः परार्थे स्वजीवनम् उत्सृजयति। तदा स अजेयोऽदम्यो भवति। तदा स तेजसा अरिं निवारयति।

महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीतापि अष्टादशोऽध्यायैः ग्रथिता। अध्यायानां विरामे गीतोपनिषद् इत्युच्यते। सांख्ययोगधर्मस्य प्रवर्तकोऽस्ति परमर्षि कपिलदेवः। तस्य सांख्ययोगस्य उपदेशः भगवता श्रीकृष्णेन अपि मनुष्येभ्यः कृतः।शास्त्रेषु श्रेष्ठः गीताग्रन्थः।

तत्रोच्यते महाभारतग्रन्थः सर्वेषां वेदानां सारार्धः। महाभारतस्य सारभुतो गीतान्तर्गतः। तस्मात् सा सर्वशास्त्रमयी। सर्वेषां शास्त्राणां सारः तत्रैवान्र्तभूक्तः। उपनिषदः उपदेशो गीता। तत्र प्रत्यध्याये योगशब्दोऽस्ति। अतः गीताशास्त्रं योगमूलकम्। अत्र द्वितीयोऽध्यायः सांख्ययोगः। तत्र निर्देशोऽस्ति-

"सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।।
यत् सांख्यैः प्राप्यते स्थानं तद्यौगेरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति"[22]।।

---

[20] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/18

[21] हितुदेश,मित्रलाभ-44

[22] श्रीमद्भगवद्गीता-5/4-5

अर्थाद् वालकवदज्ञानिव्यक्तिः केवलं सांख्ययोगं पृथकमन्यते। न तु पण्डितः। तेन शास्त्रद्वयम् आश्रित्य फललाभो भवति। सांख्ययोगयोः मार्गस्तु एकः एव। अतः तेन शास्त्रमार्गेण षड़रिपुषु विजयं प्राप्य मोक्षमाप्नोति मनुष्यः। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् "सांख्ययोगौ पृथक् विरुद्धभिन्नफलौ बालाः प्रवदन्ति न पण्डिताः। पण्डिताः तु ज्ञानिन एकं फलम् अविरुद्धम् इच्छन्ति।4/2एकम् अपि सांख्ययोगयोः सम्यक् आस्थितः सम्यक् अनुष्ठितवान् इत्यर्थः। उभयोः विन्दते फलम्। उभयोः तत् एव हि निःश्रेयसं फलम् अतो न फले विरोधः अस्ति।4/4ननु संन्यासकर्मयोगशब्देनन प्रस्तुत्य सांख्ययोगयोः फलैकत्वं कखम् इह अप्रकृतं ब्रवीति।4/5न एषः दोषः, यद्यपि अर्जुनेन संन्यासं कर्मयोगं च केवलं अभिप्रेत्य प्रश्नः कृतः, भगवान् तु तदपरित्यागेन एव स्वाभिप्रेतं च विशेषं संयोज्य शब्दान्तरवाच्यतया प्रतिवचनं ददौ, सांख्ययोगौ इति। तौ एव संन्यासकर्मयोगो ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्यौ इति भगवतो मतम् अतो न अप्रकृतप्रक्रिया" [23]इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "यस्मादेवमङ्गप्रधानत्वेनोभयोरवस्थाभेदेन क्रमसमुच्चयः। अतो विकल्पमङ्गीकृत्योभयोः कः श्रेष्ठ इति प्रश्नो अज्ञानिनामेवोचित्त न विवेकिनामित्याह-साङ्ख्ययोगाविति। साङ्ख्यशब्देन ज्ञाननिष्ठावाचिना तदङ्गं सन्न्यासं लक्षयति। सन्न्यासकर्मयोगावेकफलौ सन्तौ पृथक् स्वतन्त्राविति बाला अज्ञा एव प्रवदन्ति, न पण्डिताः। तत्र हेतुः अनयोरेकमपि सम्यगास्थित आश्रितः सदुभयोरपि फलम प्राप्नोति। तथा हि कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा यदुभयोः फलं

[23] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/4

कैवल्यं, तद्विन्दतीति न पृथक्फलत्वमनयोरित्यर्थः"[24]इति। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् "यत् सांख्यैः ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तत योगैः अपि। ज्ञानप्राप्तुपायत्वेन ईश्वरे समर्प्य कर्माणि आत्मनः फलम् अनभिसंधाय अनुतिष्ठन्ति ये ते योगिनः। तैः अपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यते इति अभिप्रायः। अत एकं सांख्यं योगं च यः पश्यति फलैकत्वात् स सम्यक् पश्यति इत्यर्थः। एवं तर्हि योगात् संन्यास एव विशिष्यते, कथं तर्हि इदम् उक्तम् –तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते इति शृणु तत्र कारणम्। त्वया पृष्ठं केवलं कर्मसंन्यासं कर्मयोगं च अभिप्रेत्य तयोः अन्यतरः कः श्रेयान्। तदनुरूपं प्रतिवचनं मया उक्तं कर्मसंन्यासात् कर्मयोगो विशिष्यते इति ज्ञानम् अनपेक्ष्य। ज्ञानापेक्षः तु संन्यासः सांख्यम् इति मया अभिप्रेतः। परमार्थयोगः च स एव। यः तु कर्मयोगो वैदिकः स तादर्थ्यात् योगः संन्यास इति उपचर्यते"[25]इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "साङ्ख्यैर्ज्ञाननिष्ठैः सन्न्यासिभिः यत् स्थानं मोक्षाख्यं प्रकर्षेण साक्षादवाप्यते। तेन कर्मयोगिभिरपि तदेव ज्ञानद्वारेण गम्यते। अवाप्यत इत्यर्थः। अतः साङ्ख्यञ्च योगञ्चैकफलत्वेनैकं यः पश्यति, स एव सम्यक् पश्यति"[26] इति। तदुक्तं गीतायाम्-

योहन्तः सुखहन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोहधिगच्छति।।
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।

---

[24] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/4

[25] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/5

[26] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/5

छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः।।
कामक्रोधवियुक्तानां यतीनां यतचेतसाम।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मानाम्।।[27]

आत्मदर्शनेनैव सुखप्राप्तिः, न विषयभोगे। आत्मनि एव विचरणं न तु बहिर्जगति। ब्रह्मस्थितिं प्राप्यो योगी निर्वाणं प्राप्नोति । ते च योगिनः परमसुखप्राप्ताः सन्तः निर्वाणं प्राप्नोन्ति। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् "योऽन्तःसुखोऽन्तरात्मनि सुखं यस्य सोऽअन्तःसुखस्तथान्तरेवात्मन्याराम आक्रीड़ा यस्य सोऽन्तरारामस्तथैवान्तरात्मैव ज्योतिः प्रकाशो यस्य सोऽन्तज्योतिरेव। य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नाव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति"इति[28]। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "न केवलं कामक्रोधवेगसंवरणमात्रेण मोक्षं प्राप्नोति अपि तु योऽन्तरिति। अन्तरात्मन्येव सुखं यस्य न तु विषयेषु, अन्तरारामः क्रीड़ा यस्य न वहिः, अन्तरेव ज्योतिर्दृष्टिर्यस्य न गीतनृत्यादिषु, स एवं ब्रह्मणि भूतः स्थितः सन् ब्रह्मणि निर्वाणं लयमधिगच्छति प्राप्नोति" [29]इति। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् लभन्ते ब्रह्मनिर्वाणं मोक्षम्ऋषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशया यतात्मानः संयतेन्द्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हिते आनुकूल्ये रता अहिंसका

[27] श्रीमद्भगवद्गीता-5/24-26

[28] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/24

[29] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/24

इत्यर्थः"[30]इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "किञ्च लभन्त इति। ऋषयः सम्यग्दर्शिनः क्षीणं कल्मषं येषाम्, छिन्नं द्वैधं संशयो येषाम्,यतः संयत आत्मा चित्तं येषाम्, सर्वेषां भूतानां हिते रताः ये कृपालवस्ते ब्रह्मनिर्वाणं मोक्षं लभन्ते" [31]इति। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम्- "कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानाम् अभित उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां विदितो ज्ञात आत्मा येषां ते विदितात्मनः तेषां विदितात्मनां सम्यगर्दशिनाम् इत्यर्थः। सम्यग् दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता। कर्मयोगः च ईश्वरार्पितसर्वभावेन ईश्वरे ब्रह्मणि आधाय क्रियमाणः, सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षाय इति भगवान् पदे पदे अब्रवीत् वक्ष्यति च"[32]इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "किञ्च कामेत्यादि। कामक्रोधाभ्यां वियुक्तानां यतीनां सन्न्यासिनां संयतचित्तानां ज्ञातात्मतत्त्वानामभित उभयतो जीवतां मृतानाञ्च न देहान्त एव तेषां ब्रह्मणि लयः, अपि तु जीवतामपि वर्तत इत्यर्थः" इति[33]। अस्य वाक्यस्य प्रतिध्वनिः श्रूयते गीतायाम् –

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।

---

[30] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/25

[31] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/25

[32] श्रीमद्भगवद्गीता, शङ्करभाष्य-5/26

[33] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-5/26

विवश्वान् मनवे प्राह मनुरिक्षाकवेहव्रवीत्।।[34]

अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् - "इमम् अध्याद्वयेनुक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवान् अहं जगत् परिपालयितृणां क्षत्रियाणां बलाधानाय। तेन योगवलेन युक्ताः समर्था भवन्ति ब्रह्म परिरक्षितुम्। ब्रह्मक्षत्रे परिपालिते जगत् परिपालयितुमलम्। अव्ययमव्ययफलत्वात्। नह्यस्य सम्यकदर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति।½स च विवस्वान्मनवे प्राह। मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत्"[35] इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "एवं तावदध्यायद्वयेन कर्मयोगोपायक-ज्ञानयोगो मोक्षसाधनत्वेनोक्तः, तमेव ब्रह्मार्पणादि-गुणविधानेन तत्त्वंपदार्थविवेकादिना च प्रपञ्चयिष्यन् प्रथमं तावत् परम्पराप्राप्तत्वेन स्तवन् श्रीभगवानुवाच, इममिति त्रिभिः। अव्ययफलत्वादव्ययं इमं योगं पुराहं विवस्वते आदित्याय कथितवान्। स च स्वपुत्राय मनवे श्राद्धदेवाय प्राह, स च मनुः स्वपुत्राय इक्ष्वाकवे अव्रवीत्"[36]इति। अस्य श्लोकस्य भाष्ये मधुसुदनीव्याख्यायां कथितम्- "सर्गादिकाले राज्ञां बलाधानेन तदधीनं सर्व जगत्पालयितुम्। कथमनेन बलाधानमिति विशेषणेन दर्शयति। अव्ययमव्ययवेदमूलत्वादव्ययमोक्षफलत्वाच्च नव्यति स्वफलादित्यव्ययमव्यभिचारिफलम्। तथाचैतादृशेन बलाधानं शक्यमिति भावः। सच मम शिष्यो विवस्वान् मनवे वैवस्वताय

---

[34] श्रीमद्भगवद्गीता-4/1

[35] श्रीमद्भगवद्गीता, शङ्करभाष्य-4/1

[36] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-4/1

स्वपुत्राय प्राह। सच मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत्। यद्यपि प्रतिमन्वन्तरं स्वायंभुवमन्वादिसाधारणेऽयं भगवदुपदेशस्तथापि सांप्रतिकवैस्वतमन्वन्तराभिप्रायेणादित्यमारभ्य संप्रदायो गणित"[37] इति। पातञ्जलयोगसूत्रेऽपि विद्यते- "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" [38]इति। श्रीकृष्णः उपदेशमिदं प्रदत्तवान्-

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप।।
स एवायं मया तेऽद्य योगः प्राक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदूत्तमम्।[39]।

अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम्- "एवं क्षत्रियपरम्पराप्राप्तमिमं राजर्षयो राजानश्च त ऋषयश्च राजर्षयो विदुरिमं योगम्। स योगः कालेनेह महता दीर्घेण नष्टो विच्छिन्नसम्प्रदायः संवृत्तः। हे परंतप, आत्मनो विपक्षभूताः पर उच्यन्ते तान् शौर्यतेजोगभस्तिभिर्भानुरिव तापयतीति परंतपः शत्रुतापन इत्यर्थः"[40] इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "एवमिति। एवं राजानश्च ते ऋषयश्चेति अन्येऽपि राजर्षयो निमिप्रमुखाः स्वपित्रादिभिरिक्ष्वाकुप्रमुखौः प्रोक्तमिमं योगं विदुर्जानन्ति स्म। अद्यतनानामज्ञाने कारणमाह- हे परन्तप, शत्रुतापन, स योगः कालवशादिह लोके नष्टो विच्छिन्नः"[41] इति। अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम् -" दुर्वलानजितेन्द्रियान्प्राप्य नष्टं योगमिममुपलभ्य लोकं

---

[37] श्रीमद्भगवद्गीता, मधुसुदनीव्याख्या-4/1

[38] योगदर्शन- 1।26

[39] श्रीमद्भगवद्गीता-4/2-3

[40] श्रीमद्भगवद्गीता, शङ्करभाष्य-4/2

[41] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-4/2

चापुरुषार्थसंवन्धिनम्- स एवायमिति। स एवायं मया ते तुभ्यमद्येदानीं योगः प्रोक्तः पुरातनः, भक्तोऽसि मे सखा चासीति। रहस्यं हि यस्मादेतदुत्तमं योगो ज्ञानमित्यर्थः[42] इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "स एवायमिति। स एवायं योगोऽद्य विच्छिन्ने सम्प्रदाये सति पुनश्च मया ते तुभ्यमुक्तः, यतस्त्वं मम भक्तोऽपि सखा चेति अन्यस्मै मया नोच्यते, हि यस्मादेतदुत्तमं रहस्यम्"[43] इति। अन्यत्रापि उच्यते-

ऋषिभिर्वहुधा गीतं छन्दोभिर्विविधैः पृथक।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चतैः।।[44]

अस्य श्लोकस्य भाष्ये शङ्कराचार्येण उक्तम्- "ऋषिभिर्बसिष्टादिभिर्वहुधा वहुप्रकारं गीतं कथिते। छन्दोभिरछन्दांसि ऋगादीनि तैर्भश्चछन्दोभिबिविधैर्नानाप्रकारैः पृथग्विवेकतो गीतम्।4/1 किञ्च ब्रह्मसूत्रपदैश्च ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानि पदान्युच्यत्ने। तैरेव च क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं गीतमित्यनुवर्तते। आत्मेत्येवोपासीत- इत्यादिभिः हि ब्रह्मसूत्रपदैरात्मा ज्ञायते। हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्न संशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः"[45] इति। अस्य श्लोकस्य भाष्ये श्रीधराचार्येण कथितम्- "कैर्विस्तरेणोक्तस्यायं संक्षेप इत्यपेक्षायामाह-ऋषिभिरिति। ऋषिभिर्वशिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराजादि-स्वरूपेण वहुधा गीतं निरूपितम्, विविधैर्विचित्रैर्नित्यनैमित्तिक

[42] श्रीमद्भगवद्गीता, शङ्करभाष्य-4/3

[43] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-4/3

[44] श्रीमद्भगवद्गीता-13/4

[45] श्रीमद्भगवद्गीता, शङ्करभाष्य-13/2

काम्यकर्मादिविषयैश्छन्दोभर्वेदैर्नानापूजनीय- देवतारूपेण गीतम्, ब्रह्मणः सूत्रैः पदैश्च ब्रह्म सूत्र्यते सूच्यते एभिः इति-ब्रह्मसूत्राणि"[46] इति।

उपसंहारः- कालप्राप्ते साधनाभावे अपप्रचाररेव सनातनधर्मे प्रच्छन्नता जायते। सनातनधर्मस्य न केवलं कल्पितकल्पनामात्रम् । गीतापुस्तकं सांख्ययोगतत्त्वैः विभूषितम्, शास्त्रदिभिः सम्मतं, न्याययुक्तिसंगतं च वर्तते। एतैः युक्तित्रयैः गीतापुस्तकं शाश्वतिकं, सनातनं, विश्वनैतिकं मानवानां कल्याणमं च। धर्मान्तरग्रन्था इव यद्यपि गीतापुस्तकं न भवति, तथापि, गीतायाः माहात्म्ये क्वापि धनिन जायते। परन्तु मर्यादायां बृद्धि भवति। जगदीश्वरः सुपुप्साद अनन्तरं अकस्मादेव धर्मग्रन्थरूपेण गीतापुस्तकं प्रकाशयति एतत् चिन्तनं न समुचितम्। ईश्वरः सर्वदा सांख्ययोगादि ब्रह्मविद्यायाः मूलमात्रम्। अतः तेन प्रयुक्तं धर्मोपदेशः सर्वदा शाश्वतः, सनातन्तरूपः विश्वनैतिकरूपः। अन्यथा तष्विपरीतो.... न सर्वदा कल्याणकरो भवति। अतः गीता एव, सार्वजनीन धर्मशास्त्ररूपेण ख्याता। श्रीकृष्ण कदापि न गीतायाः मौलिकप्रवक्ता। स न केवलं प्राचीनमौलिकोपदेशानां संकलनकर्त्ता। भारतीयानां शास्त्राणि न केवलं अनुभूतमात्राणि, परन्तु दीर्घसाधनासिद्धैः अभिज्ञतालब्धन्ति। गीतापुस्तकं सर्वदा सांख्ययोगादिनां ब्रह्मविद्यायाः फलस्वरूपम्। न कदापि संकीर्णोपरिनेयं अस्य ग्रन्थस्य प्राचुर्भावो भवति। तत् पुस्तकं देशकालमतीत्य अज्ञानान्धकारे दुरीभूतं करोति। यतोहि संकीर्णावद्धः मतवादः मनुष्यान् आवदअधं करोति।

[46] श्रीमद्भगवद्गीता, श्रीधरीव्याख्या-13/2

## ग्रन्थावली

आरण्य समाधि प्रकाश, नारीर पूर्ण अधिकार, समाधिमठ, हासुया, उत्तरदिनाजपुर, १९८०

आरण्य समाधि प्रकाश, पल्लीवोधने अन्नसमस्या, समाधिग्रन्थावली,हाओरा,वैशाख वां-१३५६

आरण्य समाधि प्रकाश, विद्यालये प्राथमिक धर्मशिक्षा, समाधिमठ, हासुया, उत्तरदिनाजपुर,१९९१

आरण्य समाधि प्रकाश, व्रह्मचक्र, समाधिमठ, हासुया, उत्तरदिनाजपुर, १९९४

आरण्य समाधि प्रकाश, श्रीश्रीजगवन्धु दर्शन, आर्य्यसङ्घ, समाधिनगर,फरिदपुर, २००२

नारायणशर्मणा प्रणीत हितोपदेशः-सम्पा. सिंह गुजर, ड.वृजेन्द्र, अलंकार प्रकाशन, जयपुरः

पातञ्जलयोगदर्शन, हरिहरानन्द आरण्य, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, सं.७,२००२

पातञ्जलयोगसूत्रम्, राजमार्तण्डवृतिसमेतम्, रामशंकर भट्टाचार्य, भारतीय विद्या प्रकाशन, वाराणसी,२०१८

श्रीमद्भगवद् गीता-सम्पा.वासुदेव लक्ष्मण शास्त्री पन्सीकर, निर्णयसागर प्रेस.बोम्वे, सं. २, १९८६

स्वामी भावघनानन्द, श्रीमद्भगवद् गीता, उद्वोधन कार्यालय, कलकाता, द्वितीय संस्करण-२००३

पत्रिका

आर्यसंघ, सम्पा. श्रीकृष्णेन्द्र मोहन विश्वास,1म वर्ष, 4र्थ-5म संख्या, आग्राहायण ओ पौष, 1894।

बाबलु बर्मनः
अतिथि अध्यापकः
रायगञ्जविश्वविद्यालयः
**Email- bablubarman0205@gmail.com**
**Phone no- 7797910656**

# अभूत् इत्यत्र लुङ्लकारे शप् भवति न वेति विचारः

Prof. G.S.V. Dattatreya Murthy
Department of Vyakarana,
Shri Jagannath Sanskrit university,
Shri Vihar, Puri

**शोधपत्रनिगमनम्**

लट्, लिट्, लुट्, लृट्, लोट्, लङ्, वि.लिङ्, आ.लिङ्, लुङ्, लृङ् इति दशलकाराः भवन्ति। तत्तद्गणानुरोधेन विकरणाः भवन्ति। प्रकृते अभूत् इत्यत्र भूधातुः भ्वादिप्रकरणे पठितः इति कृत्वा तेभ्यः कर्तरि शप् इति सूत्रेण शब्विकरणः भवति। कर्त्रर्थे सार्वधातुके परे शब्भवतीति तदर्थः। अभूत् इति लुङ् लकारे अ भू स् त् इति स्थिते सिज्लुकि सति भूधातोः कर्त्रर्थकसार्वधातुकपरत्वेन शब्विकरणः कुतः न भवतीति संदेहः। येन नाप्रसन्यायेन न भवतीति कश्चन वादः। उत्सर्गापवादन्यायमनुसृत्य पाणिनिमहर्षिः कार्याणि विदधाति। न्यायोयमविमृश्यकारीव प्रथमं व्यापकस्य सामान्यस्य विधेयं विधाय पश्चात् उद्बुद्ध इव विशेषविधीनारभमाणः विषयसंकोचनेनातिव्याप्तिं परिहरति। तस्य च लौकिकोयं दृष्टान्तः- ब्राह्मणान् भोजयन् कोपि गृहस्वामी सूदानादिशति, **ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय** इति। अत्र महावाक्यपूर्वभागेन ब्राह्मणत्वसाधारण्यान् प्राप्तं कौण्डिन्यस्यापि दधिदानम्, तक्रदानरूपविशेषविधिं कुर्वता उत्तरभागेन बाध्यते। एवं च पूर्ववाक्ये ब्राह्मणेभ्यः इति सामान्यं कौण्डिन्यभिन्नत्वविशेषणेन संकोचितविषयं पर्यवस्यति। विषयस्य एकदेशसाम्ये अधिकदेशव्यापकः विधिरुत्सर्गः, अल्पदेशव्यापकः अपवादः। उदा-आद्गुणः, वृद्धिरेची। आदचि गुणः विधीयते। आदेचि वृद्धिः विधीयते। अच्=अक् +एच्। अतोत्र गुणविधिरुत्सर्गः। वृद्धिविधिरपवादः। तेन च अपवादस्य विषयं परिहृत्यैव उत्सर्गः प्रवर्तते। अतः अभूत् इत्यत्र शब्विकरणः कथं वारणीयः इति कश्चनविचारः प्रवृत्तः, अत्र विद्वांसः प्रमाणम्।

**कुञ्जिकाशब्दाः**-लुङ्, शप्, विकरणः, उत्सर्गः, अपवादः, सावकाशः, निरवकाशः, तक्रकौण्डिन्यन्यायः, माठरकौण्डिन्यन्यायः,बाधकः, सत्यपि संभवे बाधनम्।

**भू**[1]इत्यस्मात् धातोः **लुङ्**[2]इति सूत्रेण लुङ्लकारे, भू+ल् इति स्थिते**लुङ्लङ्लृङ्क्ष्वडुदात्तः**[3]इति सूत्रेणअडागमे अ+भू+ल् इति जाते, **तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्**[4]इति सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अ+भू+ति इति जाते, **इतश्च**[5]इति सूत्रेण इकारलोपे,अ+भू+त् इति जाते, **च्लि लुङि**[6]इतिसूत्रेण च्लिप्रत्यये, अ +भू+च्लि+त् इति जाते, **च्लेः सिच्**[7]इति सूत्रेण च्लेः सिजादेशे अ+भू+स्+त् इति जाते, **गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु**[8]इति सूत्रेण सिचः लुकि, अभूत् इति रूपं सिध्यति।

**अत्र विचारः**

अ+भू+स्+त् इत्यवस्थायां सिज्लुकि सति भूधातोः कर्त्रर्थकसार्वधातुपरकत्वेन **कर्तरि शप्**[9]इति सूत्रेण शप्रत्ययः भवति नेवेति। यद्यपि आलोच्यमाने अ+भू+त् इत्यवस्थायामेव च्लिप्रत्ययोत्पत्तेः पूर्वमेव शब्विकरणः प्राप्नोत्येव, तथापि च्लिप्रत्ययः शप्रत्ययं बाधित्वा प्रवृत्तः, तस्य च्लिप्रत्ययस्य सिजादेशः प्रवृत्तः। स च सिच् गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इत्यनेन लुका लुप्तः। तथा च सिचः लुगनन्तरंकर्त्रर्थकसार्वधातुकपरकत्वमस्तीति पुनः कर्तरि शप् इति सूत्रेण शप्रत्ययः प्राप्नोत्येव खलु इति।

**निरवकाशत्वेन बाधे बाधकशास्त्रप्रवृत्त्युत्तरमुत्सर्गशास्त्रस्य प्रवृत्तिरस्ति न वेति विचारः**

अ भू त् इत्यवस्थायां च्लिप्रत्ययस्य **येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति**[10]इति न्यायेन शप्रत्ययबाधकतया च्लिप्रत्ययः प्रवृत्तः, स च सिजादेशेनापहृतः, सिच्च गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इत्यनेन लुका लुप्तः। लोपानन्तरं पुनः शप्रत्यययोग्यता अस्त्येवेति पुनः शप्प्राप्नोत्येव। च्लिप्रत्ययश्च येन नाप्राप्तन्यायेन निरवकाशत्वेन शपमबाधत। निरवकाशत्वेन बाधे बाधकशास्त्रप्रवृत्त्युत्तरं यदि उत्सर्गशास्त्रप्राप्तिरस्ति तर्हि उत्सर्गशास्त्रं पुनः प्रवर्तेत।

---

[1]भू सत्तायाम्

[2]भूतार्थवृत्तेर्धातोर्लुङ् स्यादिति सूत्रार्थः,3-2-11, अष्टाध्यायी.

[3]एषु परेषु अङ्गस्डागमः स्यात् स चोदात्तः इति सूत्रार्थः,6-4-71,अष्टाध्यायी.

[4]एते अष्टादश लादेशाः स्युः इति सूत्रार्थः,3-4-78,अष्टाध्यायी.

[5]ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्त्यस्य लोपः स्यात् इति सूत्रार्थः,3-4-100,अष्टाध्यायी.

[6]लुङि परे धातोः च्लिप्रत्ययः स्यादिति सूत्रार्थः,3-1-43,अष्टाध्यायी.

[7]3-1-44,अष्टाध्यायी.

[8]एभ्यः सिचो लुक्यास्यादिति सूत्रार्थः,2-4-77,अष्टाध्यायी.

[9]कर्त्रर्थे सार्वधातुके परे धातोः शप्स्यादिति सूत्रार्थः,3-1-68,अष्टाध्यायी.

[10]परिभाषा, संख्या-58,परिभाषेन्दुशेखरः

यथा रमायाम् इत्यत्र रमा इ इति स्थिते **याडापः**[11]इति सूत्रेण याडागमः प्राप्नोति, **ङेराम्नद्याम्नीभ्यः**[12]इति सूत्रेण आमादेशश्च प्राप्नोति। तत्र आमः निरवकाशत्वेन याडागमबाधकतया प्रथमं प्रवृत्तिरस्त्येव। आमादेशप्रवृत्त्युत्तरं पुनः प्राप्तेः सत्वात् पुनः याडागमः प्रवर्तत एव। याडादिषु कृतेषु निर्दिश्यमानस्य ङेः तैः व्यवधानात् आम् न प्राप्नोतीति ङेः आमः निरवकाशत्वात् बाधकत्वमिति भावः। अतः निरवकाशत्वेन बाधकत्वे बाधकशास्त्रप्रवृत्त्युत्तरं योग्यतायाः सत्वेन प्रकृते अभूत् इत्यत्र शब्विकरणः प्राप्नोत्येव।

तक्रकौण्डिन्यन्यायेन अपवादत्वमत्र लक्ष्ये स्वीक्रियते इति नालोचनीयम्। तक्रकौण्डिन्यन्यायेन अपवादत्वे स्वीकृते सति अपवादशास्त्रप्रवृत्त्युत्तरम् उत्सर्गशास्त्रप्रवृत्तिः सुतरां नास्त्येव। तक्रकौण्डिन्यन्यायः **सत्यपि सम्भवे बाधनं भवति** इति भाष्येण सम्भवमात्रविषयकः। तदप्राप्तियोग्ये लक्ष्ये अचारितार्थ्ये सति तस्मिन् लक्ष्ये कृतेपि यत्र चारितार्थ्ययोग्यता स्यात् तन्मात्रविषयकः।

**बाधकताबीजं कतिथमिति विचार्यते**

तथाहि- [13]येन नाप्राप्ते[14] यो विधिरारभ्यते स तस्य बाधको भवति इति न्यायस्वरूपम्।[15]यत्कर्तृकावश्यप्राप्तौ सत्यां यो विधिरारभ्यते स तस्य बाधको भवतीति तदर्थः। उदा-

---

[11]आपः परस्य ङिद्वचनस्य याडागमः स्यादिति सूत्रार्थः, 7-3-11,अष्टाध्यायी.

[12]नद्यन्तात् आबन्ताच्च नीशब्दाच्च ङेराम् स्यात् इति सूत्रार्थः, 7-3-16,अष्टाध्यायी.

[13]येन नाप्राप्तिन्यायेन विसर्जनियस्य सः, इत्यस्यापवादोयम्। न तु शर्परे विसर्जनीयः इत्यस्य। तेन वासः क्षौमम् इत्यादौ विसर्ग एव इति कौमुदीग्रन्थः,पृ-143, हल्सन्धिप्रकरणम्, बालमनोरमा-तत्वबोधिनीसहिता सिद्धान्तकौमुदी।अयमर्थः- कुप्वोःकःपौ च इति जिह्वामूलीयोपधामानीयविसर्गविधिना यथा विसर्जनीयस्य सत्वं बाध्यते, तथा शर्परे विसर्जनीय इति केवलविसर्गविधिरपि बाध्यते। तथा च वासः क्षौमम् इत्यत्रापि कुप्वोः इति कदाचित् जाह्वामूलीयः कदाचिद्विसर्गश्च स्याताम्, इष्यते तु केवल विसर्गः इति सन्दर्भे अयं ग्रन्थः प्रवृत्तः। प्राप्ते इति भावे क्तः। येनेति कर्तरि तृतीया। कर्तृकर्मणोः कृति इति षष्ठी तु न भवति, न लोकाव्ययनिष्ठाखलर्थतृनाम् इति निषेधात्। द्वौ नञौ आवश्यकत्वं बोधयतः। यस्य विधेः अवश्यं प्राप्तौ सत्यामित्यर्थः। अनेन प्रकृत न्यायेन कुप्वोः इति विधिः विसर्जनीयस्य सः इत्यस्यैवापवादः, सत्वे प्राप्ते एव तदारम्भात्। शर्परे विसर्जनीय इत्यस्य तु कुप्वोः इति नापवादः, कः करोति इत्यादौ शर्परे खरि इत्यप्राप्तेपि कुप्वोः इत्यस्यारम्भात्।

[14]प्राप्तः इत्यत्र नपंसके भावे क्तः इति क्तप्रत्ययः। न प्राप्तम् अप्राप्तम्। न अप्राप्तम् नाप्राप्तम्, नाप्राप्ते निषेधार्तकस्य नशब्दस्य सुप् सपा इति समासः। नञा अप्राप्तशब्दस्य नञ् इति सूत्रेण समासे नञः नलोपो नञः इति सूत्रेण लोपे, तस्मान्नुडचि इति सूत्रेण नुडागमे अनप्राप्रतमित्यापत्तेः। येनेति कर्तरि तृतीया। कर्तृकर्मणोः कृतीति षष्ठी न भवति, न लोकाव्ययनिष्ठाखलर्थतृनाम् इति निषेधात्। नाप्राप्ते इत्यत्रएकस्य नञः द्वितीयस्य च नञर्थकस्य नकारस्य प्रयोगसत्वात् प्रकृतडाढ्र्यबोधकत्वे यत्कर्तृकावश्यप्राप्ताविर्त्यर्थः।

[15]नञ्द्वयस्य प्रकृतदाढ्र्यबोधकत्वात्।तदुक्तं- विनञ्भ्यां नानञौ सह इति सूत्रे भाष्ये-द्वौ प्रतिषेधौ प्रकृतार्थं गमयति इति। अत एव येन प्राप्तः इति विहाय येन नाप्राप्तः इत्यूक्तम्। प्राप्तौ आवश्यकत्वं च कृताकृतप्रसङ्गित्वरूपम्, लौकिकदृष्टान्तेन तथैव

**कर्मण्यण्** इति सूत्रकर्तृकावश्यकप्राप्तौ सत्याम् **आतोनुपसर्गे कः** इति विधिरारभ्यते स विधिः तस्य अवश्यप्राप्तस्य विधेः बाधकः अपवादः भवति। यत्र यत्र गां ददातीत्यादौ कः प्राप्नोति तत्र तत्र सर्वत्र कर्मण्यण् इत्यणः प्राप्तिरस्त्येव। अतः कर्मण्यणित्यस्य अवश्यप्राप्तौ सत्यामारभ्यमाणः कविधिः अनवकाशत्वात् उत्सर्गाण्विधेः बाधकः इति निरवकाशः विधिः अपवादः। सामान्येन कार्यविधायकः उत्सर्गः, विशेषेण च कार्यविधायकः अपवादः इति गूढार्थः। एवञ्च [16]विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्य धर्मावच्छिन्नोद्देश्यताकशास्त्रस्य विशेषशास्त्रेण बाधः इति निष्कर्षः। तदप्राप्तियोग्ये अचारितार्थ्यं ह्येतस्य बाधकत्वे बीजम् इति प्रथमबाधकताबीजम्। अत्र स्थले उत्सर्गशास्त्रस्य उद्देश्ये अपवादशास्त्रस्य प्रवृत्तियोग्यलक्ष्यतातिरिक्तत्वेन संकोचः क्रियते।सूक्ष्मदृष्ट्यापरिशील्यमाने बाधकताबीजं चतुर्धा भवति। तथाहि-

1.तदप्राप्तियोग्ये अचारितार्थम्[17]।

2.तदप्राप्तियोग्ये अचारितार्थ्ये सति कृते चारितार्थ्यम्[18]।

---

लाभात्। यत्कर्तकव्यापकत्वविशिष्टप्राप्ताविति फलितोर्थः। यत्कर्तकप्राप्तिनिरूपितं व्याप्यत्वम्। यत्कर्तृकप्राप्तिस्सम्भवति, स तस्यापवाद इति भावः।

[16]विशेषशास्त्रे उद्देश्यभूतं यद्विशेषधर्मावच्छिन्नं तद्वृत्तिः यः सामान्यधर्मः तदवच्छिन्नोद्देश्यकशास्त्रस्य प्रत्यासत्या तेन विशेषशास्त्रेण बाधः इति सूक्ष्मार्थः। तथा च सामन्यत्वविशेषत्वयोः परस्परापेक्षत्वेन नान्यापेक्षयोः तयोः बाध्यबाधकभावः इति सरलार्थः। एवं च व्यापकधर्मावच्छिन्नोद्धेश्यकस्य व्याप्यधर्मावच्छोन्नोद्देश्यकं शास्त्रं बाधकमिति गूढार्थः। उत्सर्गप्राप्तियोग्यताविरहविशिष्टे लक्ष्ये चारितार्थ्याभावः बाधकत्वे बीजम्। यथा- वृद्धिरेचीति शास्त्रीय एजव्यवहितपूर्वत्वविशिष्टात्वरूपोद्देश्यतावच्छेदकव्यापकत्वस्य आद्गुणः इत्येतत् शास्त्रीयाजव्यवहितपूर्वत्वविशिष्टात्वरूपोद्देश्यतावच्छेदके सत्वेन आद्गुणः इत्यस्य वृद्धिरेची इति सूत्रेण बाधः। एवमेव ह्रस्वनद्यापो नुट् आमिसर्वनामस्सुट्, अकः सवर्णे दीर्घः, इको यणचि, इत्यत्रापि बोध्यम्।

[17]परे तु तदप्राप्तियोग्ये अचारितार्थ्यस्य स्वातन्त्र्येण बाधप्रयोजकत्वे न किञ्चित् फलम्। तदप्राप्तियोग्ये अचारितार्थ्यविशिष्टकृते चारितार्थ्यं तदुद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन सङ्कोचस्तस्य प्रयोजकम्। हे रमे इत्यत्रत्यशङ्कासमाधानपरं भाष्यं तु न प्रतिकूलम्, नित्यत्वात् हल्ङ्यादिलोपं बाधित्वा पूर्वमेत्वे आकाररूपाबन्ततदादित्वाभावेन हल्ङ्यादिलोपाप्राप्त्या एङ्ह्रस्वात्संम्बुद्धेः इति सम्बुद्धिलोपः इत्याशयात्। किञ्च कदप्राप्तियोग्ये अचारितार्थ्यविशिष्टकृते चारितार्थ्यरूपबाधबीजप्रयोज्यसङ्कोचस्य हे अनड्वान् इथ्यादिलक्ष्यनिर्वाहार्थं हलन्तविषयकवाक्ये अनित्यत्वाश्रयणेन अप्रवृत्तावपि आबन्तविषयवाक्ये तदनित्यत्वे मानाभावात् कृते चारितार्थ्यघटितबाधबीजेन हल्ङ्यादिलोपं बाधित्वा पूर्वमेत्वे एङ्ह्रस्वात्सम्बुद्धेः इत्यनेन सम्बुद्धिलोपः। किञ्च, अस्तु वा हलन्तविषयकवाक्येपि कृते चारितार्थ्यघटितबाधबीजप्रयोज्यसङ्कोचः। सावनुडुहः इत्यनेन बाधितत्वात् हल्ङ्यादिलोपाप्राप्तावपि सावपि पदं भवति भाष्यसिद्धान्तित पक्षाश्रयणात् द्विवारं संयोगान्तलोपेनेष्टसिद्धिः। लक्ष्ये लक्षणं सकृदेव प्रवर्तते इति न्यायस्य तु नात्र विषयः, एधते इत्याद्यर्थं परिष्कृत लक्ष्यत्वस्याभावादित्याहुः। अन्ये तु तत्प्रवृत्तियोग्यतातिरिक्तत्वेन सङ्कोचरूपबाधप्रयोजकत्वेन तदप्राप्तियोग्ये अचारितार्थ्यरूपबाधबीजेनैवोपपत्तौ कृते चारितार्थ्यघटितस्यैव बाधबीजत्वं न कल्पनीयम्। रमायाम् इत्यादौ ङेराम्नद्याम्नीभ्यः इत्यस्य याडप्राप्तियोग्ये चारितार्थ्यस्य सत्वादाम्प्रवृत्तियोग्यातिरिक्तः यः आबन्ताङ्गव्यवहितपरत्वविशिष्टः ङिः, तस्य याडित्येवम्, याडपः इत्यस्य सङ्कुचिते वाक्यार्थबोधे जाते आम्प्रवृत्तेः प्राक् तदप्राप्तावपि आम्प्रवृत्युत्तरं ङितस्तत्प्रवृत्तियोग्यतारिक्तत्स्यैव सत्वात् याट्सुलभः। एवमन्यत्रापि यथायथं सयमन्वयः उपपादनीयः।

 ISSN 2320-2025

3.तदप्राप्तियोग्ये अचारितार्थ्ये सति कृते अचारितार्थ्यम्।

4.तदप्राप्तियोग्ये अचारितार्थ्ये सति अपवादशास्त्रप्रवृत्युत्तरम् उत्सर्गशास्त्रप्रवृत्तौ अपवादशास्त्रप्रणयन वैय्यर्थ्यसंभावना चेति बाधतकताबीजम्[19]। प्रथमस्थले हि उत्सर्गशास्त्रस्य उद्देश्ये अपवादशास्त्रस्य प्रवृत्तियोग्यलक्ष्यातिरिक्तत्वेन संकोचः विधीयते। तेन **कर्मण्यण्** इति सूत्रस्य कर्मण्युपपदे अनुपसर्गकादन्तेतरधातोः अण् इत्यर्थः भवति। तादृशार्थस्वीकारादेव हल्ङ्यादिसूत्रस्थसुपदार्थे **सम्बुद्धौ च**[20]इति शास्त्रस्य प्रवृत्तियोग्यलक्ष्यतातिरिक्तत्वेन संकोचः क्रियते। तेन रमा सु इत्यवस्थायां हल्ङ्यादिलोपाप्रवृत्या सम्बुद्धौ च इत्यापः एत्वे **एङ्ह्रस्वात्सम्बुद्धेः**[21]इति सूत्रविहित सम्बुद्धिलोपः भवति।अत एव=कृते चारितार्थ्ये सत्यपि तदप्राप्तियोग्ये अचारितार्थ्यमात्रेण अनेन न्यायेन बाधकत्वाङ्गीकारादेव**आयादय आर्धधातुके वा**[22]इति सूत्रे गोपायिष्यतीत्यादौ

---

[18]उत्सर्गोद्देश्ये अपवादेन स्वप्रवृत्तियोग्यतातिरिक्तत्वं स्वविहितकार्याश्रयातिरिक्तत्वञ्च बोध्यते। यथा-सर्वेषाम् इत्यत्र सुटि कृतेपि न नुट्। अत्रह्रस्वनद्यापो नुट् नुट्शास्त्रप्रवृत्तिरस्तीति उत्सर्गाप्राप्तियोग्यस्थले अपवादशास्त्रस्य आमिसर्वनाम्नः सुट् इत्यस्य अचारितार्थ्यमस्ति। उत्सर्गशास्त्रस्य नुटः प्रवृत्तेरनन्तरं यदागमन्यायेन नुड्विशिष्टस्यामः ग्रहणेन ग्रहणात् सुटः चारितार्थ्यमस्ति, तथापि सटा नुटः बाधात् सुडागमानन्तरं नुट् न भवति। अत एवोक्तं मूले अनेन न्यायेन तत्प्रवृत्युत्तरमपि=उत्सर्गशास्त्रप्रवृत्युत्तरमपि चारितार्थ्ये तद्बाधबोधनम् इति।

[19]अनेन च अपवादशास्त्रेण स्वप्रवृतियोग्यतातिरिक्तत्वेन स्वविहितकार्याश्रयातिरिक्तत्वेन च उत्सर्गशास्त्रे संकोचः विधीयते। एत एव ज्ञानम् इत्यत्र ज्ञान+सु, ज्ञान+अम् इति स्थिते प्रथमतः अतोम् इत्यमादेशः, पश्चात् च न अमः लुक्। स्वमोर्नपंसकात् इत्यस्य अप्राप्तियोग्ये अपवादशास्त्रस्य अतोम् इत्यस्य चारितार्थ्यं नास्ति, अमादेशे कृते यदि लुक् शास्त्रं प्रवर्तेत तदा अम्विधायकशास्त्रप्रणयनस्य वैय्यर्थ्यमिति भावः।

[20]आपः एकारः स्यात्सम्बुद्धौ, 7-3-106,अष्टाध्यायी.

[21]एङन्ताद्ध्रस्वान्ताच्चाङ्गद्धल्लुप्यते सम्बुद्धेश्चेत् इति सूत्रार्थः, 6-1-68,अष्टाध्यायी.

[22]अयमत्र भाष्याशयः- आर्धधातुके इति परसप्तमीत्याशयेन अयादिभ्यो यदार्धधातुकं तस्मिन् परे वा आयादीनां निर्वृत्तिर्भवतीति वा, आहोश्विदायादिप्रकृतेर्यदार्धधातुकं तस्मिन् परे वा आयादीनामुत्पत्तिर्भवतीति वेति पक्षद्वयं विचारितम्। आद्यपक्षस्यायमाशयः-एतद्वाक्यनिरपेक्षैः आयादिविधायकवाक्यैः परनिमित्तानपेक्षा आयादयः सामान्येन विधीयन्ते। तत्र आर्धधातुके परे तेषामनेन वा निवृत्तिः क्रियते इति। अत्र पक्षे निवृत्तिशब्दः सूत्रे निर्देष्टव्य इति आयादय इति पञ्चम्या विपरिणाम इति च तदाशयः। द्वीतीयपक्षाभिप्रायः-गुपूधूपविच्छिपणिपनिभ्य आयः, ऋतेरीयङ्, कमेर्णिङिति सूत्रस्यायं शेषः। तथा च तैः एक्यवाक्यतया आर्धधातुके परतः आयादयः वा विधीयन्ते। गुपूधूपेत्यत्रैव आर्धधातुके वेति वक्तव्ये पृथक्पाठसामर्थ्यात् भिन्नवाक्यतया, सार्वधातुकेपि विधीयन्ते। तथा च भिन्नवाक्यतया सार्वधातुके नित्यमेकवाक्यतया आर्धधातुके विकल्पेन चादयः विधीयन्ते इति। तत्र प्रथमपक्षे गुप्तिः,जुगोप इत्यादेः इष्टस्यासिद्धिः। निमित्तानपेक्षया गुपूधूपेत्यनेन प्रथमम् आयप्रत्यये ततः प्रत्ययान्तत्वात् क्तिनं बाधित्वा अप्रत्ययात् इत्यनेन आकारप्रत्यये तस्मिन् परे आयस्यानेन वा निवृत्तावपि क्तिनः असिद्धेः। तथा आमि परतः आयस्य वा निवृत्तावपि जुगोप इतीष्टस्यासिद्धिः। गोपा, गोपांचकारेत्यनिष्टं प्राप्नोतीति दोषः उद्भावितः। द्वितीयपक्षे तु गुपूधातोः स्त्रियां क्तिनि, आर्धधातुकपरत्वस्य सत्वादनेन वा आयप्रत्यये, गोपायतिः इत्यनिष्टं प्रसज्यते, गोपायोतिचेष्टं न सिध्यति इति दोषः उद्भावितः। तदुत्तरम् उक्तदोषवारमाय आयादयो वा, सार्वधातुके नित्यमिति न्यासेन आयादीनविशेषेण विकल्पेन विधाय, सार्वधातुके तेषां नित्यत्वेन विधानमुक्तम्। तथा च पारिशेष्यात् आर्धधातुके विकल्पस्सिध्यतीति न प्रागुक्तदोषलेशः इति तद्भाष्याशयः। इदानीं समाधानम्। स्यादिबलीयस्त्वन्तु विप्रतिषेधेन तुल्यनिमित्तत्वात्। स्यादिभिस्त्वायादीनां बाधनं प्राप्नोति, किं कारणम्, विप्रतिषेधेन तुल्यनिमित्तत्वात्। तुल्यं वा निमित्तमायादीनां स्यादीनाञ्च। स्यादीनामवकाशः- करिष्यति, हरिष्यति।

अयादीन्बाधित्वा परत्वात्स्यादयः प्राप्नुवन्तीत्याशङ्क्य अनवकाशाः आयादयः, गोपायिष्यतीत्यादावपि शप्स्यादिः प्राप्नोति। न च शप्यसति वा न विशेषः। अन्यदिदानीमुच्यते नास्ति विशेष इति। यदुक्तमायादीनां स्यादिभिरव्याप्तः अवकाश इति स नास्त्यवकाश इति भाष्ये उक्तम्[23]। एवमत्र तत्प्रवृत्युत्तरं चारितार्थ्येपि तदव्याप्तः अवकाशः नास्तीति सममेव। किञ्च अनेन न्यायेन=येन नाप्रप्रन्यायेन, तत्प्रवृत्युत्तरमपि चारितार्थ्ये तद्बाधबोधनम्। अन्यथा=केवलअनवकाशत्वे एव बाधकत्वाङ्गीकारे, अनवकाषत्वेनैव बाधे सिद्धे एतत्=येन नाप्राप्तपरिभाषोपन्यसनवैय्यर्थ्यमित्यर्थः, कथनवैयर्थ्यापत्तेः, तक्रकौण्डिन्यन्यायप्रदर्शनस्यापि वैयर्थ्यापत्तेश्च। तथा प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विर्वचनेन बाधः. यथा वादेरपि प्रवृत्या चरितार्थेन आदे परस्य इत्यनेन अलोन्त्यस्य इत्यस्य बाधः। तदुक्तं मिदचोन्त्यापरः इति सूत्रे भाष्ये **सत्यपि सम्भवे बाधनं भवति** इति। अन्यथा=असम्भव एव बादकत्वस्वीकारे, **ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय** इत्यत्र तक्रदानेन दधिदानस्य बाधो न स्यात्। तद्दानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसम्भवात्। अत एव विषयभेदेपि अपवादत्वम्।

**अयमत्र परिभाषासारः**

उत्सर्गापवादन्यायमनुसृत्य पाणिनिमहर्षिः कार्याणि विदधाति। न्यायोयमविमृश्यकारीव प्रथमं व्यापकस्य सामान्यस्य विधेयं विधाय पश्चात् उद्बुद्ध इव विशेषविधीनारभमाणः विषयसंकोचनेनातिव्याप्तिं परिहरति। तस्य च लौकिकोयं दृष्टान्तः- ब्राह्मणान् भोजयन् कोपि गृहस्वामी सूदानादिशति, **ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय** इति। अत्र महावाक्यपूर्वभागेन ब्राह्मणत्वसाधारण्यान् प्राप्तं कौण्डिन्यस्यापि दधिदानम्, तक्रदानरूपविशेषविधिं कुर्वता उत्तरभागेन बाध्यते। एवं च पूर्ववाक्ये ब्राह्मणेभ्यः इति सामान्यं कौण्डिन्यभिन्नत्वविशेषणेन संकोचितविषयं पर्यवस्यति। विषयस्य एकदेशसाम्ये अधिकदेशव्यापकः विधिरुत्सर्गः, अल्पदेशव्यापकः अपवादः। उदा-आद्गुणः, वृद्धिरेची। आदचि गुणः विधीयते। आदेचि वृद्धिः विधीयते। अच्=अक् +एच्। अतोत्र

---

आयादीनामवकाशः-गोपायति,धूपायति। इहोभयं प्राप्नोति गोपायिष्यति, धूपायिष्यतीति परत्वात् स्यादयः प्राप्नुवन्तिइत्याशङ्क्य सकृद्गतिन्यायेन पुनः आयादयः न स्युः अपवादविषये उत्सर्गाप्रवृत्या आयादयो वेति सामान्यसूत्रेणापिन आयादयः इति समाहितम्।लादेशोत्तरं स्यतासी इति पक्षे सर्वधातुके नित्यमित्यनेन विहितायादीनां स्यादीनां च, तुल्यनिमित्तत्वात् स्यादिभिस्तेषां परत्वाद्बाधः प्राप्नोतीति तदाशयः। तदुत्तरं नवा आयादिविदानस्यानवकाशत्वात्। अनवकाशा आयादयः उच्यन्ते च ते वचनाद्भविष्यन्ति इत्युक्तम्। सार्वधातुके नित्यमित्यनेन विहितायादीनां स्याद्यप्राप्तियोग्ये अचारितार्थ्यात्तैस्यादीनामनवकाशत्वाद्बाध इति तदाशयः।

[23]**अयमत्र** प्रकृतप्रघट्टकाशयः- एवञ्च गोपायती त्यत्र शब्विकरणे कृते चरितार्थानामप्यायादीनाम् अनवकाशत्वप्रतिपादनपरेण अनेन भाष्येण उत्सर्गप्राप्तियोग्यताविरहविशिष्टे लक्ष्ये चारितार्थ्याभावस्य बाधकताबीजत्वं सूचितम्, न तु सर्वथानवकाशत्वम्। तथा च शबाद्युत्सर्गप्रवृत्युत्तरं तत्पूर्वं , तत्समकालं वा विशेषशास्त्रस्य चारितार्थ्येपि प्रकृतन्यायेन बाधकत्वं बोध्यम् इति।

गुणविधिरुत्सर्गः। वृद्धिविधिरपवादः। तेन च अपवादस्य विषयं परिहृत्यैव उत्सर्गः प्रवर्तते। तथा च अच्तः एचि व्यपकलिते शिष्टः अक् एव गुणस्य विषयः। आदचि गुणः, एचि वृद्धिः इति फलितम्। एवमेव अन्यत्र उत्सर्गापवादस्थले समन्वयः उपपादनीयः

**अत्रेदं बोध्यम्**

येन नाप्राप्ते इत्यत्र येनेत्यस्य यदि स्वेतरेण इत्यर्थः तदा स्वविषये स्वेतरत् यद्यत् प्राप्नोति तद्बाध्यम्, विध्यन्ताराप्राप्तविषयाभावात्। इयमेव बाध्यसामान्यचिन्ता पक्षः। यदि तु येन इत्यस्य लक्षणेन इत्यर्थो वा तदा बाध्यविशेषचिन्तापक्षः। अनवकाशत्वेन बाधेपि तद्बाधनेन सार्थक्यम् उत तद्बाधनेनेत्येवं विशेषचिन्ता सम्भवति इति।येन नाप्राप्तन्यायस्य तक्रकौण्डिन्यन्यायविषयकत्वमेव। अत एव उत्सर्गप्राप्तिविरहविशिष्टे लक्ष्ये चारितार्थ्याभावः बाधकताबीजम्। सत्यपि सम्भवे विशेषशास्त्रस्य उत्सर्गेण बाधकत्वमिति सूक्ष्मार्थः। माठरकौण्डिन्यन्यायविषयकत्वं च नास्य न्यायस्य विषयः। **सर्वे ब्राह्मणाः भुज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्** इति न्यायस्य निरवकाशविषयत्वेन तद्विषये निरवकाशाः हि विधयः सावकाशान् विधीन् बाधन्ते इति निरवकाशविधिशास्त्रसामर्थ्यादेव उत्सर्गबाधकत्वं सिध्यतीति परं विशेषः।

**अत्र कात्यायनमहर्षेरभिप्रायः**

असम्भव एव बाधकताबीजमिति वार्तिककारः ब्रवीति। तथाहि- अनभिहिते इति सूत्रप्रयोजनाधिकरणे भाष्ये अनभिहितवचनमनर्थकम्। अन्यत्राप्यभिहिते विहितं न भवतीत्युक्त्वा तस्य, भिनत्ती त्यत्र श्नमा उक्तत्वात् कर्तृत्वस्य कर्तरि शप् न भवतीति दृष्टान्तं प्रर्शितवान्। ततः ननु च श्नम्बहुजकचोपवादास्ते अपवादत्वाद्बाधका भविष्यन्ती ति दृष्टान्ताभावः इत्याक्षेपे सति समानदेशैरपवादैरुत्सर्गाणां बाधनं भवति। नानादेशत्वान्न प्राप्नोती त्युक्तं वार्तिककारेण। तदव्याख्यावसरे कैयटेन नानदेशत्वादिति। विरोधो बाधकारणम्। न विशेषविधानमेव। वार्तिककारस्य चेदं दर्शनम्। भाष्यकारस्तु विरोधाभावेपि विशेषविधानमात्रेणैव बाधकत्वमन्यत्रावोचत् इति स्पष्टीकृतम्। तद्धितेष्वचामादेः इति सूत्रे भाष्ये आदिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते इत्युक्ते सति कथमन्यस्य उच्यमाना अन्यस्य बाधिका स्यात्? असति खल्वपि संभवे बाधनं भवत्यस्ति च सम्भवो यदुभयं स्यात् इति विरोधे सति बाधकत्वमिति वार्तिकमतरीत्या आक्षिप्य सत्यपि सम्भवे बाधनं भवती ति भाष्यकृता समाहितम्। विशेषशास्त्रस्य चारितार्थ्यासम्भव एव उत्सर्गबाधकत्वम्। तक्रकौण्डिन्यन्यायः अत्र शास्त्रे नाश्रीयते इति वार्तिककृन्मतम्।

- येन नाप्राप्ततक्रकौण्डिन्यन्याययोः ऐक्यम्।
- ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय इति लौकिकन्यायः।

- अनेन न्यायेन सत्यपि सम्भवे बाधनं भवति।
- कौण्डिन्योपि ब्राह्मणः, अतः दधिदानात् पूर्वं तदुत्तरं वा तक्रदानस्य चारितार्थ्येपि तेन दधिदानस्य बाधः।
- एवम् उत्सर्गप्राप्तिपूर्वं तदुत्तरं तत्समकालं वा विशेषशास्त्रस्य चारितार्थ्ये सत्यपि येन नाप्राप्तन्यायेन विशेषेण उत्सर्गस्य बाधः इति तदप्राप्तियोग्ये अतारितार्थं बाधकताबीजम्।
- अपवादप्रवृत्त्युत्तरम् उत्सर्गप्रवृत्तेः तक्रकौण्डिन्यन्यायसिद्धतया येन नाप्राप्तन्यायस्थलेपि अपवादशास्त्रप्रवृत्त्युत्तरं न प्रवृत्तिः।
- सर्वे ब्राह्मणाः भुज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम् इति निरवकाशविषयः न्यायः।
- येन नाप्राप्तन्यायस्य तक्रन्यायविषयकत्वमेव, न तु माठरन्यायविषयकत्वम्।
- तद्विषये वचनसामर्थ्यादेव बाधकत्वस्य सिद्धत्वात्।

तस्मात् प्रकृते शबप्राप्तियोग्यलक्ष्ये अचारितार्थ्यं यद्यप्यस्ति, तथापि शब्विकरणे कृते चारितार्थ्ययोग्यता नास्ति। हि=यतः शब्विकरणे कृते धातोः लुङ् परकत्वाभावेन च्लिप्रत्ययप्रवृत्ति योग्यता नास्ति। तथा च कृते चारितार्थ्य योग्यताया अभावेन अत्र तक्रकौण्डिन्यन्यायेन अपवादत्वं नैव सम्भवति, अपि तु माठरकौण्डिन्य न्यायेन निरवकाशत्वेनैव बाधकत्वं वक्तव्यम्। निरवकाशत्वेन बाधकत्वे च बाधकशास्त्रप्रवृत्त्युत्तरं योग्यतायाः सत्वे उत्सर्गशास्त्रप्रवृत्तेरबाधात् प्रकृते अभूत् इत्यत्र बाधकच्लिप्रत्ययप्रवृत्त्युत्तरं शपः प्राप्तेः सत्वेन शप् प्रवर्तेतैव। अतः अभूत् इत्यत्र अवश्यं शपा भाव्यम् इति शङ्कितुराशयः।

**अभूत् इत्यत्र शब्निवारणोपायः**

अत्र तक्रकौण्डिन्यन्यायेनैव अपवादत्वं स्वीक्रियते। तथाहि- **च्लि लुङि** इति सूत्रे **धातोः** इति अधिकारः वर्तते। धातोः इत्यस्य च विहितपञ्चमीत्वेन धातोर्विहिते लुङि परे च्लिप्रत्ययः स्यादिति तदर्थः स्वीक्रियते। तथा च अभूत् इत्यत्र शप्प्रत्ययप्रवृत्युत्तरमपि धातर्विहितलुङ्परकत्वेन शबन्तादपि च्लिप्रत्ययप्रवृत्तियोग्यता अस्त्येवेति, शबप्राप्तियोग्येलक्ष्ये अचारितार्थ्यस्य शपि कृते चारितार्थ्ययोग्यतायाश्च सत्वेन च्लिप्रत्ययस्य तक्रकौण्डिन्यन्यायेनैव अपवादत्वं, न तु निरवकाशत्वमात्रेण। तक्रकौण्डिन्यन्यायेन अपवादत्वे च अपवादप्रवृत्त्युत्तरं योग्यतायः सत्वेपि दधिदानं क्रियते खलु। अतः प्रकृते तक्रकौण्डिन्यन्यायेन च्लिप्रत्ययस्य अपवादत्वात्,

अपवादच्लिप्रत्ययप्रवृत्युत्तरं योग्यता सत्वेपि शप्प्रत्ययः न प्रवर्तते इतिअभूत् इत्यत्र पूर्वोक्तापत्तिर्नास्त्येवेति सिद्धान्तः।

**परिशीलितग्रन्थसूची**


1.वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्वबोधिनीसहिता) तृतीयो भागः, मोतीलाल बनारसीदास.1982

2.लघुशब्देन्दुशेखरः(गुरुप्रसादसहितः) आन्ध्रविश्वकलापरिषद्, विशाखपट्टणम्। 1970

3.लघुशब्देन्दुशेखरः(महामहोपाध्यायपण्डितप्रवरभैरवमिश्रविरचितयाचन्द्रकलया टीकया सहितः) चौखाम्बा संस्कृत संस्थान, वारमासी सिटी,2001.

4.महाभाष्यम्(उद्योतपरिवृतदीपप्रकाशितमहाभाष्यम्) चौखाम्बा संस्कृतप्रतिष्ठान, दिल्ली.1990

5.काशिकावृत्तिः न्यासापरपर्यायकारिकाविवरणपञ्चिकया, पदमञ्जरीव्याख्यया च सहिता, प्राच्य भारत प्रकाशन, वारणासी,1965.

6.प्रौढमनोरमा(सटीकटिप्पणशब्दरत्नसहिता)जयकृष्णदास हरिदास गुप्तः, चौखाम्बा संस्कृत सिरीज् आफीस्, बनारस सिटी.1939.

7.परिभाषेन्दुशेखरः नागेशगूढार्थदीपिकया सहितः, आन्ध्रविश्वकलापरिषत्,विशाखपट्टणम् , 1955.

8.परिभाषेन्दुशेखरः, हैमवतीटीकया संवलितः, निदेशकः, संपूर्णानन्दासंस्कृतविश्वविद्यालयः, वारणासी,1975.

9.परिभाषेन्दुशेखरः सर्वमङ्गला सहितः, निदेशकः, संपूर्णानन्दासंस्कृतविश्वविद्यालयः, वारणासी,1987.

10.परिभाषेन्दुशेखरः,वाक्यार्थचन्द्रिकया सहितः, संस्कृतपरिषत्, उस्मानियाविश्वविद्यालयः, हैदराबाद्,1987.

11.परिभाषेन्दुशेखरः, भैरवी,तत्वप्रकाशिका सहितः, चौखाम्बा संस्कृतसंस्थान, वारणासी.

12. वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्वबोधिनीसहिता) प्रथमो भागः, मोतीलाल बनारसीदास.1982

# Women in the pages of the Hitopadeśa

Dr. Jewti Boruah
Assistant Professor
Department of Sanskrit
JhanjiH.N.S. College,
Sivasagar, Assam, India

## ABSTRACT

**Women are the essential part of the society as well as men. Their contribution to the society is undeniable. The position of women of a society indicates the progress of that society. In Indian society, different attitudes towards women have been prevalent from time to time.**

**It is said that literature is the mirror of society. All the aspects of a society are reflected through the literature. Hence, through the literary study we can also know the position of women in a society. In this study, a modest attempt has been made to highlight the attitudes towards the women which are revealed in the *Hitopadeśa* of Narayan Pandit. The book *Hitopadeśa* belongs to that class of compositions which imparts instructions and teachings through fable.**

**Keywords**: ***Hitopadeśa,*Women, Fables, Narayan Pandit, Attitude**

**Introduction:** Fable literature occupies a special place in the Sanskrit Literary world. The *Hitopadeśa* is one of the important works in that group of literature. It was written by Narayan Pandit whose date was considered after 9th century A.D. He received the patronage of the king Dhavalachandra of Bangal. The author Narayan Pandit said that the *Hitopadeśa* provides the skillfulness in speech, diversity in all things and ethics.[1] The author collected the elements of the fables from many works such as the *Pañcatantra* of Visnusarma, the *Kāmandakīya Nītisāra* etc. In this work 17 fables are newly added and other 25 fables are taken from the *Pañcatantra*. Therefore, the *Hitopadeśa* is called as 2nd version of the *Pañcatantra*. It is divided into the four parts as *Mitralābha*, *Mitrabheda*, *Vigraha* and *Sandhi* besides the *kathāmukha* or *prastāvana.*[2]Among those parts, the 3rd part is similar to the 4th part of the *Pañcatantra.* The influence of the *Pañcatantra* is also seen in the narrative and composition style of the *Hitopadeśa.* But, it is notable that the language of the *Hitopadeśa* is more simple, clear, and the fables are short than the *Pañcatantra.*

In this study, an attempt has been made to highlight the aspects in connection to the women which are revealed in the *Hitopadeśa*.

**Objectives:**

The leading objectives of this study are-

1. To give a glimpse of the book *Hitopadeśa*
2. To discuss the attitudes towards the women as found in the selected book
3. To analyse the position of women

**Methodology:** The analytical as well as the descriptive methods are used for the study. Both primary and secondary data are consulted here to prepare this paper. Here, the *Hitopadeśa* of Narayan Pandit, ed. by Narayan Ram Acharya is being used for the relevant notes.

**Discussion**:

The women have been depicted in different forms such as glorious, compassionate, goddess, lustful, adulterer etc. in literary works that have been created over the ages. Women have to play different roles like mother, daughter, wife, lover etc. from time to time. Within these roles, it is common that the scriptural works glorify the role of mother. In the book *Hitopadeśa,* the character, quality, weakness, foolishness, self-sacrifice of man etc. are presented through the fables. Here, the various characters, habits of women are also stated in place to place. Various aspects of women are included here as mother, wife, prostitute etc. and by these aspects female appreciation, women's quality and inferiority, characteristics of a virtuous woman, the means of controlling women etc. are revealed.

**Women as a mother**: Mother is always compassionate to her child. She performs her duties and showers her love upon her child without any self interest.[3] She is always busy for her child's welfare without any expectation in return. In the book taken for discussion, it is said that mother is naturally a friend or well-wisher for her child. But, in the same book, it is also directed that if her son is foolish then a mother should give up her son considering him as excreta.[4] Again, it is said that woman gives her son up when she is in hunger.[5]

**Women are not trustable:** In the *Hitopadeśa,* women are presented as not faithful. It is said that no one should trust on women.[6] Trusting women is like opening the door to death.[7]In addition to it, it is found to be mentioned that friends are more reliable for a man than his wife or any woman.[8]

**Girl child and Barren women:** It is not a good omen when a girl child is born. But, it is better than the birth of a foolish son. The barrenness is also regarded as a bad omen like the birth of a girl child.[9]

**Women are enjoyable by the man:** Women are described as an element of enjoyment for the men. But, it is for a short period[10]. Moreover, the women with new youth make the men feel satisfied. By enjoying the women the men make themselves happy but they should not take care

of the women as taking care of a woman is an obstacle for a man[11].Likewise, it is like a burden for the husband to support his wife whom he does not like[12].

**Ways to know a wife:** One can know his wife in his poor days[13]. During that time, the best wife does not give her husband's company up. It is also mentioned in the *Hitopadeśa* that generally the woman goes to other man giving up her virtuous and rich husband. Therefore, it is an exception to be with her poor husband.

**Comparison between man and woman:** There is a comparison in between man and woman in some aspects like food, readiness of wit, perseverance and passion found in the *Hitopadeśa*. It is said that the food of women is twofold, their readiness of wit fourfold, perseverance six fold and passion eightfold[14].

**Praising of women**: There are very limited place found where the women are praised in the *Hitopadeśa*. She is called as a wife who is obedient to her husband[15].One should protect his wife at the expense of wealth[16]. Again, it is found to be said that the women are naturally wise .the similar thought is repeated in Kalidasa's *Abhijñānaśakuntalam* also[17].Women's readiness of wit is fourfold more than the man etc.[18].

**Quality of a wife:** There is a description found in the *Hitopadeśa* regarding the quality of a woman as a wife. A wife should be expert in the household works, prolific in children, love her husband as her own life, and solely devoted to her husband. She should not be called a wife in whom the husband does not get delight. The place of husband is kept higher than the all deities. Therefore, it is said that when the husband is pleased, all the deities are pleased with women[19]. The husband is most precious ornament of a woman. Without the husband a woman is without grace.[20] Like that, it is also said that the husband is only guru for women[21].

**Duty of a chaste women and its result**: If a husband looked at with angry eyes, and uses harsh words to his wife then also a wife should receive her husband with a cheerful countenance. The worlds of great bliss are (in reverse) for these women who love their husband, whether living in a city or a wilderness, whether reprobate or virtuous. Again, it is said that a women live in the heaven for three (3) corers and a half years who follows her husband in death[22].

**Ways to protect chastity**: It is found to be mentioned that due to only one reason a women can stay as chaste- *i.e.*, not wishing to have sex with others. The other qualities like shame, humility, fear etc are not able to save her chastity[23].

**Women Condemnation:** Women condemnations are found in various places of the *Hitopadeśa*. Women are called adulterer or fornicator in many times. Women remain good only if they do not get space, person and facilities for fornication[24]. Even the women are compared with the cows. Women always want the new person as the cows search for new grass[25]. Therefore, woman breaks up from her husband and goes another wicked man[26]. Women always enjoy the company of other men than their husbands. Therefore, the women are called as *durjanagamyā*[27] (who always goes to wicked person).

Women's passion is very high. It is eightfold than men[28]. It is also found that the woman who has attained youth newly doesn't want an old husband and it is also like poison for the old husband having a young wife[29]. The man who has young wife suffers a lot in his life.

In the *Hitopadeśa*, women are recognized as liar, courageous, deceitful, jealous, greedy, worthless and unholy. These are called the natural faults of a woman[30].

**Reason of women's adultery:** Some factors are defined in the *Hitopadeśa* which make women adulterers. These are-liberty, staying at father's house for a long period, enjoying festivals with others, chatting with male, not following the rule, living with other adulterer woman, old husband, husband's aboard living etc[31]. In addition to these, six more reasons are also stated- drinking wine, living with wicked person, death of husband, roaming without a goal, staying or sleeping at other's house[32].

Moreover, it is also mentioned that woman is spoiled when she stays alone with man. Therefore, man is prohibited from sitting alone even with his mother, sister and daughter[33].

**Liberty and woman:** *" pitā rakṣati kaumāre bhartā rakṣati yauvane/ putraśca sthāvare bhāve na strī svātantrayamarhati//"*[34]

-this well-known verse is found in the *Manusmṛti* and included in the *Hitopadeśa* also. Many scholars have explained it in many ways. It is also already mentioned that liberty is regarded as one of the causes of women's adultery[35]. Therefore," *pitā rakṣati...* "- by this verse, liberty of women is not supported and said that father guards a woman in her childhood, husband in youth and son in old age( from adultery).

**Prostitute:** In the *Hitopadeśa,* the author also makes mention in references to *kuṭṭanī* (who teaches the prostitutes regarding prostitutions and connects in between the prostitute and man.) and prostitute. Here, it is said that a prostitute always decorates herself for others *i.e.*, man[36]. It is common that a prostitute is always adulterous. She should be shameless. If a prostitute is shy she will lose her profession[37].

Regarding *kuṭṭanī*, it is said that in religious matters the opinion of *kuṭṭanī* is not accepted though that has appropriateness[38].

**Happiness and sorrow of a man**: The happiness of man depends on his wife. It is stated in the *Hitopadeśa* that having a beloved and sweet spoken wife is one of the reasons for happiness of man[39]. On the other hand, it is like having an enemy who has a very beautiful wife[40]. Likewise, the young wife for an old man is poisonous[41].

Again, it is mentioned that there is no any man in this world who does not see other's young and beautiful wife[42]. However, it is also mentioned that the wise looks upon other's wife as mother[43]. It is like complete death for him who has a wicked wife. The misadventures performed by a wife hurt the man[44]. Thus, the happiness and sorrow are defined according to his wife's appearance and nature.

**The means of pleasing woman:** It is hard to please a woman. A woman cannot be owned over (make them agree) by any gifts, honour, simplicity, attendance, with a weapon and not with scriptural advice[45]. On the contrary, again it is said that woman can be pleased by gifts and honour. The woman who cannot be pleased with any means should be given-up[46].

**A sideways look of a woman on man:** The appearance of woman has a hypnotic (attractive) power. It is mentioned in many literary works also through the ages. The beautiful appearance of Viṣṇu pretending as *Mohinī* fascinated even Lord Shiva. In the *Hitopadeśa,* it is said that the sideways look of a woman misleads the man and makes him impatient[47].

**Shyness and woman:** Shyness is considered as ornament of a woman. But, in the time of cohabitation she should be bold instead of appearing shy[48]. A prostitute should be always shameless and other woman should be shy[49].

**Woman for treaty**: In old days, woman was a means of treaty between two countries. Such type of treaty was called '*santāna-sandhi*'[50].

From the above discussion, it is clear that the picture of women depicted in the *Hitopadeśa* is not satisfactory. Generally, it is considered that in vedic ages the women bore a high status. On the contrary, through the picture as depicted in the *Hitopadeśa* the status of women was not so good. Here, it is revealed that the status of women is lower than men and the men controlled over the women almost in every aspect. There is no support in respect of liberty of women. From the various statements found in the book *Hitopadeśa*, it is clear that the patriarchal society defined a specific boundary for women's work and movement. From the point of view of men, women are always foolish, unbelievable, and wicked. The indication of *satī prathā* is also observed in the *Hitopadeśa.* The birth of a girl child was not a good omen. From these, it is apparent that the view of the society was not equal towards the male and female. It was the duty of a woman to make her husband satisfied. The 'courage' which was generally regarding as a virtue of a man but, at the same society it was regarded as a fault for a woman.

The society was very much aware about the activities of woman, but in the same time it did not show any interest what a man does. Even the woman was accused of for bad character of a man. Thus, it is noticed that women survived with gender discrimination. Women were used for treaty also between two sovereigns. But there is no any matter revealed in this book regarding the education and health of a woman. Thus, it is noticed that the picture of women depicted in the *Hitopadeśa* is different from the present status of women. It can also be said that here a negative picture of women is presented.

It may be mentioned that the original author's view on women and their activities remain unknown. Because the verses included in the book *Hitopadeśa* are collected from different treatises. But, it is clear that the statements regarding women found in it had an impact on the society of the days of *Hitopadeśa.*

The main purpose of writing the *Hitopadeśa* was to teach the political ethics on the basis of morality. That's why to keep the young princes away from the tricks and desires of women such type of statements were introduced in this book.

Moreover, it can be stated that most of the views towards women which reflected in the *Hitopadeśa* are of adverse type. There is a lot of condemnation of women in the book. The concept of good or bad is accepted or formed time to time and society to society. In the time of writing those books from which the statements are taken such type of opinions towards women may be acceptable. But, now-a-days some opinions have no any relevance or acceptance. It is true that new ones are built by the foundation of the past. People also learn from the past and move towards the path of progress. It is clearly revealed from the picture depicted in the *Hitopadeśa* that due to the adverse attitude towards women, a huge gap was created between men and women. Therefore, women had to lag behind men in terms of education, employment etc. Women had to be victim of evil practice like *Satīdāha*, child marriage etc. Even, till the time of independence, the Indian women could not move satisfactorily and had to be under the control of men. As a result the overall development of the society was obstructed. The development and progress of society is made possible only through the co-operation of both men and women. Only the high status of men can not indicate the progress of the society.

It is true that the social customs, concepts change over time. However, the pace of the change can sometimes be fast or slow. Therefore, the attitude towards women in the past seems to have changed now. Women have been able to attain achievement in various fields with their skills. Of course, in some cases women are still lagging behind. Therefore, it is good for the society to give up the adverse kind of attitudes towards women as mentioned in the *Hitopadeśa*. As it is a book on fables therefore let the adverse attitudes towards women remain as fable. Even if someone reads the book *Hitopadeśa,* it is expected that women's status and dignity will rise only if such ideas are not accepted.

---

[1] *Hitopadeśa, Prastāvikā, 2*
[2] *Ibid, Prastāvikā,9*
[3] *Ibid,Mitralābha,38*
[4] *Ibid, Prastāvikā,17*
[5] *Ibid, Sandhi,54*
[6] *Ibid, Mitralābha,19*
[7] *Ibid, Suhṛdbheda,151*
[8] *Ibid, Mitralābha,210*
[9] *Ibid, Prastāvikā,14*
[10] *Ibid, Mitralābha,181*
[11] *Ibid, Suhṛdbheda,5*
[12] *Ibid, Mitralābh,18*
[13] *Ibid, Mitralābh,72*
[14]*Ibid, Suhṛdbheda,119*
[15] *Ibid, Suhṛdbheda,141*
[16] *Ibid, Mitralābha,42*
[17] *Abhijñānaśakuntalam, 5/23*
[18] *Hitopadeśa,Suhṛdbheda,119*
[19]*Ibid, Mitralābha,200-201*
[20] *Ibid,Vigraha,27*
[21]*Ibid,Mitralābha,108*
[22] *Ibid, Vigraha,25,26,28-30*
[23] *Ibid, Mitralābha,120*
[24] *Ibid, Mitralābha116,*

[25] *Ibid, Mitralābha,117*
[26] *Ibid,Suhṛdveda,117*
[27]*Ibid, Suhṛdveda,156*
[28] *Ibid, Suhṛdveda,119*
[29] *Ibid, Prastāvikā,23*
[30]*Ibid, Mitralābha,199*
[31] *Ibid, Mitralābha,114*
[32]*Ibid, Mitralābha,115*
[33] *Ibid, Mitralābha,119*
[34]*Ibid, Mitralābha,*121 /*Manusaṁhitā,9/3*
[35] *Ibid, Mitralābha,114*
[36]*Ibid, , Suhṛdveda,24*
[37] *Ibid, Mitralābha,138*
[38] *Ibid, Vigraha,64*
[39] *Ibid, Prastāvikā,20*
[40] *Ibid Prastāvikā,22*
[41]*Ibid, Prastāvikā,23,*
[42] *Ibid, Suhṛdveda,131*
[43] *Ibid, Mitralābha,14*
[44] *Ibid, Vigraha,117*
[45] *Ibid, Suhṛdveda,116*
[46] *Ibid,Sandhi,104*
[47] *Ibid, Suhṛdveda,182*
[48] *Ibid, Mitralābha,198*
[49] *Ibid, Vigraha,7*
[50] *Ibid, Sandhi,110*

# कालिदासनाट्यभारतीषु गजचर्चा

डॉ. कृष्णचन्द्रपण्डा
खोर्द्धा, ओडिशा

**उपक्रमः**

महाकविः कालिदासः संस्कृतसाहित्यस्य ध्रुवनक्षत्रं, विश्वसाहित्यस्य गौरीशिखरः, विश्ववाङ्मये सर्वोत्कृष्टः कविरिति प्रथितः । स्वतस्सिध्दभावना- सूक्ष्मस्वभाववर्णनाचातुर्य-प्रकृतिप्रेम-अनिवार्यसन्दर्भेषु अलङ्कारादिप्रयोगः इत्यादि कालिदासस्य इतरभिन्नं वैशिष्ट्यं भवति । उपमालङ्कारप्रयोगे कालिदाससमानः अन्यः न इति कृत्वा **"उपमा कालिदासस्य"** इति उक्तिः अपि जाता। दीपशिखा कालिदासः[i] इति सहृदयमण्डलं कालिदासम् आह्वयति चेत् तस्य कारणम् इन्दुमतिस्वयंवरस्य उपमा एका खलु । अनेनप्रकारेण संस्कृतसाहित्याकाशे सकलकविकुलललामभूतं महाकविकालिदासस्य स्थानं सर्वोपरि वर्त्तते ।

**उदारचरितानां तु वसुधैव कुटुम्बकम्**

निखिलेऽस्मिन् जगति समेषां प्राणिनाम् अस्तित्त्वं स्वतन्त्र स्थानं भजन्ते । प्रकृत्या सर्वेभ्यः प्राणिभ्यः पृथक्-प्रथक् स्वभावः प्रवृत्तिश्च प्रदत्ता । सर्वे स्वस्योत्तरदायित्त्वं निर्वहन्ति । तदुक्तं यथा मनुस्मृत्याम्-

**एतद्देश प्रसूतस्य सकाशाद् अग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याः सर्वमानवाः।।**[ii]

समेषां प्राणिनां वशादेव अस्याः पृथिव्याः पारिस्थितिकतन्त्रं स्वच्छतां प्राप्नोति । पृथिव्यां समेषां प्राणिषु अविभाज्यसम्बन्धम् अस्ति । मानवजीवने आदिकालाद् जन्तुनां महनीयमुपयोगिता अस्ति । पुराकालेऽपि मानवैः पशवः पाल्यते स्म । यतोहि मानवः विवेकशीलप्राणी मन्यते । अतः ये जन्तवः पालनयोग्याः सन्ति, तानपि मनुष्येण स्वबुद्धिकौशलेन वशीभूतं कृत्वा विविधकार्येषु प्रयुक्तम् । पृथिव्यां बहवः जन्तवः निवसन्ति यथा – गो, अश्वः, गजः, कुक्कुरः, गर्दभः,वानरः, इत्यादयः । जन्तुपालनेन मानवानां तेषाम्प्रति अनुरागः वर्धितम् । न केवलम् उपयोगितादृष्ट्या प्रत्युत आह्लादप्राप्तिवशादपि मानवानां प्रेमः जन्तून् प्रति वर्धितम् । तस्मात् उदारप्रवृत्तिजनैः नैकान् जन्तून् स्वस्नेहीदृशः पालितः । अत्र उक्तिरियं चरितार्थं भवति यतोहि-

**अयं निजः परोवेति गणना लघुचेतसाम्**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

अतः कवीभिः मानवानां अङ्गानां गुणानां च सादृश्यं जन्तुषु अनुभूतम् । यतः कविः स्वयं हि स्वस्य कृतिषु सृष्टापदम् अलङ्करोति । सः यद् वाञ्छति तद् कर्तु प्रयतते । तदर्थमुक्तम् अग्निपुराणे –

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथैदं परिवर्तते ।।**[iii]

**सूचकशब्दाः** – काव्य-नाट्य, संस्कृतवाङ्मय, गजचर्चा, कालिदासः

**विषयप्रवेशः**

काव्येषु कविभिः जन्तुनाम् अभिव्यञ्जना विदग्धतया कृता तत्र नाटकेषु एतेषां चर्चा कविकर्म पुष्णाति । संस्कृतवाङ्मये नाटकानां महिमा अद्भुतः अस्ति। यथा आहुः कालिदासेनापि – **काव्येषु नाटकं रम्यम् ।**[iv] संस्कृतनाटककाराभिः जन्तुनां विषये मात्र संकेतेभ्यः नैके रोचकतथ्यानि प्रस्तुतानि । संस्कृतनाटकेषु यत्र एकस्मिन् क्रमे मानवजीवनस्य विविधपक्षाणां क्रियात्मकव्यवहारस्य बोधः भवति तत्र द्वितीये क्रमे प्रकृत्यामुपलब्धानां

वनस्पतीनां एवञ्च जन्तूनाम् अपि परिचयः अस्माभिः प्राप्यते। क्रमेऽस्मिन् बहवः जन्तवः संस्कृतनाटकेषु स्थानं प्राप्तवन्तः तेष्वेव गजस्य स्थानं सुदृढं भाति।

**गजस्य स्वरूपम्**

एकः बलशाली विशालकाय पशुत्वेन विद्यते गजः। संस्कृतभाषायां गजस्य कृते एतानि नामानि स्वीक्रियते- हस्ती, दन्ती, पद्मी, करिन्, द्विपः, सिन्धुरेत्यादयः। गजः द्वाभ्यां मुखशुण्डाभ्यां पिबतीति द्विपः उच्यते। गजस्य उच्चता अन्युनः १० फीटः इति भवति। गजः मूलतः अरण्यपशुः वर्तते। किन्तु अमुम् सारल्येन पालितुं शक्यते। प्राचीनसमये एतेषां बाहुल्यता आसीत्। गजाः समुहे निवासकरणे सुखम् अनुभवन्ति। एतेषां वयः अन्युनः शतं तः पञ्चविंशति यावत् भवति। शक्तिभद्रेण वीणावासवदत्तम् नाटके इथम् गजस्य लक्षणं दत्तम्-

**समसितनखराग्रः कार्मुकाकारवंशः**
**सुहनुकटललाटो दीर्घपुच्छो दृढांसः।**
**प्रथुतरमुखकर्णो व्यायतावृतहस्तो**
**जलधरगुरुमेघश्याम पूर्णोच्छिताङ्गः॥**[v]

**विषयवस्तुः**

संस्कृतकविभिः नाटककाव्येषु गजचर्चा यथावश्यकता कृता। अनेनप्रकारेण कविकुलगुरु कालिदासेन स्वसु नाटकेषु प्रसङ्गानुकूलम् गजस्य कृते स्थानं दत्तम्। अभिज्ञानशाकुन्तलस्य प्रथमाङ्के एकोनत्रिंशत् कण्वस्य तपोवने उरद्रवति। तदुक्तं अभिज्ञानशाकुन्तले प्रथमाङ्के –

**तीव्राघातप्रतिहततस्तम्भलग्नैकदन्तः**
**पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः।**
**मुर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथः**
**धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः॥**[vi]

पुनः अभिज्ञानशाकुन्तले कालिदासेन दुष्यन्तस्य प्रसङ्गे गजस्य चर्चा कृता। अनया चर्चया तत्र वनेषु गजस्य शक्तेः अटनस्य च विषये ज्ञानमस्माभिः प्राप्यते। उक्तं यथा- द्वितीयाङ्के –

**अनवरतधनुर्ज्यास्फालन क्रुर पूर्वं,**
**रविकिरणसहिष्णु क्लेशलेशशैरत्रभिन्नम्।**
**अपचितमपि गात्रं व्यादातत्त्वादलक्ष्यं**
**गिरिधर इव नागः प्राणसारं विभर्ति॥**[vii]

यथा कस्मिन्नपि कार्ये सम्यक् मार्गदर्शनम् अभीष्टम् औषधिरुपेण कार्यं करोति अतः गजस्य कृतेऽपि निर्देशनस्वश्यकता भवति। समुहस्य यः नेतृत्त्वं करोति सः नायकः भवति। अतः जन्तुष्वपि नायकः भवति एवञ्च यः वने गजसमूहस्य नेतृत्वं करोति सः युथपति उच्यते। वने गजः युथपनिर्देशानुसारं भ्रमति युथपेन हि एतेषां भ्रमणस्य विश्रामस्य व्यवस्था क्रियते। अतः अभिज्ञानशाकुन्तले कालिदासेन गजस्य गुणोऽयं नृपे संदर्शितम्। तद्यथा पञ्चमाङ्कस्य पञ्चम श्लोके -

**प्रजाः प्रजाः स्वा अव तन्त्रयित्वा**
**निषेवते श्रान्तमना विविक्तम्।**
**यूथानि सञ्चार्य रविप्रतप्तः**
**शीतं दिवा स्थानमिव द्विपेन्द्रः॥**[viii]

इतोऽपि महाकविकालिदासेन मेघदूतखण्डकाव्ये यक्षस्य विरहवेदनायाः यद् वर्णनं कृतं तस्य महिमा सामान्यः नास्ति तद् विरहवेदना जन्तुष्वपि विराजते। अतः कविकुलगुरु कालिदासेन स्वस्य विक्रमोर्वशीयम् नाटके गजस्य विरहवेदनायाः एतादृशं मार्मिकं वर्णनं कृतं यद् पठनेन स्वभाविकतया मनसि चित्रमुपस्थितं भवति । तदाहुः चतुर्थाङ्के विक्रमोर्वशीयमनाटके नेपथ्ये –

**दयितारहितोऽधिकोदुःखितो विरहानुगतः परिमन्थरः।**
**गिरिकानने कुसुमोज्ज्वले गजयुथपतिर्बहुक्षीणगतिः।।**[ix]

पुनः तत्र विक्रमोर्वशीयं नाटके गजस्य चर्चा तस्मिन् रूपे कृतं यदा विरहवेदनया ग्रसित नायकः स्वस्य प्रियां द्रष्टुमेच्छा मनसि निधाय किमपि कर्तुं प्रयतते । तदाहुः विक्रमोर्वशीयस्य चतुर्थाङ्कस्य एकोनविंशतिश्लोके नेपथ्ये –

**सम्प्राप्त विसूरणः त्वरितं परवारणः ।**
**प्रियदर्शनलालसो गजवरो विस्मितमानसः।।**[x]

**उपसंहारः**

एवम् प्रकारेण निष्कर्षत्वेन एतेभ्यः श्लोकेन ज्ञायते यत् कालिदासेन न केवलं स्वस्य नाटकेषु नायकनायिकादीनां वर्णनं स्वच्छन्दतया कृतम् प्रत्युत जन्तुषु गजस्यापि विदग्धतया चर्चा कृता । गजस्य चर्चया कालिदासस्य नाटकानां कथावस्तु समीचीनरीत्या सम्पोषयते । भारतीयसंस्कृत्यां गजः शुभः मन्यते । गृहनिर्माणकलायां गृहद्वारेषु प्रायः अस्य चित्रं निर्मीयते। सर्वान् विदितमस्ति भगवत् उमाशंकरस्य पुत्रः विघ्नविनाशक श्रीगणेशस्य मुखं गजस्येव वर्तते । तस्मात् कारणादेव गजानन, गजतुण्डः इति नाम्ना श्रीगणेशः विख्यातः । अतः गजस्य वर्चस्वं जन्तुषु असामान्यं प्रतीयते।

**अन्त्यटिप्पणी**

---

[i] सञ्चारिणी दीपशिखेवरात्रौ यं यं व्यतीयाय पतिंवरा सा
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।रघुवंशम्,६.६७

[ii] मनुस्मृतिः,२.२०

[iii] अग्निपुराणम्,३३९.१०

[iv] अभिज्ञानशाकन्तलम्

[v] वीणावासवदत्तम्, २.११

[vi] अभिज्ञानशाकन्तलम्, १.३२

[vii] अभिज्ञानशाकन्तलम्, २.४

[viii] अभिज्ञानशाकन्तलम्, ५.५

[ix] विक्रमोर्वशीयम्, नेपथ्यम्

[x] [x] विक्रमोर्वशीयम्, ४. १९

**परिशीलितग्रन्थसूची**

1.Agnipurana, S. Khemraj shrikrishna Das, Mumbai, 1959
2.रघुवंशम्,डॉ.कृष्णमणि त्रिपाठी,चौखम्बासंस्कृतप्रतिष्ठानम्,नईदिल्ली,२००८
3.रघुवंशम्,प्रो.वी. कुटुम्बशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्,नईदिल्ली,२००२
4.विक्रमोर्वशीयम्, कृष्णदास अकादमी, वाराणसी,प्र.सं.,१९८९
5.कालिदासग्रन्थावली, प्रो.मिथिलाप्रसाद द्विवेदी, कालिदाससंस्कृतअकादमी, उज्जैन, तृतीयसंस्करणम्, २००८
6. Manu Smrti, Ed. Ram Sharma Acharya, Samskriti Samsthan,Bareli,1993
7.अभिज्ञानशाकुन्तलम्,चौखम्बा सुरभारती प्रकाशनम्,वाराणसी,.सं.वि,२०५६
8.अभिज्ञानशाकुन्तलम् ,भण्डारकरइस्टीट्युटपुणे, ,१९६५
9. वीणावासवदत्तम्, चौखम्बा सुरभारती प्रकाशनम्,वाराणसी,१९९८

# अद्वैतवेदान्तसिद्धान्तानुसारेण कूटस्थस्वरूपः विचारः

राधेश्याम वारिकः
शोधच्छात्रः, संस्कृतविभागः
पाण्डिच्चेरी विश्वविद्यालयः

शोधसारः-

शोधनिबन्धस्य प्रस्तावनायामादौ अद्वैतवेदान्ते दृक् दृश्य भेदेन पदार्थद्वयं प्रदर्श्य तस्य सत्तात्रयमं चोल्लिखितम् । ततः परं कूटशब्दस्य व्युत्पत्तिः तथा तस्याः स्वरुपविषये च नैकाः विद्वांसः प्रोक्तवन्तः। तत् कूटस्थं तस्मिन् कूटे स्थितं कूटस्थं तदध्यतया , अथवा राशि इव स्थितं कूटस्थं तदेव अचलं,ध्रुवं,नित्यं इत्यर्थः। अत्र कूटः राशिइव स्थितः अथवा कूटो माया, वञ्चना, जिह्मता, कुटिलता इति पर्यायवाची उच्यते इति अस्य शोधनिवन्धस्य प्रतिपाद्यमानमुख्यविषयरुपेण चर्चिताः । श्रीमद्विद्यारण्य चित्वातुविध्यमङ्गीकुर्वन्ति ।यथा घटाकाश-महाकाश-जलाकाशाभ्राकाशवत् चातुर्विध्यं कूटस्थ-ब्रह्म-जीवेश भेदेन अत्र प्रतिपादयति । देहे विकारे जायमाने अपि अयं तु निर्विकारः चैतन्यरूपः ।अतः आत्मा कूटस्थः इति व्युत्पत्तिः प्रदर्शितः। अतः कूटस्थः आत्मा स्वरुपः वर्णितम् । कूटस्थे प्रतिविम्बितः यः अन्तकरणं वा कूटस्थे कल्पितं अन्तकरणं तत्र प्रतिविम्बितं चैतन्यं चिदाभासोच्यते।। अहं शब्देन यः चिदाभास उच्यते तस्य वास्तवरुपं ब्रह्मैव भवति । यथा स्थाणुः वास्तवरुपं पुरुषः एव तद्वत् अहं शब्दस्य चिदाभासस्य यः अधिष्ठानः ब्रह्म तदैव तस्य स्वरुपं भवति । देहविकार परिणतेभ्यः भूतेभ्यः अयं चिदाभास उत्पद्यते नश्यति च । कूटस्थस्य चिदाभास श्रयत्वं वन्धः तत् विनाशो मोक्षः इति कूटस्थे देहद्वयं कल्पितम् । कूटस्थः स्वावच्छेदकस्य देहद्वयस्य निर्विकारत्वेन साक्षी इति विचारः। अतः सोऽयं विचारः अस्य प्रबन्धस्य मुख्यविषयो भवति ।

कूटशब्दः – अद्वैतवेदान्तः, कूट,दृक् दृश्य, चित्त, आत्मा, चिदाभास, देहद्वय, माया,

**प्रस्तावना**

अद्वैतवेदान्ते पदार्थद्वयमेवाङ्गीक्रियते दृक् दृश्य भेदेन, तत्र दृक्पदार्थः आत्मा पारमार्थिकः सत्ता एक एवऽपरं श्च आत्मव्यतिरिक्तः अविद्या तथा माया वा, यद्यपि अद्वैतानां मते प्रपञ्चस्य कृत्स्नस्यऽविद्यकत्वेन स्वाप्निकपदार्थ तुल्यत्वात् तन्निरूपणं व्यर्थं इति अङ्गीकुर्वन्ति । दृक्पदार्थ एकोऽप्यात्मा औपाधिकभेदेन त्रिविध उच्यते – ईश्वरो जीवः साक्षी चेति। अद्वैतसिद्धान्तऽङ्गीक्रियते सत्तात्रयं यथा पारमार्थिकं व्यावहारिकं प्रातिभासिकं च । तत्र पारमार्थिक सत्ता तु ब्रह्मसत्ता एवं शुक्तिरजतादि प्रतिभासिक सत्तायामेव तदतिरिक्त सत्ता अपि जगति प्रपञ्चस्य व्यवहारिकसत्ता स्वीक्रियते । अद्वैतवेदान्ते मुख्यतया जीवेश्वरयोः ब्रह्मजीवयोः, आत्मा तथा अविद्या, अज्ञान ,कूटस्थ , मायाया इति विषये वर्णितमस्ति । श्रीमद्विद्यारण्य चित्वातुविध्यमङ्गीकुर्वन्ति । घटाकाश-महाकाश-जलाकाशाभ्राकाशवत् चातुर्विध्यं कूटस्थ-ब्रह्म-जीवेश भेदेन तत्रैव कृतमस्ति । कूटस्थनित्यदृक्स्वरुपमात्मानं प्रतिबुध्य अस्माच्छरीराभिमानात्समुत्तिष्ठन स एव कूटस्थनित्यदृक्स्वरुप आत्मा भवति – ल यो ह् वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति , इत्यादि श्रुतिभ्यः वर्णितम् । एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया, मायया मायाविवत् , अनेकधा विभाव्यते, नान्यो विज्ञानधातुरस्तीति ।

नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन्नसङ्गे परमात्मनि तद्विपरीतं जैवं रुपं व्योम्नीव तलमलादि परिकल्पितम्।

**कूटस्थ स्वरूपं**

कूटस्थ इति शब्द वेदान्तेषु नैकत्र दृश्यते। विशेषाभिप्राये कूटस्थे जितेन्द्रियः एवं कूटस्थं क्षरं उच्यते , कूटस्थं अचलं ध्रुवं इत्यैव नैकत्रं गीतायां कूटस्थः शब्दः श्रूयते । भगवद्पादैः भाष्यकारैः गीतायां प्रदर्शितं – **ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः। इत्युच्यते योगे समलोष्टास्म काञ्चनः** ।।[1] अत्र भाष्यकारैः कूटस्थ शब्दस्य - अप्रकम्प्य ,अविचल वा अयमेवार्थः दर्शितः । तथैव गीतायां द्वादशोऽध्याये प्रोक्तम् **- ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम** ।।[2] शङ्कराचार्येण प्रोक्तं दृष्यमाणगुणम् अन्तदोषं वस्तु कूटं कूटरूपं कूटसाक्ष्यं इत्यादौ। कूटशब्दः प्रसिद्धो लोके तथा च अविद्यादि अनेकसंसारबीजम् अन्तर्दोषवद् माया व्याकृतादि शब्दवाच्यं। यथा -- **माया तु प्रकृतिं विद्यन्मायिनं तु महेश्वरम्** ।।[3] इत्यादौ प्रसिद्धं यत् तत् कूटस्थं , तस्मिन् कूटे स्थितं कूटस्थं तदध्यतया , अथवा राशि इव स्थितं कूटस्थं तदेव अचलं,ध्रुवं,नित्यं इत्यर्थः।

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

**क्षर सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते** ।।[4]

अर्थात् अत्र कूटः राशिइव स्थितः अथवा कूटो माया वञ्चना जिह्यता कुटिलता इति पर्यायवाची उच्यते। मधुसूदन सरस्वतिना प्रोक्तम् -- कूटस्थः भगवान मायाशक्तिरूपः कारणोपाधिः संसार-बीजत्वेनानन्त्यदक्षरोच्यते। क्षराक्षरोपधिद्वियदोषेणास्पृष्टो नित्यशुद्धवुद्ध मुक्त स्वभाव उत्तमः। आनन्दगिरि महभागानां मते – कार्यकारणाख्यौ राशी दर्शयित्वा कूटस्थ दर्शयति। तथैव श्रीधरस्वामिमते -- कूटस्थ श्चेतनो भोक्ता।। अतः कूटशब्दः, कूटसाक्ष्यं, कूटनीति , इत्यादौ वञ्चना इत्यस्मिन्नर्थै प्रयुज्यते। अतः वञ्चना माया जिह्वतां इत्यस्मिन्नार्थे लोके अपि कूट शब्दः प्रसिद्धत्वात्। अत्र तु कूटशब्देन माया गृह्यते। अतः कूटस्थ इत्यस्मिन् कोऽर्थः – कूटे मायायाः तिष्ठति। मायायां तदध्यक्षतया तदधिष्ठानतया तिष्ठति अतः कूटस्थः। अतः प्रोक्तं -- **माया तु प्रकृतिं विद्याम् मायिनिं तु महेश्वरम्** ।। [5]

अर्थात् दृश्यमानं गुणं अंन्तदोषं यत् वस्तु तदेव कूट शब्देन विधीयते। अतः मायाऽपि तादृशी एव वर्त्तते एवं तस्याः अध्यक्षस्थानीया भवति । ईश्वरः परमात्मा अतः सः कूटस्थः इति भाष्यकारैः अर्थः वर्णितः । अद्वितीयब्रह्मात्मैक्यविज्ञाननिरुपण एव प्रवृत्तस्यैतच्छास्त्रस्य मिथ्याभूतपदार्थस्य विभागनिरुपणे न तात्पर्यमस्ति। तथाप्यध्यारोपापवादन्यायेनाद्वितीय ब्रह्मप्रतिपत्ति साधनत्वेन पदार्थविभागनिरुपणं पूर्वाचार्यैस्तत्र तत्र कृतमेव।

---

[1] गीता .6.8

[2] गीता- .12.3

[3] श्वेताशवतर. उ.- 3.4.10

[4] गीता - 15.16

[5] श्वेताश्वतर .उ.-3.4.10

पदार्थविभागे तात्पर्याभावादेव तत्र विविधा रीतिराश्रिता वर्तते। क्वचित् न्यायोक्तैव प्रक्रिया आदृता क्वचिदन्यादृशी आदृता भवति। सिधान्तबिन्दुप्रदर्शितः ग्रन्थकारदिशा इदानिं प्रकारो निरुप्यते। अद्वैतवेदान्तशास्त्रे द्विविधः पदार्थः स्वीक्रयते- दृक् दृश्यश्चेति। तत्र दृक्पदार्थ आत्मा भूतभविष्यत् वर्तमान कालेष्वेकरुप एक एव। द्क्पदार्थ भिन्नो मिथ्याभूतः प्रपञ्चो दृश्यः। इदानीं अनयोः द्वयोः पदार्थयोरवान्तरभेद वर्ण्यन्ते।

दृक्पदार्थ एकोऽप्यात्मा औपाधिकभेदेन त्रिविध उच्यते – ईश्वरो जीवः साक्षी चेति। अज्ञानोपहितं बिम्बचैतन्यमीश्वरः। एवं अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति विवरणकाराः वर्णितम्। तथैव अज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः बुद्धिप्रतिबिम्बितं चैतन्यं जीव इति संक्षेपशारीरिककाराः। अयमेव पक्षः प्रतिबिम्बवाद इत्याचक्षते। दर्पणाद्युपाध्यन्तर्गततत्ये सत्यौपाधिकपरिच्छेदशुन्यत्वे च सति बहिः स्थितस्वरुपत्वं प्रतिबिम्बित्वम्। दर्पणाद्युपाध्यनन्तर्गतत्वे सत्युपाध्यन्तर्गतपाऽभिन्नबहिः स्थितत्वं बिम्बत्वम्, इति रत्नावल्यां वर्णितम्। अतः बिम्बत्वेन प्रतिबिम्बत्वेन जीवेश्वरयोः कल्पितत्वादौपाधिकत्वम्। अतः बिम्ब प्रतिबिम्बयो अनुगतं चित्स्वरुपं तत्राधिष्ठानं साक्षीत्युच्यते। परन्तु संक्षेपशारीरकपक्षे बिम्बभूतं चैतन्यमेव साक्षी। अवच्छेदवादि वाचस्पतिमिश्राणां मतेऽज्ञाननिषयीभूतं चैतन्यमीश्वरः। एवं अज्ञानाश्रयीभूतञ्च तज्जीवः। अस्मिन् पक्षेऽविद्योपहित एव साक्षी। जीवोपाध्यविद्यायामपि सत्त्वादयो गुणाः सन्ति त्रयः। तथापि ते त्रिगुमात्मकमूलप्रकृतेः कार्यरुपाः। अतोऽत्र कारणिभूतशब्देनाकार्यभूत इत्यवगन्तव्यम्। ईश्वरोऽपि पुनस्त्रिविधः यथा स्वोपाधिभूतमायागुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात्। कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः, कारणीभूतरजोपहितो ब्रह्मा। कारणीभूततमोपहितो रुद्र।एकमेकस्यापि दृक्स्वरुपस्य परमात्मनोऽवान्तरभेदाः काल्पनिकाः सम्भवन्ति। जीवोऽपि त्रिविधः – स्वोपाध्यवान्तरभेदेन विश्वतैजसप्राज्ञभेदात्। अविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदवस्थाभिमानी विश्वः। प्रवेशार्थकः विश् धातु भवति। जाग्रदवस्थायां स्थूलशरीरपर्यन्तं जीवस्य प्रवेश भवति ,तस्माद्विश्व इत्युच्यचे। स्थूलशरीराभिमानरहितोऽविद्यान्तःकरणोपाधिद्वयावच्छिन्नस्तेजस,इत्युच्यते।अन्तःकरण संस्कारावच्छिन्नाविद्यामात्रोपहितः प्राज्ञः। प्रकर्षेणाज्ञः प्राज्ञः। एतेषां त्रयाणामपि स्वतन्त्रोपाधि भेदाभावादेकत्वमवान्तरभेदसद्भावाद्भेदः। सिधान्तबिन्दुदिशा साक्षी तु एक एव सर्वानुगतस्तुरीयाख्यः। परन्तु वेदान्तपरिभाषाकारास्तु जीवसाक्षीश्वरसाक्षी इति साक्षीभेदद्वयमाचक्षते।

**चित्त चातुर्विधं**

श्रीमद्विद्यारण्य चित्चातुविध्यमङ्गीकुर्वन्ति। तथाह्योकस्यापि चित्रपरस्य धौतो घट्टितस्य लाञ्छितरञ्जितश्चेति भेदो भवति तद्वदेकस्यापि चैतन्यस्य चिदन्तर्यामी सूत्रात्मा विराट् चेत्यवस्थाचतुष्टयं परिकल्प्यते। पञ्चदश्यां तदुक्तम् –

**यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः**

**चिदन्तर्यामी सूत्रात्मा विराट् चात्मा तथोर्यते।।**

अत्र शुभ्रः पटो द्रव्यान्तरसम्बन्धी धौत इत्युच्यते। अन्नेन लिप्तश्च घटित इति , मषीयैराकारैर्युक्तो लाञ्छित इति, यथा योग्यं वर्णैः पूरितो रञ्जित इति चोच्यते। तद्वेदेव शुद्धां मायां तत्कार्यरहितं चैतन्यं चिदित्युच्यते। मायासम्बन्धादन्तर्यामीत्यपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मेति,पञ्चीकृतकार्यसमष्टिस्थूल शरीरोपाधिसम्बन्धाद्विराडिति चोच्यते। इयं चित्चातुर्विध्य भवति। एवमेव प्रकारेण दृक्स्वरुपस्य चैतन्यस्य घटाकाश-महाकाश-जलाकाशाभ्राकाशवत् चातुर्विध्यं कूटस्थ-ब्रह्म-जीवेश भेदेन तत्रैव कृतमस्ति। दृश्यं नामाविद्यातद्व्याप्यतत्कार्यात्मकःप्रपञ्चोदृगध्यस्तोमिथ्याभूतंवस्तु।अनाध्यविद्याचित्सम्बन्धदिस्तदव्याप्यशब्देन ग्राह्यस्तेषां कार्यत्वायोगात्। इदञ्च दृश्यं त्रिविधम्-अव्याकृतममूर्तं मूर्तञ्चेति। अविद्या- अविद्याचितोर्यगो जीवेशयोर्भेदोऽविद्यायां चिदाभासत्वेन चत्वारः पदार्था अव्याकृतशब्दवाच्याः। सा जडापि स्वरुपतः स्वच्छा

यस्यामात्मचैतन्यप्रतिबिम्बो भवति । स एव चिदाभास इत्युच्यते । अनन्तरं पञ्चदशीकारस्तु तत्र चित्तं चतुर्विधं प्रक्रियायां एव वर्णयति कूटस्थो जीवब्रह्मसौ इत्येव चित्तं चतुर्विधं । यद्यपि लोके चित्तशास्त्रे आधिक्येन चित्तं त्रिविधं प्रक्रिया प्रसिद्धा वर्तते , परन्तु अत्र तु कूटस्थ ब्रह्म जीवेश इत्यैव चित्त तु चतुर्विधं उपस्थापितम् ।

**कूटस्थो ब्रह्मजीवेषावित्येवं चचिच्तुर्विर्धा**

**घटाकाशमहाकाशौ जलकाशाभ्रखे यथा ।।[6]**

**घटावच्छिन्नखेनीर यत्तत्र प्रतिबिम्बितः ।**

**साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते ।।[7]**

**महाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते**

**प्रतिविम्बतया तत्र मेघाकाशो जले स्थितः ।।[8]**

पञ्चदशीकारैः प्रोक्तं --- घटाकाशो महाकाशौ जलाकाशा साभ्रनक्षत्र अस्य अयमेवार्थः यथा एकोऽपि आकाश उपाधितः अनेको भवति । तद्वत् आत्मानं अपि एकोऽपि अनेको भवति उपाधितः तत्र यथा - घटाकाशः – घटावच्छिन्नाकाशः घटाकाशः । महाकाशः- महाकाश अवच्छिन्न आकाशः महाकाशः। महाकाशो मध्ये मण्डलं मध्यवर्ती तुषारः , तुषारेषु प्रतिबिम्बितः आकाशः मेघाकाशः , अनन्तरं जलाकाशः घटस्य जले प्रतिबिम्बितः साभ्रनक्षत्र आकाशः जलाकाशः इति एकोऽपि आकाशः यथा चतुर्विधं भवति । तस्मादेव कूटस्थ ब्रह्मः , जीवः , ईश्वरः इति चित्त चैतन्यं चतुर्विधम्। तत्र अनवछिन्नं चैतन्यं ब्रह्म , मायायां स्थितं प्राणिनां धिवासनासु प्रतिबिम्बितः ईश्वरः कूटस्थः चिदाभास इति विशेषः ज्ञातव्यः।।

**कूटस्थ आत्मा स्वरूपं –**

अधिष्ठानतया देहद्वय अनवछिन्नः चेतनः कुटवत् निर्विकारै स्थितः कूटस्थः उच्यते । देहद्वयस्य अधिष्ठानतया यत् चैतन्यं यस्य निर्विकारः देहद्वारे विकारे सम्भवे च यः निर्विकारतया तिष्ठति सः कूटस्थः । अतः अत्र तु कूटशब्दस्य कोऽर्थः इत्युक्तौ यस्मिन् स्वर्णकारः काष्ठलङ्ग पिण्डविशेषे अयं पिण्ड विशेषः कूटः , यस्मिन् स्वर्णकारः वस्तु अन्तर्यः स्थापयित्वा ताडयति तेन ताडनेन वस्तुनि विकारः जायते, किन्तु आधार भूतायां शिलायान्तु न कोऽपि विकारः भवति। सः कूटः शब्दस्य अर्थः । कूटवन्निर्विकारेणेति स्थितः इति कूटस्थः । देहे विकारे जायमाने अपि अयं तु निर्विकारः चैतन्यरूपः ।अतः आत्मा कूटस्थः इति व्युत्पत्तिः प्रदर्शितः ।। यथा दर्पणात् प्रतिबिम्बं प्रोक्तं –

**खादित्यदीपिते कुडये दर्पणादित्यदीप्तिवत्**

---

[6] पञ्चदशी – 6.18

[7] पञ्चदशी -6.19

[8] पञ्चदशी -6.20

**कूटस्थभासतो देहो धीस्थजीवेन भास्यते ।।**[9]

**संघातोऽखिलोवृत्तीनाम भावश्चाभासिताः ।**

**निर्विकारेण येनासौ कूटस्थ इति चोच्येत ।।**

बृह् धातोः बृहत्वात् बृंहणत्वात् ब्रह्म इति सामान्यं ब्रह्मशब्दनिर्वचनम् , "बृहत्वादबृंहणत्वात्दात्मैव ब्रह्मेति गीयते इतिभासती । ब्रह्मन्नवच्छिन्नचैतन्यम्, निखिलनामरुपात्मक प्रपञ्चकारेण परिणममानमोपाधिष्ठानमिति , सर्वतन्त्रसिद्धान्तपदार्थलक्षण संग्रहः । ब्रह्मशब्दस्यहिव्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते , बृहतेर्धातोरर्थावगमात् , इति ब्रह्मसुत्रशङ्करभाष्यम् । ब्रह्मणः चिद्रूपेण ज्योतिषां ज्योतिरिति, देशातीरुपेण "स होवाच यद्रर्ध्वं ओतप्रोतश्चेति", कालातीतरुपेण पराश्त्रिकालात्, ईश्वररुपेण ,"मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" , इत्यादीनि ब्रह्मप्रतिपादकपराणि उपनिषदवाक्यानि ब्रह्मणि उपलभ्यन्ते । ब्रह्मणः स्वरुप लक्षणं तटस्थ लक्षणमिति द्विविधं वर्तते । सत्यं ज्ञानमनन्तं ब्रह्म इति ब्रह्मणः स्वरुपलक्षणमिति अद्वैतिनः कथयन्ति । तथा च अद्वितीय परब्रह्म सत्यात्मकं ज्ञानात्मकं अनन्तात्मकश्चास्ति ।ब्रह्मणः अयमेव स्वरुपः । स्वरुपलक्षणं साक्षाद्वस्तु परिचायकं चेत् तटस्थलक्षणेन उपलक्षणेन च सूच्यते । स्वरुपलक्षणेनावगन्तुं दुष्करं भवति, अगोचरत्वात्, अवेधत्वात् ब्रह्मवस्तुस्वरुपगतिः कथम् ..। ततः तत्र तटस्थलक्षणेनपि लक्ष्यवोधो सुलभः भवति । अतः जन्माद्यस्य यतः इति जगज्जन्मादि कारणत्वं ब्रह्मणः तटस्थलक्षणम् । कारणत्वं विहाय कर्तृत्वमच्यते चेद् अविद्यायामतिव्याप्तिर्भवदिति शङ्का नास्ति । यच्च यावत्लक्ष्य भावितामनुपेत्यापि व्यावर्तकं सत्लक्ष्यैकदेशे वर्तते, तथा व्यावर्तकमपि जायते तदेवतटस्थ लक्षणम् , काकोपविष्टं देवदत्तस्य गृहम् इति काकाधिकरणवत् उपपत्तेः । अत्रापि ब्रह्मणः तटस्थ लक्षणं । अज्ञानेनैव ब्रह्मणः कारणत्वमिति सिद्धम्। परमाणुवत् आरम्भकरुपं वा प्रकृतेरिव परिणामित्वरुपं वा न तथा ब्रह्म कूटस्थत्वात् । ब्रह्म विवर्त जगत् इति मायावादिनां सिद्धान्तः ।

आत्मा वा अरे द्रष्टव्यः , य आत्मापहतपाप्मा.. सोऽन्वेष्टव्यः स विजिज्ञासितव्यः , आत्मानमेव लोकमुपासीत, ब्रह्म वेद ब्रह्मैव भवति, इत्यादिषु विधानेषु सत्सु , कोऽसावात्मा , किं तद्ब्रह्म . इत्याकाङ्क्षायां तत्स्वरुपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः – नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः । तदुपासाननुप्रवेशे तु वस्तुमात्रकथने हानोपादानासंभवात्, सप्तद्वीपा वसुमती ,राजसौ गच्छति ,इत्यादिवाक्यवद्वेदान्तवाक्यामानानर्थक्यमेव स्यात् । ननु वस्तुमात्रकथनेऽपि रज्जुरियम्, नायं सर्पः इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति , अप्राणो ह्यमनाः शुभ्रः , असङ्गो ह्ययं पुरुषः इत्यादिश्रुतिभ्यः । अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम् । इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिः स्वभावम्, यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते , तदेतदशरीरत्वं मोक्षाख्यम्-

ब्रह्मसूत्रभाष्ये उत्तराच्चेदाविर्भूतस्वरुपस्तु अधिकरणे अथेदानीं मृतस्येवामृतसेकात् पुनः समुत्थानं जीवाशङ्कायाः क्रियते । तत्र हि य आत्मापहतपाप्मा, इत्यपहतपाप्मत्वादिगुणकमात्मानमन्वेष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय, य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा, इति ब्रवन् अक्षिस्थं द्रष्टारं जीवात्मानं निर्दिशति । यतस्तत्राप्याविर्भूतस्वरुपो जीवो विवक्ष्यते । आविर्भूतं स्वरुपमस्येत्याविर्भूतस्वरुपः , भूतपूर्वगत्या जीववचनम् । स्वप्नसुषुप्तोपन्यासक्रमेण "परं ज्योतिरुपसंपद्य स्वेन रुपेणाभिनिष्पद्यते" इति यदस्य पारमार्थिकं स्वरुपं परं ब्रह्म, तदुपतयैनं जीवं व्याचष्टे, न जैवेन रुपेण । यत्तत् परं ब्रह्म ज्योतिरुपसंपत्तव्यं श्रुतम्, तत्परं ब्रह्म, तच्चापहतपाप्मत्वादिधर्मकम्,तदेव च जीवस्य पारमार्थिकं स्वरुपम् ।तत्त्वमसि,इत्यादिशास्त्रेभ्यः

[9] पञ्चदशी -8.1,8.21

नेतरदुपाधिकल्पितम्। यावदेव हिस्थाणाव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन्कूटस्थनित्यदृक्स्वरुपमात्मनम, अहं ब्रह्मास्मि , इति न प्रतिपद्यते , तावज्जीवस्य जीवत्वम्। यदा तु देहेन्द्रियमनोबुद्धिसंघाताद्व्युत्थांप्य श्रृत्या प्रतिबोध्यते नासित्वं देहेन्द्रियम नोबुद्धिसंघातः , नापि संसारी, किं तर्हि तद्यत्सत्यं स आत्मा चैतन्यमात्रस्वरुपस्तत्त्वमसीति, तदा कूटस्थनित्यदृक्स्वरुपमात्मानं प्रतिबुध्य अस्माच्छरीराभिमानात्समुत्तिष्ठन स एव कूटस्थनित्यदृक्स्वरुप आत्मा भवति – ल यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति , इत्यादि श्रृतिभ्यः । तदेव चास्य पारमार्थिकं स्वरुपम , येन शरीरात्समुत्थाय स्वेन रुपेणाभिनिष्पद्यते । कथं पुनः सवं च रुपं स्वेनैव च निष्पद्यत इति संम्भवति कूटस्थनित्यस्य .. । सुवर्णादीनांतु द्रव्यान्तरसंपर्कादभिभूतस्वरुपाणामनभिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरुपेणाभिनिष्पत्तिः स्यात्। तथा नक्षत्रादीनामहन्यभिभूतप्रकाशानामभिभावकवियोगे रात्रौ स्वरुपेणाभिनिष्पत्तिः । न तु तथात्मचैतन्यज्योतिषो नित्यस्य केनचिदभिभवः संभवति असंसर्गित्वात् व्योम्न इव, दृष्टनिरोधाच्च , दृष्टिश्रुतिमतिनिज्ञातयो हि जीवस्य स्वरुपम् । यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रुपं कर्तृत्वभोक्तृत्वरागद्वेषादिदोषकलुषितमनेकानर्थयोगि, तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरुपं विद्यया प्रतिपद्यते, सर्पादिविलयनेनेव रज्ज्वादीन । अपरे तु वादिनः पारमार्थिकमेव जैवं रुपमिति मन्यन्तेऽस्मदीयाश्च केचित् । तेषां सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्षभूतानां प्रतिषेधायेदं शारीरकमारब्धम् --- एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया, मायया मायाविवत् , अनेकधा विभाव्यते, नान्यो विज्ञानधातुरस्तीति । यत्त्विदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः – नासंभवात् , इत्यादिना, तत्रायमेवभिप्रायः – नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन्नसङ्गे परमात्मनि तद्विपरीतं जैवं रुपव्योम्नीव तलमलादि परिकल्पितम् तत् आत्मैकत्व प्रतिपादनपरैर्वाक्यैन्यायोपेतै अद्वैतवाद प्रतिषेधैश्चापनेष्यामीति - परमात्मनो जीवादन्यत्वं द्रढयति, जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति , एवं हि स्वभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यन्ते ।

**कूटस्थ चिदाभासः –**

कूटस्थे प्रतिबिम्बितः यत् अन्तकरणं वा कूटस्थे कल्पितं अन्तकरणं तत्र प्रतिबिम्बितं चैतन्यं चिदाभास उच्यते । अयं चिदाभासः संसारी योगिः , कूटस्थ तु असंसारी इति भिन्नरुपेणत्वे अनयोः समानरुपत्वं कथं कथितम् । ततः कुतः इति चेत् – लोके यादृशं जीवस्य स्वरूपं प्रसिद्धं अर्थात् अहं एतादृशं अस्मि , इति आत्मत्वेन लोके सर्वेऽपि जनाः यत् मन्यन्ते तत् स्वरूपं तु कूटस्थे न दृश्यते तस्य निर्विकारत्वात् । वेदान्तिनः निर्विकारः चैतन्यमात्र आत्मा उपदिश्यन्ति , लोके तु विपरितमेवरूपं प्रसिद्धं वर्तते । अतः अनयोः द्वयोः मध्ये चिदाभासः एकः , लोकेप्रसिद्धः संसारी जीवः अपरः कूटस्थः तस्याधिष्ठानभूतः इति विवेकेन इमौ ज्ञातव्यौ – यथा लोके अहं स्वयं करोमि , तत्र तैः दृष्टान्त दीयते – अहं नाम कश्चित् वर्तते इति कथं ज्ञायते इति चेत् लोके प्रयोगो भवति । अहं स्वयं करोमि इत्यक्तौ अहं शब्दः केवलं सर्वैऽपि जनैः स्वात्मनि प्रयोगं कुर्वन्ति । स्वयं शब्दस्तु सर्वैरपि जनैः उच्यन्ते । तथैव लोके च सः स्वयं गच्छति , देवदत्तः स्वयं गच्छेत् , इत्येव लोके प्रयुज्यते । कूटस्थ इति यत् शास्त्रे प्रतिपादितः तत्र लोकेऽपि प्रसिद्धं कथं चेद् - स्वनुगतः कश्चन धर्मः वर्तते सर्वेषु पदार्थेषु विद्यमानं तत् भवति स्वयत्वं – स्वयत्वं कश्चनं धर्म – यथा इदं रजतं , इदं शुक्ति , अयं घटः सर्वत्रापि अनुगताः कश्चन साधारण धर्मः भवति , किन्तु घटत्वं रजतत्वं इमे धर्माः व्यावर्तन्ते । अतः सर्वानुगता अयमेव धर्मः कूटस्थः , यस्मात् कूटस्थः सर्वेषु चिदाभासेषु अनुगताः। स्वयन्तं धर्मविशिष्टः कूटस्थः, तथा अहंत्वं धर्मविशिष्ट चिदाभासः जीवः उच्यते । परन्तु घटः इति स्वयं न जानाति । देवदत्तः घटं जानाति, घटः स्वयं न जानाति । इदानीं तु घट तु अचेतनः परन्तु कूटस्थस्तु चेतनः , तर्हि अचेतनः घटादौ स्वयं शब्दस्य कथं प्रयोगः । चेतनाचेतनविभाग न चेतन कूटस्थ किन्तु

चिदाभास कृतार्थः कूटस्थः सर्वानुगतः । चिदाभासादि अपि घटादिगतान् अधिष्ठानो भवति । कूटस्थे चेतने यदि चिदाभासः कल्पितः तर्हि अहं शब्दः प्रयुज्यते।[10]

**कूटस्थे देहद्वयं कल्पितं --**

**अधिष्ठानतया देहद्वयावच्छिन्नचेतनः**

**कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ।।** [11]

किमर्थं ईश्वरापेक्षया कूटस्थः इति पृथक् स्वीकृतं - अर्थात् -कूटस्थः जीवस्यापि यत् स्वरूपं वर्तते सः तद् कूटस्थः भवति । मायया धिवासानासु प्रतिबिम्वितः चैतन्यं ईश्वरः , चिदाभासः तु नश्यति । बृहदारण्यके उक्तम् - **विज्ञानं घनं समुधायि तान्नैव विनस्यती ।** देहविकार परिणतेभ्यः भूतेभ्यः अयं चिदाभास उत्पद्यते नश्यति च । कूटस्थस्य चिदाभास श्रयंत्वं वन्धः तत् विनाशो मोक्षः इति । कूटस्थः नाम संसारः , संसारः नाम चिदाभासगत्वं कूटस्थस्य संसारः तान् नासः मोक्षः भवति ।

**कृटस्थे कल्पितावुद्धिस्तत्र चित्त प्रतिबिम्बिकः**

**प्राणानां धाराणाज्जीवः संसारेण स युज्यते ।।**[12]

**कूटस्थासङ्गमात्मानां जडत्वेन करोति सा ।**

**चिदाभासस्वरूपेण जीवोशावपि निर्ममे ।।** [13]

यथा रज्जु चलति - तदानीं कम्पनं विशिष्ट सर्प विशिष्टानुभूत रज्जुः चलति । मैत्रेय प्रोक्तं – **अत्रापि मोक्षात् पतत् नवा आरे अहं ब्रह्म ब्रवति , अविनाशि वा आरे आत्मा । प्रज्ञानब्रह्म इति उक्त्वा कूटस्थे इति उपसंहारे ।** परन्तु चित्त त्रिविधं प्रक्रियायां जीवः अनादि अनन्तः ,तस्य उत्पत्तिः अपि नास्ति तस्य विनाशोऽपि नास्ति । परन्तु यस्य उत्पत्तिः भवति तस्य विनाशोऽपि भवति । देहे उत्पन्ने जीवः उत्पन्नः , देहे विनाशे जीवः विनाशः मृतः वा उच्यते । अतः उक्तम्- **जीवापिता वा अक्षिलान्दे मृयते न जीवो मृयते ।** अत्र तु चित् चतुर्विधं प्रक्रियायां एतत् सर्वं कूटस्थस्य अभिप्रायः । कूटस्थे अर्पितो यो जीवः अस्ति स तु यथा दर्पणे प्रतिबिम्बितं दर्पणगता नश्यति तद्वत् उपाधि नष्टे उपाधिरुपः अयं जीवः अपि नश्यति सैव चिदाभासः।

**आभास एव चैष जीवः परस्यात्मनो जलसूर्यादिवत्प्रतिपत्तव्य ।**

**आभासस्य च अविद्या कृतत्वादाश्रयस्य संसारस्यविद्याकृतत्वो उपपत्ती ।**[14]

---

[10] पञ्चदशी – पृ 140

[11] तदैव – 6.22

[12] पञ्चदशी 6.23

[13] पञ्चदशी -1.33

[14] ब्र.सू.श -2.3.57

**योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्स्वयं ज्योतिः।**

**कूटस्थः सन्मात्मा कर्ता भोक्ता भवत्युपाधिस्थः ।।**[15]

कूटस्थ आत्मा निर्विकारोपाधि वशात् कर्ता भोक्तादि भवति । अपरोक्षानुभूतिग्रन्थे शङ्करः-

**बुद्धेः कतृत्व भोक्तृत्व दुःखित्वाद्देस्तु संयुक्त**

**चिदाभासो विकारीव शरावस्थाम्वुभानुवत् ।।**[16]

अहं ब्रह्मास्मि इति वाक्ये यदि अहं शब्देन यः जीवः उच्यते । तस्य यदि विनाशः स्यात् तर्हि कथं अविनाशि ब्रह्मणः सह तस्य समानाधिकरणं कथं भवितुं अर्हति । यतो हि अहं ब्रह्मास्मि इत्यस्मिन् वाक्ये तु समानाधिकरणं इत्युक्तां । अहं शब्देन यः चिदाभास उच्यते तस्य वास्तविकरुपं ब्रह्मैव भवति । यथा स्थाणुः वास्तवरुपं पुरुषः एव तद्वत् अहं शब्दस्य चिदाभासस्य यत् अधिष्ठानः ब्रह्म तदेव तस्य स्वरूपं । अत्र बाधितः चिदाभासस्य चिदाभासत्वं बाधितः । अधिष्ठान अविशेषे हि नाशः कल्पितवत् भवति । मध्यसस्य वस्तुनि नाशः सति । अधिष्ठानं अधितिष्ठते तया कूटस्थ एव अवशिस्यते । अत्र अहं शब्देन कूटस्थं इति स्वीकृतः । कूटस्थस्तु ब्रह्मणमैक्य स्वीकृतम् । भाष्यकारैः अन्यत्रापि उपनिषद् वाक्ये नाशित्वं संसारी , नापि देहादि संङ्घातं इत्येव प्रयुज्यते अभोदवादिनाभि अर्थकुर्वन्ति – नासित्वं संसारि,नासित्वं मनुष्यं किन्तु ब्रह्म आसीत् इति उच्यते।

**कूटस्थ साक्षी विचारः**

पञ्चदशीकारः विद्यारण्यः कूटस्थदीपप्रकरणे कूटस्थ साक्षी निरूपणं कुर्वन्ति । पञ्चीकृतस्थूलशरीराणिऽपञ्चीकृत सूक्ष्मशरीराणि देहद्वयस्यऽविद्या वा माया कल्पितस्य आधारतया शरीरद्वयऽनवच्छिन्नः आत्मा कूटस्थः उच्यते । एतादृशः कूटस्थः स्वावच्छेदकस्य देहद्वयस्य निर्विकारत्वेन साक्षी उच्यते । भगवत्पाद शङ्कराचार्येण प्रोक्तम् –

**रवेर्यथा कर्मणि साक्षिभावो वह्नेर्यथा वायसि दाहकत्वम् ।**

**रज्जोर्यथारोपितवस्तुसङ्ग स्तथैव कूटस्थचिदात्मनो मे ।।**[17]

**उपसंहारः**

जीवस्य स्वरूपं स्फोटतया निरुपण विचारमाणे कूटस्थस्वरूपं दृगात्मा प्रतिपद्यं कूटस्थ नित्य दृग् स्वरूपमेव भवति , इति वाक्ये ब्रह्मणि जीवः कल्पितः सूक्तौ रजतवत् कल्पितः । तत्र जीवस्य परमात्मनः जीवात् अन्यत्वं दृदयति । परमात्मनः जीवासु परस्यान्यत्वं न प्रतिपादयति । अर्थात् जीवः ब्रह्मणः न भिन्नः किन्तु ब्रह्मणःजीवात्

---

[15] वि.चु.-191

[16] अ.नु - 57

[17] विवेकचुडाणि -507

भिन्नः। अध्यस्त वस्तु अधिष्ठानात् कदाचिद् अपि न भिन्नति अधिष्ठानां तु अधिष्ठान वस्तुनः। चिदाभास विशिष्टं अहंङ्कारुप जीवभ्रमाधिष्ठान कूटस्थचैतन्यात्मा साक्षीति ।

## संदर्भग्रन्थसूचि


1. विद्यारण्यमुनि ,पञ्चदशि -रामकृष्ण व्याख्या तथा मोडकोपाह्वश्रीमदच्युतरायकृतव्याख्या सप्तम संस्करणम् ; १९४९
2. श्री हरिकृष्णदास गोयन्दका- श्रीमद्भगवद्गीता शंङ्करभाष्य,गीताप्रेस गोरखपुर अष्टम संस्करण - 2010
3. श्रीमदाद्यशङ्कराचार्य ,विवेकचुडामणि- हिन्दि अनुवाद सहित ,वृन्दावन रसिक वानि गीताप्रेस गोरखपुर 1 जनवरी 1980
4. शङ्कराचार्य(लेखकः) ,प्रो. रत्नाराम शर्मा (संम्पादक) अपरोक्षानुभूति -, चौखम्बा विद्याभवन वाराणसी 1954
5. ब्रह्मसूत्र शंङ्करभाष्य भामतीव्याख्या – योगीन्दानन्द -चौखम्बा विद्याभवन , वाराणसी ,
6. अद्वैत सिद्धिः - बालवोधिन्याख्याया - रत्ना पब्लिकेशन्स, वाराणसी
7. The work of sankaracharya , Brahmasutra bhashya ,vol-1,2, sri vani vilas press srirangam

# कुमारसम्भवकाव्ये कालिदासस्य सुविज्ञानप्रतिभानैपुण्यम्

डा.लक्ष्मीकान्तषडङ्गी
संस्कृतविभागाध्यक्षः,
योगदा-सत्सङ्ग-पालपाडा महाविद्यालयः

**भूमिका-**

विदन्त्येव विपश्चितः यत् भौतिकानां पदार्थाणां विशेषतः ज्ञानं विज्ञानमित्युच्यते । य एव जनः पदार्थाणां विशेषाणां गुणानामन्वेषणं कर्तुं समर्थः स एव तेषां विशिष्टां शक्तिं ज्ञातुं योग्यः भवति । एतादृशं जनं जनाः वैज्ञानिकः इति वदन्ति । अधुनिकेन विज्ञानेन संप्रति संसारस्य स्वरूपमेव परिवर्तितम् । अद्य विद्युता रेलयानं चाल्यते, पेट्रोलेन मोटरयानं वायुयानं च । विद्युता प्रकाशः क्रियते, व्यजनानि वीज्यते, नानायन्त्रणि च चाल्यन्ते । विज्ञानस्य कृपया अधुना मनुष्यः एकेन होराकालेन क्रोशानां सहस्राणां यात्रां कर्तुमर्हन्ति । आकाशवाण्या शब्दस्य दूरसंचारणं क्रियते । एतेन साधनेन वयमद्य विश्वस्य समाचारान्, गीतानि,वाद्यानि,भाषणानि च श्रोतुं समर्थाः स्मः । विज्ञानस्यैव कृपया वयं चलच्चित्राणि द्रष्टुं समर्थाः । अणुवीक्षणयन्त्रेण वयं सूक्ष्मतमं वस्तुजातं द्रष्टुं शक्नुमः । दूरवीक्षणयन्त्रेण वयं ग्रहनक्षत्राणि द्रष्टुमर्हाः । विज्ञानेन परमाणोरपि तत्त्वं परिज्ञातम् । अद्य तु रकेटादि यन्त्राणि प्रेषयित्वा मनुष्यस्य चन्द्रालोकमपि गमनं सम्भवमस्ति ।

**विज्ञानस्वरूपम्-**

सम्प्रति एकविंशशताब्द्यां यद्यपि एवं विज्ञानस्याग्रगत्या मानवसमाजस्य समुन्नतिः संभवति तथापि अस्यैव अपरपक्षोऽस्ति अतीव दारुणः । यतो हि विज्ञानेनानेन अनेकाः हानयश्च जाताः । सुख-सौविध्यप्रभावेण तु जनाः अलसाः सञ्जाताः येन अनेकाः नवीनाः व्याधयः समुत्पन्नाः । युद्धक्षेत्रे तु अनेकेषां भयङ्कराणामायुधानां निर्माणेन मानवजीवनस्य अस्तित्वविषयेऽपि शङ्का भवति । महायुद्धे प्रयोक्तव्यानि महान्ति दारुणानि प्रक्षेपास्त्राणि वैज्ञानिकैः विरचितानि । एषां मारणास्त्राणां प्रसारेण युद्धातङ्केन सन्त्रासवादातङ्केन च जनजीवनं शान्तिहीनं जायते । परन्तु एतत् तु न केनापि कदापि काम्यम् । ज्ञानं यथा सततं मङ्गलकरमस्ति विज्ञानमपि तथैव स्यात् । यत् किमपि भवेदधुना तु तदेव कृत्यं यदेव सर्वदा सर्वथा मङ्गलकरमभिनन्दनीयञ्च भवेत् । ज्ञानं विज्ञानं सुप्राचीनकालादेवासीत् । तदा साहित्यदर्शनादिशास्त्रादारभ्य आयुर्वेदार्थशास्त्रेषु,धर्मशास्त्रेषु,चिकित्साशास्त्रेषु,ज्योतिर्विज्ञानविषयेषु,युद्धविद्यायाम्,उद्भिदविद्यायाम्,रन्धन विद्यायाम्,वास्तुविद्यायाम्,चौर्यविद्यायाञ्च सर्वत्रैव सर्वदा मानवसमाजस्य कल्याणकरं विषयं वर्णितम् । कदापि कुत्रापि अहितकरस्य निदर्शनं नानुभूयते । उपनिषद्-साहित्यादिषु ग्रन्थेषु ज्ञानविज्ञानस्य स्वरूपं सर्वदा सर्वत्रैव मोक्षमूलमिति प्रतिपादितमस्ति । तत्रोच्यते-विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति[1] । भगवद्गीतायां भगवता श्रीकृष्णेनोच्यते –

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।।[2] इति

एवञ्च-

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्ट्राश्मकाञ्चनः ।।[3]

न केवलमात्रमुपनिषद्साहित्ये अपि तु लौकिकसंस्कृतसाहित्यादिष्वपि विज्ञानस्य सुप्रभावः सुस्पष्टं चित्रितम् ।

**कुमारसम्भवे कालिदासस्य सुविज्ञानप्रतिभा नैपुण्यम्** –

प्राचीन-संस्कृतसाहित्यजगति ये केचन स्वनामधन्याः कवयः सन्ति तेषु कविकुलगुरुः कालिदासः अन्यतमः । यतो हि कालिदासस्यासीत् आलोकसामान्यदर्शनक्षमता वर्णनक्षमता च । कालिदासस्य वर्णनापरिपाट्यां न केवल मात्रं सौन्दर्यमपि तु तद्रचितकाव्येषु हिमालयवर्णना,वसन्तवर्णना,उमायास्तपस्यावर्णनादयः चिरस्मरणीयाः तुलनारहिताश्च । एतदतिरिच्य कालिदासस्यासीत् अपूर्वा वैज्ञानिकी दृष्टिः । महाकविरसौ स्वरचितकाव्येषु अनन्य-साधारणदृष्टिवलेन हिमालयादिकं वर्णयति । यस्य वाणीचित्रस्यानुशीलनेन प्रतिपद्यं वैज्ञानिकतत्त्वं सुस्पष्टं परिलक्षितम् । तद्रचितकुमारसम्भवमहाकाव्यस्य प्रथमसर्गावलोकनेन एवं प्रतिभाति यत् महाकवेः वैज्ञानिकप्रतिभानैपुण्यम् अनायासेनैव प्रतिपद्यं वरिवर्ति । सर्गेऽस्मिन् महाकवेः ज्यामितिविज्ञाननैपुण्यं, भूगर्भविज्ञाननैपुण्यं, जलवायुविज्ञाननैपुण्यं, अनुसन्धानविज्ञाननैपुण्यं, धातवविज्ञाननैपुण्यं, संगीतविज्ञाननैपुण्यं, वैद्युतिकशक्तिविज्ञाननैपुण्यं, योगविज्ञाननैपुण्यं, परिवेशविज्ञाननैपुण्यञ्च एकाधारेण परिलक्ष्यन्ते । महाकवेः एषां सुविज्ञानप्रतिभानैपुण्यानां निदर्शनं कुमारसम्भवमनुसृत्य दिङ्मात्रमत्रालोच्यते ।

**कालिदासस्य ज्यामिति-विज्ञाननैपुण्यम्** –

सामान्यरूपेणोच्यते यत् यस्यैव शास्त्रस्य पठनेन भूमेर्मानमवस्थानमायतनं क्षेत्रफलादयश्च सम्यक् रूपेण ज्ञायते तदेव शास्त्रं ज्यामितिविज्ञानमित्युच्यते । कुमारसम्भवमहाकाव्यस्य प्रथमसर्गस्यादिमे पद्ये महाकविकालिदासः पर्वतराजहिमालयस्य भौगलिकावस्थानं संसूचयन् स्वकीयज्यामितिविज्ञानप्रतिभानैपुण्यमपि प्रकाशयति । तेनोच्यते पृथिव्याः परिमाणं निर्धारयितुं हिमालयस्य संस्थितिर्मानदण्डस्येव । वैज्ञानिकाः खलु वस्तूनां परिमाणं परिज्ञातुं मानदण्डं व्यवहरन्ति । एतदर्थं ते क्षुद्रवस्तुनः कृते क्षुद्रं मानदण्डं बृहद्वस्तुनः कृते बृहद्मानदण्डं च व्यवहरन्ति । एवं महाकविकालिदासोऽत्र पृथिव्याः परिमाणं निर्धारयितुं नगाधिराजं हिमालयं मानदण्डरूपेण परिकल्पयन्ति । तद्यथा कवेर्भाषया-

अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।[4]

श्लोकस्यास्य अयमेवाशयः यद्भारतस्य उत्तरस्यां दिशि हिमालयो नाम पर्वताधिराजः अवस्थितः । अयं हिमालयः पूर्वपश्चिमौ समुद्रौ संप्रविश्य भूमेः मानदण्ड इवास्ति । कुमारसम्भवस्य विख्यातटीकाकारेण मल्लिनाथेनापि

महाकवेः कालिदासस्याभिप्रायं तथा च कवेः विज्ञानप्रतिभानैपुण्यं परिस्फुटयितुं स्वटीकायां प्रकाशयति यत् – ''अतएव पृथिव्या भूमेर्मानं हस्तादिना परिच्छेदः । भावे ल्युट् । तस्य दण्डः । यद्वा मीयतेऽनेनेति मानम् । स चासौ दण्डश्च स इव स्थितः । आयामपरिच्छेदकदण्ड इव स्थित इत्यर्थः''[5] । एवं पर्यालोचनेन परिज्ञायते यत् नात्र केवलं महाकवेः अपूर्ववर्णनक्षमता अपि तु कवेरलोकसामान्यज्यामितिविज्ञानप्रतिभा अपि परिलक्ष्यते ।

**कालिदासस्य भूगर्भविज्ञाननैपुण्यम् –**

रत्नप्रसविनीयमस्माकं मातृभूमिः पृथिवी । सा खलु विविधैः रत्नादिभिः परिपूर्णा । परन्तु अस्याः रत्नमयीपृथिव्याः रत्नानामनुसन्धानं केवलमेव कृतविद्यानां समक्षे सुलभं न तु समेषाम् । सम्प्रति आधुनिके युगेऽपि वैज्ञानिकाः विविधेषु स्थानेषु भूमिं संपरीक्ष्य तस्याः रत्नादिन् तैलादिन् च समुद्धरन्ति । एवं वहुप्राचीनकालेऽपि जाता इति महाकवेरभिप्रायः । एतदर्थं महाकविः पृथुराज्ञः पौराणिकिकथां प्रतिपादयति । कुमारसम्भवस्य प्रथमसर्गस्य द्वितीये श्लोके महाकविना हिमालयवर्णनावसरे उच्यते यत् –

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धारि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।।[6]

श्लोकस्यास्य तृतीयपादस्य ''भास्वन्ति रत्नानि महौषधीश्च '' इत्यंशात् ''पृथिवी रत्नप्रसविनी '' आसीदिति ज्ञायते । टीकाकारेणापि उक्तं यत् –''भास्वन्ति च भास्ववत्यश्च भास्वन्ति द्युतिमन्ति'' । औषधिविशेषणं चैतत् । ''नपुंसकमनपुंसकेन'' इत्यादिना नपुंसकैकशेषः । रत्नानि मणीञ्जातिश्रेष्ठवस्तूनि च । रत्नं श्रेष्ठे मणावपि इति विश्वः । ''जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते '' इति यादवः । महौषधीश्च सञ्जीवनीप्रभृतीश्च क्षिरत्वेन परिणता इति शेषः । ताः ''क्षिरपरिणामिनी'' इति विष्णुपुराणात्[7] । न केवलैव धरित्री आसीद्रत्नप्रसविनी अपि तु स्वयं हिमालयोऽपि अनन्तरत्नप्रभव आसीदिति महाकवेर्मतम् । एतदर्थमुच्यते –

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातमिति[8]

एवञ्चानन्तरत्नप्रभवेन सह हिमालयः धातुमानपि आसीत् यतो हि हिमालयस्य सिन्दुरगैरिकधातुसमूहानप्सरसः स्वकीयालंकाररूपेण व्यवहृतवन्तः । एवञ्च हिमालयात् समुत्पन्नैः एभिः धातुरङ्गैः (सिन्दुरगैरिकादिभिः) वलाहकाः अपि रञ्जिताः भवन्ति । एतदपि प्रतिपादयितुं कविनोच्यते-

यश्चाप्सरोविभ्रममण्डनानां,सम्पादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ।।[9]

**कालिदासस्य जलवायुविज्ञाननैपुण्यम् –**

सम्प्रति सर्वत्र सर्वे जनाः सुखेन जीवितुमिच्छन्ति । एतदर्थमद्य एकविंशतिशताब्द्यां जनाः मृत्तिकागृहं परित्यज्य इष्टकप्रस्तरादिभिः निर्मिते बहुतलेप्रासादे तिष्ठन्ति । पुनस्तत्रापि उष्णातिशयात् शितातिशयाच्चात्मानं रक्षितुं कामः अधुनिकमानवाः शीततापनियन्त्रणादिकं वैद्युतिकं यन्त्रं व्यवहरन्ति । हिमालयेऽपि तदानीन्तनकाले तत्रस्थाः सिद्धाः शिताधिक्यात् ग्रीष्माधिक्यात् च कथं तिष्ठन्ति एतदपि प्रतिपादयितुमुच्यते कविना-

आमेखलं सञ्चरतां घनानां छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातवन्ति सिद्धाः ।।[10]

अस्यायमेवाशयः यत् हिमालयशिखरेषु ये नैके देवयोनिविशेषाः वसन्ति । ते देवयोनिविशेषाः तत्र हिमालये वृष्टिभिस्द्वेजिताः सन्तः सूर्यस्य प्रखरातपानि शृङ्गाणि आश्रयन्ते पुनश्च सूर्यस्य प्रखरातपे रताः यदा सोढुमसमर्थाः सन्ति तदा हिमालयस्य मध्यभागे सञ्चरतां घनानामधः छायामाश्रयन्ते । महाकवेरियमभिनवकल्पना आधुनिकसमाजे वित्तशालिनां जनानां बहूतलप्रसादेषु शिततापनियन्त्रणमाध्यमेन सुखवासव्यवस्थां साक्षात् संसूचयति । अनेन महाकवेः विज्ञानविषयिणी जलवायुविज्ञानभावना अपि परिस्फुटा भवति ।

**कालिदासस्य अनुसन्धानविज्ञाननैपुण्यम्-**

सम्प्रति अनुदिनं जगत्यस्मिन् सामाजिकमपराधं संघटते । सुरक्षाकर्मिणः अपराधानां सत्यासत्यमुन्मोचयितुं वैज्ञानिकदलस्य प्रशिक्षणप्राप्तकुक्कुरस्य च सहायतामाश्रयन्ते । तत्र विज्ञानोपायेन अपराधीनां क्रियां गतिविधिं पदचिह्नं अपराधे व्यावहृतास्त्रशस्त्रादीनां सम्यक् समनुशीलनेन सत्यासत्यमुन्मोचिताः सन्ति । प्राचीनकाले तु प्रसङ्गेऽस्मिन् साधारणजनाः (किराताः) अप्यभिज्ञाः आसन् इति कालिदासः कुमारसम्भवे प्रतिपादयति । यतो हि हिमालये ये किराताः वसन्ति ते शिकारसमये तुषारस्रुतिधौतरक्तं हतद्विपानां केसरिणां पदचिह्नं ज्ञातुमसमर्थाः सन्ति । अनन्तरमभिज्ञाः ते किराताः हतद्विपानां केसरिणां नखरन्ध्रमुक्तैः मुक्ताफलैः मार्गं जानन्ति । प्राचीनकाले वनेचराणां किरातानामेतादृशी बुद्धिः साम्प्रतिके काले अभिनन्दनीया । सम्प्रति समाजे दैनन्दिनघटितापराधस्य वैज्ञानिकोपायेन सत्यासत्यमुन्मोचनस्य व्यवस्था किरातानामभिज्ञतानुरूपमस्ति । एतदर्थमुच्यते कालिदासेन तदीये कुमारसम्भवे-

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ।।[11]

**कालिदासस्य धातवविज्ञाननैपुण्यम्-**

समयस्याग्रगत्या मानवसभ्यताया अपि अग्रगतिर्जायते । एकविंशशतकस्य मानवाः सम्प्रति संगणकयन्त्रं व्यवहरन्ति । अनेन विद्यालयादारभ्य देवालयं यावत् लिखनपठनादिकं सर्वं कार्यं प्रचलति । अस्यैव बहुलव्यवहारात् युगमिदं संगणकस्य युगमित्युच्यते । अस्मात् पूर्वं संगणकयन्त्रस्यावर्तमाने कर्गजलिखन्यादिभिः पठनलिखनादिकमभवत् । ततः पूर्वं अतिप्राचीनकाले ताडपत्रस्य भूर्जपत्रस्य च व्यवहारः आसीत् पठनलिखनादिषु कार्येषु । तदा लिखनसामग्रीरूपेण विविधानां धातुरसाणां व्यवहारोऽभवत् । एतदपि स्पष्टीकर्तुं महाकविः प्राचीनकालस्य प्रसङ्गं समुपन्यस्यति । हिमालये स्थिताः अधिवासिनः सिन्दुरादिभिः धातुरसैः भूर्जपत्रस्योपरि लिखन्ति । किन्नरस्त्रियः भूर्जपत्रस्योपरि धातुरसैः प्रेमपत्राणि लिखन्ति । तदारभ्य इयमेव पठन-लिखन-परम्परा बहुवर्षाणि यावत् प्रचलिता आसीत् । साम्प्रतिककालेऽपि प्राचीनमठमन्दिरादिषु भूर्जपत्रताडपत्रादिभिः लिखिताः ग्रन्थाः समुपलभ्यन्ते । यद्यपि इदानीं लिखनादिषु कार्येषु कार्गजादिनां

बहुलव्यवहारः संभवति तथापि भूर्जपत्रताडपत्रादीनां व्यवहारः नातीव प्राचीनः । विषयेऽस्मिन् महाकवेः पद्यमिदं प्रमाणम् तद्यथा-

न्यस्ताक्षरा धातुरसेन यत्र, भूर्जत्वचः कुञ्जरविन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।।[12]

**कालिदासस्य सङ्गीतविज्ञाननैपुण्यम्** –

सुप्राचीनकालादेव संगीतस्य महत्त्वं मनुष्यजीवने अपरिहार्यम् । संगीतं प्रति आकर्षणं समादरं च न केवलं मनुष्याणामपि तु पशुपक्षीणामपि परिलक्ष्यते । संगीत-साहित्य- कलाविहिनं जनं नीतिशास्त्रकारैः पशु इत्याख्ययाभिहिताः[13] । संगीतमिदं सर्वाङ्गसुन्दरं विधातुं वाद्यादीनां सम्प्रयोजनमस्ति ।एतदर्थमुच्यते गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते[14]यद्यपि आधुनिके कालेऽस्मिन् बहुविधानां वाद्ययन्त्राणामाविष्कारेण संगीतशास्त्रस्य समुन्नतिः सम्भवति तथापि वाद्यस्य उद्गमस्थलविषये महाकवि-कालिदासस्य वैज्ञानिकं मतं सर्वदैवाभिनन्दनीयम् । वंशवृक्षस्य छिद्रेषु समीरस्यागमनेन मधुरध्वनिर्जायते इति महाकवेर्मतम् । एतदेव प्रतिपादयितुं महाकविनोच्यते तदीये कुमारसम्भवे-

यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ।।[15]

अत्र टीकाकारेणापि उच्यते यत् ''यो हिमाद्रिः दरी गुहा सैव मुखं तस्मादुत्थेनोत्पन्नेन । आतश्चोपसर्गे इति क प्रत्ययः । समीरणेन वायुना कीचका वेणुविशेषः । वेणवः कीचकास्तस्युर्ये स्वनन्त्यनिलोद्धताः इत्यमरः । तेषां रन्ध्रभागाञ्छिद्रप्रदेशान्पूरयन्धमयन् । वांशिकोऽपि वंशरन्ध्राणि मुखमारुतेन पूरयतीति प्रसिद्धिः । उद्गास्यतां देवयोनित्वादुच्चैर्गान्धारग्रामेण गानं करिष्यताम् । उक्तं च नारदेन –षडज मध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं स लभ्यो देवयोनिभिः । इति किन्नराणां देवगायकानां तानप्रदायित्वम् । तानो नाम स्वरान्तरप्रवर्तको रागस्थितिप्रवृत्यादिहेतुरंशापरनामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः 'तानस्त्वंशस्वरो मतः ' इत्यभिनवगुप्तः । गाता यं यं स्वरं गच्छेतं तं वंशेन तानयेत् इति भरतः'' ।[16] अस्याः टीकायाः समनुशीलनेन ज्ञायते यत् वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः तान इत्युच्यते । अस्यैव तानस्योद्गमस्थलविशेषः वंशवृक्ष एवास्ति इति महाकवेः वैज्ञानिकं मतम् । साम्प्रतिके कालेऽपि वंशीवाद्यस्य सुमधुरः स्वरः सर्वजनसमादृतोऽस्ति ।

**कालिदासस्य वैद्युतिकशक्तिविज्ञाननैपुण्यम् –**

सम्प्रति विज्ञानस्य बहुलाग्रगतिर्भवति । मनुष्यः विद्युत्शक्तिं व्यवहृत्य गृहादिनालोकयति । सूर्यातपं शीतलीकरोति । शीतलमनिलमुष्णमपि करोति । न केवलं विद्युत्शक्त्या अपि तु सौरशक्त्या अपि नैकानि कार्याणि सम्भवन्ति । विद्युत्-सौरशक्तिद्वयस्यावर्तमानेऽपि तैलादिभिः प्रदीपैः आलोकादयः मनुष्याः व्यवहरन्ति । परन्तु साम्प्रतिके कालेऽपि न कामपि शक्तिं विना आलोकादिनां व्यवहारः सम्भवति । आलोकादिनां सर्वविधसुविधानां व्यवहारः सम्प्रति शक्तिसापेक्षम् । परन्तु प्राचीनकाले हिमालये न

काम्पि शक्तिं विना अलोकस्य व्यवहारः परिदृश्यते । हिमालये एवंभूता ओषधयः (तृणविशेषाः) आसन् येषां सकाशात् रजन्यां स्वत एवालोकस्योद्गीरणमासीत् । अतः हिमालये रात्रौ गुहायाम् ओषधयः (तृणविशेषाः) वनेचराणां वनितासखानां मिलनवेलायां अतैलपुराः प्रदीपाः जायन्ते । एतदपि विज्ञान-प्रतिभा-निपुणः कविः कालिदासः प्रतिपादयितुमाह-

वनेचराणां वनितासखानां,दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ।।[17]

**कालिदासस्य योगविज्ञाननैपुण्यम्-**

सम्प्रति समाजे मुख्या समस्या भवति मनुष्येषु आत्महत्याप्रवणता । दुःखाधिक्यात्, वैफल्यात्, लोकापवादात्, वादविवादात्, दुरारोग्यव्याधिसकाशात् केनापि कारणात् वा मनुष्याः सहसैव आत्महत्यायाः मार्गं स्वीकुर्वन्ति । अपराधमार्गगामिनस्ते विषपानादिभिरुपायैः मृत्युकालेऽपि बहुक्लेशं सहन्ते । एतादृशस्य घृण्यकार्यस्य मुख्यकारणमस्ति मनुष्येषु योगविज्ञानोपयोगस्याभावः । योगेन मनसः शान्तिर्जायते । योगविज्ञानवलेन जनाः कर्मकुशलाः भवन्ति[18] । योगेन जनाः ऐश्वर्यशालिनः सन्ति । योगविज्ञानेन संख्यातीताः जनाः दुरारोग्यव्याधिसकाशात् निरामयाः जायन्ते । योगवलेनासाध्यकार्याण्यपि साध्यानि भवन्ति । साम्प्रतिककालेऽपि केचन योगिनः सन्ति ये तावत् योगवलेन सर्वाण्यपि कार्याणि कर्तुं समर्थाः सन्ति । परन्तु प्रायशः जनाः योगविज्ञानविवर्जिता सन्तः नैकानि अपराधमूलकानि कार्याणि कुर्वन्ति यतो हि ते अजितेन्द्रियाः कर्मकुशलानभिज्ञाः चित्तवृत्तिनिरोधे च अक्षमाः । एवमात्महत्यादिनि अपराधमूलकानि कार्याणि नैवाश्रयितुं कालिदासेन योगमार्गस्य सफलमुदाहरणं प्रदर्शितम् । तद्यथा-

अथाऽवमानेन पितुःप्रयुक्ता दक्षस्यकन्याभवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ।।[19]

एवमन्यत्रापि –

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ।।[20]

उपर्युक्तश्लोकद्वयस्य समीक्षणेन परिज्ञायते यत् प्राचीनकाले पार्वत्याः योगविज्ञाने दक्षता कीदृशी गम्भीरासीदिति ।

**कालिदासस्य परिवेशविज्ञाननैपुण्यम्-**

सम्प्रति समग्रविश्वस्य कृते अपरा समस्याऽस्ति परिवेशप्रदूषणसमस्या । विशेषेण वायुजलयोः क्रमवर्धमानं दूषणं परिवेशविज्ञानिनामशेषचिन्ताकारणम् । तेनैव प्रदूषणजलवायुशस्यादिनां सेवनेन न कोऽपि जनः निरामयं जीवनं यापयितुंक्षमः । सुविशाला मानवसभ्यता कथमेतादृशात् परिवेशदूषणरूपात् भयङ्करादभिशापात् मुक्ता भवेत् तद्विषये परिक्षानिरीक्षादयः आरब्धाः । अतः सर्वैः सततं सर्वादौ परिवेशस्य सुरक्षा विधातव्या । यतो हि

विशुद्धपर्यावरणेन सुस्थं निरामयं च जीवनं सम्भवेत् । एवं स्मरणीयं यत् परिच्छन्नः परिवेशः एव सुस्थजीवनस्य दायकः दीर्घायुषश्च प्रदाता । सर्वोपरि सुस्थं निरामयञ्च जीवनं सुखाय भवेत् सर्वेषां कृते न तु विपुलम् ऐश्वर्य्ययुक्तं जीवनम् । समग्रशरीरिणां स्थावरजङ्गमानां कीदृशं दिनं शुभकरं स्यादिति विषये महाकविकालिदासस्य सुस्थ-परिवेशप्रसङ्गे वाक्यमिदं प्रणिधानयोग्यम् । तद्यथा-

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनाऽनन्तरपुष्पवृष्टिः ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव ।।[21]

अस्यैव श्लोकस्य परिशिलनेन ज्ञायते यत् प्रसन्नदिक् पांसुविविक्तवातमेव सर्वेषां कृते सुखस्य मूलं निदानं न तु अन्यत् । अत्र पार्वत्याः जन्मदिनस्य वर्णनाऽवसरे महाकवेः पर्यावरणविषयकं विज्ञानप्रतिभानैपुण्यमतीवोपादेयम् । अनेन महाकविः प्राणिनां कृते सुस्वास्थाय सुखाय च सुपरिवेशस्य प्रयोजनातिशयतां प्रकाशयति । महाकवेः तदानिन्तनकालिनवार्ता साम्प्रतिकसमाजस्य कृते महती उपयोगी इति मन्यते ।

**निष्कर्षः-**

सृष्टेः प्रारम्भात् ज्ञानविज्ञाने वागर्थाविव सम्पृक्तौ । यत्र यत्र धूमस्तत्रस्तत्र वह्निः इति न्यायेन यत्र यत्रैव ज्ञानं तत्र तत्रैव विज्ञानम् । किन्तु ज्ञानं यथानन्दमयं मङ्गलदायकं विज्ञानमपि तथा स्यात् । उच्यते च ''ज्ञानविज्ञानविमुक्तये[22]'' । सम्प्रति विज्ञानं खलु सभ्यतायाः चिरसङ्गि । यदा अरणिद्वयघर्षणेव मानवः प्रथममग्निमुत्पादयति तदा विज्ञानस्य प्रथमं स्फुरणं, विज्ञानस्य प्रथमः प्रकाशः जातः। क्रमेण विज्ञानवलात् संख्यातीता आविष्काराः जाताः । संप्रति विद्युत्शक्तिरकल्पनीयं कार्यं सम्पादयति । एषा शक्तिः मानवसभ्यतायाः परमा सहायिका । अधुना न केवलं परमाणुशक्तिराविष्कृता परन्तु परमाणुशक्तिं विविधकर्मसु प्रयुक्ता । परमाणुशक्तिप्रयोगेण अचिन्तनीयं फलञ्च लभ्यते । विज्ञानं किं न करोति , विज्ञानं किं न ददाति ? न कोऽपि मानवः विज्ञानस्यावदानानि गणयितुं समर्थः । किन्तु एका महाजिज्ञासा मानवं सदा पीडयति । किं विज्ञानं मानवं केवलमुपकरोति , न किमपि अपकरोति? विज्ञानवलेनैव मारणास्त्राणां समागमः । एषां कस्यचिद् प्रयोगेण मानवसभ्यता सद्यः विध्वस्ता भवितुं समर्था । विषयेऽस्मिन् विज्ञानस्य नास्ति कोऽपि दोषः । विज्ञानं यदि कल्याणकर्मणि प्रयुज्यते , तर्हि तत् उपकारम् अन्यथा प्रयोगे तत् भयङ्करम् । अतः कालिदासस्य-साहित्ये यथैव प्राचीनकालात् केवलमेव विज्ञानस्योपादेयता प्रदर्शिता न कुत्रापि अपकारिता तथैवाधुनिककालेऽपि स्यादित्यलं पल्लवितेन ।

**पादटीका**

1. तैत्तिरीयोपनिषद् – भृगुवल्ली 4-1 पृ.354
2. श्रीमद्भगवद्गीता 9-1 पृ.114
3. श्रीमद्भगवद्गीता 6-8 पृ.89
4. कुमारसम्भवम् 1-1 पृ.1
5. कुमारसम्भवस्य सञ्जिवनी टीकायाम् पृ. 2
6. कुमारसम्भवम् 1-2 पृ. 3
7. कुमारसम्भवस्य सञ्जिवनी-टीकायाम् –पृ.2
8. कुमारसम्भवम् 1-3 पृ.3
9. कुमारसम्भवम् 1-4 पृ.3
10. कुमारसम्भवम् 1-5 पृ. 4
11. कुमारसम्भवम् 1-6 पृ. 4
12. कुमारसम्भवम् 1-7 पृ. 5
13. नीतिशतकम् 12 पृ. 12
14. सङ्गीतरत्नाकरः 1-21 पृ. 132
15. कुमारसम्भवम् 1-8 पृ. 5
16. कुमारसम्भवस्य सञ्जिवनीटीकायाम् पृ. 6
17. कुमारसम्भवम् 1-10 पृ. 7
18. योगः कर्मसु कौशलम् । गीता – 2-50 पृ. 45
19. कुमारसम्भवम् 1-21 पृ. 12
20. कुमारसम्भवम् 5-2 पृ. 116
21. कुमारसम्भवम् 1-23 पृ. 13
22. विश्वविद्यालयानुदानायोगस्य ध्येयवाक्यम् ।

## सहायकग्रन्थसूची


1. उपनिषद्-गीताप्रेस्-गोरक्षपुरम्- 273005
2. कुमारसम्भवम्- श्री प.प्रद्युम्नपाण्डेयः-चौखम्वा सुरभारती प्रकाशनम्-वाराणसी-221001
3. भर्तृहरेः शतकत्रयम्- प. गोपीनाथः, राष्ट्रीय संस्कृत संस्थानम्, नईदिल्ली 110058

4. श्रीमद्भगवद्गीता (ओडिआ ) गीताप्रेस्-गोरखपुरम् -273005
5. संस्कृत सप्तकम् –प्रद्योतकुमारवन्दोपाध्यायः –ढाकास्टुडेण्टस् लाइव्रेरी-कलकाता -700073
6. संस्कृतसाहित्येर इतिहास-युधिष्ठिरगोप- संस्कृत-वुक्-डिपो विधानसरणी कलकाता – 700006
7. संस्कृतवीथिका- तृतीयखण्डः- कमलकृष्णचक्रवर्ती-वाणीप्रकाशनम्- कलकाता 700009

संस्कृतविभागाध्यक्षः
योगदा-सत्सङ्ग- पालपाडा महाविद्यालयः
पूर्वमेदनीपुरम्, पश्चिमवङ्गः
दुरभाषः-9933121804
Mail- ls.sanskrit.yspm@gmail.com

# यजुर्वेदे धर्मविचारः

डा.सत्यव्रतनन्दः
अनुसन्धान सहायकः,
राष्ट्रीय भारतीय चिकित्सा संपदा संस्थान, हैदरावाद

❖ **शोधसारः -**

**धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।**
**इतिकर्तव्यताभागं मीमांसा पुरयिष्यति ।।**

'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' इत्युक्तरीत्या परमकारुणिको भगवान् जैमिनिः धर्माधर्मविवेकाय वेदतत्त्वप्रतिपादनाय, वेदार्थनिर्णयाय, श्रौतकर्मानुष्ठानोपयोगाय 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अन्वाहार्ये च दर्शनात्' इत्यन्तैः सूत्रजालैः आद्वादशाध्यायात्मकं वेदार्थप्रतिपादकं पूर्वमीमांसादर्शनम् अरचयत् । विषयोऽयं धर्मविचारनाम्ना प्रस्तुते सति प्राधान्येनात्र मीमांसादृष्ट्या धर्मप्रमाणान्येवालोच्यन्ते ।

❖ **प्रस्तावना -**

**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये**[1]**।**

तत्र गुरुकुलावस्थितिपूर्वक साङ्गवेदस्याध्ययनानन्तरं धर्मजिज्ञासाकर्तव्या इति 'अथाऽतो धर्मजिज्ञासा' इति जिज्ञासाधिकरणे धर्मो विचारितः। तर्हि को नाम धर्मः इति चेत् **'चोदनालक्षणोऽर्थो धर्मः**[2]**'** इति सूत्राद्यः चोदनालक्षणो वेदबोधितोऽर्थः प्रयोजनवान् स धर्म विवक्षितः। तथा च न्याप्रकाशोक्त **'वेदेन प्रयोदनमुद्दिश्य विधीयमानोऽर्थो धर्मः**[3]**'** इति धर्मलक्षणं सिद्धं भवति । पुनश्च **'यागादिरेव धर्मः**[4]**'** इति

---

1 काण्वसंहिता.40.1.15

2 मीमांसासूत्रम्.1.1.1

3 मीमांसान्यायप्रकाशः,धर्मलक्षणम्,पृ.2

4 अर्थसंह्लगहः,धर्मलक्षमम्.पृ.2

लौगाक्षिभास्करस्य धर्मलक्षणनिरूपणे यजुर्वेदीयदर्शपौर्णमासादियागप्रयोग एव ज्ञायते । यतोहि शुक्लयजुर्वेदस्य प्रमुखविषयो भवति यागः। यश्च विधि-अर्थवाद-मन्त्र-नामधेय-वाक्यशेष-आचार-स्मृति-सामर्थ्येतिप्रमाणैः अनुष्ठातुं शक्यः।

**'वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः'**[5] इति लक्षणवाक्ये वेदशब्दस्य लिङ्गादिघटितं वेदवाक्यमर्थः। तदुत्तरतृतीयाविभक्तेः ज्ञाप्यत्वमर्थः । तस्य च विधीयमानपदघटकविधौ अन्वयः। तस्य च शानच् अर्थे फलरूपकृतिविषयत्वेऽन्वयः। तथा च विधिबोधितविधिविभाव्यप्रयोजनो-द्देश्यककृतिविषयो धर्म इति फलितम् । तत्र को नाम विधिः? सः कस्यार्थः? का च कृतिः? सा कस्यार्थः? किं तस्याः प्रयोजनम् ? किञ्च तद्विषयः? इति जिज्ञासायां ज्योतिष्टोमेन स्वर्गकामो यजेत इति वाक्यमादाय तदुपपादयामः। तत्र अज्ञातार्थज्ञापको वेदभागो विधिरिति लक्षणलक्षिते गामानय इत्यादिवाक्यश्रवणा-दनन्तरं गवानयनार्थं किङ्करः प्रवर्तते । सा प्रवृत्तिः एतद्वाक्याधीना ।

तत्र गोपदश्रवणं, अम् प्रत्ययश्रवणं, आनयश्रवणं, केवलमाख्यातश्रवणं वा न निमित्तम् । न हि गामानयेति इत्यादिवाक्यश्रवणादनन्तरं गवानयनार्थं प्रवर्तते । किन्तु लिङः श्रवणमेव निमित्तम्। तथा च लिङर्थज्ञानमेव प्रवृत्तिं प्रति तत्र करणम् । लिङर्थश्च प्रवृत्त्यनुकुलप्रवर्तयितृपुरुष-निष्ठोऽभिप्रायविशेषः। तथा च स एव विधिः। या च प्रवृत्तिस्तेन भवति सैव कृतिः। एवं च लिङ्श्रवणानन्तरं प्रवृत्त्यनुकुलोव्यापारः प्रतीयते । यद्यपि अपौरुषेये वेदे पुरुषाभिप्रायविशेष-रूपाभिप्रेरणा लिङर्थो न भवितुमर्हति, तथापि शब्दगत एव व्यापारविशेषो वेदे लिङर्थ इति कल्पनात् न दोषः। अस्यैव लिङर्थस्य शब्दनिष्ठत्वात् शाब्दीभावनेति नामान्तरमपि । इयं तु प्रसिद्धिः वैदिकानामेव ।[6] 'यजेत स्वर्गकामः' इत्यादिवाक्यानि ।

5 मीमांसान्यायप्रकाशः,धर्मलक्षणम्

6 मीमांसाशासात्रसारः,भाट्टदीपिका, पृ-3

प्रवृत्त्यनुकूलव्यापार इव स्वर्गादिफलार्थे प्रवृत्तौ भावनेति व्यवहारः। सा शाब्दीभावना, प्रवृत्तिरार्थीभावना । यत्सुखरूपं तदेव मुख्यं प्रयोजनम् । न तत्साधनानि । तथा च शाब्दीभावनाया अपि प्रवृत्तिः स्वर्गफलस्य प्रवृत्तेरेव 'अर्थभावना' शब्देन व्यवहारः। तथा च आर्थीभावना कृतिः प्रवृत्तिरित्यादीनि पर्यायपदानि यत्तु न्यायप्रकाशे **'भवितुर्भवनानुकूलो भावकव्यापारविशेषो भावना'** इत्युक्तम् । तस्याप्ययमेवाशयः।[7]

❖ **द्वितीयोऽर्थवादः -**

तत्र प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः[8] इति धर्मप्रमाणत्वेन विधिवाक्यश्रवण-समनन्तरमेव तद्विषये अर्थवादजन्यप्ररोचनायां प्रवर्तते । तत्र किं फलम् ? एवं पुराणेतिहासजनित प्ररोचनाधीनैव यस्य यागादिकर्मसु प्रवृत्तिः तस्यापि तया किं फलं भवतीति जिज्ञासायां, न हि उभयत्रापि अर्थवादस्योपयोगो विद्यत इति चेत्, भाषान्तरादि सम्पादितम् अर्थज्ञानं फलाय कल्पत इति च निरूपितम् ।[9] तथा च पुराणादितः सञ्जातापि प्ररोचना वैदिकप्ररोचनां परिपोषयन्ती सति निराकांक्षी भवति । तथा च पुराणप्ररोचनापरिपोषितवैदिकप्ररोचनात् एव तत्रापि प्रवृत्तिसिद्धा न द्वितीयस्थले वैकल्यम् । विधिवाक्यश्रवणसमनन्तरमेव प्रवृत्तिस्थलेऽपि वेदमूलक तत्तदङ्गाना-मपूर्वप्रवर्त्तक तत्तदनुष्ठानेन एव स्वर्गसिद्ध्या प्रवत्त्यङ्गशब्दभावनाङ्गप्राशस्त्यज्ञानमपि नियमेन वेदपूर्वकं सम्पादनीयम् । नह्यन्यथा प्रवर्त्तमानस्य फलं सिध्यति । न हि यागोद्देश्यं वेदवाक्यं विना प्रकारान्तरेण सम्पादयितुमनुष्ठेयज्ञानं फलाय भवतीति । तथा हि मीमांसान्यायप्रकाशे तत्र 'वायव्यं श्वेतमालभेत' इत्यादिविशेषाणां 'वायुर्वै क्षेपिष्ठा देवता' इत्यादीनामर्थवादानां विधेयार्थस्तावकतया अर्थवत्वम् । अपरञ्च वार्तिके कुमारिलेनाह –

7 मीमांसाशासात्रसारः,भाट्टदीपिका, पृ-3

8 अर्थसंग्रहः, अर्थवादनिरूपणम्

9 मीमांसाशास्त्रसारः,भाट्टदीपिका, पृ-3

**यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत् ।**

**न क्रतोस्तस्य वैगुण्यं यथाचोदितसिद्धितः।।**

इति शुक्लयजुर्वेदविहितदर्शपौर्णमासप्रकरणे यदा दर्शपूर्णमासस्थोऽपि तदतिक्रमं करोति, तदा वाह्यातिक्रमवदस्य स्वयं प्रत्यवायमात्रं स्यात् न कर्मफलसम्भवः। न हि पुरुषधर्मैः क्रतवः प्रत्यवयन्ति। अत्र च मूले निषिध्यमानस्य अनर्थहेतुत्वमित्यन्तरं न तु क्रतोः वैगुण्यमिति ।[10]

❖ **धर्मे मन्त्रप्रामाण्यम् (यजुर्वेदगतमन्त्राणां प्रामाण्यम्)** –

**'तत्र प्रयोगसमवेतार्थस्मारका मन्त्राः**[11]' इति लक्षणलक्षिते **इषेत्वोर्जे त्वा..., उरु प्रथस्व..,अग्निरसि नारिरसी**ति भवन्ति शुक्लयजुर्वेदगतमन्त्रा धर्मप्रमाणधारकाः। प्रयोगसमवेतार्थस्मारकतया अर्थत्वात्, न तदुच्चारणमदृष्टार्थम् । दृष्टे सम्भवति अदृष्टस्य अन्यायत्वात्, न च दृष्टस्य प्रकारान्तरेणापि सम्भवात् मन्त्राम्नानमनर्थकम्। अर्थात् अर्थज्ञानरूपे दृष्टे फले सम्भवति सति अदृष्टकल्पना कर्तुमशक्यत्वात्, येषां मन्त्राणां प्रयोगसमवेतार्थप्रकाशकत्वं सम्भवति । तेषां मन्त्राणाम् अर्थस्मारकत्वमेव प्रयोजनम् । तत्रापि प्रयोगसमवेतार्थप्रकाशक-मन्त्राणाम् अर्थप्रकाशनं दृष्टार्थमेव । तथापि तेषामर्थप्रकाशनमदृष्टार्थम् ।

मन्त्राणां नियतपाठबलादेव मन्त्रैरपि मन्त्रार्थः स्मर्तव्यः इति निगमः कल्पते । तथा हि मीमांसान्यायप्रकाशे –

न च दृष्टस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानमनर्थकम् ।"**मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्**" इत्युक्तस्याप्ययमेवाशयः। तत्र निरुक्ते – **मननात् मन्त्र उच्यते**[12] । अपरञ्च –

10 मीमांसाशास्त्रसारः, भाट्टदीपिका, पृ.6

11 मन्त्रलक्षणम्, मीमांसान्यायप्रकाशः

12 मन्त्रनिर्वचन, निरुक्तम्

"**यत्कामऋषिः यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तस्य देवस्य स मन्त्रो भवति**[13]" इत्यपि निरुच्यते। अत्रापि स एव पूर्वोक्तार्थः द्योतते ।

मन्त्राणां सामर्थ्यबलादेव विनियोगस्य सम्भवेऽपि तत्र तत्र 'उरु प्रथस्वे'ति '**पुरोडाशं प्रथयति**' इत्यादिना ब्राह्मणवाक्येन पुनः विनियोगकरणं व्यर्थं खलु इति, गुणपरिसंख्यार्थकत्वेन पुनः विनियोगविधानस्य सार्थक्यम् । यथा शुक्लयजुर्वेदस्य षष्ठेऽध्याये अग्निष्टोमप्रकरणे 'आभ्रिरसि नारिरसि' इत्यादि अभ्र्यादानप्रकाशकमन्त्राणां सामर्थ्यरूपलिङ्गादेव अभ्र्यादाने प्राप्यमानानां मन्त्राणां पुनः '**तां चतुर्भिः अभ्रीमादत्ते**' इति विधिना अभ्र्यादाने विनियोगः समुच्चयफलक चतुःसंख्यारूपगुणार्थः। पुनश्च एकादशेऽध्याये 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रसामर्थ्यादेव मन्त्रविशिष्टरशनादाने विनियोक्तुं समर्थस्य मन्त्रस्य 'इत्यश्वाभिधानीमादत्ते' इति पुनः विनियोगो गर्दभरशनानिवृत्तिरूपपरिसंख्यार्थः।[14]

नियमपरिसंख्यातिरिक्तफलकविधित्वम् अपूर्वविधित्वम् । एवं मन्त्राणामर्थस्मारकत्वेऽपि न कुत्रापि विनियोगवैयर्थ्यं ब्राह्मणवाक्यानाम् । एवं मन्त्राणाम् अध्ययनविधिनापि प्रयोजनवत्वमात्रं कथ्यते इत्येतावदेवोपपत्तौ, प्राशस्त्यादिप्रतिपादकार्थवादवत् अर्थस्मारकतया मन्त्राणां प्रयोजनवत्वं सिद्धम् ।

❖ **नामधेयस्य धर्मे प्रामाण्यम्** –

तत्र नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्वम् । तथा हि '**उद्भिदा यजेत पशुकामः**' इत्यत्र उद्भिच्छब्दो यागनामधेयः। तेन च विधेयार्थपरिच्छेदः क्रियते । अनेन हि वाक्येन अप्राप्तत्वात् यागः फलोद्देशेन विधीयते । यागसामान्यस्याभिधेयत्वात् यागविशेष एव अभिधीयते । तत्र कोऽसौ विशेषः

13 निरुक्तम्, 7.1

14 मीमांसाशास्त्रसारः.7, भाट्टदीपिका

इत्यपेक्षायाम् उद्भिच्छब्दादुद्भिद्रूपोयाग इत्यवधेयः। उद्भिदा यागेन सामान्याधिकरण्येन नामधेयान्वयात् तत्र वेदविहितधर्मे नामधेयस्यैव प्रामाण्यम् ।[15]

❖ **स्मृतिप्रामाण्यम्** –

'**श्रुतेरिवार्थं स्मृतिरन्वगच्छत्**[16] ' इति धर्मप्रतिपादने तावत् स्मृतिवाक्यानां प्रामाण्यमस्ति । उच्यते 'अष्टकाः कर्त्तव्याः'। एतस्मिन् स्थले स्मृतिवाक्यानां वेदमूलकत्वेन प्रामाण्यमुक्तं भगवता माधवाचार्येण स्मृत्यधिकरणसिद्धान्ते । तद्यथा -

'**विमता स्मृतिर्वेदमूला**' इति वैदिकमन्वादिप्रणीत स्मृतित्वात् । उपनयनाध्ययनादिस्मृतिवत्। तत्र नानावेदेषु नानाशाखासु पठितानुष्ठेयविचारस्य साररूपेण एकत्र सङ्ग्रहः, शिष्टत्रैवर्णिकैः याज्ञिकैः स्मृतिग्रन्थेषु सम्पादितः। अतः स्मृतिवाक्यानां वेदमूलकत्वेन धर्मे प्रामाण्यमिति निश्चयः। यथा शुक्लयजुर्वेदे अग्निष्टोमप्रकरणे यूपसंस्कारस्थले 'औदुम्बरी वेष्टनीया' इत्यादिप्रयोगदृष्टत्वात् तत्र स्मृतिवाक्यानां धर्मे प्राणाम्यमवश्यं स्वीकर्तव्यम् ।[17] तद्वदाचारप्रामाण्यम् ।

**य(त)स्मिन् देशे यः आचारः पारम्पर्यक्रमागतः ।**
**वर्णानां सान्तरालानां स सदाचार उच्यते ।।**[18]

मनुवचनादिवत् वैदिककाले तत्र तत्र दक्षिण-पश्चिमेतिस्थानभेदेन तथा स्वपूर्वपुरुषपरम्पराक्रम-उपदिष्टप्रयोगानां धर्माङ्गिकारत्वे वेदे आचारस्यैव धर्मप्रामाण्यत्वे अङ्गीकारः कृतः। यथा भोजनात् प्राग्

15 मीमांसान्यायप्रकाशः, नामधेयनिरूपणम्

16 रघुवंशम्, 2.3

17 स्मृत्यधिकरणम्, जैमिनिन्यायमालाविस्तरः,1.3.1, भाट्टमतम्

18 मनुस्मृतिः.2.18

भोज्यपदार्थस्य शोधनम् आचारानुकूलतां ज्ञापयति तथैव वेदेऽपि अग्नीषोमादिदेवानां कृते हविःपदार्थस्य फलीकरणशोधनादीनि विचार्यन्ते ।

'एवं वाक्यशेषः सामर्थ्यरूपौ'[19] वेदे धर्मप्रमाणभूतौ भवत इति एवंप्रकारेण शुक्लयजुर्वेदे धर्मप्रमाणानि प्रतिपादितानि सन्ति ।

**अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।**

**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।**[20]

अतः वेद एव धर्मस्य श्रेयोमार्गः । यजुर्वेदे 'इषे त्वोर्जे त्वा' इत्यारभ्य 'ते नम उक्तिं विधेम' इत्यन्तैः मन्त्रैः समस्तोऽपि कर्म धर्मप्रेरकमेव । तत्र धर्मस्य उपायो नितरामन्वेषणीयः।

**ॐ प्रतिपन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ।।**[21]

<u>सन्दर्भग्रन्थाः</u>


- *अर्थसंग्रहः* : कामेश्वरनाथमिश्रः,वराणसी, चौ.सं.सं., 1994 ।
- *काण्वसंहिता* : वैदिकसंशोधन मण्डल, पुणे, 1988 ।
- *जैमिनीयन्यायमालाविस्तरः* : माधवाचार्यः,पट्टाणिरामशास्त्री, चौ.सं.प्र., वाराणसी.2009 ।
- *निरुक्तम्* (मूल निघण्टुसहितम्) : भगीरथशास्त्री, मेहरचन्द लछमनदास पब्लिकेशन्स, नईदिल्ली, 2016
- *भाट्टदीपिका* : खण्डदेवः, प्रभावतिटीका-मण्डनशम्भूभट्ट, पाण्डुरङ्ग जावाजी ।
- *मीमांसादर्शन* (शाबरभाष्यम्) : महादेव चिणमादी आप्टे, आनन्दाश्रममुद्रणालय, 1982ख्रीष्टः।
- *मीमांसान्यायप्रकाशः* : आपदेवः, चौ.सं.प्र., वाराणसी, 2008 ।
- *शतपथब्राह्मणम्* : वैदिकसंशोधन मण्डल, पुणे, 1988 ।


---

19 मीमांसान्यायप्रकाशः, वाक्यशेषनिरूपणम्

20 मनुस्मृति.2.13

21 काण्वसंहिता.4.9.6

# श्रीमद्भागवतमहापुराण में मानवाधिकार विमर्श

डा.अञ्जना तिवारी
एसि. प्रोफेसर, संस्कृत, पालि एवं प्राकृत विभाग,
महाराजा मायाजिराव विश्वविद्यालय,
वडौदा, वडोदरा गुजरात

**प्रबन्धसार :**

साहित्य अथवा वाङ्मय मानव जीवन की दिशा निर्धारित करता है। कालान्तर में समाज तथा संस्कृति में समय-समय पर परिवर्तन भी होते हैं। जोकि तत्कालीन परिस्थति के अनुसार अपेक्षित भी होता है। मानव समाज को अनुशासित बनाए रखने के लिए शास्त्र के आधार पर ही निर्णय लेने की जो व्यवस्था की गयी वह अद्यापि प्रचलित है। यही शास्त्र हमें कर्त्तव्य एवं अधिकार का भी बोध कराता है। जिसका उद्देश्य मनुष्य को विवेकपूर्ण किसी को भी आहत न करते हुए गरिमामय व्यवहार सिखाना है। समस्त भारतीय वाङ्मय में यह बात निष्पक्ष एवं सहज रूप में दिखाई देती है। अधिकार और कर्त्तव्य की यह पृष्ठभूमि भारतीय जीवन-प्रणाली के प्राण हैं। श्रीमद्भागत-महापुराण में निरूपित विषय कथा एवं आख्यान द्वारा यही बोध कराते हैं। अतः प्रस्तुत लेख इसी विषय को लक्षित करते हुए उपरोक्त ग्रन्थ के आधार पर मानव अधिकारों के निरुपण की एक प्रस्तावना है।

भारतीय संस्कृति की आधारशिला स्वधर्म का विधिपूर्वक पालन तथा पुरुषार्थ-चतुष्टय की प्राप्ति है। जहाँ मनुष्य अपने आप को केन्द्र में रखकर इस विषय पर चिन्तन कर स्वसामर्थ्यानुसार उनका पालन भी करता है। मनुष्य का यही विवेक उसे अन्य प्राणिओं की अपेक्षा श्रेष्ठ बनाता है। भारतीय चिन्तन में मनुष्य जन्म की विलक्षणता के विषय में कहा गया है –

दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥[1]

मनुष्य जन्म को अन्य योनिओं की अपेक्षा श्रेयस्कर तथा उत्तम माना गया है। जिससे वह न केवल अपने लिए अपितु दूसरे प्राणधारिओं, प्रकृति तथा समाज के प्रति भी कुछ कर सके। यही मनुष्य जीवन की सार्थकता है।

मनुष्य द्वारा ही परिवार एवं समाज की अवधारणा रखी गयी तथा इसी समाज में शान्ति और सुरक्षा की स्थपना की उद्देश्य से मानवाधिकार के विषय में संस्कृत ग्रन्थों में जो चिन्तन किया गया वह, पूर्णतया मानव समुदाय के हित के लिए ही है। जिसका अनुसरण करने से समस्त समाज को अनुशासित एवं उपकृत किया जा सके। श्रीमद्भागवत में राजा निमि एवं नवयोगेश्वरों के संवाद में इसका उल्लेख मिलता है कि यदि मनुष्य निष्ठापूर्वक शास्त्रनिर्दिष्ट स्वधर्म का आचरण करे तो उसका पतन नहीं होता। यही आत्मोपलब्धि का एकमात्र साधन है-

ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये।
अञ्जः पुंसामविदुषां विद्धि भगवतान् हि तान् ॥

[1] श्रीमद्भागवत महापुराण, 11.2.29

यानास्थाय नरो राजन् न प्रमाद्येत् कर्हिचेत् ।
धावन् निमील्य वा नेत्रे न स्खलेन्न पतेदिह ।।[2]

10 दिसम्बर 1948 को संयुक्त राष्ट्र महासभा द्वारा मानवाधिकारों की घोषणा हुई जिसे संविधान सभा में 26 नवम्बर 1949 को प्रतिष्ठित किया गया । मानवाधिकार उन नैतिक सिद्धान्तों को कहा जाता है जो मानवीय व्यवहार से सम्बन्धित कुछ निश्चित मानकों को स्थापित करते हों तथा जिनसे मनुष्यों को कर्तव्य तथा अकर्तव्यता का बोध होता हो । ये प्रायः प्रत्येक मनुष्य के मूलभूत अधिकार है जिनका हनन करना सर्वथा अनुचित है । एक व्यक्ति का अधिकार ही दूसरे व्यक्ति का कर्तव्य बन जाता है । किसी भी व्यक्ति की आयु, वर्ण, प्रजातीय मूल, निवास स्थान, भाषा, धर्म आदि का इन पर कोई प्रभाव नहीं होता । ये सदा सर्वदा पालनीय हैं और सभी के लिए समान हैं काव्य की परिकल्पना भी इसी आधार पर की गयी है -

चतुर्वर्गफलप्राप्तिः सुखादल्पधयामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।[3]

आचार्य विश्वनाथ की इन पंक्तिओं में मानवमात्र के कर्तव्य बोध का अधिकार स्पष्टतया देखा जा सकता है । यही काव्य का प्रयोजन है जो मनुष्य मे इस समझ को विकसित कर सके कि हमारा आचरण राम के जैसा हो रावण जैसा नहीं । जिसे समझने एवं जानने का अधिकार सभी को है ।

वेद समस्त धर्म का मूल है । "वेदोऽखिलो धर्ममूलम्"[4] यहाँ धर्म शब्द का अर्थ व्यापक है । वस्ततः धर्म का तात्पर्य ऐसे व्यवहार से है जहाँ नैतिक मूल्यों का अनुसरण तथा सदाचार का पालन इस प्रकार किया जाये कि किसी भी वर्ग की हानि न हो । संस्कृत वाङ्मयमें मानव की मूलभूत अधिकारों की रक्षा तथा स्वकर्त्तव्य के पालन का निर्देश येन केन प्रकारेण सर्वत्र उपलब्ध होता है ।

सनातन संस्कृति में संस्कृत वाङ्मय को तीन भागों में विभक्त किया गया है - राजवाक्य (वेद), मित्रवाक्य (पुराण एवं स्मृति), कान्तावाक्य (संस्कृत साहित्य) ।

**(1) राजवाक्य -** वेद स्वतः प्रमाण हैं तथा पाठक के साथ वेद का सम्बन्ध प्रभु-भृत्य का है जिनका अक्षरशः पालन करना भृत्य(सेवक) का कर्त्तव्य है । इन वाक्यों में किन्तु - परन्तु के लिए कोई स्थान नहीं है । इनका पालन करना प्रत्येक के लिए अनिवार्य है ।

**(2) मित्रवाक्य -** पुराण एवं स्मृति के साथ पाठक का सम्बन्ध मित्रवत् है । जिस प्रकार मित्र के उपदेश अथवा परामर्श की परीक्षा करनी चाहिए । उसी प्रकार हित वाक्यों का अनुसरण तथा अहित वाक्यों की उपेक्षा करना सर्वथा उचित है । अपने विवेकानुसार ही इनका अनुसरण करना चाहिए । ये परतः प्रमाण है तथा उनकी कसौटी का मूलाधार वेद ही हैं ।

**(3) कान्तावाक्य –** वेद, पुराण, स्मृति के अतिरिक्त जो उपयोगी वाङ्गमय है उसे साहित्य कहा जाता है । साहित्य का सम्बन्ध कान्ता-कान्त सम्बन्ध है । इसकी निस्सृति हृदय प्रधान बुद्धि से होती है । यहाँ

---

[2] वही, 11.2.34-35

[3] साहित्यदर्पण, 1.2

[4] मनुस्मृति, 2.6

प्रमाणाप्रमाण का प्रश्न ही नहीं है। साहित्य में अनेक स्थलों पर धर्म और नीति के माध्यम से अधिकारों को भी इंगित किया गया है।

उपनिषदों में शास्त्रोक्त नियत कर्मों का पालन करते हुए सौ वर्ष तक जीने की इच्छा रखने का उपदेश मिलता है –

कुर्वन्नैवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।[5]

उसी प्रकार पौराणिक साहित्य में मित्रवत् आख्यानों एवं कथाओं के माध्यम से अधिकार एवं कर्त्तव्य का बोध कराया गया है। श्रीमद्भागवतमहापुराण का तो उद्गम ही इसी आधार पर हुआ है। सम्भवतया यही कारण है कि अष्टादश पुराणों में इस पुराण का विशेष महत्त्व है। दाद्वशस्कन्धात्मक इस पुराण के प्रारम्भ में ही पृथिवी जो कि गाय के रूप में तथा धर्म बैल के रूप में कलियुग द्वारा प्रताडित हैं उनकी रक्षा धर्मात्मा परीक्षित द्वारा की जाती है।

एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः।
अत एवं वधिष्यामि भूतद्रुहमसत्तमम् ।।[6]

श्रीमद्भागवत को साक्षात् भगवान् का स्वरूप माना गया है। प्रथम-द्वितीय स्कन्ध क्रमशः श्रीकृष्ण के दक्षिण एवं वाम चरण हैं। प्रथम स्कन्ध का नाम अधिकार स्कन्ध भी है। जहाँ न केवल मनुष्य अपितु प्राणीमात्र को स्वेच्छा पूर्वक जीवन जीने के अधिकार का वर्णन है। शमीक मुनि के पुत्र द्वारा परीक्षित को शाप दिये जाने पर मुनि ने अपने पुत्र को कहा कि दण्ड अपराधानुसार देना चाहिए क्रोध वश नहीं। उनकी दृष्टि मे परीक्षित को दिया गया शाप उनके अपराध के अनुसार बहुत बडा था। इसके लिए उन्होंने क्षमा याचना भी की। यही भाव भारतीय संविधान के अनुच्छेद 11 में अपने संरक्षण के लिए तथा दोष सिद्ध न होने तक उस व्यक्ति के प्रति सामान्य व्यवहार करने में है। दोष सिद्ध होने पर अपराधानुसार दण्ड का तथा अभियुक्त को अपना पूर्ण पक्ष रखने के अवसर देने का प्रावधान सम्बन्धी अनेक प्रसंग हैं।

सम्पूर्ण भागवत परीक्षित द्वारा शुकमुनि को पूछे गये दो प्रश्नों पर आधारित है – 1.मनुष्य मात्र का क्या कर्त्तव्य है तथा 2.जिसकी मृत्यु निकट है ऐसे पुरुष का क्या कर्त्तव्य है ?

अतः प्रच्छामि संसिद्धिं योगिनां परमं गुरुम्।
पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ।। [7]

यही कर्तव्य दूसरे व्यक्ति का अधिकार है परीक्षित द्वारा लोकहित में पूछे गये इन प्रश्न की शुकमुनि द्वारा प्रशंसा की गयी है ।

वरीयानेष ते प्रश्नः कृतो लोकहितो नृपः।
आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ।।[8]

[5] ईशावास्योपनिषद्, 2

[6] भागवतपुराण, 1.17.11

[7] भागवतपुराण, 1.19

[8] वही, 2.2.1

यही वैचारिक अभिव्यक्ति की स्वतन्त्रता का स्पष्ट निर्देश है। जिसमें किसी भी व्यक्ति को ज्ञानार्जन तथा अपनी जिज्ञासा व्यक्त करने का पूर्ण अधिकार है। लोककल्याण के हेतु से महापुरुषों द्वारा मार्ग-स्थापन किया जाता है।

राजा भरत जिन्हें जडभरत भी कहा जाता है उनके चरित में धार्मिक स्वतन्त्रता का उल्लेख मिलता है। ये ऋषभदेव के पुत्र थे जो कि स्वयं जैन तीर्थकर के रूप में प्रसिद्ध हुए और भरत ने भागवत धर्मो का आचरण करते हुए राजर्षि के रूप में प्रतिष्ठा एवं परम् गति प्राप्त की।

तेषां वै भरतो ज्येष्ठो नारायणपरायणः।
विख्यातं वर्षमेतद् यन्नाम्नाभारतमद्भुतम् ।।[9]

भरत के अन्य भाई अपनी अपनी रुचि के अनुसार अलग अलग क्षेत्र में प्रसिद्ध हुए। वे भी किसी प्रकार से किसी क्षेत्र विशेष को अपनाने के लिए बाध्य नहीं थे।

तेषां वै नव नवद्वीपपतयोऽस्य समन्ततः।
क्रमतन्त्रप्रणेतार एकाशीतिर्द्विजातयः ।।[10]

उपरोक्त प्रसंग द्वारा संविधान में उल्लिखित स्वेच्छा से धर्मानुसरण का अधिकार तथा जीविका चयन के अधिकार को समझा जा सकता है।

सप्तम स्कन्ध के छठे अध्याय में प्रह्लाद जी द्वारा दैत्य बालकों को जीवन की सार्थकता तथा सदाचार का उपदेश दिया गया है -

कौमारं आचरेत् प्राज्ञो धर्मान् भागवतानिह।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ।।[11]

उपरोक्त श्लोक में मनुष्य मात्र का अधिकार है कि वह अपने जीवन की सही दिशा तथा आत्मोन्नति के लिए हर सम्भव प्रयास करे। इसी प्रकार माता देवकी को गर्भावस्था में देख कर कंस जैसे दुष्ट की सद्भावना तथा सद्विचारों में नारीत्व के गौरव की रक्षा तथा उसके अधिकारों का वर्णन मिलता है।

किमद्य तस्मिन् करणीयमाशु मे यदर्थतन्त्रो न विहन्ति विक्रमम्।
स्त्रियाः स्वसुर्गरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकालमायुः।
स एष जीवन खलु संपरेतो वर्तेत योऽत्यन्तनृशंसितेन।
देहे मृते तं मनुजाः शपन्ति गन्ता तमोऽन्धं तनुमानिनो ध्रुवम् ।।[12]

उपरोक्त प्रसंग से यह समझा जा सकता है कि तत्कालीन समाज में सभी को कर्त्तव्य एवं अकर्त्तव्य का बोध कराने के उद्देश्य से शिक्षा दी जाती थी। जिसका विवेकपूर्ण विचार करने के पश्चात् ही अनुरसण किया जाता था।वहीं गोवर्धन उद्धरण के प्रसंग द्वारा धार्मिक आयोजन की स्वतन्त्रता को समझा जा सकता है। किसी भी व्यक्ति विशेष अथवा मनुष्य तो क्या किसी देव द्वारा भी किसी भी मानव को विशेष आराधना के लिए बाध्य नहीं किया जा सकता।अपनी श्रद्धानुसार धर्माचरण प्रत्येक व्यक्ति का मूलभूत अधिकार है। इस विषय में स्वयं भगवान कहते हैं-

कर्मणा जायते जन्तुः कर्मणैव विलीयते।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ।।

[9] वही, 11.2.17

[10] वही, 11.2.19

[11] वही, 7.6.1

[12] वही 10.2.21-22

अस्ति चेदीश्वरः कश्चित् फलरूपान्यकर्मणाम् ।
कर्तारं भजते सोऽपि ह्यकर्तुः प्रभुर्हि सः ।। 13

भारतीय संविधान शिक्षा के समान अधिकार का पक्षधर है । सांदीपनि आश्रम में श्रीकृष्ण का एक गरीब ब्राह्मण बालक सुदामा के साथ विद्यार्जन करना शिक्षा के मूलभूत अधिकार को बिना किसी भेदभाव के बताता है । साथ ही यह प्रसंग प्रगाढ मैत्री का भी एक उत्कृष्ट उदाहरण है-

कच्चिद् गुरुकुले वासं ब्रह्मन् स्मरसि नौ यतः।
द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ।।14

शिशुपाल के वध के प्रसंग में मानवीय मनोभावों की अभिव्यक्ति का अधिकार दृष्टिगोचर होता है । एकादश स्कन्ध में श्रीकृष्ण का दार्शनिक स्वरूप तथा पक्षपात के बिना धर्म का स्थापन तथा अनुचित होने पर अपने कुल का नाश कर देना स्पष्ट न्याय का उत्कृष्ट दृष्टान्त है -

नैवान्यतः परिभवोऽस्य भवेत् कथञ्चित्
मत्संश्रयस्य विभवोन्नहनस्य नित्यम् ।
अन्तःकलिं यदुकुलस्य विधाय वेणु-
स्तम्बस्य वह्निमिव शान्तिमुपैमि धाम ।।15

इसी स्कन्ध में अवधूतोपाख्यान भी है । जिसमें दत्तात्रेय के चौबीस गुरुओं का वर्णन है । जहाँ प्रत्येक जीव का स्वभाव तथा उससे प्राप्त होनेवाली शिक्षा का वर्णन मानवीय समाज के लिए एक दिशानिर्देश है ।

एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः ।
शिक्षा वृत्तिभिरेतेषामन्वशिक्षामिहात्मनः।।16

उपरोक्त प्रसंग में प्रकृति,प्राकृतिक तत्वों तथा सृष्टि में निहित प्राणीमात्र के अधिकारों का गहन चिन्तन है ।

भागवत के द्वादशस्कन्ध में कलियुग के धर्मों का वर्णन है जहाँ एक ब्राह्मण मन्त्री द्वारा प्रजा के अधिकारों का हनन करने वाले प्रमादी राजा का साम्राज्य समाप्त कर मौर्यवंश की स्थापना किये जाने का उल्लेख है । जोकि परिस्थिति विशेष में जनहित में एक मन्त्री द्वारा लिए गये निर्णय और उसके अधिकारों को इंगित करता है । किसी भी सामाजिक और वैचारिक भेदभाव के बिना समस्त संसार की मंगल कामना उपनिषदों भी की गयी है ।

ॐसह नावनतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वी नावधीतमस्तु । मा विद्विषावहै । ॐशान्तिः शान्तिः शान्तिः । 17

**निष्कर्ष-** उपरोक्त विवेचन से यह भलीभाँति समझा जा सकता है कि समस्त भारतीय शास्त्र में मानव अधिकारों का चिन्तन हुआ है । यही श्रीमद्भागवत-महापुराण में अनेक प्रसंगों द्वारा निरूपित है । जोकि मानव समाज के लिए एक मार्गदर्शक की भूमिका निभाता है । शास्त्रोक्त वचनों का यथासामर्थ्य पालन करना प्रत्येक मनुष्य का अनिवार्य कर्त्तव्य है । जिससे मानवीय मूल्यों की रक्षा हो सके । तथा कर्त्तव्य पालन

---

13 वहीं. 10. 24. 13

14 वहीं 10.80.31

15 वहीं. 11. 1. 4

16 वही. 11. 7. 35

16 वही. 11. 7. 35

17 शान्तिपाठ कठोपनिषद्

द्वारा मनुष्य को दिये गये अधिकारों का यथार्थ रूप समझा जा सके। भगवद्गीता भी कर्त्तव्य परायणता का उपदेश देती है जिससे मनुष्य अपने कल्याण का मार्ग प्रशस्त करने में सक्षम हो।

**सन्दर्भसूची :**


1. *श्रीमद्भागवत महापुराण*, गीताप्रेस, गोरखपुर, 1998.
2. *श्रीमद्भागवत* (गुजराती भाषान्तर), सम्पा. कल्याणरायकानजी शास्त्री, पुष्टिमार्गीय पाठशाला ट्रस्ट, पाटण (गुजरात), 2017.
3. *श्रीमद्भागवत* (मूलमात्रम्), सम्पा. नवनीतप्रिय शास्त्री, विद्यानिधि ट्रस्ट, नडियाद, 2011.
4. *श्रीमद्भागवतकथासार* (गुजराती), सम्पा. किरीट व्यास, भारती किरीटव्यास, निजामपुरा, वडोदरा, 2021.
5. *उपनिषद् अङ्क*, कल्याण-कार्यालय, गीताप्रेस, गोरखपुर, 1998.
6. *श्रीमद्भगवद्गीता*, गीताप्रेस, गोरखपुर, 2021.
7. *मनुस्मृतिः*, सम्पा. गिरिजाशंकर मयाशंकर शास्त्री, भिक्षु अखंडानन्द प्रसादी सस्तु साहित्य वर्धक कार्यालय, मुंबई, 1976.
8. *साहित्यदर्पणः*, सम्पा. सत्यव्रत सिंह, चौखम्बा विद्याभवन, वाराणसी, 2010.

# भामहदृष्ट्या काव्यकारणपर्यालोचनम्

वापनरुइदासः
शोधछात्रः, संस्कृतविभागः
रामकृष्णमिशनविद्यामन्दिरम्, बेलुड,

## भूमिका

कवेः कर्म इत्यर्थे कविशब्दात् ष्यञ्प्रत्यये काव्यशब्दो निष्पद्यते। अस्य काव्यस्य किं लक्षणमिति आलंकारिकैः नैकानि लक्षणानि लक्षितानि। यथा, भामहनये 'शब्दार्थौ सहितौ काव्यम्', दण्डिमते 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली', आनन्दवर्धनदिशा 'सहृदयहृदयाह्लादिशब्दार्थमयत्वेन काव्यलक्षणम्', मम्मटदृष्ट्या 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'। जगन्नाथनये 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्', विश्वनाथमते च 'वाक्यं रसात्मकं काव्यम्'। एवम्प्रकारेण सुप्राचीनकालतः संस्कृतवाङ्मये काव्यस्वरूपमवलम्ब्य आलंकारिकेषु यथा वैमत्यं दृश्यते तथैव काव्योत्पत्तेः कारणविषयेऽपि विदूषां विप्रतिपत्तिरस्ति। नैकेष्वालंकारिकेषु काव्यतात्त्विकभामहपादाचार्येण काव्यकारणनिरूपनावसरे तदीये काव्यालङ्कारग्रन्थे किम् आलोचनं प्रतिपादितमिति तु मम आलोच्यो विषयः। इदानीं तमेव विषयमाधारीकृत्य भामहदृष्ट्या काव्यकारणपर्यालोचनमिति नामाङ्कितः लघुप्रबन्धः ग्रन्थदिशा विस्तृततया अधस्तात् प्रस्तूयते –

## काव्यकारणम्

काव्यतात्त्विकेन भामहपादाचार्येण काव्यप्रयोजननिरूपणान्तरं काव्यकारणं निरूपितम्। भामहेन काव्यकारणनिरूपणप्रसङ्गे निर्दिष्टतया किञ्चित् नोल्लिख्यते। परन्तु काव्यरचनायां कस्य उपादानस्य आवश्यकता वर्तते, तस्य चर्चा विहिता तेन –

गुरुपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः॥[1] इति।

गुरोः शिक्षया कश्चिज्जडमतिरपि शास्त्रमधिगन्तुं समर्थो भवति परन्तु काव्यं तु कस्यचित्प्रतिभाशालिन एव कदाचित्स्फुरति। प्रतिभावानपि सदैव निरन्तरं साधुकाव्यनिबन्धने न समर्थो भवति। महाकवेः कालिदासस्यापि सर्वाः कृतयः समानमुत्कर्षं न धारयन्ति । सत्काव्यस्य निर्माणमूलं प्रतिभाव्युत्पत्त्यभ्यासानां त्रितयं भवति । तत्र मुख्यं प्रतिभा वर्तते । अस्य श्लोकस्य

द्वितीये चरणे वर्णितात् 'जातु' इति पदप्रयोगात् ध्वन्यते यत् प्रतिभा खलु दुर्लभा । एतद् अग्निपुराणेऽपि स्वीक्रियते –

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।

कवित्वं दुर्लभं तत्र शक्तिस्तत्र च दुर्लभा ॥[2] इति।

अस्मिन् संसारे मनुष्यस्य शरीरं दुर्लभम्, मनुष्यत्वे विद्या दुर्लभा, विद्यायां कवित्वं दुर्लभम्, कवित्वे च शक्ति: प्रतिभा वा दुर्लभा। अत्र प्रतिभा एव काव्यस्य मुख्यकारणम्। किन्तु अधुनात्र प्रश्नो हि केयं प्रतिभा? भामहेन प्रतिभाया: किमपि लक्षणं न लक्षितम्। भट्टतौतेन प्रतिभालक्षणप्रसङ्गे न्यगादि–

स्मृतिर्व्यतीतविषया मतिरागामिगोचरा।

बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता।

प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः॥[3] इति।

अर्थात् या अतीतं प्रति याति सा स्मृतिः, या भविष्यं प्रति याति सा मतिः, या वर्तमानमवेक्षते सा बुद्धि: या च त्रिकालं व्याप्नोति सा प्रज्ञा मता। इयमेव नवनवोन्मेषशालिनी प्रज्ञा प्रतिभेत्युच्यते। अत्रेदं तात्पर्यं यत्प्रतिभा खलु त्रिकालव्यापिनी नवनवोन्मेषशालिनी च। अत एव प्रतिभावान् कविः त्रिकालद्रष्टेति कथ्यते। आचार्याभिनवगुप्तानुसारेण प्रतिभाया लक्षणं कृतम् –

अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा।[4] इति।

अर्थात् या प्रज्ञा अपूर्ववस्तुनो निर्माणे समर्था सैव प्रतिभा। प्रतिभाबलेन यद्वस्तु आविष्क्रियते तन्न केवलं नवीनम् अपि तु अपूर्वमेव।

अत्र भट्टतौतस्य 'नवनवोन्मेषशालिनी' इत्यस्मात् विशेषणात् अभिनगुप्तस्य 'अपूर्ववस्तुनिर्माणक्षमा' इति विशेषणं सार्थकतां भजते। नवनवोन्मेष: साधुरिति, परन्तु अस्मिन् उन्मेषे चमत्कारिताया: अपूर्वतायाश्च आवश्यकता अस्ति। अभिनवगुप्तप्रणीते प्रतिभालक्षणे

द्वयोरपि अभिव्यक्तिः स्यादिति। वस्तुनो नवीनतावशात् चमत्कारितावशाच्च प्रतिभा काव्यस्य सौन्दर्यं साधयति। अस्मात्कारणात् काव्यनिर्माणे प्रतिभा मुख्यकारणम्।

नवनवोन्मेषः कल्पनया एव प्राप्यते, यदि कल्पनायाः आधारः यथार्थः स्यात्। ये प्रतिभाशालिनः मानवजीवनं गभीररूपेण अधीयते अथवा ये बहूनां शास्त्राणां ज्ञानं लभन्ते त एव नवनवोद्भावनं कर्तुं पारयन्ति । एतदर्थमेव भामहाचार्येण भणितम् – भूलोकस्य स्थितिकालपर्यन्तं यशसं लब्धकामः व्यक्तिः ज्ञातव्यं विषयं ज्ञात्वा काव्यनिमार्णं कर्तुं शक्नोति[5]। एतद्व्यतिरिच्यापि कवेः विषयेऽस्मिन् ज्ञानमावश्यकम् –

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथा।

लोको युक्तिः कलाश्चेति मन्तव्याः काव्यगैर्ह्यमी॥[6] इति।

अत्र 'शब्द' इति प्रयोगात् शब्दानुशासनं व्याकरणं वा बुध्यते। अनेन शब्दानां शुद्धप्रयोगानां ज्ञानं स्यात्। शास्त्रे उक्तम् – शब्दानां सम्यक् ज्ञानं सुष्ठु प्रयोगश्च स्वर्गलोकस्य सर्वकामनायाः पूरको भवति[7]।

शब्दानां सम्यग् ज्ञानं, सुष्ठु शब्दप्रयोगश्च व्याकरणज्ञानमृतेऽसम्भवम्। अतः रचयितुकामानां व्याकरणशास्त्रस्य ज्ञानमावश्यकम्। पद्यात्मिका काव्यरचना छन्दसा एव भवति। अतः छन्दसः निर्माणं वर्णमात्रयोः आधारत्वेन प्राप्यते। कवेः भावाभिव्यञ्जनायां छन्दसः महत्वपूर्णा भूमिका अस्ति। तस्मात् छन्दसः सूक्ष्मातिसूक्ष्मविषयस्य ज्ञापनार्थं छन्दःशास्त्रे कवेः ज्ञानार्जनम् आवश्यकम्। अत्र 'अभिधानम्' इति वचनात् कोशग्रन्थः बोध्यव्यः। शब्दज्ञानभाण्डारविस्तृतये विभिन्नानां कोशग्रन्थानामपि अनुशीलनं कर्तव्यम्। ततः 'अर्थ' इति पदेन लक्ष्यार्थ-वाच्यार्थ-व्यङ्ग्यार्थाः बुध्यन्ते। अनेन काव्यशास्त्रस्य ज्ञानं भवितुमर्हति, तदर्थं वाच्यार्थादिविषयेऽपि कवेः ज्ञानम् आवश्यकम्। अत्र इतिहासाश्रित्य इति वचनात् रामायणमहाभारतयोः कथा प्राप्यते। संस्कृतजगति नैकानि काव्यानि नाटकानि वा रामायणमहाभारतयोः कथामाश्रित्य रचितानि। रामायणमहाभारताभ्यां विना परम्परानुसारेण काव्यज्ञानं सम्पूर्णं न स्यात्। तस्मात् काव्यरचनायां रामायणादिग्रन्थानां ज्ञानार्जनं कविना कर्तव्यम्। ततः अत्र 'लोक' इत्यनेन शब्दप्रयोगेन लोकव्यवहार इति बुध्यते। काव्यरचनाभिलाषी कविः मानवजीवनेन सह यावान् संयुक्तः, तावान् प्रभावपूर्णं काव्यं रचयितुं समर्थः। कविः सुखदुःखरागादीनाम् अनुभूतिः लोकव्यवहारादेव प्राप्यते। 'युक्ति' इति शब्दात् तर्कशास्त्रम् अवगन्तव्यम्। परन्तु तस्य अर्थः समग्रे दर्शनशास्त्रे एव प्राप्यते। सङ्गीतनृत्यादिशब्दाः कलाशब्दवाचकाः। काव्यरचनाभिलाषिनः कवेः

कलाशास्त्रेऽपि निपुणता आवश्यिकी। तदैव स: 'वैचक्षण्यं कलासु' इति काव्यप्रयोजनसिद्धये सफलो भवति।

उपर्युक्तालोचनया बुध्यते यत् – काव्यरचनायां काव्यरचनाभिलाषिन: कवे: शब्दछन्दाभिधानादिविषये निपुणता आवश्यिकी। भामहनये एतेऽपि काव्यनिर्माणस्य हेतव:। काव्यकारणप्रसङ्गे दण्डिना 'व्युत्पत्ति:', मम्मटेन च 'निपुणता' इति शब्दप्रयोग: कृत:।

तर्हि दृश्यते यत् – काव्यनिर्माणाय व्युत्पत्ति: तथा निपुणता आवश्यिकी परन्तु केवलं प्रतिभां व्युत्पत्तिं चावलम्ब्य सत्काव्यस्य रचना असम्भवा। भामहनये शब्दार्थान् सम्यक् ज्ञात्वा, काव्यज्ञान् विधिपूर्वकं समुपास्य पूर्ववर्तिनां महाकवीनां सत्काव्यानि समधीत्य काव्यनिर्माणे सादरमध्यवसायं प्रारभेत। यथोक्तं तेन –

शब्दाऽभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।

विलोक्याऽन्यनिबन्धांश्च कार्य: काव्यक्रियादर:॥[8] इति।

काव्यं कर्तुं विचारयितुं च यो जानाति स तद्वित् काव्यज्ञ:। तथाविधस्य तस्य काव्यज्ञस्य उपासनां सेवनं शुश्रूषां वा कृत्वा विधाय अन्यनिबन्धान् पूर्ववर्तिनां प्रथितमहाकवीनां काव्यबन्धान् विलोक्य परिशील्य काव्यक्रियादर: काव्यकर्मणि आग्रह: मनोयोगपूर्वमहीनतया निर्माणव्यापार: कार्य: करणीय:। यथा यज्ञादिकर्मसु श्रद्धा मनयोगोऽप्रमाद: प्रदर्श्यते तथैव अत्रापि। अनेन श्लोकेन ज्ञातुं शक्यते शब्दार्थज्ञानमेव काव्यरचनायां न पर्याप्तं स्यात्। यत: काव्यज्ञपण्डितानां निर्देशानुसारेण काव्याभ्यास: आवश्यक: स्यात्, यत्र काव्यरचनारम्भात् दोषगुणयो: धारणा प्राप्यते। दोषगुणादीनां सम्यक् अधीत्य काव्यरचनायां सत्यां काव्यं माधुर्यमण्डितमधिकं भवति।

भामहाचार्यस्य आलोचनात् ज्ञायते, प्रतिभा व्युत्पत्ति: अभ्यासश्चेति काव्यस्य कारणम्। किन्तु एतेषां मध्ये प्रतिभा खलु मुख्यकारणम्, यत: प्रतिभां विना व्युत्पत्त्यभ्यासौ निरर्थकौ। पुन: प्रतिभां विहाय सत्काव्यस्य निर्माणमपि असम्भवम्। तथाहि आदौ प्रतिभाप्रतिपादनानन्तरम् अध्ययनजन्या व्युत्पत्ति: प्रतिपादिता। पुनस्तेन कथितं ज्ञानदृष्ट्या शास्त्रं, लोक: कला चेति त्रयस्य एव उपयोग: स्यात्। अन्ते च अन्येषां कवीनां रचनां प्रेक्ष्य, काव्यज्ञानाम् उपासनां कृत्वा काव्यनिर्माणे प्रवृत्त: स्यात्, योऽभ्यासो नाम्नाभिधीयते। काव्यज्ञानामुपासना अभ्यासेनैव भवति। यत: तन्मार्गानुसारेण ज्ञातुं शक्यते यत् काव्यस्य का त्रुटि: ? तत्समाधानं वा केन प्रकारेण सम्भवम्। अतएव प्रतिभा-व्युत्पत्ति-अभ्यासान् आधारीकृत्यैव काव्यनिर्माणं सम्भवति। एतेषाम् आधार: प्रस्तुतकरणाय भामहाचार्य एव श्रेय:।

भामहोत्तरवर्तिभिः आलंकारिकैरपि काव्यहेतुविषये विस्तृतालोचना कृता। तेषु नैकैः आलंकारिकैः प्रतिभा एव काव्यस्य मुख्यहेतुरूपेण स्वीक्रियते, व्युत्पत्तिः अभ्यासश्च गौणः। यथा पण्डितराजजगन्नाथनये केवलं प्रतिभा एव काव्यकारणम्[9]। परन्तु दण्ड्याचार्यः व्युत्पत्तौ अभ्यासे चाधिकं गुरुत्वमारोपितम्[10]। तेन मन्यते यत् – सर्वस्मिन् प्रतिभा न विद्यते। तदर्थं मनुष्यो यदि व्युत्पत्त्या अभ्यासेन च वाणीम् उपासते तर्हि सरस्वती अवश्यमेव तस्योपरि अनुग्रहं करिष्यति।

## मूल्यायनम्

भामहाचार्यः एव आद्यालंकारिकः यः प्रतिभा-व्युत्पत्ति-अभ्यासान् काव्यकारणरूपेण स्वीकृतवान्। तेन पञ्चमकारिकायां प्रतिभा स्पष्टतया उल्लिख्यते। ततः परं अष्टमकारिकायां 'यत्नो विद्रित वेद्येन विध्येय' इत्युक्त्वा व्युत्पत्त्यभ्यासयोः निर्देशः विहितः। अत्र 'यत्न' इति अभ्यासवाचकम्, 'विदितवेद्य' इति व्युत्पत्तिवाचकः शब्दः। एवम्प्रकारेण भामहेन प्रतिभाव्युत्पत्त्यभ्यासा इति हेतुत्रयम् आलोचितम्।

## पादटिप्पणी -

1 भामहकाव्यालंकारः - १/५

2 अग्निपुराणम् - ३३७/३

3 राजशेखरः, काव्यमीमांसा, सम्पा. सीतानाथाचार्यः, पृ. ६७

4 आनन्दवर्धनः, ध्वन्यालोकः १/६, लोचनटीका।

5 भामहकाव्यालंकारः - १/८

6 भामहकाव्यालंकारः - १/९

7 एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति। महाभाष्यम्, पश्पसाह्निकः।

8 भामहकाव्यालंकारः - १/१०

9 तस्य च कारणं कविगता केवला प्रतिभा। - रसगङ्गाधरः।

10 काव्यादर्शः - १/१०३

---

**आकरग्रन्थाः -**

आनन्दवर्धनः। *ध्वन्यालोकः*। सम्पा. श्री सुवोधचन्द्र सेनगुप्त ओ श्री कालिपद भट्टाचार्य। कलकाताः संस्कृत वुक डिपो, २००५।

कुन्तकः। *वक्रोक्तिजीवितम्* । सम्पा. राधेश्याम मिश्र। वाराणसीः चौखम्बा संस्कृत संस्थान, १९९८।

दण्डी। *काव्यादर्श*। चिन्मयी चट्टोपाध्याय। कलकाताः पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१८।

भामह। *काव्यालंकार*। सम्पा. देवेन्द्रनाथ शर्मा। पाटनाः विहार राष्ट्रभाषा परिषद्, १९८५।

भामह। *काव्यालंकार*। सम्पा. पि.भि. नागनाथ शास्त्री। दिल्लीः मोतिलाल वनारसीदास पावलिशार्स, १९९१।

मम्मटः। *काव्यप्रकाशः*। सम्पा. झलकीकरः। दिल्लीः परिमल पाब्लिकेशन्स, २००८।

विश्वनाथः। *साहित्यदर्पणः*। सम्पा. कृष्णमोहन शास्त्री। वाराणसीः चौखम्बा संस्कृत संस्थान, २०१८।

*NATYASASTRA OF BHARATA MUNI* (VOL.I), EDITED R.S. NAGAR/K.L. JOSHI, DELHI: PARIMAL PUBLICATIONS, 2009.

**Bapan Ruidas**

**Ph.D Scholar, Department of Sanskrit,**

**Ramakrishna Mission Vidyamandira,**

**Email:** sanskrit.bapan@gmail.com

**Mob: - 9593322276**

# A Study of Chiranjiva Bhattacharya's Mādhavacampū – in the light of available textual variants

Dr. Preeti Pujara,
Assistant Professor,
DCM Art & Commerce College,
Viramgam, Ahmedabad

[Key words: textual variants, Champū literature, Mādhavacampū, imperfections, Naiyāyika - Poetician, manuscriptology, syntactic, semantics]

Introduction:

[Textual variants are an important area of study for the students of manuscriptology. In the study of textual variants what is important is the loyalty to the original author. It should reflect the true voice of the author. What is more important in the study of variant is not the quantity of variants, but the quality of variants. In the case of present study, the textual variants have come into picture as the author himself has undertaken the exercise of revising and editing his own text.]

Mādhavacampū (MC.) of Chiranjiva Bhattacharya is an important work in the field of Champū literature. Mādhavacampū is a small kāvya of Champū type which is the mixture of prose and poetry. It deals with the five Uccavāsa and they mainly focus on the exploits of Lord Krishana. Two printed editions of this book are available to us. As the work was edited so many years ago, first in 1971and the second in 1972,the text is corrupt and full of errors;even the printing is not legible.Chiranjiva has also written another work on Alaṁkāraśāstra named Kāvyavilāsa(KV.)

It is very much interesting to note here that Chiranjiva has quoted 23 verses of his own Mādhavacampū(MC.) as the illustrations of various Alaṁkāras in KV. After a close comparison of the verses quoted in the KV,with that of MC, it is interesting to note that the verses in KV are more accurate and authentic from the poetic stand point. It seems that they are revised very carefully by the author himself.

Daṇḍin. *Kāvyadarśa,* with commentary of Jīvānanda Vidyāsāgara Bhaṭṭāchāryya. Madras (now Chennai) : Vavilla Venkateswara Sastrulu & Sons., 1952.

Hemcandra. *Kāvyānuśāsanam* (In Two Parts). Ed. R. C. Parikh. Bombay (now Mumbai) : Sri Mahavira Jaina Vidyalaya, 1938 (First Edition).

Mammaṭa. *Kāvyaprakāśa*. with Sanskrit commentary '*Bālabodhinī*' by Vamanacharya Bin Ramabhatta Jhalakikar. Ed. Ragunath Damodar Karmarkar. Poona (now Pune) : Bhandarkar Oriental Research Institute, 1933 (Fifth Edition, Reprinted from the Fourth Edition).

Paṇḍitarāja Jagannātha. *Rasagaṅgādhara,* with commentary of Nagesa Bhatta. Ed. Durgaprasad and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1888. (Kāvyamāla Series No. 12).

Rudraṭa. *Kāvyālaṃkāra* with Namisādhu's commentary. Delhi-7 : M.L.B.D., 1983.

Ruyyaka. *Alaṃkārasarvasva* with commentary of Jayaratha. Ed. Durgaprasad and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1893. (Kāvyamāla Series No. 35).

Udbhaṭa. *Kāvyālaṃkāra-sāra-saṃgraha*, with the commentary '*Laghuvṛtti*' of Induraja, Ed. by N. D. Banhatti, Bhandarkar Oriental Research Institute, Poona (Now Pune), First Edition, 1925.

Vāmana. *Kāvyālaṃkārasūtravṛtti,* Ed. Durgaprasad and K. P. Parab. Bombay (now Mumbai) : Nirnay Sagar Press, 1926 (Third Revised Edition). (Kāvyamāla Series No. 15).

—.— with *Kāmadhenu* commentary. Ed. Ratna Gopal Bhatta. Benaras (now Varanasi) : Vidya Vilas Press, 1908. (Benaras Sanskrit Series).

Vidyādhara. *Ekāvalī*, with the commentary '*Taralā*' by Mallinatha. Ed. K.P.Trivedi. Bombay (now Mumbai) : Govt. Central Book Depot, 1903 (First Edition).

Vidyānātha. *Pratāparudrayaśobhūsaṇa*, with '*Ratnāpaṇa*' and '*Ratnaśāṇa*' commentaries. Ed. K.P.Trivedi. Bombay (now Mumbai) 1909. (Bombay Sanskrit Series No-65).

Visvanātha Kavirāja. *Sāhityadarpaṇa*, with the '*Kusumapratimā*' commentary by Haridas Siddhanta Vagisha Bhattacharya. Calcutta (now Kolkata) : Sanskrit Book Depot, 1841 (First Edition), 1981 (Reprinted Second Edition, from the Fifth Edition).

** From the general doctrines of the Sanskrit rhetoricians we can form some basic ideas about the characteristics of the figure *yathāsaṃkhya* or *karma*—

i) *Yathāsaṃkhya* is formed when different objects or groups of objects mentioned earlier are subsequently referred to in the same order.

ii) *Yathāsaṃkhya*

iii)

iv)

*** Vāmana's treatment of the figure is quite unique as it puts emphasis on the element of similarity present in the figure. The orderly succession of objects in the figure provides it with a natural charm. But the requirement of similarity advocated by Vāmana supplies strikingness to the figure even further.

# अश्वघोषस्य बुद्धचरितसौन्दरानन्दमहाकाव्ययोः राजधर्मस्य परिशीलनम्

Dr. Gitanjali Nayak
Assistant Professor, Dept. of Sanskrit,
Villa Marie Degree College for Woman,
Hyderabad

संस्कृतवाङ्मये वैदिककालादारभ्य एतावत्पर्यन्तं नैकानि नीतिशास्त्राणि विरचितानि सन्ति , रामायण-महाभारत-पुराणादीनानन्तरं धर्मशास्त्रमपि तादृशमेकं शास्त्रं यत्र नीतिपूर्णाः मानवीयमूल्यबोधनिरूपिताः, मानवाधिकारनिरूपिताः नैके श्लोकाः वर्तन्ते । परन्तु तादृशोषु नीतिशास्त्रमूलकग्रन्थेषु धर्मशास्त्रमपि विशिष्टं स्थानं भजतेतराम् ।

शास्त्रकाराः काव्येषु निरूपितानां विषयाणामुपरि यत् किमपि विरचयन्ति, समालोचयन्ति तदेव शास्त्रमिति नाम्ना प्रथते । धर्मशास्त्रे प्रतिपादितेषु नैकेषु ग्रन्थेषु मनुस्मृतिः सर्वोपरि वर्तते । अत्र नैके सिद्धान्ताः,राजधर्मविषयाः, नीतयश्च प्रतिपादितास्सन्ति । तस्मिन् शास्त्रे न केवलं धर्मस्य स्वरूपम् अपि तु षोडशसंस्काराणां विषये , राजधर्मस्य विषये तथा दण्डनीत्यादीनां विषयेऽपि विचाराः अवलोक्यन्ते ।

मनुस्मृतौ सप्तमाध्याये राजधर्मस्य विषये बहवः श्लोकास्सन्ति । एकस्य राज्ञः किं कर्तव्यं , किञ्च अकर्तव्यं, कथं प्रजानां शासनं कर्तव्यम् इत्येते विषयाः विस्ताररूपेण निरूपितास्सन्ति । राजा यदि दण्डविधानपूर्वकं प्रजानां शासनं न करोति, तर्हि प्रजाः सर्वाः पथभ्रष्टाः भविष्यन्ति । तत्र मनुस्मृतौ दण्ड एव धर्ममिति प्रतिपादितमस्ति । उक्तं हि –

दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति ।

दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।। 1

महाकविर्भासः स्वीये प्रतिमानाटके तृतीयाङ्के गोपानामभावे यथा गावः विलयं प्राप्नुवन्ति, तथैव एकस्य राज्ञः अभावे शासकविहीनाः प्रजाः विनष्टाः भवन्ति । यत्र राजधर्मस्य सङ्केतो प्राप्यते । उक्तं यथा –

ईक्ष्वाकूणामिहाद्यैव कश्चित् राजा विधीयताम् ।

अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात् ।। 2

अत एव राजा स्वीयधर्मानुसारं प्रजानां शासनं कुर्यादिति राजधर्मविषयकं वर्णनं स्मृतिग्रन्थेष्वपि निरूपितं वर्तते ।

## शोधपत्रस्य उद्देश्यम्

यद्यपि नैकेषु स्मृतिग्रन्थेषु राजधर्मविषये विचाराः प्रतिपादितास्तथापि मदीये शोधपत्रे महाकवेः अश्वघोषस्य महाकाव्यद्वयेषु बुद्धचरिते सौन्दरानन्दे च महाकाव्यद्वये कथं राजा स्वीयधर्मस्यानुसरणं कुर्यादिति विषयं सप्रमाणं निरूपितमस्ति । येन समाजस्य तथा एकस्य नेतुः कृतेऽपि तद्विषयकं ज्ञानं भवति । एकस्य समुचितराज्ञः किं कर्तव्यं भवति ? येन राष्ट्रस्योन्नतिः भूयादिति विषयः समालोचनीयः । तस्मिन् महाकाव्यद्वये राजधर्मविषये किं किं निरूपितमस्ति तदेव शोधपत्रेऽस्मिन् विचारितं मया ।

**को नाम धर्मः**

ध्रियते पुण्यात्मभिरिति लोकोऽनेन , धरति लोकं वेति धर्मः । धृधातुना मन् 3 प्रत्यये धर्मशब्दोऽयं समजनि ।धर्मार्थकाममोक्षेषु चतुर्वर्गेषु धर्मः प्रप्रथमं सर्वोत्तमचतुर्वर्गरूपेण स्थानमवाप्नोत् । भगवता मनुना मनुस्मृतौ द्वितीयाध्याये धर्मस्य स्वरूपं साक्षात् प्रतिपादितम् । यतो हि सः सर्वेषामपि वेदानां ज्ञातासीत् तदर्थं वेदेषु निरूपितानां धर्माणां स्वरूपमेव स्वीये स्मृतिग्रन्थे धर्मस्वरूपेण निरूपितं तेन । अर्थात् मनुना यं कमपि धर्ममित्युक्तं तत्सर्वमपि वेदे प्रतिपादितमेव । वेद-स्मृति-सदाचारादयः धर्मस्य दशधा लक्षणं मनुनाङ्गीकृतम् । उक्तं यथा –

**यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।**

**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।। 4**

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**

**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। 5**

नारायणपण्डितेनापि स्वीये नीतिशास्त्रपरके हितोपदेशे मित्रलाभे धर्मेणैव मनुष्यः स्वर्गलोकं प्राप्नोतीति विषयं प्रमाणितम् । स च धर्मः निधनानन्तरं स्वर्ग्रं प्राप्नोति, शरीरेण सह अन्यत् सर्वमपि इहैव नष्टं गच्छतीति तेन प्रतिपादितम् । उक्तं हि –

**एक एव सुहृद्धर्मो निधनेप्यनुयाति यः ।**

**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ।। 6**

**को नाम राजधर्मः**

राज्ञः धर्मः राजधर्मः । मनुना सप्तमाध्याये प्रारम्भे भृगुमुनिः अन्येभ्यः महर्षिभ्यः राजधर्मस्य विषये यत् संसूचितवान् तादृशान् राजधर्मान् प्रवक्षामीति निगदति । यस्य राज्ञः आचारः,उत्पत्तिः, इह लोके परलोके परमां सिद्धिं प्रापयति । धर्मशब्दस्तु दृष्टादृष्टार्थानुष्ठेयपरोऽस्ति । शास्त्रानुसारं वेदान् प्राप्तोपनयनादिसंस्कारैर्युक्तः क्षत्रियेणाभिषिक्तेन राजा न्यायपूर्वकं स्वीये राज्ये स्थित्वा प्रजानां संरक्षणं कुर्यात् , तदेव राज्ञः समुचितधर्मो भवति । सन्दर्भेऽस्मिन् उक्तं हि –

राजधर्मान्प्रवक्षामि यथावृत्तो भवेन्नृपः ।

संभवश्च यथा तस्य सिद्धिश्च परमा यथा ।।

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधिः ।

सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ।। 7

राज्ञः प्रभावविषये मनुना यदुक्तं (प्रभावतः) तत्सत्यमेव प्रतिभाति । राजा स्वदेशस्य कृते सर्वमपि भवति । सः साधारणः तथा सर्वशक्तिमान् भवति । स च राजा अग्निरूपः,वायुरुपः,सूर्यरूपः,चन्द्ररूपः,धर्मराजरूपः (यमः) कुबेररूपश्च भवति । अत एव तदनुगुणमेव प्रजान् शास्ति स प्रभुः । उक्तं यथा –

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।

स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ।। 8

एवञ्च " यथा राजा तथा प्रजाः " इतिआभाणकानुसारंकश्चनराजा न्यायपूर्वकं समुचितरूपेणैव स्वप्रजानां संरक्षणं कुर्यात् , तदेव राजधर्म इति नाम्नाभिधीयते ।

अश्वघोषस्य महाकाव्येषु राजधर्मः

संस्कृतसाहित्यजगति महाकवेः अश्वघोषस्य नाम स्वर्णाक्षरैः लिखितुं शक्यते । महाकवेरस्य महाकाव्यद्वयं सौन्दरानन्दम् , बुद्धचरितं च । एतत् महाकाव्यद्वयं बौद्धग्रन्थद्वयमेव भवति । तत्र बुद्धचरिते अष्टाविंशतिः (28) तथा सौन्दरानन्दे अष्टादश (18) सर्गाः सन्ति । तस्मिन् महाकाव्यद्वये राजधर्मस्य स्वरूपं नैकेषु सर्गेषु वर्णितास्सन्ति । तदत्र किञ्चित् समालोच्यते अधस्तात् ।

महाकविः अश्वघोषः राजनीतये " राजशास्त्रम् " इति शब्दस्य प्रयोगं कृतवान् । बुद्धचरिते प्रथमसर्गे तेनोक्तं यत् वंशपरम्पराचालनाय भृगुः अङ्गिरा च ऋषिः यत् राजशास्त्रं न निर्मितवान् तदेव तत्पुत्रैः शुक्रबृहस्पतिभिः निर्दिष्टम् । उक्तं यथा –

यद्राजशास्त्रं भृगुरंगिरा वा न चक्रतुर्वंशकरावृषीतौ ।

तयोः सुतौ सौम्य ससर्जतुस्तत् कालेज शुक्रश्च बृहस्पतिश्च ।। 9

अश्वघोषस्य विश्वासः आसीत् यत् यः कोऽपि वा पुरुषः राजपदं प्राप्तुम् अर्हः नैव भवति । राज्ञः कृते केचन गुणाः अपेक्षिताः वर्तन्ते । सिद्धार्थः राजकुमारोऽपि भाविनि काले पृथ्वीपतिः भवितुं शक्नोति , यतो हि दयादाक्षिण्यादयः सर्वेऽपि गुणाः गौतमे वर्तमानकालेन एव वर्तन्ते । तेन महाकविरयं तं बुद्धं पृथ्वीपरिपालने समर्थोऽस्तीति निगदति । प्रसङ्गेऽस्मिन् उक्तं यथा –

**दृष्ट्वा च सोर्णभ्रुवमायताक्षं ज्वलच्छरीरं शुभजालहस्तम् ।**

**तं भिक्षुवेषं क्षितिपालनार्हं सञ्चुक्षुभे राजगृहस्य लक्ष्मीः ।। 10**

अश्वघोषस्य मतानुसारं राजानं विना राज्यं स्थिररूपेण नैव तिष्ठति । तन्मते राजपुत्राणाम् आचरणं, व्यवहारो वा राजा इव भवति चेदपि एकस्य राज्ञः अभावे तस्य राज्यस्य शोभा तथैव न भवति , यथा तारासहस्रैरपि चन्द्रमा न शोभते । राज्ञः अस्तित्वं राज्ये तथैव भवतीति सौन्दरानन्दमहाकाव्ये निरूपितं वर्तते । उक्तं यथा -

**तन्नाथवृतैरपि राजपुत्रैरराजकं नैव रराज राष्ट्रम् ।**

**कारासहस्रैरपि दीप्यमानैरनुपस्थिते चन्द्र इवान्तरिक्षे ।।11**

सौन्दरानन्दे महाकाव्ये प्रथमसर्गे राज्ञः राजधर्मविषये अश्वघोषेन समुद्घोषितं यत् यदि कश्चन राजा सदा आचारवान् , विनयवान् नयवान् क्रियावान् च भवेत् । तथा सः राजा धर्ममाचरितुमेव न तु इन्द्रियसुखाय राजछत्रं धारयेत् । सः राष्ट्रस्य संरक्षणं तथैव कुर्यात् यथा मरुद्भिः सह इन्द्रः वर्गाणां रक्षणं करोति । प्रसङ्गेऽस्मिन् उक्तं हि सौन्दरानन्दे -

**आचारवान् विनयवान् नयवान् क्रियावान्,**

**धर्माय नेन्द्रिय सुखाय स धृतातपत्रः ।**

**तद्भ्रातृभिः परिवृतः स जुगोप राष्ट्रं**

**संक्रन्दनो दिवमिवानुसृतो मरुद्भिः ।। 12**

अश्वघोषेनोक्तं यत् शुद्धोदनः स्वशत्रून् तीरेण शान्तमकरोत् । राजा शक्तिशाली भवति चेत् शत्रवः क्रूरतां प्रकटयितुं नैव शक्नुवन्ति । स्वगुणैः सः आत्मीयबन्धूनां संरक्षणं कृतवान् । यदि भृत्याः कुत्रापि त्रुटिं (दोषान्) आचरन्ति,तथापि सः राजा तेभ्यः भृत्येभ्यः कोषं नैव प्रकटयति स्म ।

महाबलसैनिकैः सः राजा शक्तिशालीशत्रूणाम् अभिमानं चूर्णयति स्म । अत्र राजधर्मः सुस्पष्टमवलोक्यते। उक्तं यथा –

**राष्ट्रमन्यत्र च बलेन स किञ्चिददीददपत् ।**

**भृत्यैरेव च सौद्योगं द्विषद्दर्पमदीदपत् ।। 13**

अश्वघोषदिशा कश्चन राजा स्वशौर्येण सर्वापि पृथिवी जेतुं शक्नोति । तस्याः पृथिव्या सुरक्षा तदधीने (राज्ञः अधीने)भवति । अर्थात् सौन्दरानन्दे तस्य राज्ञः शुद्धोदनस्य समये राज्यं धनधान्येन परिपूर्णमभूत् । राजा दण्डनीतिं परिपाल्य रात्रौ ये अन्येषां कृते बाधामुत्पादयन्ति स्म , तान् शान्तं विदधाति । प्रसङ्गेऽस्मिन् उक्तं यथा –

रक्षणाच्चैव शौर्याच्च निखिलां गामवीवपत्।

स्पष्टया दण्डनीत्या च रात्रिसत्रानवीवपत्॥ 14

रामायणेऽपि राजधर्मस्य सङ्केतो बहुत्र प्राप्यते। तत्र रघुवंशीयानां शासनकाले रात्रौ चौर्यकार्यं नैव प्रवर्तते स्म। कस्यापि बलात्कारः कदापि नैवाभूत्। दण्डनीतिपालकस्य राज्ञः उपस्थितिः सर्वथा अपेक्ष्यते स्म। अन्यथा अराजके राज्ये कुमारीगणाः सुवर्णालङ्कारैः विभूषिताः सत्यः सायंकाले क्रीडनाय उद्यानं प्रति गन्तुं नैव शक्नुवन्ति। अत्रापि राज्ञः समुचितराजधर्मः नारीणां संरक्षणाय वर्तते। उक्तं यथा –

नाराजके जनपदे तूद्यानानि समागताः।

सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः॥ 15

अश्वघोषस्य मतानुसारं कश्चन राजा स्वकीयैः शुद्धाचरणैः स्ववंशं / कुलं वा प्रकाशयेत्। स च राजा सर्वधर्मव्यवस्थया प्रजाभ्यः लेशोऽपि दुःखं कष्टं वा नैव प्रददात्। प्रसङ्गेऽस्मिन् एकस्य राज्ञः स्वप्रजाभ्यः कृते समुचितव्यवहारः कथं भवितव्येति सुस्पष्टं निरूपिम् महाकविनाश्वघोषेन। उक्तं हि –

स्वैरेवादीदपच्चापि भूयो भूयो गुणैः कुलम्।

प्रजा नीदीदपच्चैव सर्वधर्मव्यवस्थया॥ 16

सौन्दरानन्दमहाकाव्यस्य द्वितीयसर्गे राज्ञः शुद्धोदनस्य चरित्रमुपरि यत्किञ्चित् महाकविना समालोचितं तत्र राज्ञः समुचितधर्मः, कर्तव्यपरायणता, कर्तव्यनिष्ठश्च प्रमाणीभूतो भवति।कश्चन राजा अश्रान्तः सन् समुचिते समये यज्ञकार्यं कुर्यात्। न केवलमेतत् अपि च स्वीयसंरक्षणेन सह ब्राह्मणेभ्यः ब्रह्मचिन्तनाय सततं प्रेरणमपि कुर्यात्। राजा सदा प्रजान् स्वपुत्रमिव परिपालयेत्। राजा शुद्धोदनः परमधर्मज्ञासीत्। सः प्रजानां कृते धर्मस्य सूक्ष्मस्वरूपम् अबोधयत्। तथा च धर्मदर्शनं कारयित्वा तान् (प्रजान्) यथासमयं स्वर्गं प्राप्तये योग्यमपि अकारयत्। यत्र एकस्य राज्ञः धर्मः कीदृशो भवेदिति विषयः निरूपितोऽभूत्। उक्तं या तस्मिन् महाकाव्ये –

प्रजाः परमधर्मज्ञः सूक्ष्मं धर्ममवीवसत्।

दर्शनाच्चैव धर्मस्य काले स्वर्गमवीवसत्॥ 17

राजधर्मस्य नैके विषयाः सौन्दरानन्दमहाकाव्ये निरूपितं महाकविना। यद्यपि राजा आर्थिकदुःखेषु भवति, तथापि अयोग्यजनानां नियुक्तिः स्वराज्ये नैव कुर्यात्। राजा सदा स्वतेजसा स्वपराक्रमप्रभया वा गर्वितान् अरीन् भस्मसात् कुर्यात्। अपि तु स्वस्य यशोदीपेन पृथिवीं प्रकाशयेत्। अत्रापि शुद्धोदनस्य पृथिवीं प्रकाशयेत्। अत्रापि शुद्धोदनस्य कर्मणा समुचितराधर्मस्य सङ्केतो प्राप्यते। सन्दर्भेऽस्मिन् उक्तं यथा –

तेजसा च त्विषा चैव रिपून् दृप्तानबीभसत्।

**यशोदीपेन दीप्तेन पृथिवीं च व्यबीभसत् ।। 18**

राज्ञः धनदानविषयेऽपि समुचितकर्तव्यं सौन्दरानन्दे द्वितीयसर्गे विचारितम् । कश्चन राजा केवलं स्वस्य यशलाभाय प्रजाभ्यः धनं न दद्यात् , अपि तु दयालुस्वभावेन याचकेभ्यः धनं दद्यात् । नकेवलमेतत् अपि तु प्रजानां कृते बहुधनं दत्वापि " अहं महादानी " इति स्वीयकीर्तिं सर्वत्र नैव प्रसारयेत् । उक्तं हि –

**आनृशंस्यान्न यशसे तेनादायि सदार्थिने ।**

**द्रव्यं महदपि त्यक्त्वा न चैवाकीर्ति किञ्चन ।। 19**

मनुस्मृतौ भगवता मनुना राजा साक्षात् भगवान् विष्णुरिति प्रतिपादितः । श्वघोषेनापि स्वीये महाकाव्ये राज्ञः शुद्धोदनस्य चरित्रं शरणागताना शत्रूणां कृतेऽपि त्राणकर्तृरूपेण चित्रितम् । यथा भगवान् शरणागतानां भक्तानां संरक्षणं करोति , तथैव राजापि शरणागतः शत्रुः कोऽपि अस्ति चेत् तस्. परित्यागं नैव कुर्यात् । अपि तु दृप्तान् (अभिमानेन युक्तान् ) शत्रुमपि विजित्य विस्मयः (गर्वम् , अहङ्कारो वा ) नैव प्रकटयेत् । अत्र राजा आदर्शरूपेण स्वीयधर्मस्य परिपालनं करोति । यत्र राज्ञः कर्तव्यं सुस्पष्टमभिव्यज्यते । उक्तं यथा –

**तेनारिरपि दुःखार्तो नात्याजि शरणागतः ।**

**जित्वा दृप्तानपि रिपून्न तेनाकारि विस्मयः ।। 20**

राजा सदा काम- द्वेष-भयादपि स्वस्य मर्यादां न त्यजेत् । राजभोगं कृत्वापि सः इन्द्रियसुखेन नैव प्रवर्तितव्यम् । स च राजा मित्रं शत्रुर्वा भवतु । कस्यापि कृते निम्नक्रियाः (नीचकार्यं) नैव कुर्यात् । राजा विधिवत् सोमरसस्य पानपूर्वकं स्वस्य यशसः रक्षणं कुर्यात् , तथा निरन्तरं वेदाध्ययनपूर्वकं वेदविहितकर्मसु प्रवृत्तिः भवेत् । यः राजा ब्राह्मणेभ्यः धनदानपूर्वकं परिपालयन् तस्य राज्ये कदापि अकालः (समये अन्नस्योत्पन्नम्) नायातीति विषयमपि महाकाव्येऽस्मिन् स्पष्टीकृतम् । कश्चन राजा राजर्षिरिव आचरन् स्वीयकुलस्य यशोगन्धंप्रसारयेत् । यथा सूर्यः स्वप्रकाशेन अन्धकारं दूरीकरोति,तथैव राजा स्वतेजसा स्वस्य अरीन् समूलं विनाशयति । राज्ञः इदमेव कर्तव्यं राजधर्मं सूचयति । उक्तं हि –

**कुलं राजर्षिवृत्तेन यशोगन्धमवीवपत् ।**

**दीप्त्या तम इवादित्यस्तेजसारीनवीवपत् ।। 21**

राजा कदापि अनुचितरूपेण प्रजाभ्यः करग्रहणं नैव कुर्यात् । तथा च स्वस्य प्रभुशक्त्या गर्वं नैव प्रकटयेत् । स च भूपतिः सामाजिककर्तव्यस्य पालनाय एव शास्त्रकाराणामध्ययनं कृत्वा स्वज्ञानस्याभिवृद्धिं कारयेत् । उक्तं यथा –

**नासृक्षद् बलिमप्राप्तं नारुक्षन्मानमैश्वरम् ।**

**गमैर्बुद्धिमाधिक्षद्धर्माय न तु कीर्तये ।। 22**

अश्वघोषः बुद्धचरितमहाकाव्ये राजधर्मस्य विषयं सूचयन्नाह – कश्चन राजा ऋषिसम्बद्धितानां व्रतं पालयेत् । चिरसञ्चितं वैरं त्यजेत् । गुणरूपगन्धवान् यशः प्राप्नुयात् । तथा च मालिन्ये सहायकरजोवृत्तिं त्यजेत् । उक्तं यथा -

**आर्षाण्यचारीन् परमव्रतानि वैराण्यहासीच्चिरसंभृतानि ।**

**न चाविवक्षीद् द्विषतामधर्मं न चाविवक्षीद्धृदयेन मन्युम् ।। 23**

बुद्धचरिते द्वितीयसर्गे दण्डनीतिप्रतिपादकं तत्त्वमेकं महाकविना सूचितम् । राजा राज्यस्य सप्ताङ्गानां संरक्षणं कुर्यात् । राज्यस्य सप्ताङ्गानि सन्ति , यान् सप्ताङ्गंतत्त्वमित्युच्यते । वाल्मीकितः नीतिवाक्यामृतकारसोमदेवं यावत् सप्ताङ्गराज्यतत्त्वमुपरि स्वीयमतं प्रदत्तवन्तः । राजा शुद्धोदनोऽपि सप्ततत्त्वानां (सप्ताङ्गानाम्) संरक्षणं कृतवान् । तत्र राज्ञः प्रथमाङ्गं स्वयं राजा एव भवति । तः एकस्मिन् राजनि यावन्तः गुणाः भवेयुः तेषां सर्वेषामपि ध्यानं राजभिः दातव्यमेव भवति । अमात्यस्य नियुक्तिः, प्रजानां संरक्षणादयः राजभिः कर्तव्यम् । सन्दर्भेऽस्मिन् उक्तं यथा –

**एकं विनिन्ये स जुगोप सप्त सप्तैव तत्याज ररक्ष पञ्च ।**

**बबन्ध त्रिवर्ग बुबुधे त्रिवर्गं जज्ञे द्विवर्गं प्रजहौ द्विवर्गम् ।। 24**

बुद्धचरिते द्वितीयसर्गे विशेषरूपेण महाकविनाश्वघोषेन राजधर्मस्य विशेषरूपेण ध्यानं दत्तम् । कश्चन राजा स्वप्रजान् स्वपुत्रमिव परिपालनं कुर्यात्, तथा सततं प्रजानां सततं सुखकामनापि राजभिः कर्तव्यम् । सन्दर्भेऽस्मिन् उक्तं यथा बुद्धचरितमहाकाव्ये –

**नाध्येष्ट दुःखाय परस्य विद्यां ज्ञानं शिवं यत्तु तदध्यगीष्ट ।**

**स्वाभ्यः प्रजाभ्यः हि यथा तथैव सर्वप्रजाभ्यः शिवमाशशंसे ।।25**

बुद्धचरिते नवमसर्गे अश्वघोषः मोक्षधर्मराजधर्मयोः मतभेदं निरूपयन् उक्तवान् यत् शमप्रधानमोक्षधर्मः क्व ? दण्डनीतिप्रधानः राजधर्मः क्व ? तर्हि कश्चन राजा दण्डनीतिप्रधानधर्मं स्वीकृत्य स्वप्रजानां कृते शास्त्रं कुर्यात्। येन राज्ये सुखशान्तिश्च सततं भवेत् । उक्तं यथा –

**शमप्रधानः क्व च मोक्षधर्मो दण्डप्रधानः क्व च राजधर्मः ।। 26**

एवञ्च राजधर्मस्य विषये महाकविना अश्वघोषेन स्वीयमहाकाव्यद्वये सौन्दरानन्दे बुद्धचरिते च यथा वर्णितं तदत्र किञ्चित् अस्माभिः प्रतिपादितं प्रमाणपुरस्सरम् । तेषां राजधर्माणां परिपालनेन अनुसरणैव कस्यापि राज्यस्य तेन च सम्पूर्णस्य राष्ट्रस्य समुन्नतिः साधयितुं शक्यते इति मे मतिः ।

उपसंहारः

समुचितराष्ट्रस्य निर्माणाय राजधर्मः विशिष्टस्थानमावहति । यदि कश्चन राजा वेदेषु, रामायणे, महाभारते, पुराणेषु, स्मृतिग्रन्थेषु महाकाव्येषु च निरूपितानां राजधर्माणां तथा तत्र निरूपितदण्डनीतिनामनुसरणपूर्वकं तस्याचरणं विदधाति , तर्हि राज्ये सर्वाः प्रजाः सुखशान्तिपूर्वकं जीविष्यन्ति। राजा सदा तेषां राजधर्माणां परिपालनम् अवश्यमेव कुर्यादिति शोधपत्रेऽस्मिन् तदुदाहृतम् । राष्ट्रस्य समुन्नतये स्मृतिग्रन्थेषु महाकाव्यदिषु च निरूपितानां राजधर्माणामुपरि राजभिः ध्यानमस्भिः अवश्यमेव दातव्यम् । तेषां राजधर्माणां परिपालनमपि कुर्यादिति ।

शब्दसङ्केताः

अयोध्या. अयोध्याकाण्डः

उणादि. - ऊणादिसूत्रम्

मनु. – मनुस्मृतिः

प्रतिमा. – प्रतिमानाटकम्

हितोप. – हितोपदेशः

सौन्दरा. – सौन्दरानन्दम्

बुद्ध. - बुद्धचरितम्

वा.रा – वाल्मीकिरामायणम्

पादटीप्पणीः

1. मनु. 7.18
2. प्रतिमा. 3.4
3. ऊणादि. 1/139
4. मनु. 2.7

**5.** मनु. 2.12
**6.** हितोप. 1.59
**7.** मनु. 7.1-2
**8.** मनु.7.7
**9.** बुद्ध. च 1.41
**10.** बुद्ध.च 10.9
**11.** सौन्दरा.1.60
**12.** सौन्दरा 1.62
**13.** सौन्दरा. 2.3
**14.** सौन्दरा. 2.38
**15.** वा.रा . अयोध्या . 67.17
**16.** सौन्दरा. 2.34
**17.** सौन्दरा. 2.37
**18.** सौन्दरा. 2.39
**19.** सौन्दरा.2.40
**20.** सौन्दरा. 2.41
**21.** सौन्दरा. 2.29
**22.** सौन्दरा. 2.20
**23.** बुद्ध.2.43
**24.** बुद्ध.2.41
**25.** बुद्ध.2.35
**26.** बुद्ध. 9.48

# कालिदाससाहित्ये रसायनविज्ञानम्

डॉ. नृसिंहनाथगुरुः
कालियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
कालियाचकः, पूर्वमेदिनीपुरम्, पश्चिवङ्गः

उपक्रमः

आधुनिककालः विज्ञानसर्वस्वमस्ति। विज्ञानं सम्प्रति मानवानां जीवनस्य प्रत्येकं पक्षं न केवलं प्रभावयति अपि तु आर्थिकं समाजिकमुन्नतिमपि साधयति। अध्ययने, अध्यापने, अनुसन्धाने, गमनागमने, विलासव्यसने, सम्बादसम्प्रेषणे, अन्नोत्पादने, भवननिर्माणे, व्यापारे, वाणिज्ये, चिकित्साक्षेत्रे, कृषिकर्मणि च विज्ञानस्य प्रभावः नितरामनुभूयते। परन्तु एतत्सत्यं यत् प्राचीनभारते विज्ञानस्य यादृशं चिन्तनं प्रवृत्तं तादृशं चिन्तनं प्रायः जगति अन्यत्र न प्रवृत्तम्। आधुनिकविज्ञानिकैः विज्ञानस्य याः शाखाः प्रतिपादिताः, ताः प्रायः सर्वारपि प्राचीनैः महामनीषिभिः भारतीयैः ज्ञानवैभवसम्पन्नैः आचार्यैः पोषिताः स्वकर्मजीवने व्यवहृताश्च।

प्रथमे द्वितीये च शतके भारते रसायनविज्ञानम्, चिकित्साविज्ञानम्, खगोलविज्ञानम्, भौतिकविज्ञानम्, वनस्पतिविज्ञानम्, पर्यावरणविज्ञानम्, पराविज्ञानम्, भूगर्भविज्ञानम्, सामुद्रिकविज्ञानम्, कृषिविज्ञानम्, पाणिपागविज्ञानम्, गणितम् इत्यादयः विज्ञानस्य बह्व्यः शाखाः विकासगताः आसन्।

आधुनिकयुगे सुप्रसिद्धस्य रसायनशास्त्रस्य CHEMISTRYइत्यस्य प्राचीनभारते लौकिकेषु तात्विकेषु च प्रत्येकेषु क्षेत्रेषु व्यवहारः दृश्यते स्म। रसरत्नाकरः, रसरत्नसमुच्चयः, रसेन्द्रसारसंग्रहः इत्यादयः ग्रन्थाः नेत्राञ्जनसदृशाः सन्ति।

न केवलमेतदपितु बहुविधेषु संस्कृतग्रन्थेषु काव्यनाटकादिषु च रसायनशास्त्रस्य प्रचुरं तथ्यं समुपलभ्यते। कविषु मूर्धन्यः कविताकामिनीकान्तः महाकविः कालिदासोऽपि रसायशास्त्रस्यमहान् विद्वान् आसीदिति तस्य काव्यानुसन्धानेन ज्ञायते। प्रकरणवशात् कालिदाससाहित्येषु रसायनविज्ञानमिति विषये किञ्चिदत्रतत्त्वामृतमालोच्यते।

रसायनशास्त्रस्य मूलं तावत् वैदिकवाङ्मये उपलभ्यते। यथा वेदे – "सीसं च मे त्रपुश्चमे श्यामं च मे लोहं च मे……"[1] इति धातूनां विषये उल्लेखः विद्यते।

रसायनशास्त्रं विज्ञानस्य तादृशी विशिष्टा शाखा भवति यस्यां पदार्थानां गुण-संघटन-संरचनादीनां तथा तेषु प्रवर्तमानानां परिवर्तनानामध्ययनं भवति। सम्भवतः एतादृशेषु रसायनविज्ञानसिद्धान्तेषु परिचितः महाकविः कालिदासः स्वकाव्येषु रसायनशास्त्रविषयकं सिद्धान्तं समुपस्थापयति। तत्र मालविकाग्निमित्रे वायुषु जलविन्दूनामुपस्थितिविषयकं रसायनशास्त्रस्य आर्द्रतासिद्धान्तं वर्णयति। आधुनिकवैज्ञानिकाः अपि वायुमण्डले सर्वदा आर्द्रता विद्यमाना भवतीति स्वीकुर्वन्ति। तद्यथा –

**वोढाकुरबकरजसां किसलयपुटभेदशीकरानुगतः।**
**अनिमित्तामुत्कण्ठामपि जनयति मनसो मलयवातः।।**[2]

एवमेव महाकविः वायुप्रवाहेषु जलविन्दूनामुपस्थितिविषयकं वैज्ञानिकसिद्धान्तं पोषयन् मलयाचलस्य वायुमत्र जलविन्दुयुक्तं शीतलं सुगन्धितमिति वर्णयति। तद्यथा कुमारसम्भवे -

**भागीरथीनिर्झरभीसीकराणां वोढा मुहुः कम्पित देवदारुः।**
**यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हैः।।**[3]

गङ्गाप्रवाहशीतलजलविन्दुभिः प्रकम्पितदेवदारुसंस्पर्शितैःसुगन्धितवायुभिः किरातानां मृगया कष्टं दूरीभवति। अतः अत्र महाकवेः अभिप्रायः हिमालयस्य वातावरणे स्थिता आद्रता अर्थात्HUMIDITY अस्ति । यः रसायनशास्त्रस्य तथ्यं प्रतिपादयति।

किञ्च महाकविः कालिदासः वाष्पीकरणसिद्धान्तस्य तथा संघननसिद्धान्तस्य च ज्ञाताऽऽसीत्। सूर्यस्य प्रखरकिरणैः जलं वाष्पीभूय मेघरूपं धारयति। अनन्तरं वृष्टिद्वारेण पुनः मेघरूपं प्राप्नोतीति रघुवंशमहाकाव्ये समुद्रवर्णनप्रसङ्गे कविः एवं वर्णयति –

**गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमात्राश्नुते वसूनि।।**[4]

अर्थात् सूर्यः समुद्रात् जलं वाष्पीकरणप्रक्रियाद्वारेण स्वगर्भे धारयति। अनन्तरं वाष्पीभूतं तदेव जलं वृष्टेः कारणं भवति। एषा प्रक्रिया रसायनशास्त्रस्य

वाष्पीकरणसंघननसिद्धान्तस्याधारे भवति। तत्र रघुवंशमहाकाव्ये दशमसर्गे सूर्यः एव वृष्टेः कारणभूतः इति विचिन्तयन् तस्मै (सूर्याय) अमृता संज्ञा प्रददाति । तद्यथा –

**ताभिर्गर्भः प्रजा भूत्यै दध्रेवांशसम्भवः।**
**सौरीभिरिव नाडीभिरमृताख्याभिरम्भयः।।**[5]

तत्रैव रघुवंशमहाकाव्यस्य प्रथमसर्गे राजा दिलीपः प्रजाभ्यः करं स्वीकृत्य तैः धनैः सह वहुधनं संयोज्य प्रजानामुन्नतये एव व्ययीकरोतीति वर्णयितुं रसायनविज्ञानस्य वाष्पीकरणसिद्धान्तमत्र उदाहरणरूपेण प्रस्तौति। तद्यथा –

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।**[6]

यथा सूर्यः भूपृष्टतः जलं स्वीकृत्य तमेव जलं सहस्रगुणैः वृष्टिभिः जनानां कल्याणाय अर्पयति तथा राजा रघुरपि प्रजानां मङ्गलाय करं स्वीकरोति स्म।

एवमेव सूर्यस्य किरणेन तप्तायाः पृथिव्याः उपरि यदा जलवृष्टिः भवति तदा वाष्पोत्सर्जनविषयकरसायनसिद्धान्तस्य अभिव्यक्तिः भवतीति स्ववैज्ञानिकदृष्टिं प्रकाशयति। तद्यथा कुमारसम्भवे –

**निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसम्भृतेन सा।**
**तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्मामममुंचदूर्ध्वगम्।।**[7]

किञ्च दर्पणस्योपरि यदि वयं श्वासत्यागं कुर्मः तर्हि दर्पणः अस्पष्टः भवति। एषा रसायनविज्ञानस्य संघननप्रक्रिया वर्त्तते। एनं रसायनसिद्धान्तं काव्यकारः रघुवंशस्य सप्तमसर्गे इन्दुमत्याः मुखवर्णन प्रसङ्गे उपस्थापयति। तद्यथा –

**तस्याः प्रतिद्वन्द्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे।**
**निःश्वासवाष्पापगमात् प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः।।**[8]

एवमेव महाकविः मेघदूते मेघनिर्माणस्य प्रक्रियां वर्णयन् स्वसूक्ष्मवैज्ञानिकचिन्तनस्य परिचयं प्रस्तौति। तद्यथा –

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः।**[9]

कविषु मूर्द्धन्यः कालिदासः धूम-ज्योति-सलिल-वायूनां सन्निपातेन मेघस्य निर्माणं भवतीति यां वैज्ञानिकदृष्टिं पोषयति तां सम्प्रति आधुनिकरसशास्त्रविशारदाः स्वीकुर्वन्ति। तेषां विचारे मेघस्य निर्माणं DUST+HEAT+$H_2O$+GASES मिश्रणेन

भवति। एवमपि समुद्रवर्णनप्रसङ्गे रसायनशास्त्रविषयकं सिद्धान्तं पोषयन् लवणाम्बुराशि इति शब्दस्य प्रयोगं कुर्वन्नेवं प्रतिपादयति –

**आभाति वेला लवणाम्बुराशेः धारानिबद्धेव कलङ्गरेखा।।**[10]

सामान्यजलापेक्षया समुद्रजलं स्वेदजलं वा भिन्नं भवति। सम्भवतः एतत् मनसि निधाय सामान्यजल-क्षारीयप्रकृतियुक्तस्वेदजलयोर्मध्ये भेदं प्रदर्शयन् स्ववैज्ञानिकदृष्टिमेवमुद्घाटयति –

**विश्रान्तः सन्व्रजवनदी तीरजातिसिंच**
**न्नुद्यानानां नवजलकणै यूथकाजालकानि।**
**गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां**
**छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्।।**[11]

मेघस्य शुद्धजलेन वृक्षाणां सिञ्जनं वृक्षाणां कृते हितकारकं भवति। परन्तु शारीरिकपरिश्रमेण ये स्वेदबिन्दवः जायन्ते ते क्षारीयप्रकृतिसम्पन्नाः सन्तः कमलस्य कृते हानिकारकाः भवन्तीति काव्यकारः स्वरसायनचिन्तनस्य परिचयं ददाति। किं वा अधिकमसौ ताप-प्रसरण-घर्षणादीनामाधुनिकरसायनशास्त्रीयसिद्धान्तानां विज्ञाता आसीत्। यतोहि वैज्ञानिकसिद्धान्तः वर्तते यत् घर्षणेन मर्दनेन वा उष्मता जायते। उष्मताद्वारेण गैसीयप्रसरणं भवति। ततः सुगन्धस्य परिव्याप्तिः भवति। यथा मालविकाग्निमित्रे –

**विमर्दसुरभिर्बकुलावलिका खल्वहम्।**[12]

तत्र मेघदूतेऽपि देवदारुवृक्षाणां परस्परघर्षणेन अग्निः उत्पद्यति। तद्यथा –

**तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्म ।।**
**बाधेतोल्काक्षपित-चमरी-बाल-भारो-दवाग्निः।।**[13]

ईन्धनं यदि अधिकं धुनुते तस्मात् अग्निःजायते। प्रसरणविषयकसिद्धान्तस्य वर्णनं कुमारसम्भवे यथा –

**ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।**[14]

एवमेव महाकविः रसायनशास्त्रे वर्णितस्य धातुसिद्धान्तस्य महान् विशेषज्ञः आसीदिति तस्य काव्यानामनुशीलनेन ज्ञायते। तत्र रघुवंशे यथा –

**अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु।।**[15]

लौहधातुं यदि अधिकमुत्तप्तं क्रियते तर्हि सः मृदुलः भवति। तत्र विक्रमोर्वशीये पुरुरवा-ऊर्वश्योः अनन्यप्रेमभावनां वर्णयितुं कविः लौहमुत्तप्तलौहेन सह संयोज्य स्व रसायनसिद्धान्तस्य परिपक्वज्ञानस्य परिचयमेवं प्रस्तौति –

**साधारणोऽयमुभयोः प्रणयः स्मरस्य।**

**तप्तेन तप्तमयसा घटनाय योग्यम्।।**[16]

कुमारसम्भवेऽपि ताम्रधातोः गुणधर्मविषयकं रसायनशास्त्रस्य वर्णनं यथा –

**अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचाकरेण।**

**विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम्।।**[17]

एवञ्च रथचक्रपरिधौ उत्तप्ततरललौहधातोः स्थापनविषयक 'अलातचक्र' इति संज्ञाप्रादनं महाकवेः वैज्ञानिकदृष्टिं सूचयति। तद्यथा –

**अलातचक्रप्रतिमं विहंगस्तद्रागलेखावलयं तनोति।**[18]

अग्नेः अभिवृद्धये OXYGEN इत्यस्य आवश्यकताऽस्तीति वैज्ञानिकसिद्धान्तः वर्त्तते। सिद्धान्तेऽस्मिन् दक्षः महाकविः कालिदासः रघुवंशे स्वाभिव्यक्तिमेवं प्रकटयति –

**स्वयमेव हि वातोऽग्नेः सरथ्यं प्रतिपद्यते।**[19]

वायुः अग्नेः वृद्धये मुख्यसहायकः अस्ति। वायुतत्त्वेषु OXYGEN इत्यस्य उपस्थितिः विज्ञानमपि स्वीकरोति। अतः OXYGEN अग्नेः वृद्धये मुख्यभूमिकां निर्वाहयति। वायुना सह अग्नेः एतादृशं संयोगं काव्यकारः क्षत्रियतेजसा सह ब्रह्मतेज तुलयन् कथयति यत् अनयोः तेजयोः मिलनेन यथा शत्रोः विनाशः सुनिश्चितः भवति तथा अग्नि-वाय्वोः मिलनमपि विनाशकारकं भवति। तद्यथा –

**पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा।**[20]

किञ्च गैसीय पदार्थानां रसायनिकप्रतिक्रियायाः फलस्वरूपं वस्तूनां मध्ये विवर्णता भवति। वैज्ञानिकसिद्धान्तस्याऽस्य विज्ञाता महाकविः अभिज्ञानशाकुन्तले विषयममुं वर्णयन् कथयति यत् यज्ञाग्नितः यः धूमः जायते, तस्मिन् CARBON OXIDE तथा CARBON MANOXIDE वर्त्तते। यस्य स्पर्शेन कोमलपल्लवाः विवर्णाः भवन्ति। तद्यथा –

**भिन्नो रागः किसलयरुचामाज्यधुमोद्गमेन।**[21]

कुमारसम्भवेऽपि कविः हवनाऽग्निना देव्याः पार्वत्याः मुखे परिवर्तनं सञ्जातमिति वर्णयन् कथयति–

**तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालांजनरागमक्ष्णाः।**

**वधूमुखं क्लान्तयवावतं समाचारधूमग्रहणाद् बभूव।।**[22]

असौ वैज्ञानिकसिद्धान्तः यत् यदा वृष्टिः भवति तदा विद्युत् प्रवला भवति। विद्युत् प्रवला सति जनजीवनम् उद्भिदं प्राणिनञ्च प्रभावयति। सिद्धान्तेऽस्मिन् परिपक्वः महाकविः कुमारसम्भवे एवं वर्णयति–

**तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।**[23]

एवमेव जलशुद्धिकरणविषयकं रसायनशास्त्रीयचिन्तनं द्रष्टव्यमस्ति। यथा मालविकाग्निमित्रे –

**मन्दोऽप्यमन्दतमेति संसर्गेण विपश्चितः।**

**पंकच्छिदः फलस्येव निकषेणाविलं पयः।।**[24]

अनेन रसायनसिद्धान्तानां स्वकाव्यनाटकादिषु व्यवहारेण महाकवेः कालिदासस्य रसायनविषयकं गभीरं ज्ञानमासीदिति प्रमाणीयते। किं वा अधिकं मेघनिर्माणस्य रसायनदृष्टिः, जलस्य, क्षारीयप्रवृत्तिः, आर्द्रता, वाष्पीकरणं, संघटननं, तापवृद्धिः, घर्षणं, विद्युत् प्रभृतीनां वैज्ञानिकसिद्धान्तानां वर्णनं स्वकाव्येषु कुर्वन् रसायनविज्ञानस्य असौ महान् पोषकः इति चिरवन्दनीयः सञ्जातः इति दिक्।

डॉ. नृसिंहनाथगुरुः
कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः
हेडिया, पूर्वमेदिनीपूरम्, पश्चिमवङ्गः
Ph. No-9861442233
Email-nrusinghanathguru@gmail.com

**पादटिप्पणी**

[1]भारतस्य विज्ञानपरम्परा- पृ-741

[2]मालविकाग्निमित्रम्. – 3/9

[3]कुमारसम्भवम् – 1/15

[4]रघुवंशम्- 13/4
[5]रघुवंशम्- 10/58
[6]रघुवंशम्- 1/18
[7]कुमारसम्भवम्– 5/23
[8]रघुवंशम्- 7/68
[9]मेघदूतम् – 1/5
[10]रघुवंशम्- 13/15
[11]मेघदूतम् – 1/26
[12]मालविकाग्निमित्रम्. – 3/14, तः पूर्वम्
[13]मेघदूतम् – 53.
[14]कुमारसम्भवम्, - 6/31
[15]रघुवंशम्- 8/43
[16]विक्रमोर्वशीयम् – 2/15
[17]कुमारसम्भवम्– 3/65
[18]विक्रमोर्वशीयम् – 5/2
[19]रघुवंशम्- 10/40
[20]रघुवंशम्- 8/4
[21]अभाज्ञानशाकुन्तलम्– 1/15
[22]रघुवंशम्- 7/82
[23]कुमारसम्भवम्– 3/74
[24]मालविकाग्निमित्रम्. – – 2/7

## ग्रन्थसंकेतः

1) कालिदासग्रन्थावली-ब्रह्मानन्दत्रिपाठी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
2) Science in SanskritSamskritBharati, MatamandirGali, Jhandewala, New Delhi।
3) भारतस्य विज्ञानपरम्परा- संस्कृतभारती, मातामन्दिरगलि, झण्डेवाला, नई दिल्ली।
4) संस्कृत वाङ्मय में विज्ञान का इतिहास-राष्ट्रीय शैक्षिक अनुसन्धान और प्रशिक्षण परिषद् ।
5) कालिदास की वैज्ञानिक दृष्टि-परिमल पाब्लिकेशन्स, 27/28 शक्तिनगर, दिल्ली-110007।
6) रसायनसार-श्यामसुन्दराचार्य वैश्य, चौखम्बा, कृष्णदास अकादमी, वाराणसी।
7) मेघदूतम्-चौखम्बा कृष्णदास अकादमी, वाराणसी।

# प्राचीनभारते मानवाधिकारभावनायाः तत्त्वान्वेषणम्

देवदास-मण्डलः
सहकारी अध्यापकः,
संस्कृतविभागस्य यादवपुरविश्वविद्यालयस्य

1948 ख्रिस्टाब्दस्य 10 डिसेम्वरमासिसम्मिलितजातिपुञ्जस्य साधारणसभायाः तृतीयवार्षिकाधिवेशने मानवाधिकारसंक्रान्तप्राथमिकभावना संकलिताआसीत्। तां भावनामाश्रित्य 1993 ख्रिस्टाब्दे जुनमासस्य चतुर्दशतः पञ्चविंशतिदिवसपर्यन्तं अस्ट्रियायाः भियेनानगर्य्यां मानवाधिकारविषयकं प्रथमविश्वसम्मेलनमनुष्ठितम्। तत्रभारतवर्षस्य प्रतिनिधिभिः सह१७० देशस्य प्रतिनिधयः समावेशिताऽभवन्। तत्र सम्मिलितैः सभ्यैः केचन सिद्धान्ताः गृहीताः। तदनन्तरं भारतवर्षे 1993 ख्रिस्टाब्दे `The Protection of Human Right Act’नाम्ना मानवाधिकारो नियमो प्रचलितोऽभवत्।अधुना मानवाधिकारनाम्ना ये नियमाःप्रचलिताः सन्ति, सुप्राचीनकालतः भारतवर्षे सा भावना वीजाकारेण अस्माकं संस्कृतसाहित्ये शास्त्रे वा कथं निहिता आसीत्तदत्र विचार्या।

भारतवर्षः माननीयानां मनीषिणां महामानवानां वा देशः। भारतवर्ष एको वृहत्गणतान्त्रिकदेशः। वहुसंख्यकानां विविधानां मानवानां भाषा-जाति-धर्माणां समन्वयस्य देशश्चेति। तत्र मानवाः किं किमधिकुर्वन्ति तेषामधिकारस्य इयत्ता कीदृशी साम्प्रतं सा विचारणीया।अधिक्रियते अस्मिन् इत्यधिकारः। मानवानाम् अधिकारः मानवाधिकार इत्यनेन शब्दोऽयं निष्पन्नः। मनो अपत्यं पुमान् मानवः। अत्र मानवशब्देन जातिधर्मवर्णनिर्विशेषं चतुर्णां निखिलं मनुष्यजातं बोद्धव्यम्। तादृशेषु मनुष्येषु ब्राह्मणक्षत्रियशूद्रविशां चतुर्णां वर्णानां, तेषांसान्तरालानां चसामान्येन कोऽपि विभेदो नास्ति।[1]सर्वेषां समानरूपेणाधिकारो भवति। तत्र सर्वेषामविशेषेण एकैव संज्ञा या मानवरूपेण सर्वत्र प्रथिता।तेषां मानवानामधिकारः कीदृशो भवितुमर्हति इत्यपि विवेचनीयः।
मनुष्याणां कल्याणसाधनमेव मानवाधिकारकमिशनस्य मुख्योद्देश्यम्। अतो मानवाधिकार नियमप्रवर्तनेन विश्वे सर्वेषां मनुष्याणां सुस्थस्वाभाविकजीवनयापनस्याधिकार निश्चितकृतम्। यत्तु अस्माकं प्राचीनभारतीयैर्ऋषिभिर्महर्षिभिश्च सततमेवोदीरितं –‘सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।’[2]सर्वभूतेषु आत्मदर्शनम्, आत्मनि च सर्वभूतमिति उपनिषत्सु प्रतिपादितम्। तत्र सर्वं विश्वं ऋषीणां चिन्तने भवत्येकनीडमिति। अतो जगतः सर्वभूत-हितसाधनमेव तेषां लक्ष्यमासीत्। अतो साधूक्तं *हितोपदेशे*-‘अयं निजः परो वेति गणना

---

[1]उल्लेख्यं, भारतीयसंविधानस्य १५ अनुच्छेदे उक्तम्- केवलं धर्म-जाति-वर्ण-लिङ्गानुसारेण नागरिकाणां वैषम्यं न स्वीकृतम्।

[2]वृहदारण्यकोपनिषद्, १.४.१४; महानारायणोपनिषद्,१.१

लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्।'[3]वस्तुतः, मनुष्यजीवनं न केवलं सोदरपूरणार्थम्। तत्र परारर्थैव जीवितं सफलमिति मन्यते अस्माकं साहित्ये। वहुजनहिताय वहुजनसुखाय च जीवनस्य गुरुत्वं तत्र स्वीकृतम्। तदुच्यते-'यस्मिञ्जीवति जीवन्ति वहवः स तु जीवति।' ( हितोपदेशः, २.३७)

'न हि मनुष्यात् श्रेष्ठतरं किञ्चित्।'(महा.१२.२८८.२०) इति महाभारतवचनात् सुस्पष्टमवगम्यते यत् पृथिव्यामस्यां मनुष्यापेक्षया न किञ्चित् श्रेष्ठतरं वस्तु दृग्गोचरीभवति। तिर्यक्योनिषु मानवो हि श्रेष्ठः। धर्मार्थकाममोक्ष इति चतुवर्गफलेषु तस्याधिकारोऽस्ति। स हि सर्वेषां भूतानामुपरि विराजते। स्वकीयगुणबलेन प्रज्ञाबलेन च।

अत उपनिषदिउच्यते-'श्रुण्वन्तु विश्वे अमृतस्य पुत्राः' (श्वेत. २.५)इति। ते नाम मानवा अमृतस्य पुत्ररूपेण परिगण्यन्ते। मनुष्या एव केवलममृतस्य अधिकारिणः। तत्रान्येषां गवाश्वादीनां प्राणिनां कोऽपि अधिकारो नास्ति। मनुष्याणामधिकारो नाम पानभोजनादिषु सर्वत्र समेषामाविद्वदङ्गनाबालं समान अधिकारः।

'समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनक्ति' इति अथर्ववेदीयमन्त्रे(३.३०६) सर्वेषां मनुजानां कृते तृष्णाया जलमेकविधं भवतु, सर्वेषां कृते अन्नं च समानं भवतु, कुत्रापि वैषम्यं मास्तु इति प्रार्थना क्रियते। इयं प्रार्थना सार्वजनीना सर्वत्र समत्वबुद्धिमाविष्करोति। न केबलं पानभोजनादिषु समत्वं धनवण्टनेऽपि एकरूपत्वं वयमृगवेदे साक्षात्कुर्मः। 'वि भजा भुरि ते वसु, भक्षीय तव राधसः'इत्यादौ मन्त्रे सर्वेषां मनुष्याणां सर्वेषु वस्तुषु समानमधिकारो प्रतिष्ठापयति।

मानवानां कुत्राधिकारः? एतज्ज्ञायते श्रीमदभागवगीतायां अर्जुनं प्रति श्रीकृष्णस्य वचनात्। तत्र जीवनयुद्धे किंकर्तव्यविमूढमर्जुनं प्रति भगवता श्रीकृष्णेनोक्तं- 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।'[4]अर्थात् कर्मणि एव अर्जुनस्य सर्वस्य मानवस्यैवाधिकारोऽत्र निर्देशितो। अतो यथाधिकारस्थितेन मानवेन सर्वदा निष्कामकर्म =नित्यकर्म करणीयमित्यशयः।- मानवजीवने कर्मैव साधकम्, प्रत्यूहवारकम्, दुःखनिरोधकम्, अर्थाधिगमसाधनम्, पापनिवारकम्, आधिव्याधिविनाशकं चेति। यत्र कर्म तत्र सुखम्। यत्र कर्माभावः तत्र दुखावसादः। अतो कर्माधीनं जीवनं, कर्मैवपुरुषार्थसाधनमिति तात्पर्यम्।

सापेक्ष-निरपेक्षभेदेन मानवाधिकारः द्विविधरुच्यते। सापेक्षाधिकारः मानवैः स्वर्जिताधिकारः। निरपेक्षाधिकारः मनुष्याणां जन्मगताधिकारः। यथायोग्यं जागतिकवस्तुभोगस्याधिकारः, स्वातन्त्रस्याधिकारादयः, तथा च पितुः मातुः वा सम्पत्तौ पुत्र-कन्यानां अन्वयानां वाअधिकारः स्वीकृतः, तत्रपात्रभेदेन कीदृशोऽधिकारोत्पन्नः तेषां

[3]हितोपदेशः, १.६९
[4]श्रीमद्भागवद्गीता,२.४७

सयौक्तिकं सोदाहरणवर्णनंमन्वादिस्मृतिशास्त्रेनिबद्धम्। तेषां तद्धिकारोलङ्घने सति मानवाधिकारलङ्घं जातमिति, तदर्थं विवादो जातः। मानवानां स्वार्जिताधिकारः गुणानुसारेण कर्मनिर्धारणं कर्तव्यम्।यानि कर्माणि अगर्ह्याणि शास्त्रसम्मतानितान्येवकरणीयानि, न पुनः निन्दितानि समनुष्ठेयानि। अत्रो*हितोपदेशस्*योपदेशः-' अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मसु। '[5]

अधुना मानवाधिकारनियमस्य १६नं धारायायां जाति-धर्म-वर्णगतनिषेधमतिक्रम्य कन्या-वरयोः विवाहसम्पादनस्याधिकारः, परिवार-प्रतिष्ठापनस्याधिकारः वा स्वीकृतः। तत्र पुनः द्वितीय-धारायां पात्री-पात्रयो वरस्य कन्यायाश्च इच्छानुसारेण विवाहसम्पादनस्य विधिरस्ति। विधिरयं प्राप्यते मनुसंहितायाम्। तत्र ब्राह्म-दैव-आर्ष-प्राजापत्यादिषु अष्टसु विवाहेषु स गान्धर्वविवाह नाम्ना परिगणितः। यत्र कन्याया वरस्य चान्योन्यानुरागेण स्वेच्छया वा परस्परसंयोग य आलिङ्गनादिरूपः भवेत् स गान्धर्वविवाहो इत्युच्यते। मनुसंहितायां कन्या-वरयोः स्वेच्छानुमतेः गुरुत्वं स्वीकृतम्।[6]

अधिकारो नाम कर्तव्यम्। कर्तव्यमिदं यथा राज्ञः/राष्ट्रस्य तथा राष्ट्रस्थितप्रजानामपि। मानवानामाधिकारं कर्तव्यं च उपजीव्य विविधाः विषयाः संस्कृतशास्त्रे साहित्ये च सन्ति। यैः तदानीन्तनकालस्य मनुष्याणां कर्तव्यानि कीदृशानि आसन् तद्ज्ञायते। तत्र मानवानामधिकारस्य कर्तव्यस्य च यदि उल्लङ्घनं भवेत् तर्हि दण्डः स्यात्। अस्य जगतः सर्वस्य रक्षणे, सर्वेषामधिकाररक्षणे च आत्मरक्षणेऽपि सर्वदा सावधानता अवलम्बनीया। दुर्वलं प्रति प्रवलस्याक्रमणं यथा न स्यात् तदर्थं यः मानवाधिकाररक्षानियमः आधुना प्रचलितः, अस्य प्राथमिकधारणा *मनुसंहितायां* परिलक्षिता। यत्रोच्यते-'तस्य सर्वाणि भुतानि स्थावराणि चराणि च। भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति।[7]वस्तुतः दण्डाभावात् समाजे मात्स्यन्यायस्योद्भवः भवेत्। राजा यथार्हं दण्डप्रदानेन मात्स्यन्यायदूरीकर्तुं समर्थोऽभवत्।अर्थात् पाचीनकाले दण्डः/(राजा- प्रशासकः) राष्ट्रस्थजानानां प्रजानां तत्र मानवाधिकाररक्षा कर्ता आसीत्।
*कौटिलीये अर्थशास्त्रे* उच्यते- प्रजासुखे सुखं राज्ञो प्रजानां च हिते हितम्। नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।[8]अतो राष्ट्रस्थितानां सर्वेषां प्रजानांसुरक्षाविधाने राज्ञः गुरुत्वं स्वीकृतम्। विशेषतःतत्र उच्यते-'बालवृद्धव्यसन्यनाथांश्च राजा विभृयात्, स्त्रियमप्रजातां प्रजातायाश्च पुत्रान्।'[9]

---

[5]हितोपदेशः, २.१०
[6]मनुसंहिता, ३.३२
[7]मनुसंहिता, ७.१५
[8]अर्थशास्त्र, १.१९
[9]तदेव, २.१.२६

अधुना मानवाधिकारस्य उल्लङ्घनमुत्तरोत्तरं वर्धनं जातम्।सम्प्रतिअस्माकं देशे केन्द्रीयसर्वकारेण (NRC, CAA) नव्यनागरिकत्वनियमप्रवर्तनात् मानवाधिकारलङ्घनस्य यो वितर्क उपस्थितः अचिरेणैव तस्य समाधानं भवेदिति आशास्महे। मानवानां निखिलानामधिकारं संरक्षितुं तथा तेषामुल्लङ्घनं निवारयितुं च अस्मस्दीयराष्ट्रे जातीयमानवाधिकरसंस्थानमस्ति।अतो मानवाधिकारविषयस्य सम्यक् तात्पर्यावधारणाय वयं सर्वे भारतीयाः अस्मदीयान् अधिकारान् तथा कर्तव्यानि अपि सुचारुरूपेण पालयितु सततं यतमाना भवाम इति शम्। अन्तिमे ऋग्वेदस्यन्तिमसूक्ते भारतवर्षस्य महान् ऐतिह्यं सूचितम्। तत्र समेत्य समवायरूपेण वा गमनं वचनं चिन्तनं मन्त्रणं वा श्रेयसे भवति।

'सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्/ समानो मन्त्रः समितिः समानी, समानं मनः सह चित्तमेषाम्// समानो व आकुतिः समाना हृदयानि वः/ समानमस्तु वो मनो यथा सुसहासति'//[10]

## Bibliography


Donnelly, Jack. *International Human Rights.* Westview Press, 2013(4th Ed).

Kangle, R.P. *The KauṭilīyaArthaśāstra*. MLBD (PVT.), Delhi: 2006(rpt.)

Lavin, Liya. *MānavaAdhikāra: Prasna o Uttara*. National Book Trust, New Delhi: 2010(rpt.)

...*Human Rights: Comments and Interpretation*, UNICO:1949

Kale, M. R. (ed) *Hitopadeśa of Nārāyaṇa*. MLBD(pvt.), Delhi: 2004(rpt.).

... *Pañcatantra of Viṣṇusarman*. MLBD(pvt.), Delhi: 2008(rpt.).

Mulla, F. & Desai, S.A. *Mulla Hindu Law*. Lexis Nexis; (21 ed), 2013.

Swain, B.K. *Dharmaśātra*. Chaukhamba Sanskrit Bhawan, Varanasi, 2003.

Swain, B.K. *The Voice of Verdict*. Chaukhambha Publication, New Delhi: 2007.


..............

[10]ऋग्वेद. १०.१९१.२-४

# श्रीमद्भागवतदर्शने सृष्टिवैचित्र्यम्

भूपेनमण्डलः
संस्कृतविभागः, योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः
पालपाडा, पूर्व-मेदिनीपुरम्, पश्चिमबङ्गप्रान्तः

"कृष्णात्परं किमपि तत्त्वमहं न जाने"

'दृश्' धातोः ल्युट् प्रत्यये कृते दर्शन-शब्दः एवञ्च 'धृ' धातोः मन् प्रत्यये धर्म-शब्दो निष्पद्यते। किन्तु धर्मदर्शनयोः शब्दयोः विशाला व्याप्तिः अस्ति। यदि धर्म एव न स्वीक्रियते तर्हि वस्तुसत्ता विनश्यति। जगति वस्तुधर्माणां प्रकाशः सर्वत्र उपलभ्यते। तत्र जडधर्मस्य (देहधर्मस्य) प्रकाशः आकर्षण-विकर्षण-गतिरूपेण लक्ष्यते। चेतनधर्मः (आत्मधर्मः) इच्छारूपेण, अनुभवरूपेण, क्रियारूपेणच प्रकाशते। अस्यैव चेतनधर्मस्य मूर्तविग्रहस्वरूपं श्रीमद्भागवतं धर्मशास्त्रस्य तथा दर्शनशास्त्रस्य शिरोमणिरूपेण बहुभिः समादृतम्। एवमेव दर्शनस्यापि द्विधा प्रकाशः – स्थूलरूपा सूक्ष्मरूपा च। केवलं स्थूलदर्शनेन मनुष्यसमाजः पशुसमाजतुल्यः, तदपेक्षया निकृष्टो वा भवति। अधोक्षज-दर्शनमेव केवलं आत्मसत्ताया विकाशपूर्वकं जीवस्य प्रकृतस्वरूपञ्च प्रकटयति, तेन जीवः अमृततत्त्वस्य अधिकारी भवति, 'अमृतस्य पुत्राः' एवम् उपलब्धि-सामर्थ्यञ्च लभते। जगति विद्वत्सभायां यानि दर्शनानि समादृतानि, तेषु विशेषेण वेदव्यासकृतं श्रीमद्भागवतं शिरोमणितुल्यं शास्त्रे प्रामाण्यम्।

सृज् धातोः क्तिनि प्रत्यये कृते सृष्टिशब्दो निष्पद्यते। किन्तु विचित्रमिदं संसारस्य सृष्टितत्त्वमत्यन्तगहनम्। भारतवर्षे नानाशास्त्रेषु अयं विषयः विस्तरशो वर्णितः। आधुनिकाः वैज्ञानिकाः अपि भौतिकसंसारस्य विमर्शं कुर्वन्ति। किन्तु भारतवर्षे वैज्ञानिकसृष्टितत्त्वस्य भूरिशो दार्शनिकपृष्ठभूमिर्वर्त्तते। यद्यपि वेदादारभ्य अयं विषयः विद्यते तथापि स विषयः सर्वेषां मनुष्याणां संशयं न मोचयति। केवलेन हि श्रीमद्भागवते सम्यग्रूपेण अयं विषयः सर्वेषां संशयं छिनत्ति।

सृष्टिः, स्थितिः प्रलयश्चेति त्रिविधा दशा प्रत्येकपदार्थस्य वर्त्तते। भौतिक पदार्थेन सह आत्मनः संयोगेन एकस्यपदार्थस्य आविर्भावः घटते। अनेन एकस्य पदार्थस्य सृष्टिःभवति। सृष्टस्य पदार्थस्य निर्दिष्टं कालं यावत् स्थितिर्वर्त्तते।एतस्य कालस्य समाप्तौ भौतिकपदार्थात् आत्मा प्रत्याह्रियते ।अयं प्रत्याहारः भवति उपसंहारः । अनेन व्याजेन त्रिविधंफलमवलम्ब्य एकः पदार्थः वर्त्तते । इदं जगद् एकः पदार्थः ।अस्य सृष्टिरस्ति स्थितिरस्ति संहारश्चास्ति । अस्मात् हेतोःजगदिदं त्रिदशासम्पन्नम् । यदि वा संसारः

उत्पद्यते तिष्ठति म्रियतेच, सृष्टिसंहारयोः ज्ञानार्थं तादृशी समस्या न जायते । सृष्टेःविषयमुपजीव्य वस्तुतः अस्माकं ज्ञानं सम्यक् न वर्त्तते । अस्माद्हेतोः सृष्टितत्त्वस्य प्रकाशनाय एका समस्या आगच्छति, यांसमस्यां समाधातुं प्रबन्धेऽस्मिन् प्रयासः करिष्यते।

वेदादारभ्य काव्यादिशास्त्रं यावत् प्रायेण सर्वविधानिशास्त्राणि सृष्टितत्त्वप्रतिपादने तत्पराणि दृश्यन्ते । कदाचित्सृष्टितत्त्वस्य प्रतिपादनं दर्शनशास्त्रे, क्वचिदाधुनिकविज्ञानेऽपि रामायणैतिहासिकशास्त्रान्तरेऽपि उपस्थाप्यते। किन्तु एतानि सर्वाणि सूक्ष्मातिसूक्ष्मत्वेनप्रतिभान्ति। श्रीमद्भागवतमहापुराणं सृष्टितत्त्वप्रतिपादने विस्तृतव्याख्यानरूपग्रन्थः, यत्र ईश्वरेच्छया जगतः सृष्टिस्थितिसंहारदशाःनियम्यन्ते। पुरुषतत्त्वाख्यातस्य जगत्सृष्टिप्रक्रिया वेदेन प्रतिपाद्यते परन्तु श्रीमद्भागवते तल्लीलामाध्यमेन सृष्टिचक्रस्यविस्तरशो वर्णनम् अस्माभिः प्राप्यते । अस्माद् हेतोः एतस्मिन्शोधनिबन्धे श्रीमद्भागवतमहापुराणमेवसमेषां सुखबोधाय मदीयं मुख्यं साधनम्।

एतस्याः समस्यायाः समाधानाय नानाविधाः पद्धतयःसन्ति । यथा विश्लेषणात्मकपद्धतिः, तुलनात्मकपद्धतिः,वर्णनात्मकपद्धतिश्चेति। यतः श्रीमद्भागवतस्य द्वितीय-तृतीय-चतुर्थस्कन्धानामाधारेण अयं शोधनिबन्धः निर्मीयते, अतः एतस्यकेवलं वर्णनं नैव पर्याप्तं भवेत्। एतस्य ग्रन्थस्य आधारेणक्रियमाणत्वाद् अस्य तुलनात्मकपद्धतिरपि नैव सम्भाव्यते ।अतः विश्लेषणात्मकपद्धतिरेव स्वीक्रियते ।

वस्तुतः विराड्पुरुषारभ्य मनुष्यसृष्टिं यावत्सम्पूर्णजीवचक्रस्य सृष्टिविषये एका क्रमिकता विद्यते । अस्यांक्रमिकतायां मनुष्यः सर्वकनिष्ठोजीवः । सृष्टिचक्रस्य सम्पूर्णानुभवः तस्यैववर्तते । मनुष्यपर्यन्तमागमनाय असामर्थ्यात् अपरे जीवाः सृष्टिचक्रंतादृक्प्रकारेण अनुभवितुं न पारयन्ति, यथा मनुष्यः पारयेत् ।अतः मनुष्यकर्तृकसृष्ट्यनुभवः ईश्वरेच्छामात्रविषयकः इतिनिष्पत्तिमुपस्थापयितुं शोधनिबन्धेऽस्मिन् प्रयासः क्रियते ।

प्रस्थानत्रय्याम् उपनिषद् ब्रह्मसूत्रं श्रीमद्भगवद्गीता चअन्तर्भवन्ति । विशेषेण अद्वैतवेदान्तिनः केचन वैष्णवसम्प्रदायश्च एतानि त्रीणि शास्त्राणि प्रस्थानरूपेण मुख्यत्वेन स्वीकुर्वन्ति।वैष्णवदर्शनमुपजीवन्तः पण्डिताः श्रीमद्भागवतमेतदभ्यन्तरेअन्तर्भावयितुमिच्छन्ति । श्रुतिप्रस्थानरूपेण उपनिषदः यदि वामन्यन्ते तथापि अधिकतया संहिताः, ब्राह्मणम् आरण्यकं च तत्रयोज्यन्ते । न्यायप्रस्थानत्वेन श्रीमद्बादरायणप्रणीतं ब्रह्मसूत्रंस्वीक्रियते । स्मृतिप्रस्थानत्वेन श्रीमद्भगवद्गीता श्रीमद्भागवतंच इति द्वयम् अवलम्ब्यते । संहितासु, ब्राह्मणेषु आरण्यकेषु

चसकला सृष्टिः यज्ञाद् एव प्रवर्त्तते।एतदर्थं पुरुषसूक्तं,हिरण्यगर्भसूक्तं नासदीयसूक्तं प्रभृतीनि बहूनि सूक्तानिसृष्टितत्त्वं प्रकाशयन्ति । उपनिषत्सु–

**"यतो वा इमानि भूतानि जायन्ते।"**(तैत्तिरीयोपनिषत्.३.१)

इत्यनेन मन्त्रेण या सृष्टिप्रक्रिया संक्षेपेण उक्ता, तामुपजीव्यब्रह्मसूत्रे श्रीमता बादरायणेन **'जन्माद्यस्य यतः'**इति सूत्रं प्रणीतम् ।सर्वत्र उपनिषत्सु ब्रह्मणः एव सृष्टिः ब्रह्मणि एव लयः, संहितासुयज्ञात् सकलसृष्टिः प्रवर्त्तते । श्रीमद्भगवद्गीतासु स्वयं भगवताश्रीकृष्णेन इदमेव यद् उक्तं तत् तस्मादेव प्रवर्त्तते । वेदान्त-सांख्ययोः सिधान्तद्वयम् एकीकृत्य जगत्सृष्टिविषयः तत्रउपन्यस्तः । एवं प्रकारेण प्रस्थानत्रय्यां सृष्टिविषयःविन्यस्तोविद्यते ।

यदा भगवान् संसारं स्रष्टुमिच्छति तदाकारणार्णवशायिनः पुरुषस्य ईक्षणात् सृष्टिर्भवति। अयं विषयःश्रीमद्भागवते स्पष्टरूपेण वर्तते[१] ।

अयमेव कारणार्णवशायिपुरुषः प्रकृतिं प्रति क्रियमाणस्यईक्षणस्य कर्त्ता । अस्मिन्नेव पुरुषे सूक्ष्मरूपेण समस्तं विश्वम्, अपिच कर्मफलाश्रितसूक्ष्मजीवश्च महाप्रलये अवतिष्ठते । अमुं विषयंस्पष्टीकर्तुं वेदान्ते निर्दिष्टं सूत्रं विद्यते[२]। यदा सोऽयं कारणार्णव-शायिपुरुषः दूरे स्थित्वा प्रकृतिमीक्षते, तदानीं तेन ईक्षणेन प्रकृतौस तदीयशक्तिं सञ्चारयति । अनेन प्रकृतिः विक्षुब्धा भवति ।तदानीं प्रकृतेः समावस्था नश्यति । कालक्रमेण विक्षुब्धायांप्रकृतौ प्रधानः सृज्यते । अनेन प्रधानेन सह जीवादृष्टवशात् सूत्रंनिर्मीयते। तदानीं पुरुषकर्तृकप्रवर्त्तनया प्रवर्तिता भूत्वा कालः,कर्म, प्रकृतिः, स्वभावः इत्येते प्रकृतौ परिणामं प्राप्नुवन्ति ।अनया दृष्ट्या जीवादृष्टानुकूलं प्राथमिकं परिणामं यं प्रकृतिर्लभतेअर्थात् तच्चेतनेन सह संयोगेन यत् सूत्रं निर्मीयते, तेन यत्तत्त्वमुपपद्यते तद् महत्तत्वमिति नाम[३]।

एतद् महत्तत्त्वं कालकर्मादिप्रभावेण अहंकारनामकं पृथक्तत्त्वं निर्माति । द्रव्य-ज्ञान-क्रियात्मकाहंकारतत्त्वं विकारं लब्ध्वात्रिभिः रूपैः अभिव्यज्यते । यथा सात्त्विकाहंकारः,राजसाहंकारः तामसाहंकारश्च । सात्त्विकाहंकाराद् मनःइन्द्रियाधिष्ठातृदेवताश्च जायन्ते । राजसाहंकाराद् बुद्धिः, प्राणाः,पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि च सृज्यन्ते । तामसाहंकारात्पञ्चतन्मात्राणि पञ्चमहाभूतानि च जायन्ते।

ब्रह्माण्डस्य सृष्टये भगवता प्रत्येकं वस्तु समादिष्टं, तथापिवस्तुनि चैतन्यस्य विद्यमानत्वेऽपि एकं वस्तु अपरेण सह नैव मिलितुंप्रभवति । अस्मात् हेतोः स्वयं भगवान् अणोरणीयान्महतोमहीयान् च भूत्वा तदन्तः प्रविशति । श्वासमात्रेण भगवतःसकाशात् निखिलं ब्रह्माण्डमाविर्भूतम् अभवत् । तदेव विरजासंज्ञया पतिता तथापि दीर्घकालं यावत्

तद् बह्माण्डं कार्यंकर्तुमसमर्थमभूत् । तदनन्तरं कारणार्णवशायी भगवान् एकस्मिन्एकस्मिन् अंशे प्रविवेश । एवं प्रकारेण परस्परं सम्मेलनेनचराचरात्मकलोकसमूहाद् विराड्देहोत्पत्तिरभूत् । अस्य विराड्रूपंश्रीमद्भागवते उपलभ्यते ।

अस्य विराड्रूपस्य पादमूलात् पातालः,पादाग्रात्पश्चाद्भागाच्च रसातलः,गुल्फदेशाद् महातलः,जङ्घातःतलातलश्च उत्पन्नाः । तस्यैव विश्वमूर्त्तेः यानुद्वयं भवति सुतलः,उरुद्वयं भवति वितलः अतलश्च, जघनं भवति महातलः,नभोमण्डलंभवति तस्य नाभिसरोवरः । ज्योतिःसमूहः तस्य वक्षःस्थलं,महर्लोको भवति तस्य ग्रीवादेशः, जनलोको भवति तस्य वदनंतपोलोको भवति तस्य ललाटः । एवं क्रमेण तस्यैव सहस्रशीर्ष-विष्णुमूर्त्तेः शिरोदेशात् सप्त लोकाः समुत्पन्नाः । इन्द्रियादिदेवगणःतस्य बाहुः, दिक्सकलः तस्य कर्णकुहरः, शब्दः तस्य श्रवणेन्द्रियम्,अश्विनीकुमारौ तस्य नासिकाद्वयम् । गन्धः तस्य घ्राणेन्द्रियमेवंच प्रहृष्टानलः तस्य मुखम् । अन्तरिक्षः तस्य नेत्रगोलकः, सूर्यःतस्य चक्षुरिन्द्रियम्, अहर्निशं तस्य चक्षुःपक्ष्मसकलं, ब्रह्मपदं तस्यभ्रुविभङ्गः, जलं तस्य तालुका, रसः तस्य जिह्वा, वेदः तस्यब्रह्मरन्ध्रं, यमः तस्य दन्तपंक्तिः, पुत्रादिस्नेहकला तस्य दन्तसमूहः,लोकसकलस्य उन्मत्तकारिणीमाया तस्य हास्यम्, एवं च अपारःसंसारः तस्य कटाक्षः, व्रीडा तस्य उत्तरौष्ठः, लोभः तस्य अधरः,धर्मः तस्य स्तनः,अधर्मः तस्य पृष्ठभागः, प्रजापतिः तस्य मेढ्रः,मित्रावरुणौ तस्य वृषणौ, समुद्रसकलः तस्य कुक्षिदेशः, एवं चपर्वतसकलः तस्य अस्थि, नदीसकलः तस्य नाडी, वृक्षसकलःतस्य रोमः, अनन्तवीर्यबाहुः तस्य निश्वासः, वयः तस्य गतिः,प्राणिनां संसारः तस्य कर्म अर्थात् क्रीडा, मेघसमूहः तस्य केशः,सन्ध्या तस्य वसनमव्यक्तं तस्य हृदयं, समस्तविकारस्यआश्रयभूतः चन्द्रमाः तस्य मनः, महत्तत्त्वं तस्य विज्ञानशक्तिर्नामचित्तम् । अहङ्कारतत्त्वस्य श्रीरुद्रम् अस्य तर्हि उष्ट्रः, हस्तीतिप्रभृतयः तस्य नखः, अन्ये सर्वे पशवः तस्य कटिदेशः, पक्षिणःतस्य विचित्रशिल्पनैपुण्यं, स्वायंभुवमनुः तस्य मनीषा, पुरुषःतस्य आश्रयस्थानं, गन्धर्वविद्याधरचारणाप्सरसः तस्य स्मृतिः,असुरसैन्याः तस्य वीर्यं, ब्राह्मणाः तस्य आननं, क्षत्रियाः तस्यबाहुः, वैश्याः उरु, शूद्राः चरणः वर्त्तन्ते । असौ नानाविध-नामधारिभिः वसुरुद्रादि देवगणैः परिवृतः हविस्यादध्य यज्ञादि-प्रयोगः तस्य कार्यम्[४]।

यस्य विराड्देहस्य सृष्टिप्रसङ्गः पूर्वमुक्तः ततः परिणतिःप्राप्ततत्त्वानां सम्मेलनेन उत्पद्यते एकः अण्डविशेषः। सोऽयं अण्डःकतिपयैः आवरणैः परिवृतः। अस्मादेव अण्डात् हिरण्यगर्भात्मक-विराड्पुरुषस्य आविर्भावः। अयं हिरण्यगर्भान्तर्वर्ती सहस्रशीर्षापुरुषः अण्डे उपस्थितः आसीत्। अयमेव कारणार्णवशायीद्वितीयस्वरूपेण गर्भोदशायी विष्णुः। अस्मात् एव गर्भोदशायिनोविष्णोः नाभिपद्माद् ब्रह्मा समुत्पन्नः।

स एव ब्रह्मा कारणार्णवपरिमण्डलं वीक्ष्य किमपिलब्धुमसमर्थः पुनरपि चतुर्द्दशभुवनात्मकनालदण्डाभ्यन्तरे प्रविष्टःततः उत्थाय तपः शब्दं श्रुतवान्। तस्मात् च सृष्टिरहस्यं विज्ञायतत्कर्तृकसृष्टिप्रपञ्चं विरचयामास।

ब्रह्मा प्रथमतः स्थावरं ससर्ज। तेषु वनस्पतयः, लताः,त्वक्सारः, विरुत्, वृक्षः, तदन्तरं तिर्यक् इति च ससर्ज। तिर्यक्प्राणिनः भविष्यज्ज्ञानशून्याः बहुलतमोगुणविशिष्टाः। केवलंआहारशयनादिषु तत्पराः, ते स्वकीयघ्राणेन्द्रियेण स्वीयाभिलषितवस्तु ज्ञातुं पारयन्ति। तेषां हृदये किमपि ज्ञानं न तिष्ठति।ते दीर्घानुसन्धानशून्या भवन्ति।

तदनन्तरं मनुष्यसृष्टिः। मनुष्यः केवलमेकप्रकारकःप्राणी, तत्तुल्यः प्राणी नास्ति। मनुष्याणामाहारसञ्चारःनिम्नामभिव्याप्य भवति। अस्मिन् रजोगुणश्च प्राधान्यं वर्त्तते।एतदर्थमस्मिन् कर्मणि तत्परता दृश्यते। एतेन असौ दुःखेऽपिसुखमनुभवति।

तदनन्तरं वैकारिकदेवसृष्टिरभूत्। इयं सृष्टिः अष्टविधा।अत्र सन्ति देवाः पितरः असुराः गन्धर्वाप्सरसः यक्षाः रक्षांसिसिद्धाः चारणाः विद्याधराः भूताः प्रेताः पिशाचाः किन्नराः किंपुरुषाश्च। देवताः पितरः असुराश्च त्रिप्रकारकाः भवन्ति।गन्धर्वाप्सरसश्च मिलित्वा एकप्रकारकाः, यक्षः रक्षांसि चमिलित्वा एकप्रकारकाः, सिद्धाः चारणाः विद्याधरश्च मिलित्वाएकप्रकारकाः, भूतः प्रेतः पिशाचश्च मिलित्वा एकं किन्नरकिंपुरुषौमिलित्वा एकम्। एवं प्रकारेण वैकारिकदेवसृष्टेः अष्टौ भेदाःभवन्ति।

मनुष्यसृष्टेः अनन्तरं ब्रह्मा नैव किमपि स्त्रष्टुं इयेष। सआत्मानं द्विधा कृत्वा एकेन अंशेन मनुम् इतरेण अंशेन चशतरूपां ससर्ज। मनुना शतरूपायां त्रिस्रः कन्या द्वौ पुत्रौ चउत्पादिता। कन्यारूपेण आकूतिः, प्रसूतिः, देवहुतिश्चपुत्ररूपेण उत्थानपादः, प्रियव्रतश्च भवन्ति। इतःसकलमनुष्यसंसारः प्रादुर्बभूव।

श्रीमद्भागवतात् प्राक् वेदादिवाङ्मयेषु यत् सृष्टितत्त्वंप्रतिपादितं तत्र ब्रह्मकर्तृकः सृष्टिविषयः उक्तः। तत्र ब्रह्माण्डमात्रस्य सृष्टिविषयस्य उत्पत्तिर्विद्यते। किन्तु श्रीमद्भागवते यत्सृष्टितत्त्वं प्रतिपादितं तत्तु ब्रह्मकर्तृकम्। अत्र ब्रह्मायां सृष्टिंकृतवान् तस्य विस्तरशो वर्णनं श्रीमद्भागवते प्राप्यते। भागवतीयसृष्टितत्त्वे मनुष्यपर्यन्तंनिखिलजीवानां पुंखानुपुंखमेकैकशो वर्णनं प्राप्यते। अस्मिन्प्रबन्धे प्राक्प्रवर्त्तितसृष्टितत्त्वात् श्रीमद्भागवतकृतसृष्टितत्त्वस्य इदंभवति एकं विशिष्टं फलम्।

(क) एतस्य सृष्टितत्त्वस्य आधाररूपेणश्रीमद्भागवतस्य यत् समर्थनम् अस्ति तत्तु द्वितीयस्कन्धस्य,तृतीयस्कन्धस्यचतुर्थस्कन्धस्य च विषयपरिसरत्वम्।

(ख) यदि कश्चन आपत्तिमुत्थापयेत् यन्मनुष्यव्यतिरेकेण स्तम्भपर्यन्तसृष्टेः पुंखानुपुंखं विवरणं किमर्थंश्रीमद्भागवतकारेण नैव प्रदत्तमिति, अस्योत्तरेण अस्माभिरेतदेववक्तुं शक्यते यद् भगवता या काचित् सृष्टि कृता सर्वत्र तस्यअसन्तोष एव विद्यते । यतो हि सर्वा सृष्टि: भगवन्तंपरिचेतुमसमर्था, केवलं मनुष्यः भगवन्तं सम्यक् परिचेतुं सामर्थ्यविभर्त्ति । अनेन हेतुना भगवान् लीलामाध्यमेन सम्पूर्णां स्वसृष्टिमनुभवितुं यदा इच्छति तदानीं सर्वदेहापेक्षया मनुष्यदेहंसर्वात्मना समर्थयति । स स्वयं व्यक्तिः यत् **“मानुषी मे तनुप्रिया"**इति । अस्मात् हेतोः अपरेषां प्राणिनां जीवानां वा पुंखानुपुंखंसृष्टिमवर्णयित्वा श्रीमद्भागवतकारः मनुष्यसृष्टिमुपजीव्यआधिक्येन कथितवान्।

अत्र सारांशरूपेण इदं वक्तुं शक्यते यद् वेदेषुयज्ञमाध्यमेन या सृष्टिः कृता सा सृष्टि: नियता चक्राकारा च ।उपनिषत्सु या सृष्टिप्रक्रिया वर्णिता सा महत्त्वपूर्णा।तत्र उपनिषत्सृष्टौ तत्त्वात्मकः विचारः अधिकतया कृतः। तत्र तत्र बहुत्रबन्धनात्मकभावना परिलक्ष्यते। उपनिषत्सृष्टौ बन्धनात्मकभावनान विद्यते । श्रीमद्भागवत- प्रतिपादितसृष्टौ संसारं प्रति भगवत्सृष्टौआनन्दानुभवस्य प्राधान्यं विद्यते । अत्र वैदिकसृष्टेः आरभ्यभागवतीयसृष्टिं यावद् एकः प्रवाहः तिष्ठति ।उपर्युक्तप्रकारेण विश्लेषणे कृते इदमेव निकर्षरूपेणआगच्छति यत् –

(क) मनुष्यो यदि संसारे जन्म लब्ध्वा आत्मनःबन्धनमात्रमनुभवेत् तर्हि केवलं स दुःखमेव अनुभवेत् । यदिभगवतः लीलामात्रं सफलयितुमात्मनः जन्मनः साफल्यमनुभवेत्तर्हि सकलपदार्थजिज्ञासापेक्षया भगवजिज्ञासां लक्ष्यरूपेणस्वीकुर्यात् । भगवतः आनन्दमयत्वात् तद्विषयकजिज्ञासापिआनन्दं जनयेत् ।

(ख) श्रीमद्भागवते मनुष्यः अन्येषां जीवानामपेक्षयासुखी, तथापि वन्धने तस्य दुःखं नास्ति ।

(ग) भगवतः इच्छामयत्वात् तद्विषयिणी इच्छा एवमनुष्यजीवनस्य लक्ष्यम् ।

वेदेषु ब्राह्मणेषु आरण्यकेषु उपनिषत्सु श्रीमद्भागवतेच सृष्टितत्त्वं यथैव वर्णितमस्ति सांख्यादिदर्शनेषु मन्वादिस्मृतिषुब्रह्मादिपुराणेषु च सृष्टिप्रक्रिया तथैव विस्तरस्य विद्यते ।श्रीमद्भागवत-पुराणापेक्षया इतरत्र सृष्टितत्त्वस्य वैभिन्न्यंसामञ्जस्यं च कारणप्रदर्शनपुरःसरं अलमति विस्तरेणेति किञ्चित् परिचर्चितम्।

**“त्वदीयं वस्तु गोविन्दतुभ्यमेव समर्पये।”**

## टिप्पणी

१.जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षया ।। श्रीमद्भागवतम् १.३.१
२. ईक्षतेर्नाशब्दम् ब्रह्मसूत्रम्
३. कालं कर्म स्वभावञ्च मायेशो स्वया ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरु पाददे ।।
कालात् गुणव्यतिकरः परिणामः स्वभावतः ।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्।। श्रीमद्भागवतम्. २.५.२१-२२
४.पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥
दे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलश्चातलञ्च ।
महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो घृणन्ति ॥
उरुः स्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य।
तपो रराटीं विदुरादिपुंसः सत्यन्तु शीर्षाणि सहस्रशीर्ष्णः ।।
इन्द्रादयो बाहवः आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ।
नासत्यदस्रो परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ।।
द्यौरक्षिणी चक्षुरभूत् पतङ्गः पक्ष्माणि विष्णोरहनी उभे च ।
तद् भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालु रस एव जिह्वा ।।
छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि ।
हासो जनोन्मादकरी च माया दूरन्तसर्गो यदपाङ्ग माक्षः ।।
व्रीडोत्तरौष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्म पथोऽस्य प्रिष्ठम् ।
कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गीरयोऽस्तिसंघाः ।।
नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ।
अनन्तवीर्यः श्वसितं मातरिष्वा गतिर्वयः कर्म गुणप्रवाहः ।।
ईशस्य केषान् विदुरम्बूवाहन् वासस्तु सन्धां कुरुवर्य्य भुम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च च चन्द्रमाः सर्वविकारकोषः ।।
विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम् ।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ।।
वयांसि तद्व्याकरणं विचित्रं मनुर्मनिषा मनुजो निवासः ।
गन्धर्वविद्याधरचारणास्परः स्वरः स्मृतीरसुरानीकवीर्यः ।।

ब्रह्माननं क्षत्रभूजो महात्मा विड्रुरभि श्रितकृष्णवर्णः ।

नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः ।।

श्रीमद्भागवतम्. २.१.२६-३७

# उपयुक्तग्रन्थसूची


१.तैत्तिरीयोपनिषत्सम्पा.-महामहोपाध्याय दुर्गाचरण सांख्यवेदान्ततीर्थ, प्रथमसंस्करणम्,कलकाता, देव साहित्य कुटीर प्राइभेट लिमिटेड, २०१४

२.ब्रह्मसूत्रशाङ्करभाष्यम् विश्वेश्वर सिद्धान्त शिरोमणि, प्रथमसंस्करणम्, वाराणसी, चौखम्बा विद्याभवन, १९८६

३.गोस्वामी श्रीरूप, भक्तिरसामृतासिन्धुः सम्पा. श्रीमद्भक्तिरक्षक,श्रीधर गोस्वामी श्रीजीवगोस्वामीपादकृतः 'दुर्गम सङ्गमनी' टीकासमेतः)प्रथमसंस्करणम्,नवद्वीप, श्रीचैतन्य-सारस्वतमठ १९४८

४.श्रीमद्भगवद्गीताशाङ्करभाष्यसमेता, पञ्चमसंस्करणम्,दिल्ली, मोतीलाल बनारसीदास, २००४

५.श्रीमद्भागवत-महापुराणम् सम्पा.रामतेज पाण्डेय, तृतीयसंस्करणम्, वाराणसी, चैखम्बा संस्कृत प्रतिष्ठान, २०११

६.विद्याभूषण-वलदेवसिद्धान्तरत्नम् सम्पा. श्रीमद्भक्तिवेदान्त-वामन-महाराज,प्रथमसंस्करणम्, नवद्वीप, श्रीगौडीय वेदान्त समिति,१९७३

# पातञ्जलदर्शनविमर्शः

मृण्मयमल्लिकः
सहाध्यापकः, संस्कृतविभागः,
श्रीचैतन्यकलेज, हावडा, उत्तरचव्विशपरगणा

**सारांशः**

दर्शनसमृद्धेषु संस्कृतसाहित्येषु महर्षिणा पतञ्जलिना प्रणीतं योगदर्शनं प्राचीनकालात् वर्तमानसमयेऽपि मानवानां जीवने अतीव प्रभावविस्तारं करोति। चतुर्णां पुरुषार्थाणां मोक्षः ज्ञानिनाम् ईप्सिततमः भवति। निधिध्यासनात्मके योगशास्त्रे मोक्षलाभोपायः पतञ्जलिना वर्णितः। सर्वे भारतीयदार्शनिकसम्प्रदायाः आत्मनः मुक्त्यर्थं साधकतमं करणं योगविद्या इति मुक्तकण्ठेन उद्घोषयन्ति। वेदोपनिषत्स्मृतिपुराणानि सर्वाणि शास्त्राणि योगोल्लेखं विदधन्ति द्रष्टानि भवन्ति। योगेनैव मनुष्यस्य चित्तं निर्मलं शुद्धं स्थिरञ्च भवितुमर्हति। यन्मनः शान्तं शुद्धञ्चास्ति तदेव गूढानि तत्त्वान्यवबोद्धुं प्रभवति। सत्यमेवाभिहितं—'नास्ति योगसमं बलम्।' योगः सार्वभौमधर्मोऽस्ति। न तस्य कस्मिन् अपि मते सम्प्रदाये वा पक्षपातः। स सर्वथा वाद-विवाद-विरहितः। स आत्मानं दर्शयति मनः शरीरञ्च संस्करोति।

**मूलशब्दाः**—*योगः, चित्तवृत्तिः, चित्तभूमिः, अष्टसाधनानि।*

मोक्षलाभार्थमात्मसाक्षात्काराकाङ्क्षिणः कृते पातञ्जलं योगदर्शनममूल्यनिधिरस्ति। व्यासस्तत्र भाष्यं यच्चकार तद् योगभाष्यमिति नाम्ना सर्वत्राद्य सुविदितम्। व्यासकृतभाष्यस्य टीकां वाचस्पतिमिश्रः कृतवान् सा टीका तत्त्ववैशारदीति संज्ञया प्रसिद्धास्ति। विज्ञानभिक्षोर्योगवार्तिकं किञ्च भोजराजस्य भोजवृत्तिरपि योगदर्शनेस्योत्तमौ व्याख्यानग्रन्थौ स्तः। पातञ्जलं योगदर्शनं चतुर्षु पादेषु विभक्तमस्ति। समाधिपादः प्रथमः पादोऽस्ति तत्र योगस्य स्वरूपमुद्देश्यं लक्षणं, चित्तवृत्तिनिरोधस्योपाया विभिन्नयोगानाञ्च विवेचनं कृतमस्ति। द्वितीयःपादः साधनापादः कथ्यते। तत्र क्रियायोग-क्लेश-कर्मफल-दुःख-स्वभाव-हेय-हेयहेतुहानहानोपायादिकाश्च विषया वर्णिताः सन्ति। तृतीयः पादो विभूतिपाद इति नाम्ना विश्रुतः। तत्र योगस्यान्तरङ्गावस्था योगाभ्यासजनितसिद्धयश्चोल्लिखिताः सन्ति। कैवल्यपादाभिधे चतुर्थे पादे मुक्तिस्वरूपं गीतमस्ति।

सांख्य-योगमतेन जीवोऽस्ति स्वतन्त्रः पुरुषः सामान्यतः सः स्थूलं शरीरं विशेषतश्च सूक्ष्मं शरीरमधितिष्ठति। अस्ति सः स्वभावेन शुद्धश्चेतनश्च। शारीरिकेभ्यो वन्धनेभ्यो मानसिकेभ्यश्च विकारेभ्यो मुक्तः सन् स सन्तिष्टते। अज्ञानात् सः आत्मानं चित्तमवगच्छति। चित्तन्तु प्रकृतेः प्रथमो विकारः। तत्र विजितरजस्तमस्कस्य सत्त्वगुणस्य प्राबल्यं परिस्पन्दते। तन्निसर्गतोऽस्ति जड़म्। आत्मनो निकटतमसन्निकर्षात् तत् तेन (आत्मना) प्रकाश्यमानं भवति। शुद्धसत्त्वात् तन्निर्मलमस्ति निर्मलत्वात् तस्य, तत्रात्मनः प्रतिविम्बं पतति। तेन तत् चेतनमिवाभासते। यदा चित्तस्य केनापि विषयेण सह सान्निध्यं भवति तदा तत् तस्यैव विषयस्याकारं विभर्ति। एभिरेव विषयानुरूपैश्चित्तविकारैरात्मा विषयाभिज्ञो भवति। यद्यप्यात्मास्ति सर्वथैवाविकारी अपरिणामी च परं परिवर्तनशीलासु चित्तवृत्तिषु प्रतिविम्बितत्वात् तत्र परिवर्तनशीलता आभासत इव। यथा सरितः कल्लोलेषु प्रतिबिम्बितः शशी चलन् प्रतीयते तथैव परिवर्तिनीषु चित्तवृत्तिषु ह्यात्मापि परिवृत्तिं गृह्णन् आभासते।

प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतय इत्येता सन्ति वृत्तयः पञ्च चित्तस्य। सत्यज्ञानं प्रमाणमित्यतेन किञ्च मिथ्याज्ञानं विपर्यय इत्येतेन पदेन व्यपदिष्टं भवति। विकल्प इत्येतेन पदेन कल्पितं वस्तु समुपस्थाप्यते वस्तुतस्मद् वस्तुनः स्थितिर्न कालत्रयेऽपि दृश्यते। निद्राख्या चित्तवृत्तिः तमोगुणप्रधाना भवति। तत् कारणात् जाग्रतस्वप्नावस्थयोरनुभवो लीयते। निद्रायां (सुषुप्त्याम्) मनः क्रियारतमेव भवति। विषयज्ञानस्य चाभावो जायते। अत इयं वृत्तिः अभावप्रत्ययालम्वनेति कथ्यते। अतीतानामनुभवानां यथावन्मानसिकी प्रतीतिः 'स्मृति'रिति प्रोच्यते।

यदा चित्तं कस्याञ्चन वृत्तौ परिणमते तदा तत्रात्मनः प्रकाशः पतति। प्रकाशपातेन तदात्मेव प्रतीयते। अज्ञानाज्जीवस्तामवस्थां स्वकीयामवस्थामवगच्छति। ततश्च भासतः इत्थं यदात्मैव (पुरुषः) विचारयति, करोति, उत्पद्यते, म्रियते, वर्धते, हीयते, स्वपिति, जागर्ति, स्मरति, विस्मरति च। परमिदं सर्वं नात्मनो धर्मः। जननमरणादिका धर्माः शरीरस्यैव सन्ति। शयनजागरणादिक्रिया मनसः सन्ति। ध्यान-कल्पना-स्मृतयो मनसो वृत्तयः। आत्मा सर्वेभ्य एभ्यो विकारेभ्यः परः। भ्रमात् जीवः स्वं पञ्चक्लेशानामास्पदं मन्यते। अविद्या-अस्मिता-राग-द्वेषाभिनिवेशाः सन्ति पञ्च क्लेशाः। अनित्यं नित्यत्येन, अनात्मानमात्मत्वेन, दुःखं सुखत्वेन, अशुद्धं शुद्धत्वेनावगमनमविद्येति कथ्यते। अविद्यावशात् आत्मानं वुद्धित्वेनावधारणम् अस्मितेति निगद्यते। सुखस्य सुख-साधनानाञ्चावाप्तेरिच्छा राग इति भाष्यते। दुःखे वैरधीर्द्वेष इति प्रोच्यते। मृत्योर्भयमभिनिवेश इत्यभिधीयते।

यावच्चित्ते विकारा जायन्ते तावत् तस्मिन् आत्मानः प्रकाशोऽवतरति; विवेकज्ञानाभावात् पुरुषस्तेष्वेव (विकारेषु) स्वसत्ताया अनुभूतिं कर्तुमारभते। सांसारिकेषु च विषयेषु सुख-दुःख-द्वेषधियं निवध्नाति। आत्मनः (पुरुषस्य) एवं

विधतैव वन्धनमिति कथ्यते। एतस्माद् वन्धनान्मुक्तयवाप्तिनिमित्तेन शरीरेन्द्रियमनश्चित्तवृत्तीनां निरोधोऽपेक्ष्यते। यदा हि कार्यभूतचित्तस्य धारा प्रवाहश्छिद्यते भवति च तत् कारणभूतचित्ते (शान्तावस्थायाम्) अवस्थितं तदात्मा स्वकीयस्य यथार्थस्य स्वरूपस्य ज्ञानमश्नुते। अवगच्छति च तत् आत्मानं शरीरमन आदितो भिन्नम् अवेति च स्वं नित्यं मुक्तं शुद्धं चैतन्यस्वरूपञ्च। चित्तवृत्तिनिरोधेनात्मनः स्वरूपेऽवस्थापनमेव योगस्य महोद्देश्यम्।

क्षिप्त-मूढ़-विक्षिप्त-एकाग्र-निरुद्धाख्यानि सन्ति चित्तभूमेः मञ्च रूपाणि वा अवस्थाः। एतास्ववस्थासु क्षिप्त-मूढ़-विक्षिप्तावस्था न योगानुकूला भवन्ति। रजोगुणप्रधानत्वात् क्षिप्तावस्था तमोगुणप्रधानत्वान्मूढ़ावस्था नेमे द्वेऽप्यवस्थे योगाय समुचिते। एवमेव विक्षिप्तावस्थायां मनो न एकस्मिन् विषये चिरं सन्तिष्ठते तत् त्वरया विषयान्तरं धावति तस्मात् साप्यवस्था न योगार्थमनुगुणा। एकाग्रावस्था निरुद्धावस्था च अवश्यमेव योगानुकूले। तयोः सत्वगुणप्रधानत्वात्। एकाग्रावस्थायां चित्तं चिरमेकस्मिन् विषये आरुढं भवति। तदस्यामवस्थायां कमपि विषयं चिरं ध्यातुं शक्नोति तस्मादेषावस्था योगाय कल्पते। योगस्यैषावस्था प्रथमसोपानत्वेन मता। अन्तिमावस्था निरुद्धाख्यास्ति। एतस्यामवस्थायां चित्तस्य सर्वा अपि वृत्तयो लुप्ता भवन्ति तस्मात् तत् (चित्तम्) स्वकीयां स्वाभाविकीं स्थिरां शान्तामवस्थामधिगच्छति।

एकाग्रावस्थाया नामान्तरं सम्प्रज्ञातसमाधिर्वा सम्प्रज्ञातयोग इति वर्तते। निरुद्धावस्थायाश्चापरं नामधेयं हि असम्प्रज्ञातसमाधिर्वा असम्प्रज्ञातयोग इत्येतदस्ति।

सम्प्रज्ञातसमाधौ चित्तं ध्येये लीनं भूत्वा तन्मयी भवति। असम्प्रज्ञातसमाधौ सर्वासामपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते।

**वितर्क**—विचारानन्दास्मितावत्वात् सम्प्रज्ञातसमाधेः, स चतुर्विधो भवति—(१) सवितर्कसम्प्रज्ञातसमाधिः (२)सविचारसम्प्रज्ञातसमाधिः, (३) सानन्दसम्प्रज्ञातसमाधिः, (४) सास्मितासम्प्रज्ञातसमाधिः।

यदा कस्मिंश्चित् स्थूले भौतिकपदार्थे चित्तमविचलभावेन समवस्थाप्यते तदा स समाधिः सवितर्क इत्युच्यते। स्थूलात् (मूर्त्यादेः) चित्तमाकृष्य यदा तत् सूक्ष्मे विषये प्रतिष्ठाप्यते तदा स समाधिः सविचारसमाधिरित्यभिधीयते। यदा सूक्ष्मादपि (तन्मात्रात्) चित्तमावर्ज्यं कस्मिंश्चित् सूक्ष्मतरे विषये तद् ध्यानार्थमारोप्यते तदा स समाधिः सानन्दसमाधिरिति भण्यते। यदा च ध्यानमहङ्कारगोचरं क्रियते तदा स समाधिः सास्मितासमाधियिति कीर्त्यते। एतस्य समाधेर्फलमस्ति आत्म-साक्षातकारः।

यदा चित्तं सर्वेभ्योऽपि वाह्येभ्यः आभ्यन्तरेभ्यश्च विषयेभ्यो दूरीभवति तदा सा स्थितिः असम्प्रज्ञातसमाधिनाम्ना

गीयते। असम्प्रज्ञातसाधिरेव परमयोगः। इमं सम्प्रज्ञातसमाधि प्रपश्नो योगी मुक्तो भवति। न संसारस्तदर्थं वन्धनं भवति। एतस्यामवस्थायां हि आत्मा मुक्तावस्थाजनितं प्रकाशमनुभवति। आनन्दमयो जायते सः। अस्यान्तिमस्य लक्ष्यस्याधिगतिश्चिरसाधनायाः कठिनस्य च योगाभ्यासस्यानन्तरं भगवदनुग्रहेण भवति।

योगस्य सन्ति प्राधाना मार्गास्त्रयः—(१) ज्ञानयोगमार्गः, (२) भक्तियोगमार्गः, (३) कर्मयोगमार्गः। मानवः स्वकीयप्रकृत्यनुरूपं स्वयोग्यतानुकूलं स्ववुद्ध्यनुगुणं कमप्येकं मार्गमनुगच्छेत्। ज्ञाने यो रमते स ज्ञानमार्गमवलम्वेत। सः सांसारिकान् विषयान् साधु परिशीलयन् आत्मानं शरीरान्मनसश्च पृथगवगच्छेत्। भावुकप्रकृतिर्जनो भक्तिमार्गमाश्रयेत्। स श्रद्धया भक्त्या च ईश्वरमाराधयेत्। यो जनः कठोरसाधनायां वा मीमांसाविहितेषु कर्मसु योजयितुमात्मानं प्रभवेत् स कर्मयोगमार्ग गृह्णीयात्। मनसः शुद्धता सर्वत्रापेक्षित्रास्ति।

यावन्मानवस्य मानसं विकाराकीर्णं तावत् स तत्त्वज्ञानसमवाप्तिपात्रं भरत्येव न। आत्मज्ञानलाभाय हृदयस्य पवित्रता वुद्धेः सात्तिकगुणशालिताभिलष्यते। सांख्ययोगमतेन मुक्तेः कृते 'प्रज्ञाया' अपेक्षा भवति। 'आत्मा मनःशरीराभ्यां भिन्नः स नित्यः शुद्धो वुद्धो मुक्तश्चेतन' इत्येतस्य सत्यस्य दर्शनं यया दिव्यदृष्ट्या भवति सैव प्रज्ञेति वुधैः प्रोक्ता। एतस्या दिव्यदृष्टेरूपलव्धै चित्तेन निर्विकारेण शुद्धेन शान्तेन भवितव्यम्। निर्विकारत्वादिहेतोः योगदर्शनमष्टसाधनानि निदधाति। तानीमानि—

'यम-नियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः' तत्र अहिंसा-सत्यास्तेयव्रह्मचर्यापरिग्रहभेदेन यमः पञ्चविधः, नियमश्च शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानभेदेन पञ्चधा।

परापीड़नमहिंसेति कथ्यते। अहिंसकं प्रति न कोऽपि प्राणी वैरी भवति। सर्वेऽपि प्राणिनस्तस्मिन् वैररहिता भवन्ति। अतः योगसूत्रे प्रोक्तम्— 'अहिंसाप्रतिष्ठायां तत्सन्निध्यौ वैरत्यागः।'[१] कीदृशस्याप्यसत्यस्याभाषणं सत्यमिति निगद्यते सत्यभाषणेन भवति वाण्यमोघा। सत्य-भाषी यद् वदति तस्य प्रकाशनमात्रेण फलमुपलब्धं जायते। उक्तञ्च—'सत्यप्रतिष्ठियां क्रियाफलाश्रयत्वम्।'[२] चोर्यकर्मणस्त्यागोऽस्तेयमित्युदीर्यते। अस्तेयात् सर्वाविधसम्पदां लाभो भवति। नास्तेयसाधको भवति कुत्रापि रागी तदभावदसौ तु लक्ष्म्या स्वयमेव मृग्यते। योगसूत्रमाह—'अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।'[३] व्रह्मचर्येण शारीरिकं मानसिकमात्मिकञ्च वलमेधते। तत् साहाय्येन योगेऽन्तरायमन्तरोन्नतिर्भवति। अतः कथितम्— 'व्रह्मचर्यप्रतिष्ठायां वीर्जलाभः'।[४] विषय-वासनानां दिशम्प्रति न गमनं 'व्रह्मचर्य' मिति गीयते। अपरिग्रहात् भूत-भाविजन्मज्ञानमुत्पद्यते। गतजन्म मम कीदृशमासीत् कुत्र चाहमासम् किञ्चागामिनि जन्मनि कोऽहं

भविष्यामि कुत्र च तद् भवेदित्येतत् सर्वमपरिग्रही चेति। अतः उक्तम्— 'अपरिग्रहस्थैर्येजन्मकथन्तासम्बोधः।'[५] लोभवशात् परवस्तुनोऽपरिग्रहणमपरिग्रह इत्यभिधीयते।

वाह्यशुद्धिराभ्यन्तरशुद्धिः 'शौच'मिति, समुचितोद्योगेन समावाप्ते वस्तुनि तुष्टिः 'सन्तोष' इति द्वन्द्वसहिष्णुता 'तपः' इति। नियमपूर्वकं धर्मग्रन्थाध्ययनं 'स्वाध्याय' इति, ईश्वर-ध्यानं तस्मै स्वापर्णम् 'ईश्वरप्रणिधानमिति प्रोच्यते। नियमानां परिपालनेन यानि कलानि लभ्यन्ते तेषां कीर्तनं योगसूत्रमेवं कुरुते—(१) शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गाः, (२) सन्तोषादनुत्तमसुखलाभः, (३) कार्येन्द्रियसिद्धिरशुद्धिक्षयात्तपसः, (४) स्वाध्यायदिष्टदेवतासम्प्रयोगः, (५) समाधिसिद्धिरीश्वरप्रणिधनात्।

साधनायै यत् सुखदमनुकूलं तदासनमिति गीतम्। आसनं सस्तिकासनसिद्धासनपद्मासनदिभेदैर्वहुविधम्। श्वास-प्रशासगतिनिरोधः प्राणायाम इति प्रोच्यते। प्राणायामात् को लाभ इत्यत्र पञ्चशिखाचार्य आह—

'तपो न परं प्राणायामात् ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्य।' मनुश्चाह—

**दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः।**

**तथेन्द्रियणां दह्यन्ते दोषाः प्राणस्य निग्रहात्।**[६]

पतञ्जलिः प्राह प्राणायामात् अज्ञानावरणं क्षीयते मनश्च स्थिरं भवति। येनेद्रियाणि विषयेभ्यो विमुखानि भूत्वान्तर्मुखीनि भवन्ति स 'प्रत्याहार' इति गद्यते। यम-नियमासानप्राणायामप्रत्याहारा वहिरङ्गानि साधनानि मतानि। धारणा-ध्यान-समाधयश्चान्तरङ्गानि।

चित्तस्याभीष्टविषये सन्निवेशनं धारणेति कथ्यते। परं वृत्तिमात्रसहितचित्तस्य नाभि-नासिकाग्रभागचन्द्रादिध्येये निवन्धनमपेक्ष्यतेऽत्र।

ध्येयस्यानारतं चिन्तनं ध्यानमिति आम्नातम्।

योगसाधनस्यान्तिमसोपानः समाधिरस्ति। अस्यामवस्थायां मनो ध्येय एवंविधतया लीयते यत् तद् ध्येञ्चोभयमपि भवत्येकमेव। उभयोस्तादात्म्यं भवति। समाधेर्लक्षणमेवमाह योगसूत्रम्—'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।'[७] धारणा-ध्यान-समाधय-इत्येषां त्रिकं 'संयम' इत्येतया संज्ञया प्रसिद्धम्।

योगाभ्यासं विदधानो योगी सत्यवस्थाविशेषे सिद्धिष्वधिकारमवाप्नुते। सिद्धयः सन्त्यष्ट—(१) अणिमा, (२) लघिमा, (३) महिमा (४) प्राप्तिः, (५) प्राकाम्यम् (६) वशित्वम्, (७) ईशित्वम् (८) यत्र कामावसायित्वम्। अणिम्ना

योगी अणुरिव, लघिम्ना, तुलवल्लघुः, महिम्ना पर्वत इव, प्राप्त्या अभिमतवस्तुलाभवान्, प्राकाम्येन निर्वाधेच्छावान्, वशित्वेन सर्वजीवशीकरणशक्तिशाली, ईशित्वेन भौतिकपदार्थाधिकारी, यत्र कामावसायित्वेन च सिद्धसकलसङ्कल्पो भवति। योगी न कदाप्यैश्वर्यलोभेन योग-साधनायां प्रवर्तेत। तदीयं लक्ष्यन्तु मुक्तिलाभोऽस्ति तस्मात् तत्रैवात्मानं प्रवर्तयेत स इति योगसूत्रस्य कठोर आदेशो विद्यते।

समाधिर्योगस्यान्तिमः सोपानः ; स चेश्वरप्रणिधानात् सिद्ध्यति। तस्मादीश्वरो हि महनीयं स्थानमधितिष्ठति। ईश्वरप्रणिधानान्वितयोगाङ्गानामनुष्ठानेन निष्प्रत्यूहमाश्वेव समाधेः सिद्धत्वादीश्वरस्य महत्त्वां नितरामेव स्फुटभावेन योगस्समुद्घोषयति—'ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्चेति।'[८] महर्षिः पतञ्जलिर्मानवजीवनस्याग्रे ईश्वरस्योपस्थानं मानवीयजीवनम्प्रति सौभाग्यं महन्मन्यमानस्तस्य प्रविधानं चित्तवृत्तेर्निरोधनकारिणां साधनानां मध्ये परमोल्लेखनीयं साधनं शंसन् ईश्वरस्य स्वरूपश्च 'क्लेशकर्मविपाकाशयैरपरासृष्टः पुरुषविशेषः ईश्वर'[९] इत्यतेन सूत्रेण वर्णयन् 'तत्र निरतिशयं सर्वज्ञवीजम्'[१०] 'पूर्वेषामपि गुरुः कालेनानावच्छेदात्'[११] इत्येतत्सूत्रद्वितयेन तमुपश्लोकयन् साधकश्रयसे तदीयं शुभं नाम 'तस्य वाचकः प्रणवः'[१२] इत्यतेन सूत्रेण कीर्तयन् स मानवं प्रेरयति यदसौ तदीयस्वभाव-गुण-धर्म-वैशिष्ट्यानि विभावयन तन्नाम जपेदिति।

योगसूत्रमतेन ईश्वर परमपुरुषोऽस्ति। स सर्वभ्योऽपि दोषेभ्यो रहितोऽस्ति जीवानाञ्च शास्ता स एव। अस्ति स नित्यः सर्वव्यापी सर्वज्ञः सर्वशक्तिमान् पूर्णश्च। जगतः सर्वेऽपि जीवा अविद्याहङ्कारवासनारागद्वेषाभिनिवेशादिहेतोः दुःखानि भुञ्जन्ति। ते विविधकर्माचरणात् सुखानि दुःखानि च विन्दन्ति। प्राक्तनजनुषः संष्काराणां प्रभावस् तान् स्ववशे करोति। पयमीश्वरस्तु सर्वथैव जीवेभ्योः विलक्षणः। अस्ति स नित्यमुक्तः क्लेश-कर्मविपाकाशयैश्च अपरामृष्टः। अस्ति स एकरसो निर्विकारश्च। न तत्समः कोऽपि। पूर्णज्ञानः सः। इच्छामात्रेण सकलमपि जगत्प्रपञ्चं वितनोति परिचालयति नियच्छति च। तदीया इमा अनन्ता विशिष्टतास्तं जीवात् पृथक् कुर्वन्ति।

ईश्वरस्य सिद्धावधोलिखिता युक्तयो दीयन्ते—

(अ) वेदोपनिषदादीनामीश्वरगुणगायित्वात् सिद्धयति यद् ईश्वरोऽस्ति।

(आ) पदार्थेषु दृश्यमाना लघुता महत्ता च सूचयति यत् कोऽपि पदार्थोऽवश्यमेवैतादृक् योऽणोरप्यणीयान् महतोऽपि महीयान् अस्ति य ईदृशः स एव ईश्वरः।

(इ) पुरुष-प्रकृत्योः संश्लेषेण संसारस्य सृष्टिर्भवति। द्वयोश्च तयोर्विश्लेषेण प्रलयः। तद्द्वितयं नैकमपि तु परस्परं

भिन्नम्। न तयोः संयोगो वियोगश्च स्वाभाव्येन सम्भवः। अवश्यमेवास्ति किमपि एवंविधं निमित्तकारणं यत् तद् द्वितयं शास्ति योजयति वियोजयति च। अदृष्टानुसारेण किमपि तत्त्वं नूनं यत् जीवं (पुरुषम्) संसारयति मोचयति च प्रकृत्याः, प्रकृत्या सह निबध्नाति च। 'इदं तत्त्वमेवं ईश्वर' इति नाम्ना शास्त्राण्यामनन्ति। विना तत्प्रेरणया प्रकृतिर्जगत् न तेन प्रकारेण व्यवस्थापयितुमर्हति यो भवति आत्मोत्थानार्थं मुक्त्यर्थञ्च जीवं (पुरुषम्) प्रति हितावहः।

विद्वद्वराणान्त्वीश्वरमधिकृत्य मतमिदमप्यस्ति यदीश्वरो न केवलं ध्यानार्थमपेक्ष्यते अपि तु महाप्रभुत्वात् सर्वशक्तिमत्त्वात् करुणालुत्वात् शरणागतवत्सलत्वाच्च तस्य, जीवस्य (पुरुषस्य)कर्तव्यमाद्यं यत् स तं शरणं प्रपद्येत तमनिशं भजेत्। तदनुकम्पया पुरुषस्य पापानि नश्यन्ति तस्य योगमार्गो भवति सुगमः। योगविद्या परमपदप्रदायिनी। सा मातेव सर्वजीवान् सुखिनोऽवलोक-यितुमभिलषते। तदीयाः सिद्धयोऽपि सन्त्यलौकिकाः। भौतिकं विज्ञानं वा मनोविज्ञानं यानपि नियमान् प्रतिपादयति न तैः समं तासां भवति संगतिः। अतस्ताः शाम्वरी कलेव प्रतिभान्ति।

सत्यन्त्विदं यद् यौगिक आत्म-साक्षात्कारः सांख्यदर्शनं नाम संसारं सुदृढ़माधारमवलम्वते। तद्वादोऽयं यद् आत्मास्ति नित्यः शुद्धः चेतनश्च। चेदेतादृग् विषयागोचर आत्मास्ति तदेदमपि स्वीकरणीयमस्त्येव यद् विषयानुभूतिधरात उपरिष्टादपि वर्तते काप्युत्तुङ्गतरा धरा किञ्च एतादृश्यः शक्तयोऽपि शोभन्ते या भौतिकेन्द्रियगम्याः शक्तीरपि अतिशेरते। एतस्यात्मिकस्य तत्त्वस्य ज्योतिः संसारे ऋषि-महर्षयस्तु विलोकितवन्त एव परं तज्ज्योतिः—सद्भाव प्लेटो-अरस्तु-स्पिनोजा-लाइब्नीज-काँट-हेगेलप्रभृतयो गुरुगुरुतरा दार्शनिका अपि स्वीकुर्वन्ति। अद्यत्वे अध्यात्मतत्त्वानुसन्धानसमितिः किञ्च आधुनिकं मनस्तत्त्वविश्लेषणमस्यां दिशायां जनान् प्रति पर्याप्तज्ञान-प्रदाने स्वीयमुत्साहं दर्शयतः। यद् ज्ञेयं मानस-गह्वरंध्वान्ते निहितमासीत् तत्र साम्प्रतं प्रकाशं पातयन्तो विज्ञाग्रण्यो वीक्षिता भवन्ति। योगदर्शनमस्यामेवाशायामुपसरत् मानवम्प्रति स्वकीयं यथार्थस्वरूपं दर्शयितुमात्मसंयमविषयकान् व्यवहारिकान् उपायान् प्रस्तवीति। सिद्धान्ततो व्यवहारतश्च योगदर्शनं सांख्यदर्शनाज्ज्यायो गरीयश्च। तस्मिन् येयं ज्यायस्कता गरीयस्कता च प्राप्यते तत्र कारणमस्ति तस्येश्वरनिष्ठत्वं यथार्थानुभूतिशीलत्वञ्च। आभ्यां गुणाभ्यां तत् साधकस्य मानसं नितरामेवावर्जयति किञ्च तन्मनसि स्वविषये श्रद्धाञ्च सञ्चारयति। योगतत्त्वावगमनाय श्रद्धया भक्त्या च तदध्ययनं तदभ्यासश्च पुनः पुनः अपेक्ष्यते।

**उपसंहारः**

सांख्य-योगौ न पृथक् पृथक्। सांख्ये ये सिद्धान्ता वर्णिताः सन्ति तेषां प्रयोग एव योगे कृतो वर्तते। योगदर्शनं सांख्यप्रतिपादितान् सिद्धान्तान् क्रियायां परिणमयति। तत् तथा यतते येन सांख्यस्य सिद्धान्ता जीवने व्यवहरणीयाः स्युः।

ज्ञानमुद्दिश्य सांख्यस्य यो विचारो वर्तते स एव योगस्यापि विद्यते। सांख्याभिमतानि प्रत्यक्षानुमानशब्दप्रमाणानि योगदर्शनमप्यङ्गीकरोति। तत् सांख्यस्य पञ्चविंशतितत्त्वानि च स्वीकरोति। सांख्यं मन्यते यद् विवेकज्ञानमेव मुक्तिसाधानमस्तीत्येतन्मतं योगदर्शनमपि मन्यमानमामनति यद् योगाभ्यास एव विवेकज्ञानस्य साधनं विद्यते।

मानवजीवनस्य चरमं लक्ष्यमस्ति हि आत्म-साक्षात्कारः। आत्मनो दर्शनं न तावत् सम्भवं यावन्मानवो योगी न जायते। अत एव तु भगवान् कृष्णोऽर्जुनमुपदिशति—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन।[१३]

अनन्यचेता भवन् सततं यो नित्ययुक्तो भूत्वा स्मरति परमेश्वरं तस्यैव योगिनो भगवान् भवति सुलभः—

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।[१४]

प्रतिपदं भगवान् कृष्णो योगयुक्तं जीवनं श्लाघमानो दृग्गोचर भवति। स आह—

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत् पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥[१५]

नात्र संशयो यदि साम्प्रतिकोऽयं संसारो योगदर्शनप्रदर्शितं पन्थानमनुयायात् तदा स भौतिकानि सुखान्यपि भुञ्जानः परामेव शान्तिं प्रीतिञ्च समवाप्तुं शक्नोति। हन्त येनोभयमपि भोक्तव्यं भवति येन च स्वास्थ्यं लभ्यते आत्मनोपलव्धिर्मनश्च शूध्यति तं योगं कस्मान्न भजते मानवः।

यो मुनिप्रवरः पतञ्जलिः संसारोपकाराय योगदर्शनं नाम प्रकाशं व्यातनोद् तमधोलिखितेन श्लोकेनास्मन्मनोऽपि नमति पुनः पुनः—

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां 'पतञ्जलिं' प्राञ्जलिरानतोऽस्मि॥

**पादटीकाः**

१. पातञ्जलयोगदर्शने २/३५

२. तत्रैव २/३६

३. तत्रैव २/३७

४. तत्रैव २/३८

५. तत्रैव २/३९

६. मनुसंहितायाम् ६/७१

७. पातञ्जलयोगदर्शने ३/३

८. तत्रैव १/२९

९. तत्रैव १/२४

१०. तत्रैव १/२५

११. तत्रैव १/२६

१२. तत्रैव १/२७

१३. गीतायाम् ६/४६

१४. तत्रैव ८/१४

१५. तत्रैव ८/२८

**सहायकग्रन्थाः**

१. आरण्यः, श्रीमद् हरिहरानन्दः, पातञ्जलयोगदर्शनम्, कलिकाताविश्वविद्यालयः, कोलकाता, १९४९।

२. त्रिपाठी, ड. श्रीकृष्णमणिः, पुराणेतिहासयोः सांख्ययोगदर्शनविमर्शः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९७९।

३. पाल, ड. विपद्भञ्जन, भारतीयदर्शन, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१४।

४. भट्टाचर्यः, रामशंकरः, सांख्यतत्त्वकौमुदी, मोतीलाल वनारसीदास, वाराणसी, १९६७।

५. शास्त्री, श्रीशिवनारायणः, सांख्यकारिका, निर्णयसागरमुद्रालय, वोम्वे, १९४०।

६. शास्त्री, श्रीहरगोविन्दः, मनुस्मृतिः, चौखम्वा संस्कृत सीरिज, वनारस, १९५२।

७. स्वामी, विज्ञानाश्रमजी, पातञ्जलयोगदर्शनम्, दि फाइन आर्ट प्रिन्टिंग प्रेस, अजमेर, १९३२।

८. स्वामी, भावघनानन्दः, श्रीमद्भगवद्गीता, उद्बोधन कार्यलय, कोलकाता, २०००।

# भर्तृहरेः वैराग्यशतकस्यानुशीलनम्

डा. गोगिकारप्रकाशः
सहायकाचार्यः संस्कृतविभागः,
निजाम् कलाशाल(स्वायत्त),
उस्मानिया विश्वविद्यालयः

महाकविः भर्तृहरिः शकपुरुशस्य विक्रमाक्स्र्य भ्राता इति काचित् कथा श्रूयते। अतः अयं महाकविः विक्रमशकारम्भे क्रीस्तोः ५६ तमे वर्षे एव आसीदिति ज्ञायते। भर्तृहारि सुभाषितत्रिशतिं व्यरचयत्। इह खलु तत्रभवानशेषसारपारदृश्वविश्वाति शयिगुणगरिमावतारो भर्तृहरिनाम महायोगीश्वरो निजयोगमहिमानुसारेण करतलामलकीकृतखिल विरिञ्च प्रपञ्चस्तृणकणतुव जगज्जालमालोकयन् परमकारुणिको लोकव्यवहारपरिज्ञान भिन्नान्तःकरणः लोकानुजिघृक्षया नीतिशृड्.गारवैराग्य वर्णनप्रख्यं सुभाशित त्रिशत्याख्यं कञ्चित्प्रबन्दं प्रारम्भमाणस्तत्परिपन्दिनिर्मन्दनद्वारा परिसमाप्ति प्रचयगमन लक्षणं फलमाशासानः शिष्टाचारपरिप्राप्तिविशिषटपरज्योती रूपेष्टदेवता नमस्काराकारं मड्.गलमादौ निबध्नाति।

तानि नीतिशतकं,श्रृड्.गारशतकं,वैराग्यशतकं चेति कथ्यन्ते। अनेन लिखितानि सुभाषितानि प्रत्येकरूपेण वर्तन्ते। एकस्य श्लोकस्य अन्येन श्लोकेन सह संबंधः नास्ति। अतः एव मुक्तकाः इत् कथ्यते।

अस्मिन् ग्रन्थे श्लोकास्सर्वे सम्पूर्णजीवितानुभवज्ञानेन वदन्तीव पाठकानां चित्त संस्कारार्था समर्थाः इव वर्तन्ते। नीतिशतकं कामन्दकीयादि नितिग्रन्थानां उपसंक्षेप

मिति वक्तुं शक्यते।श्रृड्.गारशतकं अमरुकादि श्रृड्.गारग्रन्थानां सादृशरूपेण शोभते। वैराग्यशतकं तु शान्तरस ज्वाला: उद्गिरणमिव संसारान्धकारे मग्नानां प्रकाशं ददतीव वर्तते।

**वैराग्यशतकम् – तृष्णादूषणम्**।मानवानां रागस्य् तृष्णामूलकत्वात्तद्गर्हणं विना न वारागस्य सिद्धिरित्यभिप्रेत्य तत्सिद्ध्यर्थमादौ तावत्तत्परिवन्थिभूतां तृष्णां दूषयति-भ्रान्तमित्यादि नवभिश्लोकै: तत्र प्रथमं स्वकर्म कष्टनिवेदन पूर्वकं तृष्णां संबोध्य त्रिभिर्दूषयति।अनेकैर्दुर्गै पार्वतवार्क्षजलदुर्गादि विषमं देशं सचरितम्। तथापिकिञ्चिदल्पमपि फलं,धनं न लब्धम्। तथा उचितमनुरूपं ब्राह्मण्त्वादि जाति, सद्वंशादि कुलयोरभिमानं त्यक्त्वा फलशून्या सेवां कृता। बहुमानविहीन लोलुपत्वेन परगृहेषु काकवत् भुक्तम्। पापकर्मणां प्रवर्तकान्ताराभाव: हे तृष्णे विषयस्पृहे प्रवृद्धाभवसि किं त्वद्यापि ईदृक्कष्टकर्म प्रवर्तनदशायामपि न संतुष्यसि।

भ्रान्तं देशमनेक दुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशड्.कया काकव
तृष्णेजृम्भसि पापकर्म पिशुने नाद्यापि संतुष्यसि॥१.

मानवप्राणा: बिसिनीपत्रपयांसीव क्षणभड्.गुरा:।तुलित बिसिनीपत्रपयसामीव मानवप्राणा: क्षणभड्.गुरा:। अमीषां प्राणानांकृते विगळित विवेकै: अस्माभि: किं नव्यवसितं? यद्रविणमदेन निस्सज्ञमनसां,आढानामग्रे वीतव्रीडै: निजगुणकथा पातकमपिकृतम्।अमीषांप्राणानां तुलितबिसिनीपत्रपयसां

कृते किं नास्माभिर्विगळितविवेकैव्यवसितम्।

य दाढ्यानामग्रे द्रविणमदनि:सज्ञमनसां

कृतं वीतव्रीडैर्निजगुणकथापातकमपि॥२.

**तृष्णा न जीर्णा – वयमेवजीर्णाः**।स्रक्चन्दनादिविषया नानुभूताः किं तु तत्प्राप्यर्थं दुरन्तचिन्तया ग्रस्ताः वयमेव भुक्ताः। तथा व्रतोपासनादिपुण्यं नाचरितं अथवा तपः न तप्तं किं तु वयमेव आध्यात्मिकादि तापत्रयेण संतापिताः। कालो न गतः किं तु वयमेव याताः देहगेहादियोगक्षेमानुसन्धान लम्पटत्वेन कालमतिक्रम्य गता तथा तृष्णा न शिथिला किं तु वयमेव जरया शिथिलाङ्,गा जाता जीर्णाः।

भोगानभुक्ता वयमेवभुक्ताः स्तपो नतप्तं वयमेव तप्ताः।
कालो न यातो वयमेव याता स्तृष्णानजीर्णावयमेवजीर्णाः॥३

**सर्वं भुवि नृणां भयान्वितं –वैराग्यमेकमेव निर्भयम्**।

भोगो स्रक्चन्दन वनितासम्भोगसुखानुभवे रोगभयमस्ति, सद्वंशे च्युतेराचार भ्रंशाद्भयं, द्रव्यसमृद्धौ राज्ञो तदपहर्तृत्वादि भयं, अभिमाने कार्पण्याद्भयं, सामर्ध्ये दमनशीलशत्रोर्भयं, रूपसौन्दर्ये वार्धकावस्थाय भयं, वेदान्तादि शास्त्रकले शुष्क तर्ककलहकण्ठकवादिभ्यः भयं, विद्याविनयादिगुणगणे दूषकदुर्जनाद्भयं, देहे तदन्तकरात् यमाद्भयम्। अतः भुवि नृणां सम्बन्धि सर्वं वस्तु भयसहितमेव। किं तु विगतो विषयाभिलाषस्तेषां भावो वैराग्यं तदेकमेव न विद्यते भयम्। अतः भयावहं भोगादिकं परित्यज्य निर्भयं वैराग्यमेवाश्रयणीयम्।

भोगेरोगभयं कुलेच्युतिभयं वित्तेनृपालाद्भयं
मानै दैन्यभयं बले रिपुभायं रूपेजराया भयं।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम्॥४

**हे! योगे बुधाः शीघ्रमेव बुद्धिं विदद्ध्वम्**।

नुभृतां भोगाः मेघवितानमध्ये विलसत् सौदामनीव क्षणिका, आयुर्जीवितं च वायुना विघट्टिता अब्जपटलीलीन अम्बुवत् भङ्.गुरं। अनुपान वायुविघट्टित पद्मपत्रप्रान्त

संस्लिष्टजलबिन्दुवत् भङ्.गलीलावत् नश्वरं भवति।यौवने महाभोगाभिलाषाः अस्तिराः। हे बुधाः इत्येवमालोच्य द्रुतं धीरत्वं चित्तस्थैर्यं तयोस्सिध्या सुखलभ्ये भ्रह्मध्याने निश्चयात्मकं कुरुत।

भोगा मेघवितानमध्यविलसत्सौदामनीचञ्चला

आयुर्वायुविघट्टिताब्जलीलीनाम्बुवद्भङ्.गुरम्।

लोला यौवन लालसास्तमभृतामित्याकल्य द्रुत्म्

योगो धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदद्ध्वं बुधाः ॥५

**चित्सन्तुष्टे सति कः पुमानर्थवान् कश्च वा द्रव्यहीनः।**हे राजन् ! वयं इह वल्क्लैः सन्तुष्टाः त्वं क्षौमैर्विचित्रचीनाम्भुरै सन्तुष्टाः अस्माकं तव च तुल्यैव विशेषः निर्विशेषः मामक तावक परितोषयोरन्तरं न किञ्चिदप्यसि संतुष्टिः समं जायते। कः दरिद्रः किन्तुयस्य तृष्णा विशाला सः दरिद्रः भवतु किं च मनसि तुष्टेसति कः पुमानर्थवान् कश्च वा द्रव्यहीनः।

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलै

स्सम इह परितोषो निर्विशेषो विशेषः।

स तु भवतु दरिद्रो यस्य तृष्णा विशाला

मनसि च परितुष्टे कोऽर्थवान् कोदरिद्रः॥६

**चित्तप्रसादात् मोक्षसिद्धिः भविष्यति।** हे चेतः एतस्मात् दुःखजनकात्, शब्दादिविशयरूपारण्यातद्विरम। क्षणात् अशेष दुःखशमनव्यापारसमर्थं ज्ञानमार्गमनुसर। स्वरूपानुसन्धानतत्परत्वमुपैः तथा कल्लोल लोलां स्वकीयां व्यापारं सम्यग्विसृज्य सुस्थिरं भवे। पुनरपि अशाश्वतां संसारासक्तिं मा सेवस्व किं तु अधुना प्रसन्नं भव चित्तप्रसादन्तरा पुण्यशतैरपि श्रेयः प्रास्यसम्भवः।

एतस्माद्विर मेन्द्रियार्थगहना दायासकादाश्रय

श्रेयोमार्गमशेषदुःखश्यमनव्यापारदक्षं क्षणात्।

सात्वीभावमुपै हि सन्त्यज निजां कल्लोललोलां गतिं

शिवचरणमेव शरणमिति स्मरणमभितीयाह-विषयाभिलाषाश्चान्तरङ्.गेव नष्टाः तद्यौवनं चावयवेषु गलितं यातं, विद्या विनयादश्च गुणाः गुणज्ञैर्विना निष्फलतां गताः कालः बलिष्टः अक्षमी प्राणहरणार्थं सहसाऽभ्युपैति, अतः किं कर्तव्यं, किं युक्तं हा कष्टं,तथापिदमेकं तरणसाधनं ज्ञातं मदनान्तकस्य शम्भोः पादयुग्मं विहायान्याश्शरणं नास्ति अतस्तदेवाश्रयणीयम्।

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं
हस्ताङ्.गेषु गुणाश्च वन्ध्यफलतां यातागुणज्ञैर्विना ।
किं युक्तं सहसाऽभ्युपैति बलवान्कालः कृतान्तोऽक्षमी
हा ज्ञातं मदनान्तकाङ्.घ्रियुगळमुक्त्वाऽस्तिनान्यागतिः॥१०

**शिवप्रसादेन सुलभेन मोक्षमार्गः सम्पन्नो भवति।**करतलमेव भोजनभाजनं कुर्वतां स्वभावपरिपूतेन भैक्षेण सन्तुष्यतां यस्मिन् कस्मिन् प्रदेशे निषीदतां मुहुः प्रपञ्चे ईषदसमासं तृणं आकलयतां देहसम्बन्ध शून्यत्वभावेऽपि अखण्डोऽ परिच्छिन्नो परमानन्दो तस्यानुभवं स्पृशां जीवन्मुक्तत्वादि भाव योगिनां शिवप्रसादस्सुलभः कोऽप्यनिर्वाच्यः अथ्वा मोक्षमार्गः सम्पन्नो भवति।

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण सन्तुष्यतां
यत्र क्वाऽपि निषीततां बहुतृणं विश्वं मुहुःपश्यतां।
अत्यागेऽपि तनो रखण्डपरमानन्दावबोधस्पृशा
मथ्वाकोऽपि शिवप्रसादसुलभस्सम्पत्स्यते योगिनाम्॥११

**अहं परे ब्रह्मणि विदेहकैवल्यपर्यन्तंजीवन्मुक्तस्सन्नहं वर्ते इत्याशयः।**

हे! मातः! हे! मेदिनि! हे! तात मारुत! हे! सखे तेजः! हे! सुबन्धो जलः! हे! भ्रातर् व्योम! भवतां पञ्चतत्त्वानां एषः अन्त्यप्रणामाञ्जलिः निबद्धोऽस्ति युष्मत्सङ्.ग वशेन उपजातं यत्सुकृतं तेन विस्तारं स्फुरन्निर्मलं च यद्ज्ञानं तेन अपास्तः समस्त मोहमहिमा-पुत्रमित्रकलत्राभिनिवेशाज्ञानातिशयस्सन् अहं परे ब्रह्मणिलीये- सच्चिदानन्दस्वरूपिणि निर्विकारे निष्कलङ्.क निरञ्जने ब्रह्मणि विदेहकैवल्यपर्यन्तं

मा भूयोभज भङ्.गुरां भवरतिं चेत: प्रसीदाधुना॥७

**तपसः श्रेयो हेतुत्वात्तदाचरणयोग्यः।**अभिमाने भग्ने सति तथा धने च विनष्टे सति याचके निरर्थके वाञ्चतार्थ लाभाद्वैमुख्यं गते सति,पुत्रमित्रादिबन्धुजनसमूहे,क्षीणे अन्नाद्यलाभात्कृशे सति,भृत्यवर्गे अन्यत्रगते सति, शनै: तारुण्ये नष्टे गळिते सति, अनित्यत्वस्वाभाव्या त्सरस्मिन्विपन्ने सति,बुद्धिसम्पन्नानामिदमेव अत्यन्तमुचितम्।कस्मिंश्चित् जह्नुकन्यापय: पवित्रा:पाषाणा: हिमवद्गिरे: गुहबहि: स्थल्यां निकुञ्जोलतामण्डपे निवास: यदेत्युक्तमिति तस्यैव श्रेयस्साधन भूततपोयोग्यस्थलम्।

माने म्लायिनि खण्डिते च वसुनि व्यर्थं प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्वने ।
युक्तं केवलमेतदेव सुधियां यज्ज्ह्नुकन्यापय:
पूतग्रावगिरीन्द्रकन्दरतटे कुञ्जेनिवास: क्वचित्॥८

**चित्तस्य नित्यानित्यवस्तुविवेके सति रम्यमपि सर्वमरम्यमेव।**

चन्द्रकिरणा: रमणीया: शाद्वलप्राया वनमध्यभूमि: रम्या, सज्जनसहवासात्प्राप्तं यत्सुखं तदपि रम्यं,काव्येषूक्तप्रकारेषु कथा: उपाख्यानानि वा रम्या:,प्रणयकलहादिषु क्रोधवशादुत्पयेत्बाष्पबिन्धुभि: तरलं प्रियाया: मुखं रम्यं। अतस्सकलमपि मनोहरमेव किन्तु मनसि नित्यानित्यवस्तुविचारतत्परता उपगते सति किञ्चिदपि रम्यं नभवत्येव।रम्याश्चन्द्रमरीचय स्तृणवती रम्यावनान्तस्थली

रम्यं साधुसमागमागतसुखं काव्येषु रम्या: कथा ।

कोपोपाहितबाष्पबिन्दुतरळं रम्यं प्रिया या मुखं

सर्वं रम्यमनित्यतामुपगते चित्ते न किञ्चित्पुन ॥९

**शम्भोः पादयुग्मं विहायान्या शरणं नास्ति।**

जीवन्मुक्तस्सन्नहं वर्ते इत्याशयः।

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल!

भ्रातोर्व्योम निबद्ध एष भवतामन्यः प्रणामाञ्जलिः।

युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल

ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि॥१२

**उपसंहार**: उपरि निर्दिष्टानुसारेण भर्तृहरिः अस्मिन् वैराग्यशतके वेदान्तसिद्धान्तं स्पष्टयति। मनुष्यानां तेषां तृष्णाच्छेदमावश्यकं, ऐहिकास्थिरसांसारिकबन्धनानां प्रधानकारणं लोभः इति कथयति। तल्लोभादेव सर्वेजनाः स्वार्थाः धनिनश्च मदान्धो भवन्ति। तस्मात् लोभधनादिविषये जागरूकाः भवेयुः। सर्वे इहलोक अशाश्वत सुख सम्भन्धेन संल्ग्नाः भूत्वा कैवल्यं विस्मृत्य मनश्शान्तिं नष्टं प्राप्नुवन्ति। अतः सर्वेपरे ब्रह्मणिलीये- सच्चिदानन्दस्वरूपिणि निर्विकारे निष्कलङ्क निरञ्जने ब्रह्मणि विदेहकैवल्यपर्यन्तं जीवन्मुक्ताः भवेयुः इति कवेः आशयः।

**सन्दर्भः - भर्तृहरित्रिशति – वैराग्यशतकम्।**

**१.वैराग्यशतकम् - श्लोक संख्या- ०२. २.तदेव ”-०५. ३.तदेव –०७.**

**४.तदेव – ३१. ५.तदेव – ३५. ६.तदेव -५३.**

**७.तदेव – ६३. ८.तदेव – ७८. ९.तदेव – ७९.**

**१०.तदेव – ८३. ११.तदेव – ९०. १२.तदेव – १००.**

<u>उपयुक्तग्रन्थसूचिः</u> - सुभाशितरत्नावली – येनुगु लक्ष्मणकविः

जे.पि.पब्लिकेषनस्,विजयवाड.आन्द्रप्रदेशः

# अक्षरतत्त्वविवेकः

डा. प्रियव्रतमिश्रः
एसोसिएट् प्रोफेसर, व्याकरणविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

वाङ्मुखम् –

कोऽयमक्षरशब्दः यश्च श्रुतिस्मृतिपुराणादिषु बाहुल्येन श्रवणगोचरो बोभवीति ? इति विचिकित्सायां शब्दमर्यादया यदि परिशिशीलयिषामः तदा न क्षरतीति व्युत्पत्त्या क्षरसञ्चलने इत्यस्माद्धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"१ इत्यनेन पचादिगणस्याकृतिगणत्वात् अच्प्रत्ययेन अक्षर इति शब्दो निष्पद्यते अविचलः अक्षुण्ण इत्यर्थः । यद्वा अशु व्याप्तौ सङ्घाते च इत्यस्माद्धातोः "अशेः सरः" इत्युणादिसूत्रेण सर् प्रत्ययेन अक्षरशब्दः प्रतिपाद्यते व्याप्नोतीत्यर्थः । यौगिकार्थे इत्थं सम्पन्ने कस्मिन्नर्थे शब्दोऽयं प्रयुज्यते वाङ्मये इति विविदिषायां –

क्षराद्विरुद्धधर्मत्वादक्षरं ब्रह्म भण्यते । कार्यकारणरूपं तु नश्वरं क्षरमुच्यते ।।

यत्किञ्चिद्वस्तु लोकेऽस्मिन् वाचो गोचरतां गतम् । प्रमाणस्य च तत्सर्वमक्षरे प्रतिषिध्यते ॥

यदप्रबोधात् कार्पण्यं ब्राह्मण्यं यत्प्रबोधतः । तदक्षरं प्रबोद्धव्यं यथोक्तश्वरवर्त्मना ॥

इति स्मृतिवचनात् अक्षरशब्दः ब्रह्मणोऽपरपर्यायत्वेन प्रयुक्तः तच्च ब्रह्म अविनाशि निर्विशेषं प्रणवरूपमित्युच्यते । किञ्च-

*द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।*

*क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥*२

इति भगवद्गीतोक्तदिशा क्षरश्चाक्षरश्चेति द्वौ पुरुषौ लोके भवतः तत्र सर्वाणि भूतानि "क्षर" इति पदेन व्यपदिश्यन्ते ब्रह्मादिस्थावरं शरीरं कूटस्थम् अक्षर इत्युच्यते । श्रुतिस्मृतिषु ब्रह्मशब्दवत् "अक्षर" शब्दस्यापि बहुधा प्रयोगो दृश्यते । *अक्षरात् परतः परः* ३इत्यत्र अक्षरशब्दस्य प्रयोगः प्रधाने अव्याकृते वाऽव्यक्ते प्रधाने वर्त्तते । *यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः* ४इत्यत्र अक्षरशब्दस्य प्रयोगो जीवेश्वरनित्यमुक्ताऽक्षरब्रह्मादिषु दृश्यते । *योऽक्षरमन्तरे सञ्चरन् यस्याऽक्षरं शरीरं यमक्षरं न वेद* ५ इत्यत्राऽक्षरशब्दस्य प्रयोग अक्षरब्रह्मणः कृते वर्त्तते । *तदक्षरे परमे व्योमन्*६ , *तदाहुरक्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः* ७ इत्यत्राऽक्षरशब्दस्य प्रयोगो भगवतो दिव्याक्षरधाम्नः कृते कृतोऽस्ति । एवमक्षरशब्दस्य श्रुतिस्मृतिषु बहुविधः प्रयोगो दृश्यते ।

तथाऽयं सङ्ग्रहः – (१) प्राण्यप्राणिसाधारणविनाशसामान्याभाववाची

(२) आत्मा

(३) चिरकालस्थायी

(४) न क्षरतीति नित्यविभूतिः

(५) मुक्तानां स्थानभूतपरमाकाशः अर्थात् दिव्यं ब्रह्मधाम

(६) मूलप्रकृत्यवस्थाविशेषाः प्रधानाऽव्यक्ताऽव्याकृतादयः

(७) मोक्षः

(८) परं ब्रह्म

व्याकरणदर्शने अक्षरतत्त्वम् –

तत्र व्याकरणशास्त्रस्य द्वयी गतिः । प्रक्रियाप्रस्थानं दर्शनप्रस्थानञ्चेति । शब्दानां साध्वसाध्वविचारपूर्वकमन्वाख्यानं प्रक्रियापक्षे जायते । स एव शब्दः ब्रह्मरूपः परा-पश्यन्ती-मध्यमा-वैखरीवाग्भिः परामृश्यत इति दार्शनिकपक्षोऽस्य शास्त्रस्य । एवञ्च शब्दब्रह्मवादिनो वैयाकरणाः । तत्र वाग्घरिणा भर्तृहरिणा वाक्यपदीये आदावेव शब्दब्रह्मणः स्वरूपमाचक्षाणः प्रस्तूयते कारिकेयम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ ८इति

आद्यन्तरहितं शब्दब्रह्म तच्च शब्दतत्त्वं ब्रह्म अक्षराणां वर्णानां निमित्तत्वादक्षरमित्युच्यते, कार्यकारणयोरभेदोपचारात् । कथं ब्रह्मणोऽक्षराणां निमित्तत्वमिति चेदित्थम्- प्रत्येकचैतन्ये ज्ञानरूपे ऽन्तरविद्यया सन्निवेशिताः पदवाक्यरूपा वर्णाः परप्रत्ययनार्थं प्रयत्नेनाभिव्यज्यन्ते । सेयं वर्णव्यक्तिवर्णसङ्घातरूपा ब्रह्मरूपस्यात्मनोऽभिष्यन्द इत्युच्यते । एवं ब्रह्मोपादानिका वर्णव्यक्तिर्घटव्यक्तिरिव मृदुपादानिका । इत्थञ्च व्याकरणदर्शने अक्षरशब्दः शब्दब्रह्मणो विशेषणत्वेन प्रयुक्तो दृश्यते ।

**अक्षरपुरुषोत्तमदर्शने अक्षरतत्त्वम् -**

उपर्युक्तव्युत्पत्तिद्वयं (*न क्षरतीति, अश्नुते व्याप्नोतीति*) यदि सूक्ष्मेक्षिकया परिशीलयामः तदा अवयवार्थपौष्कल्यं यत्र सम्भवति तदेव यौगिकशब्देन स्वरसतः प्रतीयते । अत एव व्याप्नोतीत्यवयवशक्तिः मुख्यवृत्त्या त्रिविधपरिच्छेदरहिततयाऽसङ्कुचितव्यापनशीलं परब्रह्मपुरुषोत्तमनारायणमेव बोधयति ।

व्यापकशब्दस्य प्रधानपुरुषाऽक्षरब्रह्माऽक्षरमुक्तेषु प्रयोग उपचारेण । अक्षरादिषु स्वरूपतः स्वभावतश्च त्रिविधपरिच्छेदरहितव्यापकत्वं नास्ति । सर्वत्र व्यापनशीलत्वेऽपि अक्षरब्रह्मणः परब्रह्मणि व्यापकत्वं नैव सम्भवति । न क्षरतीत्यवयवशक्तिरसङ्कुचिततया सर्वथाऽक्षरणशीले भगवति नारायण एव वर्त्तते नान्येष्वक्षरादिषु । उक्तञ्च विष्णुसहस्रनामभाष्ये *अक्षरस्थैः मुक्तैः निरन्तरमनुभूयमानोऽपि मधूत्सवत् निःसीमगुणोन्मज्जनेन उपर्युपरि भोग्यतया उपचीयते* ९इति । सदाऽनुभूयमानोऽपि निःसीमगुणगौरवात् मुक्तैः क्वचिन्न क्षरतीत्यक्षरः परिकीर्त्तित इति विष्णुसहस्रनामनिर्वचनम् ।

*अतः येनाऽक्षरं पुरुषं वेद सत्य प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्१०* इति मुण्डकोपनिषदादिषु स्वरूपतो गुणतश्च सर्वथाऽक्षरणशीलत्वं भगवतो नारायणस्यैव प्रतिपाद्यते नत्वक्षरब्रह्मादीनाम् । यद्यप्यक्षरादीनां नित्यमक्षरणशीलत्वमस्ति तथापि तदक्षरत्वं परमात्माधीनं वर्त्तते । कदाचित् तत्र क्षरणस्य सम्भावना चापि वर्त्तते ।

कथयति भगवान् श्रीस्वामिनारायणो वचनामृतग्रन्थे अस्मत्सम्प्रदाये सद्गुरुमुक्तानन्दस्वामिसद्गुरुगोपालनन्दस्वामिनौ महान्तौ स्तः परन्तु यद्यतिशयमानसन्मानस्य योगः स्यात्, विपुलधनसम्पत्तेः पुष्कलसुवर्णमुद्रिकाणां योगः स्यात्, रूपवतीनां स्त्रीणाञ्च योगः स्यात् तदा एतयोः महत्त्यागपरायणसत्त्वेऽपि तादृश्युपमा स्थितिः कदाचिदचला भवेन्न वा भवेत् ? रमणीयेषु च पञ्चविषयेषु भगवान् नारायण एव निर्विकारः तिष्ठति । तथा चोक्तं भागवते *" ऋषिं नारायणमृते योषिन्मयेह मायया" ११*इति ।

सद्गुरुगोपालनन्दस्वामिप्रभृतीनां सतां महिमा श्रीस्वामिनारायणसम्प्रदाये सुप्रसिद्धोऽस्ति । ते तु भगवता श्रीस्वामिनारायणेन साकमेव अक्षरधामतो भुव्यवतीर्णाः । तेषां नित्यनिर्दोषत्वमविवादास्पदमचलञ्च तथापि विषमदेशकालादीनां तेषां हृदयेऽपि विकाराणामाविर्भावेन चाञ्चलस्य सम्भावना वर्त्तते किन्तु तादृशी सम्भावना भगवति नारायणे कथञ्चिदपि नास्ति । अतः सर्वथाऽक्षरणशीलत्वं भगवतः पुरुषोत्तमनारायणस्यैव ।

एवमेव श्रीमद्रामानुजाचार्यसद्गुरुमुक्तानन्दस्वामिसद्गुरुगोपालनन्दस्वामिप्रभृतिभिः सर्वैः पूर्वाचार्यैः श्रुतिस्मृतिब्रह्मसूत्रेषु वचनामृतग्रन्थे च सृष्टेः असाधारणकारणप्रकरणे ध्यानोपासनप्रकरणे कर्मफलप्रदातृत्वप्रकरणे च पठिता आत्मेश्वराऽक्षरब्रह्मेत्यादयः शब्दा मुख्यवृत्त्या परस्य ब्रह्मण एव वाचका नाऽक्षरादीनामिति सिद्धम् ।

तत्र ब्रह्मसूत्रभाष्यरत्ननामके ग्रन्थे अक्षराधिकरणे अक्षरमम्बरान्तधृतेः १२इति सूत्रव्याख्यानावसरे उच्यते-

श्रूयतेऽस्य विषयो बृहदारण्यके " एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वदीर्घमलोहितमस्नेहमच्छायम्१३ इत्यादि । अत्र अक्षरशब्दवाच्यस्त्रेधा संदिह्यते प्रणवो नारायणो वेति, प्रणवजीवयोरन्यतर एवाक्षरशब्दवाच्यः अक्षरशब्दस्य वर्णपर्यायित्वात् प्रणववाचकत्वमुचितम्;

"पुरुषोऽक्षरमुच्यते" इति पुरुषस्यापि तदभिधेयत्वमुक्तम्; अतस्तावेवाक्षरशब्दवाच्याविति प्राप्ते ब्रूमः, अत्राक्षरशब्दवाच्यं नारायणाख्यं परं ब्रह्मैव , कुतः ? अम्बरान्तधृतेः –

यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते, आकाशे एव तदोतं च प्रोतं च ।

इति सर्वविकाराधारतया निर्दिष्ट आकाशः कस्मिन्नोतश्चेति गार्ग्या पृष्टे "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" १४इत्यादिना "एतस्मिन् खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च" १५इत्यन्तेन याज्ञवल्क्यवचनेन निर्दिष्टस्याक्षरस्याम्बरान्तप्रपञ्चधृतिरवगम्यते । कथमेतदन्यत्र नारायणात् सम्भवति ? ननु

"दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।

लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः"॥१६

तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।

विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥१७

इति स्मृतिस्थाक्षरपदेनाम्बरान्तप्रपञ्चाधारकं ब्रह्मपुराख्यं परमात्मस्थानमक्षरब्रह्मैवोक्तम्; तदेवात्र प्रतीयते न परमात्मेति चेन्न;

"यस्याक्षरं शरीरम्" , "अक्षरमन्तरो यमयति" १८इति,

"अक्षरात्परतः परः" १९इति,

"आकाशशरीरं ब्रह्म"२० इति

"एष सर्वभूतान्तरात्मा"२१

इत्यादिभिरक्षराख्यचिदम्बरान्तसर्वनियन्तृतया तद्व्यापकतया च सर्वात्मतया च नारायण एवाभिहितः । एतस्मिन्नक्षरेऽक्षरशब्दाभिधेये परब्रह्मणि नारायणे हे गार्गि आकाशश्चिदम्बराख्यमक्षरं ब्रह्म ओतः प्रोतश्चेत्युक्तम् । अतः स एवाक्षरशब्दाभिधेयः ।

## स्वामिनारायणसिद्धान्तसुधानुसारेण अक्षरतत्त्वम् –

अक्षरं ब्रह्म परब्रह्मणो भिन्नं परब्रह्मैव नित्यमेकं त्रिगुणातीतं चेतनं च तत्त्वम् । तत् सदा दिव्यमनन्तकल्याणमयगुणैर्युक्तं मायिकगुणैश्च रहितं सदा निर्दोषम् । अस्य चाऽक्षरब्रह्मणः स्वरूपगुणैश्वर्यादिकमेकमात्रपरब्रह्माऽधीनमेव । परब्रह्मणश्च नित्येच्छया तज्जडचिदात्मकसकलसृष्टेः कारणमाधारं व्यापकं नियामकं शरीरि च । एतदक्षरं ब्रह्म तत्त्वत एकमेव सदपि चतुर्भी रूपैर्विभिन्नसेवारूपं करोति कार्यम् । अक्षरब्रह्म चिदाकाशरूपेणानन्तकोटिब्रह्माण्डानाम् अन्तर्बहिश्च व्याप्यावतिष्ठते धरति च तानिति । अक्षरब्रह्म धामरूपेण परब्रह्मणस्तत्सेवायामवस्थितस्य मूर्त्तिमतोऽक्षरब्रह्मणस्तथानन्तकोट्यक्षरमुक्तानां दिव्यं निवासस्थानम् । एतदक्षरधामैकमेव नित्यं सदा त्रिगुणातीतं च । अक्षरब्रह्मसाधर्म्यमाप्ता मुक्ता एव शक्नुवन्ति तस्मिन् प्रवेष्टुमिति

। अक्षरं ब्रह्म सेवकरूपेण तस्मिन्नेवाक्षरधाम्नि परब्रह्मेवैव दिव्यद्विभुजादिसर्वाङ्गसम्पूर्णपुरुषाकारेण सदैव परब्रह्मणः सेवायामक्षरमुक्तानामादर्शरूपेण रममाणमवतिष्ठत इति।

पुनस्तदेवाक्षरं संसारे बद्धान् जीवानीश्वरांश्च स्वदिव्यप्रसङ्गेन ब्रह्मरूपान् कृत्वा परब्रह्मोत्तमनिर्विकल्पनिश्चयं कारयितुं तदात्यान्तिककल्याणाय कारयितुं च सदैव परमात्मप्राकट्यानुभूतिं परब्रह्मणः सम्यगखण्डं च धारकेण गुरुरूपेण तत्तद्ब्रह्माण्डेषु परमात्मना साकं मनुष्यरूपं धृत्वावतरति रक्षति सम्प्रदायपरम्पराम् अनुभावयति च सर्वान् परमसुखम् । अक्षरब्रह्मस्वरूपाणां गुणातीतगुरूणां परम्परायामस्यां गुणातीतानन्दस्वामिमहाराजो भगतजीमहाराजः शास्त्रिजीमहाराजस्तथा योगिजीमहाराजः प्रकटिताः। परम्परा चेयमखण्डिततया प्रचलत्येव । एकस्मिन् काले एतादृशैकनैव गुरुणाऽऽत्यन्तिककल्याणमार्गः प्रचलितो वर्त्तत इति ।

परब्रह्मणाक्षरब्रह्मोद्धोषः –

साक्षात्परब्रह्म पुरुषोत्तम एव स्वोपदेशेषु ध्रुवं मुहुश्च स्वरूपतः स्वभिन्नतयाऽक्षरब्रह्मेत्याख्यं सुधानिभं दिव्यतत्त्वं सस्मार । यथा "पुरुषोत्तमो भगवान्, अक्षरब्रह्म, माया, ईश्वर जीवश्चेति पञ्च भेदाः अनादयः (वच.ग.प्र.७ वच.ग. अ १०) इति नित्यसत्यभेदवद्वस्तुविवरणावसरे "यो ब्रह्मरूपो भवति तस्यैव पुरुषोत्तमस्य भक्तावधिकारोऽस्ति । अतो ब्रह्मरूपो भूत्वा यः परब्रह्मभक्तिं न करोति तदा सोऽप्यात्यन्तिककल्याणं न प्राप्त इत्युच्यते (वच.लो.७) " स्वजीवात्मानं तेन ब्रह्मणा सहैकीकृत्य परब्रह्मणो स्वामिसेवकभावेनोपासनं कर्त्तव्यम् (वच.ग.म.३) इति परब्रह्मभक्त्यधिकारितातदुपासनाद्युपदेशावसरे " यच्च वर्त्ततेऽक्षरं ब्रह्म तत्तु भगवतो निवासधामास्ति (वच.प.१) इति भगवन्निवसनदेशनिदर्शनावसरे " स्वात्मनश्च दर्शनं ब्रह्मरूपेण भवति । तस्मिंश्च ब्रह्मणि परब्रह्मनारायणस्यापि दर्शनं भवति (वच.ग.म६२) इत्यात्मनिष्ठालक्षणावसरे "अक्षरब्रह्मसाधर्म्यं प्राप्य केवलं भगवन्मूर्त्तावेव निमग्नो भवति । स निर्विकल्पसमाधिमान् इत्युच्यते (वच.ग.प्र.४०) इति निर्विकल्पसमाधिव्याख्यानावसरे "अष्टावरणयुक्तकोटिकोटिब्रह्माण्डानि यदक्षरेऽणुवत् भासन्ते तादृशं यत् पुरुषोत्तमनारायणस्य धामरूपमक्षरं तद्रूपेण स्वयं तिष्ठन् पुरुषोत्तममुपासीत, स उत्तमनिर्विकल्पनिश्चयवान् इति कथ्यते (वच.लो.१२) इत्युत्तमनिर्विकल्पनिश्चयवल्लक्षणावसरे "अक्षरातीतः श्रीपुरुषोत्तमो भगवान् सृष्टिसमयेऽक्षरसम्मुखं दृष्टिपातं करोति (वच.ग.प्र.४१) इति सृष्टिप्रक्रियोपस्थापनावसरे "यदा ब्रह्माण्डप्रलयो भवति तदा प्रकृतिकार्यभूतचतुर्विंशतितत्त्वादिसर्वं प्रकृतौ लीयते । तथा च प्रकृतिपुरुषोऽप्यक्षरस्तेजस्यदृश्यो भवतीति प्रलयावस्थानिरूपणावसरे ज्ञानी तु ब्रह्मस्वरूपेण वर्त्तते । जानाति च यथार्थतया भगवन्महिमानमतस्तस्य भगवत्स्वरूपं विना न कापि कामना (वच.ग.प्र.५६) इत्यात्मनिष्ठाज्ञानीत्यादिलक्षणावसरे "यस्य प्रकृतिपुरुषयोः सूर्यचन्द्रादिसर्वदेवतानां च प्रेरकं तदक्षरस्याऽन्वयस्वरूपमिति ज्ञेयम् । यस्मिन् स्वरूपे च प्रकृत्यादिर्न कोऽप्युपाधिर्वर्त्तते, एकः पुरुषोत्तमो भगवान् एवावतिष्ठते तदक्षरस्य व्यतिरेकं स्वरूपमित्यादिजगत्कारणाधारादिप्रदर्शनावसरे " भगवान् जीवानां कल्याणार्थं यदा मूर्त्तिं धारयति तदा स्वाक्षरधाम्ना चैतन्यमूर्त्तिपार्षदैः स्वकीयसर्वैश्वर्यैश्च सहित एव समागच्छति । अतो भगवद्भक्तो भगवत्स्वरूपमक्षरधामसहितं पृथिव्यां विराजमानं वर्त्तत इति विजानीयाद् अन्येषामग्रेऽप्येवमेव विज्ञापयेच्च वार्त्ताम् (वच.ग.प्र.७१) इत्यादिज्ञातव्यज्ञापितव्यवार्त्तोपदेशावसरे चेत्यादि । एवमेव

पुनर्योगयज्ञज्ञानयज्ञप्रकारादिप्रतिपादने (वच.ग.म.८) परमात्मसुखनिरूपणे (वच.प.१) ब्रह्मज्ञानप्रकाशने (वच.ग.म.३)चेत्यादिसकलेष्वपि साधनानां सिद्धदशानां चोपदेशे समुपस्थापयामासैवाक्षरं ब्रह्म ।

**तथा च सङ्ग्रहः –**

वेदवेदान्तशास्त्रेषु प्रच्छन्नं गूढमक्षरम् ।

प्रथममुज्जुघोषात्र स्वामिनारायणो भुवि ॥ ६०॥

सन्दर्भाः -


१. पा.अ. ३-१-१३४
२. भ.गी.१५/१६
३. मु.उ.२-१-२
४. भ.गी.१५/१८
५. सु.उ.६
६. तै.ना.उ.१/२
७. भा.पु.३/११/४१
८. वा.प.ब्र.१
९. वि.स.भा.७७
१०. मु.उ.१/२/१३
११. भा.पु.३/३१/३७
१२. ब्र.सू.१/३/९
१३. बृ.५/८/७
१४. बृ.५/८/७
१५. बृ.५/८/१०
१६. भा.३-११.४०
१७. भा.३.११.४१
१८. सुबा.उ.७
१९. मु.उ.२.१.२
२०. तै.शि.६-२
२१. सुबा.उ ७/मु.२-१-२

परामृष्टाः ग्रन्थाः –

१. श्रीमद्भगवद्गीता
२. ब्रह्मसूत्रम्
३. वाक्यपदीयम्
४. ब्रह्मसूत्रभाष्यरत्नम्
५. वचनामृतभूमिका
६. स्वामिनारायणसिद्धान्तसुधा

# सायणाचार्यस्यअथर्वसंहिताव्याख्यानविधेःसमीक्षणम्

डॉ. सपन कुमार पण्डा
सहाचार्यः, विभागाध्यक्षश्च वेदविभागः,
शासकीयसंस्कृतमहाविद्यालयः,
भितरी, जि-सीधी( मध्यप्रदेशः)

ऋगादिषु चतुर्षु वेदेषु अथर्ववेदः अन्यतमः। लौकिकमङ्गलाय अर्व्यते – प्रस्तूयते इत्यर्थे अर्व गतौधातोः अथर्वशब्दः निष्पन्नः।ऐहिकामुष्मिकसफल-पुरूषार्थपरिज्ञानोपायभूतोऽयम् अथर्ववेदः। तल्लिख्यते सायणाचार्यैः अथर्ववेद-संहिताभाष्योपक्रमे -

**व्याख्यायवेदत्रितयं आमुष्मिकफलप्रदम्।**
**ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति[1]॥**

अस्य अथर्ववेदस्य पैपलादस्तौदाः मौदाः शौनकीया जाजला जलदा ब्रह्मवेदा देवदर्शश्चारणवैद्याश्चेतिनवभेदाः भवन्ति। मन्त्रब्राह्मणयोर्वेदनामधेयम्[2] इति आपस्तम्बसूत्रानुसारं वेदस्य मन्त्रभागः ब्राह्मणभागश्चेति द्वौ भागौ स्तः। मन्त्रभागस्य संहिताभाग इति संज्ञा प्रतिवेदशाखानुसारं भिन्नाः भिन्नाः संहिताग्रन्थाः निर्दिष्टाः सन्ति। तेषु संहिताग्रन्थेषु अन्यतमः अथर्ववेदीया शौनकसंहिता।तस्याः संस्कृतव्याख्या सायणाचार्येण कृता वर्तते। सायणाचार्यस्य व्याख्याने न केवलं यागप्रयोगाः अपितु कृषि-चिकित्सा-सकुन-अभिचार-ज्योतिष-वेदान्तादिशास्त्राणि तथा युद्धराष्ट्ररक्षासंग्रामजयादि सहित विभिन्नवैज्ञानिकप्रयोगाः समुपलभ्यन्ते । सायणेन अस्याः अनुवाकसूक्तऋगादीनां सविनियोगं व्याख्यानं गोपथब्राह्मणानुसारेण कौशिक-वैतान-नक्षत्रकल्प-

1 अथर्ववेदभाष्यभूमिका, श्लो. 10

2 आपस्तम्बश्रौतसूत्रम् 24.1.31

अङ्गिरसकल्प-शान्तिकल्पाख्यैः पञ्चभिः सूत्रग्रन्थैः संपादितः। अथर्ववेदीयसूत्रगन्थानां विषये उच्यते कल्पसूत्रा-धिकरणे-

**नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः।**
**तुर्य आङ्गिरसः कल्पः शान्तिकल्पस्तु पञ्चमः॥**

इति।

**(आपस्तम्बश्रौतसूत्रम्- )**

सायणाचार्यस्य व्याख्याने न केवलं यागप्रयोगाः अपितु कृषिचिकित्सा – शकुन- अभिचार - युद्ध-राष्ट्ररक्षादि सहित विभिन्न वैज्ञानिकप्रयोगाः समुपलभ्यन्ते। यथा –प्रथमकाण्डस्य विद्मा शरस्य पितरं इतिद्वितीयं सूक्तम्। अस्य त्रिधा विनियोग: सायणेन स्वव्याख्याने विहितः। अस्य सूक्तस्य उपाकर्मणि जपे विनियोग: इति गृह्यप्रयोगः। संग्रामजयकर्मणि विनियोगः इति राष्ट्ररक्षाप्रयोगः। तथा ज्वरातिसारतिसाराति-मूत्रनाडीव्रणेषुतदुपशमनाय विनियोगः इति चिकित्साविज्ञानसंम्बन्धि प्रयोगः। इत्थं नैके विधयः सायणाचार्यस्य अथर्वसंहिताव्याख्याने प्राप्यन्ते। येषां समीक्षा संगोष्ठ्यां मया क्रियते।

सायणस्य अथर्वसंहिताव्याख्याने इमे पञ्चसंख्यकाः सूत्रग्रन्थेषु विहितविधयः विनियुक्ताः भवन्ति । यस्य अध्ययनेन लोके सामान्यजनेषु संहिताविषये केवलकर्मकाण्डयज्ञयागादिप्रयोगाः इति या मिथ्याभावना विद्यते सा अवश्यं नश्यति इति मे मतिः । तस्मादत्र संक्षेपेण विनियोगविधाने मूलोपजीव्यमानानां पञ्चानां सूत्रग्रन्थानां प्रतिपाद्यविषयान् प्रस्तूयते ।

**(1) कौशिकसूत्रम् –**

संहितामन्त्राणां साकल्येन शान्तिपौष्टिकादि कर्मसु विनियोगविधानात् कौशिकसूत्रस्य संहिताविधिरिति संज्ञा । तथा च इतरैः सूत्रैरुपजीव्यत्वात् इदं प्रधानं च । बहुषु सूत्रग्रन्थेषु विप्रकीर्णत्वेन प्रतिपादितानि अथर्ववेदीयकर्माणि सुखावबोधाय अस्मिन् सूत्रग्रन्थे संगृहीतानि । कौशिकसूत्रे तावत् मेधाजननानि, ग्रामनगरदुर्गराष्ट्रादिलाभार्थानि, पुत्रपशुधनधान्यप्रजास्त्रीतुरगरथान्दोलिकादि-सर्वसंपत्साधकानि तथा च जनानाम् ऐकमत्यसम्पादकानि सामनस्यानि कर्माणि प्रतिपादितानि । ततः विविधराजकर्माणि यथा- शत्रुहस्तित्रासनानि, संग्रामजयसाधकानि तथा राष्ट्रसमृद्धये विभिन्नरोगनिवारणोपायाः, कृषिसमृद्धिः, पशुसमृद्धिसहित सप्तपाकसंस्थाः प्रतिपाद्यन्ते ।

**(2) वैतानसूत्रम् –**

वैतानसूत्रे दर्शपूर्णमासादिषु अयनान्तेषु वेदत्रयविहितकर्मसु ब्रह्मा-ब्राह्मणच्छंसी-आग्नीध्रः-पोतेति चतुर्णां ब्रह्मगणस्थानाम् ऋत्विजां कर्तव्यं प्रतिपाद्यते। तत्र यथा अनुज्ञानुमन्त्रणादीनि ब्रह्मणः, शस्त्रादीनि ब्राह्मणाच्छंसिनः, आग्नीध्रस्य अन्वाहार्यश्रपणप्रस्थितयाज्यादीनि, पोतुः प्रस्थितयाज्यादीनि इति कर्मविभागः । तत्र प्रामुख्येन क्रमशः दर्शपूर्णमासौ, अग्न्याधानम्, अग्निहोत्रम्, आग्रयणेष्टिः, चातुर्मास्यानि सप्तसंस्थाकसोमयागः, अग्निचयनम्, सौत्रामण्यादिश्रौतयागाः प्रतिपादितास्सन्ति ।

**(3) नक्षत्रकल्पः –**

नक्षत्रकल्पे कृत्तिकादिनक्षत्रपूजाहोमादि, अद्भुतमहाशान्तिः, नैर्ऋतकर्म तथा विभिन्नग्रहहोमाश्च प्रतिपाद्यन्ते ।

**(4) आङ्गिरसकल्पः** –

आङ्गिरसकल्पे आभिचारिककर्माणि प्रतिपाद्यन्ते । तत्र अभिचारिककर्मणां नाम श्रवणे सामान्यतः लोके मारणमोहनसम्मोहनवशीकरणोच्चाटनादिकर्माणि अन्यस्य अनिष्टसाधयितुमेव उपदिष्टानि इति स्वाभाविकी प्रवृत्तिः उदेति । परन्तु प्रकृतौ वेदे एतानि कर्माणि स्वात्मरक्षार्थं खलप्रवृत्तिसम्पन्नजनान् नियन्त्रयितुमेव उपदिष्टानि । तत्रादौ आभिचारिककर्मादौ कर्तृकारयितृसदस्यानां स्वात्मरक्षा-करणम्। अभिचारोपयुक्त-देशकालमण्डपकर्तृकारयितृदीक्षादिधर्मसमिदाज्यादि-सम्भारनिरूपणादिकम् । ततः आभिचारिककर्माणि, परकृताभिचारनिवारणादीन्य-न्यान्यपि कर्माणि उपदिश्यन्ते ।

**(5) शान्तिकल्पः** –

शान्तिकल्पे विविधशान्तिपौष्टिककर्माणि विधीयन्ते ।

अत्रेदानीं सायणाचार्यकृतव्याख्यानविधिं सोदाहरणं परिशीलयामः । यथा- प्रथमकाण्डस्य “ये त्रिषप्ताः[3]” इति प्रथमं सूक्तम् । अस्य सूक्तस्य विनियोगः व्याख्यानञ्च मेधाकामः, सर्वसंपत्कामस्तथा शत्रुहस्तित्रासनादि विविधकर्मसु विहितः। तद्यथा- उपनयनदिवसे मेधाकामस्य ब्रह्मचारिणः अनेन सूक्तेन आज्यहोमः कर्तव्यः । तथा सर्वसंपत्कर्मसु अनेन सूक्तेन उदुम्बरपलाशकर्कन्धूस-

3 अथर्ववेदसंहिता- 1.1

मिदाधानम्, व्रीहियवतिलानाम् आवपनम्, क्षीरौदनपुरोडाशरसानां भक्षणञ्चेत्येतानि मेधाजननोक्तानि अहनि कालत्रये अग्निप्रज्वालनं तदुपस्थानञ्च सव्यात् पाणिमध्यात् रुधिरस्य दधिघृतमधूदकमिश्रितस्य संपाताभिमन्त्रितस्य प्राशनम्, पृश्निमन्थप्राशनम् इत्येतानि कर्माणि अनेनैव सूक्तेन सर्वसंपत्कामः कुर्यात् । तथा वर्चस्यकर्माणि वर्चस्कामः अनेन सूक्तेन अग्न्युपस्थानं कार्यम् । शत्रुहस्तित्रासनकर्मण्यपि अनेनैव सूक्तेन संग्रामजयकामो राजा संपातोपेतस्थचक्रस्य शत्रुहस्त्यभिमुखं प्रवर्तयेत्, स्वकीयानि हस्त्यश्वादियानानि शत्रुगजाभिमुखं प्रेरयेत् । अत्र सायणाचार्यस्य व्याख्यानम् अध्ययनार्हः वर्तते, यतोहि यथा सायणाचार्यस्य व्याख्यानं तात्विकं सुस्पष्टञ्च विद्यते तथा इतरव्याख्याकाराणां व्याख्याने न दृश्यते । उदाहरणार्थम् अत्र "ये त्रिषप्ताः" इति सूक्तस्य प्रथममन्त्रं पश्यामः । तद्यथा –

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे[4] ।।

व्याख्यार्थः – अत्र पृथिव्यादयस्त्रयः लोकाः, तेषाम् अधिष्ठातारः अग्निवाय्वादित्याः, सत्त्वरजस्तमोगुणाः, ब्रह्मविष्णुमहेश्वराः इत्येवमाद्यास्त्रिसंख्याकाः ये सन्ति ते सर्वे अत्र त्रिशब्देन विवक्षिताः । तथा सप्त ऋषयः । सप्त ग्रहाः । सप्त मरुद्गणाः। सप्त लोकाः । सप्त छन्दांसि इत्याद्या ये सप्तसंख्याकाः सन्ति ते सर्वे अत्र सप्तशब्देन अभिमताः । अथवा- त्रिः सप्त त्रिसप्ताः । त्रिरावृत्तसप्तसंख्यायुक्ता इत्यर्थः

4 अथर्ववेदसंहिता- 1.1.1

। ते च एवं द्रष्टव्याः प्रसिद्धसूर्याधिष्ठितप्राचीदिग्व्यतिरिक्ता आरोगादिभिः सप्तभिः सूर्यैरधिष्ठिताः सप्तदिशः[5] । श्रुत्यन्तरप्रसिद्धा विवस्वद्व्यतिरिक्ताः सप्त आदित्या वा[6] । यद्वा सप्त सिन्धवः सप्त लोकाः सप्त दिशः इत्येवं त्रिसप्ताः[7]। सप्त ग्रहाः सप्त ऋषयः सप्त मरुद्गणा इति वा त्रिसप्ताः[8] । अथवा त्रिगुणिता सप्तसंख्या येष्विति वहुब्रीहिव्युत्पत्त्या एकविंशतिसंख्या इत्यर्थः । ते च "द्वादश मासाः पञ्चऋतवस्त्रय इमे लोका असावादित्य एकविंशः"[9] इति प्रसिद्धाः गृह्यन्ते । विकल्पे शरीरारम्भकाणि पञ्च महाभूतानि पञ्च प्राणाः पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तःकरणं चेति एकविंशतिसंख्याकाः ज्ञेयाः ।

एवम् उक्तलक्षणास्त्रिसप्तसंख्या ये देवाः जगदनुग्रहार्थं विश्वानि रूपाणि धारयन्तः प्रतिदिनं प्रतिवत्सरं प्रतिकल्पं प्रतिशरीरं पर्यावर्तन्ते । अथवा रूप्यन्त इति रूपाणि चेतनाचेतनात्मकानि वस्तूनि अभिमतफलप्रदानेन पोषयन्तः वेदात्मिकायाः वाचः पतिः प्रागुक्तानां त्रिसप्तानां देवानां बलेन तत्तदसाधारण-सामर्थ्यानि श्रुतधारणादीनि (मे) मम मेधादितत्तद्फलार्थिनः (अद्य) इदानीं मेधाजननादितत्तद्कर्मकाले मयि विदधातु ।

---

5 आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः । तै.आ. 1.7.1

6 मित्रश्च वरुणश्च । धाता चार्यमा च । अंशश्च भगश्च । इन्द्रश्च विवस्वाश्चेत्येते । तै.आ. 1.13.

7 सप्त दिशो नानासूर्याः सप्त होतारः ऋत्विजः । देवा आदित्या ये सप्त । ऋ. 9.114.3

8 यः सप्त सिन्धून् अदधात् पृथिव्याम् । यः सप्त लोकान् अकृणोद् दिशश्च । तै.ब्रा. 2.8.3.8

9 तै. सं. 7.3.10.5

तत्र सायणाचार्यस्य अथर्वसंहिताव्याख्याने न केवलं मेधासर्वसंपत्संग्राम-जयकामादीनां विषये अपि तु ज्योतिषवेदान्तादिशास्त्रीयतत्त्वान्यप्युपलभ्यन्ते । यथा "वेनस्तत् पश्यत्"[10] इति सूक्तेन अभिमन्त्र्य अभिमतकार्यं मनसि सञ्चिन्त्य समे देशे ऊर्ध्वं धारयेत् । यदि दण्डादयश्चिन्तितदिशि निपतेयुः तदा कार्यसिद्धिं जानीयात् विपर्यये तु असिद्धम् । तद्वदेव इषु संधाय अनेन सूक्तेन अभिमन्त्र्य विसृजेत् । निर्द्दिष्टलक्ष्यपतनेन कार्यसिद्धिः । तथैव दर्भस्तम्भम् अनेन सूक्तेन अभिमन्त्र्य कार्यं विचिन्त्य गणयेत् । यदि समसंख्या सम्पद्येत तर्हि कार्यसिद्धिः। एवं हस्तयोरङ्गुलिद्वयम् अनेन सूक्तेन अभिमन्त्र्य आसाम् अन्यतमां गृहाणेति कुमारीं ब्रूयात् । तत्र आकृतिलोष्टवल्मीकलोष्टयोः स्पर्शने कल्याणं भवति । चतुष्पथलोष्टस्पर्शनेन बहुचारीणी भविष्यति, श्मशानलोष्टस्पर्शनेन मरिष्यतीति जानीयात् । तथा कुमार्या अञ्जलौ उदकम् आपूर्य अभिमन्त्र्य प्रक्षिप इति तां ब्रूयात्। यदि प्राचीं दिशं प्रति सा निनयेत् तदा कल्याणं प्रतीयात् । एतादृशाः ज्योतिषशास्त्रीयविषयाः सायणेन अथर्वसंहिताव्याख्याने स्पष्टीकृता वर्तते । न केवलमत्र अस्मिन् सूक्ते ज्योतिषशास्त्रीयविषयाः अपि च प्रत्येकं मन्त्रे वेदान्तप्रतिपाद्यब्रह्मतत्त्वविचारोऽपि स्पष्टं समुपलभ्यते । तदत्र किञ्चिदालोच्यते । यथा – प्रथममन्त्रः –

**वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येकरूपम् ।**

10 अथर्ववेदसंहिता- 2.1

इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः[11] ।।

मन्त्रार्थः – वेनतेः कान्तिकर्मसु पाठात् अत्र दीप्यमान आदित्यो वेनः इत्युच्यते। अर्थात् गुहारूपे सर्वप्राणीनां हृदये यत् श्रुत्यन्तरप्रसिद्धं सत्यज्ञानादिलक्षणं परमं ब्रह्म वर्तते, तथा यस्मिन् अधिष्ठानरूपे ब्रह्मणि विश्वं कृत्स्नं जगत् एकरूपं एकाकारं भवति। तल्लक्षणं ब्रह्म वेनः अपश्यत् , आदित्यः साक्षात्कृतवान् इत्यर्थः । पृश्निः दिवश्च आदित्यस्य च साधारणनामैतत् । जायमानाः पृश्नेरुत्पद्यमानाः स्वर्विदः सुखस्य लम्भयित्रीः (व्राः) संभज्यमानाः स्वीक्रियमाणा अपः सर्वे जना अभ्यनूषत अभिष्टुवन्ति वा एवं उक्तलक्षणः सर्वज्ञः आदित्यः शुभाशुभविज्ञानं करोतु इति प्रार्थ्यते ।

द्वितीयमन्त्रः भवति –

प्र तद् वोचेद् अमृतस्य विद्वान् गन्धर्वो धाम परमं गुहा यत् ।

त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुष्पितासत्[12] ।।

अमृतस्य अविनाशिनो ब्रह्मणो विद्वान् जानन् हे गन्धर्व! आदित्य! तत् उक्तलक्षणं ब्रह्म उपासकेभ्यः प्रब्रवीतु । तत्र गावो रश्मयः तान् धारयतीति गन्धर्वः। किं तद् ब्रह्म इति तदाह- गुहायां हृद्रूपायां स्थितं यत् ब्रह्मणः तत्त्वं तद् प्रब्रवीतु, यस्य ब्रह्मणः त्रीणि पदानि गुहायां निहितानि । यद्यपि अत्र निरूपाधिकस्य ब्रह्मणः निरवयवत्वात्

---

11 अथर्ववेदसंहिता- 2.1.1

12 तत्रैव- 2.1.2

पादकल्पना नोपपद्यते तथापि भूतभौतिकप्रपञ्चजातान् तदुपादानस्य आत्मनो निरतिशयमहत्त्वं प्रतिपादयितुं त्रिपदत्वम् उक्तम् इति अविरोधः । यथा च्छान्दोग्ये- "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि"[13] इति । यद्वा अस्य पूर्वोक्तस्य परब्रह्मणः त्रीणि पदानि । पद्यन्ते गमन्ते मुमुक्षुभिः प्राप्यन्त इति पदशब्देन अंशीभूता हिरण्यगर्भेश्वरा उच्यन्ते । गुहा गूहयति संवृणोति परिच्छिन्नति परमात्मनम् इति गुहा माया, तत्र निहितानि समष्टिरूपेण उपहितानि । यः शमदमादिसम्पन्नोऽधिकारी तानि पादत्रयोपलक्षितं ब्रह्म वेद जीवेश्वरोपाधिपरित्यागेन साक्षात् करोति सः विद्वान् पितुः स्वजनकस्यापि पिता कारणभूतः भवति । तद् उक्तं सामब्रह्मणे "शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृत् आसीत् स पितृन् पुत्रका इत्यामन्त्रयत"[14]।

तृतीयमन्त्रः भवति –

**स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा ।**

**यो देवानां नामधा एक एव तं संप्रश्नं भुवना सन्ति सर्वा[15] ।।**

मन्त्रार्थः – अर्थात् सः सूर्यात्मकः परमात्मा अस्माकं पिता पालयिता, न केवलं पालकः किन्तु जनयिता उत्पादकोऽपि । अपि च स एक आदित्यः एव भ्रात्रादिरूपो बन्धुवर्गः । तस्यैव आदित्यस्य सर्वज्ञतामत्र प्रतिपाद्यते यत्- धामानि कर्मफलभूतस्वर्गादिस्थानानि विश्वानि

13 छान्दोग्योपनिषत् – 3.12.6

14 ताण्ड्यब्राह्मणम् – 13.3.14

15 अथर्ववेदसंहिता- 2.1.3

सर्वाणि भूतजातानि कृत्स्नप्रपञ्चं स्वाभिन्नं जानातीत्यर्थ। तथा यः उक्तः परमात्मा एक एव देवानां इन्द्रादीनां स्वसृष्टानां इन्द्रमित्रादीनि नामानि दधाति विदधाति करोतीति नामधाः । अथवा इन्द्राग्न्यादिदेवतात्मकः सन् तत्तन्नामानि स्वयमेव धत्ते इति नामधाः । तम् उक्तलक्षणम् आत्मानं विषयीकृत्य सर्वाणि भूतजातानि किं विधोऽयमात्मा इति संप्रश्नं कुर्वन्ति । तत् गुरुशास्त्रोपदेशतस्तमेव परमात्मानं यन्ति, तदैक्यं लभन्त इत्यर्थः ।

चतुर्थमन्त्रः –

**परि द्यावापृथिवी सद्य आयमुपतिष्ठे प्रथमजामृतस्य ।**

**वाचामिव वक्तरि भुवनेष्ठा धास्युरेष नन्वेषो अग्निः[16] ।।**

मन्त्रार्थः – ज्ञानोत्तरकालं तत्त्वविद् ब्रूते- द्यौश्च पृथिवी च द्यावापृथिव्यौ । द्यावापृथिव्युपलक्षितं कृत्स्नं जगत् (सद्यः) तत्त्वज्ञानसमकालमेव परितः प्राप्तवान् अस्मि । (ऋतस्य) सत्याद् ब्रह्मणः (प्रथमजाः) भूतभौतिकप्रपञ्चजातात् पूर्वमुत्पन्नः सूत्रात्मा उपतिष्ठेत्, यथा- समष्टिरूपेण कृत्स्नं जगत् व्याप्य अवतिष्ठते तद्वद् अहमस्मीति । सद्यः प्राप्तिं दृष्टान्तेन उपपादयति । यथा- प्रयोक्तरिस्थितां वाचं निकटस्थिता बोद्धारो यथा प्रयोगसमकाल एव अवगच्छति तद्वत् एष परमात्मा (धास्युः) पोषणेच्छावान् पोषणाद्धेतोः प्रतिभूतेषु वर्तते । निष्क्रियस्य सतः कथं पोषकत्वं भोक्तृत्वं चेति तत्रोच्यते- एषः परमात्मा अग्निरिव वैश्वनरात्मनो पोषको भोक्ता खलु तद्वत् ।

अन्तिममन्त्रः भवति –

---

16 अथर्ववेदसंहिता- 2.1.4

**परि विश्वा भुवनान्यायमृतस्य तन्तुं विततं दृशे कम् ।**
**यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त**[17] ।।

मन्त्रार्थः – ब्रह्म विश्वानि पृथिव्यादीन् कर्मफलभूतान् लोकान् ज्ञानोत्पत्तेः प्राक् खलु परितः प्राप्तवत् । परितो गमनस्य प्रयोजनमाह- सत्यस्य ब्रह्मणः पटस्य तन्तुवत् जगतः कारणभूतं व्याप्तं स्वरूपं द्रष्टुम् ऋतस्य पुण्यापुण्यलक्षणकर्मणः कारणभूतं तन्तुवद् बन्धनहेतुं मूलज्ञानम् अनादित्वेन विस्तीर्णम् । द्रष्टव्यं ब्रह्मैव प्रतिपाद्यते- यस्मिन् ब्रह्मणि इन्द्राद्या देवाः अविनश्वरं परमानन्दम् अश्नुवानाः एकस्मिन्नेव कारणभूते ब्रह्मणि स्वात्मानम् एकीभूतत्वेन स्वानुभवम् आविष्करोति । यत्र ब्रह्मणि मनोवृत्तिभिः साक्षात्कृते अनश्वरनिरतिशयानन्दं प्राप्नुवन्तो देवा इन्द्रियाणि समाने योनौ साधारणे कारणभूते ब्रह्मणि लीना भवन्ति ।

इत्थं सायणाचार्येण स्वभाष्ये अथर्वसंहितायाः व्याख्यानं पञ्चभिः सूत्रैः विविधविज्ञानानां तथा विविधशास्त्राणां वीजानि सम्यगुपपादितः । यस्य अध्ययनेन न केवलं व्यक्तेः अपि तु समाजस्य महानुपकारः भविष्यति इति मे मतिः ।इति शम् ।

सन्दर्भग्रन्थसूची –

१. तैतरीयसंहिताभाष्यम्, वैदिकसंशोधनमण्डलम्. पूना।
२. वेदभाष्यभूमिकासंग्रहः, चौखम्बा संस्कृत संस्थान, बारणासी।
३. अथर्ववेदसंहिताभष्यम्, ,वैदिकसंशोधनमण्डलम्. पूना।

17 तत्रैव- 2.1.5

३. अथर्ववेदसंहिताभष्यम्, ,वैदिकसंशोधनमण्डलम्. पूना।

४. तैत्तिरीयारण्यकम्, चौखम्बा संस्कृत सिरिज् आफिस, बारणासी।

**सहायकाचार्यः, विभागाध्यक्षश्च वेदविभागः**

**शासकीयसंस्कृतमहाविद्यालयः, भितरी**

**जि - सीधी (मध्यप्रदेशः)**

# अपादानविमर्शः

प्रो. प्रशान्तकुमारमहला
आचार्यः, संस्कृतविभागः,
रायगञ्जविश्वविद्यालयः, उत्तरदिनाजपुरम्

**अपादानशब्दस्य व्युत्पत्तिः** - अप,आ उपसर्गपूर्वकात् दानार्थकाद् दाधातोः भावे ल्युट् प्रत्यये अपादानशब्दो निष्पद्यते।यस्यार्थः अपादीयते नाम पृथक् क्रियते इति।पृथक् करणम् अपादानम्।यदा आदानशब्दः संश्लेषात्मके अर्थे व्यवह्रियते तदा अपादानशब्दः तस्य विपरीते अर्थे अर्थात् विश्लेषात्मके अर्थे व्यवह्रियते।साधारणतया सम्प्रदान-अपादानशब्दौ परस्परौ सम्बन्धिनौ।उभयोः विकासः समकालिनौ।अतः संश्लेष-विश्लेषावपि परस्परौ सम्बन्धिनौ।

**अपादानस्य लक्षणम्**- पाणिनिना अपादानस्य लक्षणं "ध्रुवमपायेऽपादानम्"-1.4.24 इति कृतम्।अपादानशब्दस्य यो लौकिकार्थः(पृथक् करणम्) शास्त्रीयार्थेन सह तस्य सम्बन्धत्वेपि वस्तुतः शास्त्रीयार्थो भिन्नः।पाणिनेः सूत्रे अपायशब्दो विश्लेषः पृथक्करणार्थे व्यवहारो दृश्यते।ध्रुव शब्दस्य सामान्यार्थः स्थिरः।पतञ्जलिरपि स्थिररूपार्थं स्वीकरोति।कालान्तरे वैयाकरणैः अवधिरूपार्थे(यस्मात् विभागः प्रारभते) ध्रुवशब्दः परिभाषितः।पाणिनेः सूत्रस्यायमेवार्थः अपायो नाम विश्लेषः तस्मिन् साध्ये ध्रुवम् नाम अवधिभूतं कारकम् अपादानसंज्ञं स्यात्।अर्थात् विश्लेषसमये यः पदार्थः ध्रुवः नाम स्थिरः सोऽपादनम्।यथा- वृक्षात् पत्रं पतति।वृक्ष-पर्णयोः विभागदशायां पर्णस्य अस्थिरता अपिच वृक्षस्य स्थैर्यत्वं विवक्षितोऽस्ति।अतः वृक्षस्य अपादानत्वं सिध्यति।

यदि सूत्रे ध्रुवशब्दस्य प्रयोगो न स्यात् तर्हि 'ग्रामादागच्छति शकटेन' अत्र वाक्ये केवलं विश्लेषमाधारीकृत्य शकटस्यापि अपादानत्वं स्यात्।परन्तु शकटः अध्रुवत्वेन तस्य अपादान संज्ञा न भवति।तथैव ग्रामादागच्छन् कंसपात्र्यां पाणिनौदनं भुङ्क्ते (ग्रामादागमन समये मार्गे कांस्यपात्रे कुत्रचित् हस्तेन अन्नं खादति) अत्र वाक्ये कंसपात्री इत्यस्यापि अपादानत्वं प्राप्नोति।परन्तु विश्लेष सत्त्वेपि ध्रुवत्वाभावे न अपादानसंज्ञा।यदि उच्येत परत्वकारणात् करणम् अधिकरणञ्च अपादानं बाधते अतः पतञ्जलिः उदाहरणान्तरं प्रस्तौति- वृक्षस्य पर्णं पतति,कुड्यस्य पिण्डः पतति।अत्र पतनक्रिया भवति इति हेतोः अपायस्य प्रतीतिर्भवति, किन्तु वस्तुतः अपायो नास्ति।अत्र वृक्षात् पर्णस्य पृथकत्वं न विवक्षितो भवति नापि कुड्य-पिण्डयोः वियोगो विवक्षितः। ध्रुववस्तुनः सत्तां विना केवलस्य गतेः अपादानत्वं न स्यात्।लौकिकदृष्ट्या यद्यपि अपायो भवति तथापि ध्रुवस्य अविवक्षावशात् वृक्ष-कुड्ययोः न अपादानसंज्ञा।

**ध्रुवस्य शास्त्रीयसंज्ञा-** ध्रुवशब्दस्यार्थो यदि स्थिरः अचलः स्वीक्रियेत तर्हि वृक्षात् पत्रं पतति इत्यादौ वृक्षः अचलत्वेन स्थिरत्वेन वा वृक्षादौ अपादानसंज्ञा सिद्धौ न कोऽपि बाधः किन्तु गतिशीले पदार्थे अपादानसंज्ञा कथं स्यादिति प्रश्नः।यथा- रथात्प्रवीतात् पतितः(प्रखरगतिविशिष्टात् रथात् पतितः),अश्वात् त्रस्तात् पतितः(भयात् धावमानात् अश्वात् पतितः),सार्थाद् गच्छतो हीनः(गमनसमये स्वकीयात् विच्छेदः) इत्यादौ उदाहरणे गतिशीलस्य रथस्य,अश्वस्य सार्थस्य अपादानसंज्ञा भवति।ध्रुवशब्दस्यार्थो यदि स्थिरः स्यात् उपर्युक्तेषु उदाहरणेषु अपादानसंज्ञा कथं स्यादिति चेत्,वार्तिककारः कात्यायनः कथयति-न वाऽध्रौव्यस्याविवक्षितत्वात्-(7.4.24 सूत्रे वार्तिकम्)अर्थात् अत्र अध्रुवतायाः अविवक्षावशात् अत्र अपादानसंज्ञा स्यात्।अत्र इदमेव तात्पर्यं यत् वक्ता अत्र अध्रुवत्वे ध्रुवत्वं स्वीकरोति।परन्तु एतत् कथं सम्भवेत् स्पष्टतः परिस्पन्दितस्य वस्तुनः कथं ध्रुवत्वं स्वीकुर्यात् ?

अत्र पतञ्जलिः कथयति-अश्वे या जातिः प्रवृत्तिनिमित्तं वा अपिच आशुगामित्वे यत् प्रवृत्तिनिमित्तं स ध्रुव इति वक्ता वक्तुमिच्छति।अत्र एकरूपता एव ध्रुवः।(ध्रुवमेकरूपमुच्यते इति कैयटः)यतोहि अश्वे अश्वत्वमेक एव, अश्वः शान्तो भवतु त्रस्तो भवतु नाम।अत्र कैयटः कथयति एतादृशेषु उदाहरणेषु आदौ कारकस्य(अश्वस्य) क्रियया(पतितः) सह अन्वयो भवति यो श्रुतिगम्यो भवति।अनन्तरं विशेषणेन सह अन्वयो भवति(त्रस्ताताद् अश्वात्)।इत्थं अश्वात् पतितः इति वाक्ये अनेन सम्बधेन अश्वे यदि अध्रुवता नास्ति(अर्थात् अश्वे ध्रुवत्वं स्वीक्रियते) पश्चात् त्रस्तेन सह सम्बधेऽपि अन्तरङ्गसंज्ञायाः (अश्वत्वस्य)निवृत्तिर्न भवति।अतः तस्य अध्रुवता पूर्ववत् स्यादेव।इदानीं प्रश्नः त्रस्तपदे कथम् अपादानत्वं स्यात् ।अत्र उच्यते, तत्र अपादानस्य अभावेऽपि विशेष्यानुरोधेन पञ्चमीविभक्तेः प्रयोगो भवति अयं तु न अनियमः।यतोहि कैयटः कथयति-

विशेषणस्यासत्यपादानत्वे सामयिकी विभक्तिः।

सा च विशेष्यानुरोधेन प्रवर्तते, न त्वनियमेन।।

त्रस्त इत्यत्र विभक्तिसाधनस्य उपायान्तरं कैयटेन प्रदर्शितः यस्तु नागेशानुसारं भाष्यसम्मतमपि।उपायस्तु इत्थं वर्तते-त्रस्ते अपि अपादानत्वं स्वीकुर्यात् यतोहि त्रस्तापेक्षया यद्यपि अश्वे अध्रुवत्वं अधिकं वर्तते तथापि पतनक्रियादृष्ट्या अश्वे ध्रुवत्वमस्त्येव।इयं परिकल्पना परवर्तीसमये वैयाकरणैः विकसिता।

इत्थं रथ-सार्थयोः ध्रुवत्वबोधो भवति।रथे रथत्वं(रमन्ते अस्मिन्निति रथः)ध्रुवरूपेण विवक्षितम्।सार्थे सार्थत्वमपि(सहार्थाभावः)ध्रुवत्वेन विवक्षितम्।अनेन प्रकारेण ध्रुवत्वस्य

मर्यादानिरूपणं भवति।परन्तु एतत् तत्रैव सम्भवं यत्र क्रिया प्रवृत्तिनिमित्तं न भवति,केवलं व्युत्पत्तिजन्यार्थस्योपरि आसीनं भवति।यदि क्रिया शब्दस्य व्यावहारिकेऽर्थे व्यवहारो भवति यथा-धावतः पतितः,त्वरमाणात् पतितः तदा अपादानत्वसाधिका मर्यादा कथं भवेत् ?(ये त्वेतेऽप्यन्तं गतियुक्तास्तत्र कथम् ? धावतः पतितः त्वरमाणात् पतित इति।(महाभाष्यम्)अत्रापि पतञ्जलिः अध्रुवत्वस्य अविवक्षायाः उपरि गुरुत्वं दत्तवान्।लोके सत्पदार्थस्य अविवक्षा असत्पदार्थस्य विवक्षाविषये बहूनि उदाहरणानि दृश्यन्ते।यथा-अलोमिका एडका(अल्पलोमविशिष्टा एडका)अनुदरा कन्या(कृशोदरी कन्या)इत्यादौ पदार्थविद्यमानतायां अविवक्षावशात् नञ् इत्यस्य प्रयोगः भवत्येव।समुद्र कुण्डिका(समुद्रः क्षुद्रकलश इव),विन्ध्यो वर्धितकः(विन्ध्याचलःओदनखण्ड इव)अत्र पदार्थः वस्तुतः तथैव न किन्तु विवक्षा भवति।अतः अवस्थितस्य अध्रुवत्वस्य अविवक्षा लोकव्यवहारे किमपि नूतनं न।

इत्थं भगवान् पतञ्जलिःअपादानसंज्ञाविधायके सूत्रे प्रयुक्तस्य ध्रुवस्य अपादानस्य च स्वस्य व्यावहारिके अर्थे सर्वविधसम्भाव्यप्रयोगाणां व्याख्यानं कृतवान्।परवर्ती समये वैयाकरणाःउभयोः पारिभाषिकत्वेन स्वीचक्रुः।अस्मिन् विषये भर्तृहरे मतवयं वर्तते।यद्यपि भर्तृहरेः नाम्ना बह्यः कारिकाः अपादानप्रङ्गे विभिन्नैः वैयाकरणैः उद्धृताः ताः सर्वाः कारिकाः इदानीमुपलभ्यमाने संस्करणे नोपलभ्यन्ते तथापि अपादानविषये तस्य चिन्तनं व्याख्यानं वा परवर्तीग्रन्थकाराणां कृते प्रत्यक्षरूपेण-परोक्षरूपेण वा उपजीव्यमस्तीति नास्ति संशयस्य लेशः।

ध्रुवत्वं भर्तुहरिः वस्तुस्वभावरूपेण (कुटस्थरूपेण निष्क्रियरूपेण) न स्वीकरोति सूत्रस्वारस्यात्।(अर्थात् ध्रुवमपायेपादानम् इति सूत्रात् ज्ञायते इति भर्तृहरेर्मतम्)अत्र पतञ्जलिना सह भर्तुहरे वैमत्यं परिदृश्यते।पतञ्जलेः अश्वत्वस्य,आशुगामित्वस्य व्याख्यायाम् अरुचिं प्रदर्श्य अपायस्य विषयम् अपादानत्वेन स्वीकरोति भर्तृहरिः।अतः भर्तृहरिः कथयति-

द्रव्यस्वभावो न ध्रौव्यम् इति सूत्रे प्रतीयते।

अपायविषयं ध्रौव्यं यत्तु तावद् विवक्षितम्।।वा.प.3.7.138

अत्रेदमेव तात्पर्यं अपायः अर्थात् पृथग्भवति या क्रिया, तां क्रियां प्रति यः स्थिरः,अपायक्रियया सह यः असंस्पृष्टो भवति अपिच तां क्रियां प्रति य उदासीनो भवति सोऽत्र ध्रुवः।धावतो अश्वात् पतति इत्यत्र अपायबोधिका क्रिया भवति पतति।अस्याः क्रियायाः कर्ता अश्वो न।परन्तु अश्वः पतनक्रियां प्रति उदासीनः।पतनक्रियायाम् अनावेश- कारणात्(साक्षात् सम्बन्धाभावात्)अश्वस्य ध्रुवत्वं असंशयम् सन्देहशून्यम्।बहुषु नव्यव्याकरणरणग्रन्थेषु भर्तृहरेः नाम्ना इयं कारिका दृश्यते-

अपाये यदुदासीनं चलं वा यदि वाचलम्।

ध्रुवमेवातदावेशात् तदपादानमुच्यते।।

परन्तु इयं कारिका भर्तुहरेः मूलग्रन्थे न दृश्यते।अस्योदाहरणार्थम् अपर एको श्लोको दृश्यते-

पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।

तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते।।

अस्याः कारिकायाः फलितार्थः हेलाराजेन वाक्यपदीयस्य 3.7.138 तः 3.7.139 स्वस्य व्याख्यायां प्रतिपादितः भर्तृहरेरपि अस्याः कारिकायाः फलितार्थं प्रति सम्मतिरस्तीति प्रतीयते।

अत्रायमेवाशयः उपर्युक्ते वर्णिते क्रमे क्रियां प्रति यः उदासीनो निरपेक्षो वा भवति स चलः(गतिशीलः) भवतु अचलो वा भवतु स ध्रुवः भवेत्।यतोहि तस्य विश्लेषबोधिकया क्रियया सह नास्ति कोऽपि साक्षात्सम्बन्धः।अतः ध्रुवस्य भेदद्वयम्-अचलो ध्रुवः(वृक्षः) सचलो ध्रुवश्च।उपर्युक्ते द्वीतीये श्लोके चलध्रुवस्योदाहरणं व्याख्यातम्। कुड्यात् पततः अश्वात् पतति।अत्र विश्लेषहेतुभूते द्वे क्रिये स्तः।पतति क्रियया बोध्यो भवति द्वितीयक्रियायाः कर्ता,कश्चन जनः यः अश्वारूढ आसीत्।यस्मात् अश्वात् स पतति सः अश्वः तत्पतनक्रियां प्रति उदासीनः।अतः सः अश्वः अत्र ध्रुवः।अर्थात् जनस्य पतनक्रियां प्रति अश्वः ध्रुवो भवति।किन्तु सः अश्वः पततः इति क्रियया बोध्यःप्रथमपतनक्रियायाः कर्ता अस्ति, न तु ध्रुवः।अश्वस्य पतनक्रियां प्रति निरपेक्षकारणात् कुड्यः ध्रुवः।अतः ध्रुवशब्दस्य अयमेव निष्कर्षः विश्लाषार्थकक्रियायाः प्रयोगेण(पतनम्,सरणम्,हानो भ्रंशो वा) यः पदार्थः तां विश्लेषभूतां क्रियां प्रति उदासीनो भवति सोऽत्र ध्रुवः।भर्तृहरिः ध्रुवाध्रुवस्य भेदं प्रदर्श्य कथयति-

सरणे देवदत्तस्य ध्रौव्यं पाते तु वाजिनः।

आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते।। वा.प.3.7.139

अत्रायमेवाशयः अश्वे सरणक्रिया(शीघ्रधावनम्)विद्यमानत्वेऽपि अत्र देवदत्तः ध्रुवः यतोहि सरणक्रियया स अप्रभावितोऽस्ति।तथैव पतनक्रिया देवदत्ते विद्यमानतायामपि अश्वः तत्र अप्रवेशात् अप्रभावितत्वात् अनाविष्टकारणात् वा अत्र अश्वो ध्रुवः।अपाये अनावेशः अप्रवेशः ध्रुवत्वस्य हेतुः।अर्थात् यः पदार्थः अपायाविष्टः अपायप्रविष्टो वा सः अध्रुवः।अत्र इदमेवावधेयं यत् अश्वस्य सरणेन (शीघ्रगमनेन) लौकिकदृष्ट्या यद्यपि देवदत्तः ध्रुवः इति उच्यते तथापि पारिभाषिकध्रुवत्वस्य अभावात् तस्य अपादानसंज्ञा न भवति।यतोहि ध्रुवत्वेऽपि देवदत्तस्य

अवधित्वेन(यस्मात् विश्लेषारम्भो भवति) ग्रहणं न भवति।यदि लौकिकार्थम् आधारीकृत्य देवदत्तस्य अपादानत्वं स्वीक्रियेत तर्हि सरतो देवदत्ताद् धावत्यश्वः इत्याकारोऽपादानत्वस्य प्राप्तिः स्यात्।अत्र अवधिःलोकप्रयुक्ताद् अर्थाद् पृथक्कृत्य शास्त्रीयार्थे व्यवस्थापयति।तदनुसारं इयमवधिः विभागस्य सीमानं अपाये अनाविष्टं पदार्थं ध्रुवत्वेन नियमयति।

अवधेः महत्वं गुरुत्वपूर्णं वर्तते।अवधेः अभावे यां कामपि गतिं अपाय इति वक्तुं न शक्नुयात्।अतः भर्तृहरिः कथयति- गतिर्विना त्ववधिना नापाय इति कथ्यते।

वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम्।। वा.प.3.7.143

अतः अपायः सावधिकगतिमात्रेण युक्तात्वात् अपायस्य पारिभाषिकत्वं सिध्यति।वृक्षस्य पर्णं पतति इत्यत्र वाक्ये वृक्षसम्बधिनः पर्णस्य पतनम् इति विवक्षितः।वक्ता वृक्षं अवधित्वेन वक्तुं नेच्छति।अतःवृक्षे पतनक्रियाविद्यमानत्वेऽपि अवधेः अविवक्षाकारणात् अपायस्य प्रतीतिर्न भवति।अतः अपादानमूलिका पञ्चमीविभक्त्यपि न भवति।यदा अपायस्य विवक्षा भवेत् तदा वृक्षःअवधिः स्यात् तदा वृक्षात् पर्णं पतति इति प्रयोगः स्यात्।वृक्षात् पर्णं पतति इत्यतः न ज्ञायते पर्णं केन सह सम्बन्धः।कङ्केन उत कुररेण।षष्ठीविशिष्टे उदाहरणे वृक्षस्य विवक्षा पर्णस्य विशेषणरूपेण भवति वृक्षसम्बन्धी पर्णम्।अत्र इदमेव तात्पर्यं यत् अयं प्रयोगः तदा भवति यदा शाखायां स्थितं पर्णं वृक्षमपरित्यज्य भूमिं स्पृशति।अतः अवधिहीना गतिः अपायो न भवति अतो न अपादानसंज्ञा नापि पञ्चमी।अतः हेलाराजः कथयति- एतस्माच्चावसीयते- सावधिकगतिरपायो, न शुद्धा।

उपर्यक्तात् व्याख्यातः ज्ञायते ध्रुवस्य पर्यायवाची भवति उदासीनः।पुरुषोत्तमदेवः उदासीनशब्दस्य अर्थम् अधिकं परिष्करोति। स कथयति-अपायविषये यत् अविचलतत्वं नाम गमनक्रियां प्रति यस्य अगमनम्,पतनक्रियां प्रति यस्य अपतनम् तस्य ध्रुवसंज्ञा भवति।धावतोऽश्वात् पतति देवदत्तः इत्यत्र यदा देवदत्तः पतति तदा अश्वः न पतति।यदि अश्वः पतेत् तर्हि अश्वदेवदत्तौ पततः इति प्रयोगः स्यात्।पतनक्रियायां अश्वस्य अप्रवेशकारणात् अश्वस्य उदासीनता अत्र ध्रुवत्वम्।

इदानीं एका शंकासमुदेति यदि ध्रुवः क्रियां प्रति उदासीनो भवति तदा तस्य कारकत्वं न स्यात्।यतोहि कारकं सदैव घटनारूपं भवति परन्तु उदासीनः न घटते।उदासीनो यदि घटिष्यति तर्हि तस्य औदासीनत्वं न तिष्ठेत्।अतः भर्तृहरिः कथयति-

ध्रुवं न कारकं मन्ये नोपकारि गतौ यतः।

अपायाधारभूतोऽसौ स क्रियश्च न कथ्यते।।पुरु.कारकचक्रम्

अस्योत्तरेण पुरुषोत्तमदेवः कथयति-सर्वाणि कारकाणि स्वगतक्रियया प्रधानक्रियायाः निमित्तानि भवन्ति इति सर्वैः स्वीकृतम्।यथा पाकक्रियायां काष्ठादि ज्वलनक्रियाद्वारा निमित्तं भवति तथैव ग्रामाद् देवदत्तः आगच्छति इति वाक्ये ध्रुवरूपेण विद्यमानो ग्रामः अवस्थानक्रियारूपेण देवदत्तस्य आगमनक्रियायाः(प्रधानक्रियायाः) निमित्तं भवति।एतत्तु सत्यं ग्रामोऽवस्थितः।तथापि स अनेन प्रकारेण स्थित्वा प्रधानक्रियायाः निमित्तीभूय निवर्तकत्वेन कारकं भवति।अत्र ग्रामः स्वस्य अनागमन द्वारा देवदत्त्स्य आगमनक्रियायाः निमित्तं भवति।

इदानीं अपरैका शंका समुदेति यत् अवस्थानं नाम गतिनिवृत्तिः नाम अभावरूपपदार्थः।अतः तस्य कियात्वं कथं सम्भवेत् ।अत्रोच्यते वैयाकरणा धात्वर्थं क्रियात्वेन स्वीकुर्वन्ति।अतः अवस्थानम् अभावो धातुना अभिहितत्वेन अभावोऽपि क्रिया।यथा नश्यति इत्यनेन अभिधेया क्रिया अभावरूपा।यद्यभावं क्रियात्वेन न स्वीक्रियेत अवतिष्ठते, नश्यति इत्यादीनां अक्रियावाचकानां धातुसंज्ञा न स्यात्।

उदासीनशब्दस्य अत्र अयमेवार्थो यत् स आगमनक्रियां प्रति कर्ता न भवति।देवदत्तो गच्छति ,परन्तु ग्रामः तस्यानुगमनं न करोति तथापि ग्रामः अपायस्य निमित्तं भवति।अपाय एकः सम्बन्धः, यस्य सिद्धिः द्वयोः सम्बन्धिनोः भवति।अस्मिन् अपाये एकः सम्बन्धी क्रियया प्रवृत्तो भवति (यः कर्ता) परन्तु अपरः क्रियया सह प्रवृत्तो न भवति(अपादानम्)। अस्य अपरसम्बन्धिनः उदासीनतापि अपायसिद्धेः निमित्तं भवति।ध्रुवस्य उदासीनतायाः इदमेव तात्पर्यम्।

सहायकग्रन्थसूची

भर्तृहरेः *वाक्यपदीयम्* ,तृतीयं काण्डम्,द्वितीयो भागः,श्रीहेलाराजविरचितया प्रकाशव्याख्यया पद्मश्रीपण्डितश्रीरघुनाथशर्मणा विरचितया अम्बाकत्री व्याख्यया च विभूषितम्,सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,तृतीयं संस्करणम्,वाराणसी,2016.

पाणिनेः*अष्टाध्ययीसूत्रपाठः,दीक्षितपुष्पाकृत प्रकरणनिर्देशसमन्वितः,संस्कृतभारती,नवदेहली,2010*

शर्मा उमाशङ्करः,*संस्कृत-व्याकरण में कारक तत्त्वानुशीलन,* चौखम्बासुरभारतीप्रकाशनम्,वाराणसी,2011.

भट्टोजिदीक्षितप्रणीता *वैयाकरणसिद्धान्तकौमुदी,*श्रीधरमुखोल्लासिनी हिन्दीव्याख्या समन्विता,सम्पा.लक्षीशर्मा,द्वीतीयो भागः, चौखम्बासुरभारतीप्रकाशनम्,वाराणसी,2016.

पुरुषत्तमदेवस्य *परिभाषावृत्तिः-ज्ञापकसमुच्चयःतथा-कारकचक्रम्,* सम्पा.दीनेशचन्द्र भट्टाचार्यः,वारेन्द्र-रिसर्च-म्युजियम्,राजशाही,1947

रायगञ्जविश्वविद्यालयः

संस्कृतविभागः

उत्तरदिनाजपुरम्

# सुसंस्कृतसमाजनिर्माणे रघुवंशमहाकाव्यस्य प्रासङ्गिकता

ममि महान्त
शोधच्छात्रा, पण्डिच्चेरीविश्वविद्यालयः

**शोधसारः-**

समाजस्य धर्मः संस्कृतिः इति द्वेआधारभूमी स्तः। एतौ द्वौपवित्रभारतवर्षस्य आत्मगौरवस्य परिचायिकौ।यथा धर्मः संस्कृत्या सह सम्बन्धितस्तथैव संस्कृतिरपि धर्मेण सह संपृक्ता। संस्करणं **संस्कृतिः**,एतस्याः वाहकः **धर्मः**।अनयोः परस्परयोः सम्बन्धः परिपूरकः अनन्याश्रितश्च। संस्कृतेः प्रागेव धर्मस्य प्रादुर्भावः। संस्कृतेः विकासाय आधारं निर्माय च समुचितसाधनानि विधाय साध्यपर्यन्तं प्रापयितुं धर्मः एव पूर्णसहयोगं करोति। अतः प्रोक्तम्-

**" धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः"।**[1]इति

भारतीयसंस्कृत्यां धर्मस्यैव प्राधान्यता वर्तते। धर्मात् व्यवच्छिन्नाः मानवाः पशुभिः सदृशाः प्रतिभान्ति। भारतीयसंस्कृतिः लोकेषु विश्वबन्धुत्वभावनां सृजयति। यथा-

**"मित्रस्याऽहं चक्षुषा सर्वाणि भूतानि समीक्ष्ये ।**

**मित्रस्य चक्षुषा समीक्षामहे।।"**[2] इति

जगत्यस्मिन् धर्मसंस्कृतेः प्रतिपादनं न केवलं वैदिकसाहित्ये वर्णितम् अपितुलौकिकसाहित्येऽपिस्पष्टरूपे समुपलभ्यते।प्राचीनकालाद् आद्यपर्यन्तं भारतस्य सामाजिकसांस्कृतिकधार्मिकजीवनस्य प्रतिफलनं काव्ये एव भवति।महाकवि कालिदासः धर्मसंस्कृत्योः परमोपासकः। अतः तस्य सर्वश्रेष्ठे महाकाव्ये रघुवंशे सार्वकालिकः सार्वदेशिकः च धर्मसंस्कृत्योःयत्समुज्वलरूपः प्राप्यते तद् अद्यपर्यन्तं अस्माकं समाजस्यआदर्शः अस्ति। सदाचारः, वर्णाश्रमव्यवस्था, संस्कारः, त्यागः, तपस्या, सहिष्णुता,

[1]सुभाषितम्
[2]यजुर्वेद-36-18

मातृपितृगुरूभक्तिः, कर्मवादः, आध्यात्मिकभावना, कर्तव्यनिष्ठता, मोक्षचिन्तनं, गोसेवा,पुनर्जन्मवादःइत्यादयः अस्माकं समाजंसमेधयन्ति । एतानि सर्वाणि तत्वानि च उपनिबद्धानि कालिदासस्य सर्वश्रेष्ठमहाकाव्येरघुवंशे।

यतोहि समाजस्य मूले अस्त्येव धर्मसंस्कृती।तर्हि का नाम संस्कृतिः, को धर्मः, एतौ द्वौ कीदृशौ प्रतिफलितौ रघुवंशमहाकव्ये तथा तेषां समाजाय किं प्रासङ्गिकता वर्तते तदेव मया प्रस्तूयते शोधलेखेऽस्मिन् ।

**कूटशब्दाः**-(**Key Words**)-संस्कृतिः, धर्मः, रघुवंशं चेति।

## उपस्थापना-

- संस्कृतिः-

**'सत्याहिंसागुणैः श्रेष्ठा, विश्वबन्धुत्वशिक्षिका ।**

**विश्वशान्तिसुखाधात्री, भारतीया हि संस्कृतिः ।।'**[3]इति

**"संस्कृतिः"**शब्दः "सम्" उपसर्गपूर्वकः "कृ" धातोः "क्तिन्" प्रत्ययस्य संयोगेन निष्पन्नः। यस्याः अर्थःसंस्करणं,परिष्करणं,अलंकरणं,शुद्धिकरणं चेति। मानवः मानवत्वं प्रतिष्ठापयितुं यामाश्रियते सा एव संस्कृतिः। इयमस्माकं जीवनस्याऽन्तरङ्गस्वरूपं प्रकाशयति। अपिच मनसः मलं, चेतसः चाञ्चल्यं अज्ञानावरणं च व्यपनयति। विश्वस्य अन्यासु संस्कृतिषु भारतीयसंस्कृतिः भिन्ना शुद्धा चास्ति।एषा चेतसि दुर्भावदमनपूर्वकं स्वान्तं स्थैर्यं च संस्थापयति।विश्वहितस्य विश्वोन्नतेश्च सर्वाः मूलभूताः भावनाः अस्यां संस्कृतौ उपलभ्यन्ते। **"भारतीया संस्कृतिः सर्वश्रेष्ठा संस्कृतिः।"**इति न केवलं भारतीयाः स्वीकुर्वन्ति अपितु पाश्चात्यैः अपि मुक्तकण्ठेन स्वीकृतवन्तः। मैक्समुलर महोदयेनोक्तम्-'**यदि मां प्रति कोऽपि प्रश्नं पृच्छति एतादृशं को देशो कुत्र चास्ति? यत्र मानवः स्व मानसिकशक्त्या सर्वोत्तमं गुणं विद्यानां च प्रत्येग्शाखां विचारयति? एवं क्लिष्टतः अतिक्लिष्टप्रश्नानां समाधातुं सक्षमाः भवन्ति तर्हि अहं पवित्रभारतवर्षमिति वदामि** ।भारतीयसंस्कृत्यां मानवाय सत्यं शिवं सुन्दरं संदेशः अस्ति। अन्यया संस्कृत्या प्रभावेन्यपिएषा स्थिराअपरिवर्तिताच।सदाचारः,वर्णाश्रमव्यवस्था,त्यागः, तपस्या, सहिष्णुता, मातृपितृगुरूभक्तिः, कर्मवादः, आध्यात्मिकभावना, कर्तव्यनिष्ठता,मोक्षचिन्तनं, गोसेवा एतानि सर्वाणि भारतीयसंस्कृतेः मुख्यानि वैशिष्ट्यानि।

**धर्मस्य स्वरूपम्-**

---

[3]संस्कृतनिबन्धशतकम्-175

भारतीयसंस्कृतेः वाहकः अस्ति **"धर्मः"**।**धर्ममाश्रित्यैव** भारतीयसस्कृतिः जीविता।कामपि संस्कृतिं सम्यक्संचलनाय सामाजिकसन्तुलनरक्षाय च धर्मः एव सक्षमः।पाश्चात्यदेशवत् भारतेऽस्मिन् धर्मशब्दस्य प्रयोगः "Religion" अथवा उर्दुभार्षावत्"Majahab'' मजहबइति संकुचितशब्देननव्यवह्रियते। भारतीयसंस्कृत्यांधर्मस्तु बहुव्यापकः शब्दः, अत्रैव संपूर्णसमाजस्य इतिहासःसमावेशितः। गर्भे आगमनामारभ्य अन्येष्टिपर्यन्तं मानवजीवनस्य प्रत्येकं क्षेत्रं धर्मेण परिव्याप्तं भवति।**धृञ्"** धारणपोषणयोरिति धातोः औणादिके**"मन्"**प्रत्ययकृते उत्पद्यते धर्मशब्दः ।महाभारते इदं वचनमस्ति-'**धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।**

**यस्याद्धारणसंयुक्तः स धर्म इति निश्चयः।।'**[4]**इति**

अर्थात्, धर्मः जीवनस्य मूलाधारः।

विष्णुसहस्रनामस्तोत्रे- "**आचारप्रभवो धर्मः धर्मस्य प्रभुरच्युतः**" इति वर्णितमस्ति। अर्थात् ,आचारः हि परमधर्मः एवं तस्य स्वामिस्वयं नारायणः इति।संस्कृतजगति धर्मप्रतिपादकं शास्त्रं"**धर्मशास्त्रम्**"।धर्मशास्त्रे धर्मशब्दः पूर्णविकासमभजत्।तत्समये परमाराध्यः मनुः प्रक्तोम्-

**'विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।**

**हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ।।'**[5] **इति**

अर्थात्, सज्जनैः,रागद्वेषरहितैः वेदविद्भिः सततमनुष्ठितः, एवं अन्तःकरणेन प्राप्तानुज्ञः धर्मः इति । अपि च "**आचारः परमधर्मः**" इत्युक्त्वा धर्मस्य दशलक्षणं मनुना प्रतिपादितम्। यथा-

**'धृतिःक्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।'**[6] **इति**

दशलक्षणमेतद् मानवान् दुष्कर्मेभ्यः मद्यपानस्तेयादिभ्यः वारयति। सुकर्मसु व्रतोपवासदानादिषु शास्त्रविहितकर्मेषु प्रवर्त्तयति।ततःमानवः विश्वे वीतक्रोधभयरागरहितः सन् जीवनस्य चरमलक्ष्यं सुलभेन प्राप्नोति।चलाचले संसारे धर्मस्यैव नियतत्वं सर्वैरनुभूयते। धर्मे न केवलं पूजापङ्गादयः समन्वयं भवति अपितु आङ्ग्लभाषायाःVirtue, Law, Duty, Human behaviour, Morality, Custom usageआदिः पदानां अन्तर्भवति।धर्म एव जीवजगतस्यधारकः,सदसद्विचारकः, कर्मक्रियायाः साधनः,पापपुण्यनिर्धारकः,

---

[4]महाभारत.शान्ति-209.22

[5]मनु.-2.1

[6]मनु-6.91

कर्तव्याकर्त्तव्यबोधकः च। धर्मं विना संस्कृतिः क्षणमपि स्थातुं नार्हति। वस्तुतस्तु धर्मेण संस्कृत्युथानं सम्भवम्।

## मूलप्रबन्धः-

अस्माकं भारतीयसमाजस्य प्रतिपादनं न केवलं वैदिकसाहित्ये वर्णितं अपितु लौकिकसाहित्येऽपि स्पष्टरूपे समुपलभ्यते। प्राचीनकालाद् अद्यपर्यन्तं भारतस्य सामाजिकसांस्कृतिकाध्यात्मिकजीवनस्य प्रतिफलनं काव्ये भवति।यतो हि काव्यगतं प्रयोजनं प्रतिपादयता मम्मटेन प्रोक्तम्-

**'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये कान्ता सम्मिततयोपदेशयुजे।।'**[7] इति

लौकिकसाहित्येयथा आदिकविः वाल्मीकिव्यासदेवप्रभृतयः विशिष्टस्थानमलंकुर्वन्ति तथैव महाकविकालिदासस्यापि संस्कृतजगति अनन्यं स्वतन्त्रं च स्थानं वर्तते।संस्कृतलौकिकसाहित्ये कविकुलगुरोः कालिदासस्य काव्यकृत्यानि सर्वजनहिताय, सर्वजनकल्याणाय, सर्वजनसुखाय, सर्वलोकोपकाराय च प्रवर्त्तते इति। इदानीन्तनजीवने बहु जनाः संस्कृतिविमुखाः धर्मपराङ्मुखाः च भवन्ति। अतः साम्प्रतिकयुगे महाकविकालिदासस्य सर्वश्रेष्ठकाव्ये रघुवंशे वर्णिताः संस्कृतिप्रतिपादिताः धर्मसंयुक्ताः विषयाः सुसंस्कृतसमाजविर्निमाणे श्लाघनीयाः उपयोगिनश्च भविष्यन्तीति विचारयित्वा मया स्वीक्रियते अयं विषयः।

सनातनधर्ममाश्रित्य भारतीयसंमाजस्य प्रतिपादनं कालिदासेन स्वकीयकाव्ये रघुवंशे यादृशं कृतं तादृशं अन्यत्र न कुत्रापि उपलभ्यते। सदाचारः, वर्णाश्रमव्यवस्था, त्यागः, तपस्या, सहिष्णुता, मातृपितृगुरूभक्तिः, कर्मवादः, आध्यात्मिकभावना, कर्तव्यनिष्ठता, मोक्षचिन्तनं, गोसेवा एते सर्वे धर्मसंस्कृत्योः मूलविषयाः काव्येऽस्मिन् प्रतिपादिताः।

- **सदाचारः**-धर्मानुकूलं शारीरिकव्यापारः सदाचारः इत्युच्यते।श्रुत्यां स्मृत्यां च उपदिष्टोऽस्ति आचारः 'परमधर्मः' इति।यथा मनुसंहितायां-**'आचार परमो धर्मः श्रुत्युक्तः स्मार्तं एव च।**

  **'तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान्द्विजः।।'**[8] **इति**

  तथैव काशीखण्डे वर्णितमस्ति-

  **'आचारः परमो धर्म आचारः परमं तपः।**

  **आचाराद् वर्द्धते ह्यायुराचारात् पापसंक्षयः।।'**[9] **इति**

---

[7]काव्यप्रकाश-1.2

[8]मनुस्मृति-1.108

रघुवंशे प्रतिपादिताः सर्वाः चरित्राः सदाचारसम्पन्नाः । तेषां चरितं समाजे धार्मिकजीवनावलम्बनार्थं प्रेरयति। तस्य समाजः (**श्रुतेरिवार्थं स्मृतिरन्वगच्छत्**) श्रुतिस्मृत्यनुकूलोऽस्ति। सदाचारस्य पराकाष्ठा अत्रेव प्राप्यते । यथा-

**'त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।**

**यशसे विजिगीषूणा प्रजायै गृहमेधिनाम्।।'[10] इति**

अर्थात्, रघुवंशजाः नृपाः त्यागायार्थसंग्रहः सत्यायाल्पभाषणंकीर्त्यर्थमेव विजयेप्सूनां एवं सन्तानप्राप्त्यर्थं दारपरिग्रहं च कुर्वन्ति । एतादृश सदाचासम्पन्नसमाजे परस्परं जीवनं सुगमं तथा संस्कृतिः आदर्शरुपागौरवान्विता च भवति ।

- **परोपकारभावना-**

  **"परोपकारः"** मानवधर्मस्य संस्कृतेः च सर्वश्रेष्ठः चिन्तनः। समाजे कोऽपि जनःअन्यजनानां उपकारं विना जीवितुं न शक्नोति। अतः स्वयं कालिदासः प्रोक्तम्-

  **'अर्थं सप्रतिबन्धं प्रभूरधिगन्तुं सहायवानेवं ।**

  **दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि।।'[11] इति**

रघुवंशे राजसु ये गुणाः विद्यन्ते ते सर्वेऽपि गुणाः परोपकारार्थं एव प्रयुक्तः -

**'तं वेधा विदधे नूनं महाभूतसमाधिना।**

**तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः।।'[12]इति**

अर्थात्,पाञ्चभौतिकशरीरस्य निर्माणकर्तुं रूपरसादिगुणाः यथा परार्थम् एव प्रयोजितम्। तथैव शासके विद्यमानाः सर्वेऽपि गुणाः परोपकारार्थम्।

उपकारस्यानन्तरं प्रत्युपकारं कृतज्ञताविधानं च अवश्यकरणीयमिति कविः बहुत्रोल्लेखितः। अत्र कविना परस्परसाहार्य्येन विना मानवस्य स्थितिमसाध्यमिति सूक्ष्मोदारहरणैःप्रदत्तः।

- **करव्यवस्था-**

आदर्शभूतस्य राष्ट्रस्य करव्यवस्थावर्णनावसरे महाकवि कालिदासः प्रोक्तवान्-

---

[9]काशीखण्ड

[10] रघुवंशम्-1.7

[11]मालवि.1.9

[12]रघुवंशम्-1.29

**'प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।'**[13]इति

अर्थात्, यथा सूर्यः सहस्रगुणं वर्षाद्वारा जलं प्रदायितुं सम्पर्णसमुन्द्रस्य जलं ग्रीष्मकाले शोषयति। तथैव प्रजानां ऐश्वर्यसमृद्ध्यर्थम् एव प्रजाभ्यः करग्रहणं राजा कृतः। तर्हि अत्र राज्ञा करः स्थापनीयः, प्रजाभिः करः अवश्यः देयः, प्रजाभ्यः करस्वीकृत्य तत्धनं स्वात्मरक्षार्थं उपयोगः न करणीयं तथा च प्रजाभ्यः कल्याणं यथा भवेत् तादृश्यं चिन्तनं करणीयमिति वर्णयित्वा शासनव्यवस्थायाः वास्तविकस्वरूपं प्रतिपादितमस्ति।

- **पारिवारिकजीवनम्** –

विश्वपरिवारस्य एकत्वस्य च भव्यभावना एव विश्वशांन्ति,सौहार्दं ,सौख्यं च संस्थापयितुं परिवारस्य स्थानंसर्वोपरि।परिवारस्य सर्वप्रधानाङ्गरुपेण नारीपुरूषौ स्तः। परिवारे केवलं पुरूषस्य नार्याः वा श्रेष्ठता नास्ति। अनयोः द्वयोः प्रकृतिप्रत्ययवत् समानः प्राधान्यं वर्तते इति कविना विहितम् । यथा-

**" सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगशन्निभः"**[14]इति

पारिवारिकजीवने सर्वदा नारी पत्युः परिस्थितिं जानीयात् इति सीतादेव्याः प्रसङ्गे कविना प्रोक्तम्-

**'उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः।**

**तदास्पदं प्राप्य तयाविशेषात्सोढास्मि न त्वद्भवने वसन्ती।'**[15]इति

तथा च-'**साहं तपः सूर्यनिविष्टदृष्टिरुर्ध्वं प्रसूतेश्चरितुं यतिष्ये।**

**भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः।।'**[16]इति

रघुवंशे दाम्पत्यजीवनस्य यत् चित्रं प्रस्फुटितं तदेव अस्माकं संस्कृतेः निरुपमं चित्रणम्। ततो ज्ञायते यत्-पतीपत्नयोः सम्बन्धः समानमनस्त्वेन भवेत् न तु शरीरयोगमात्रेण।

- **मोक्षचिन्तनम्**-परमपुरूषार्थस्तु "मोक्षप्राप्तिः"। मोक्षमधिगम्य मुनयः पुनः इहलोकं न आवर्तन्ते। महाकवि कालिदासः ईक्ष्वाकुवंशस्य कुलव्रतं तु मोक्षचिन्तनमिति प्रतिसर्गे स्पष्टीं करोति। यथा-

[13]रघुवंशम्-1.18
[14]रघुवंशम्-11.56
[15]रघुवंशम्-14.63
[16]रघुवंशम्-14.66

'प्रथमपरिगतार्थस्त रघुः संन्निवृत्तं

विजयिनमभिनन्द्य श्लाघ्यजायासमेतम्।

तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभून्नहि

सति कुलधुर्ये सूर्यवंश्या गृहाया।।'[17]इति

तेषां नृपाणां सन्तानाः यदा योग्याः भवन्ति तदा ते परिपारिजीवनात् निवृत्तिं प्राप्य शान्तिमार्गं (मोक्षमार्गं)कामयन्ते। यथा च-'**गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजा।**

**पदवीं तरू वल्कवाससां प्रयताः संयमिताः प्रपदिरे।।'[18] इति**

दिलीपवंशजाः वार्धककाले गुणयुक्तसुतेषु राज्यभारारोपणं कृत्वा तरूवल्कवाससां संयमिनां मुनिनां व्रतधारणं कृत्वा चमोक्षमार्गमाश्रयन्ते।अतःसूच्यते- जीवनस्यान्तिमकाले अवश्यमेव मोक्षचिन्तनं कुर्यात्।

- **वर्णाश्रमः-**

भारतवर्षेऽस्मिन् ऋषिभिः प्राचीनैराचार्यैश्च संस्कृतिं शृङ्खलयितुं नैकाः व्यवस्थाः विरचिताः। वर्णाश्रमव्यवस्था भिन्ना प्रसिद्धा चास्ति, वर्णाश्रमव्यवस्था इत्युक्ते चतुर्णां वर्णानां आचारः,व्यवहारः, तथा तेषां आश्रमव्यवस्थादिः गृह्यते।भारतीयसंस्कृतेः मूलाधारस्तु वर्णाश्रमव्यवस्था। वर्णाश्रमव्यवस्थायाः संपूर्णरूपंमहाकविः रघुवंशस्य प्रारम्भे कृतवान् । यथा-

**'शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।'[19]इति**

वाल्ये ब्रह्मचर्याश्रमिणां विद्याभ्यासः करणीयः, यौवने गृहस्थाश्रमे धर्मानुसरं विषयसुखं प्राप्तव्यम्,बृद्धावस्थायां वानप्रस्थाश्रमे मुनिवृत्तिकल्पः आचारः स्वीकर्तव्यः, जीवनस्यान्तिमकाले सन्यासाश्रमे परमात्माध्यानेन शरीरं त्यक्तव्यमिति वर्णितमस्ति।

वर्णाश्रमपरिपालनं नृपस्य प्रधानं कर्तव्यं भवति।

**'नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः ।'[20]इति**

---

[17]रघुवंशम्-7.71

[18]रघुवंशम्-8.11

[19]रघुवंशम्-1.8

राजा सर्वदा वर्णाश्रमव्यवस्थायाः अवरमानुष्ठानं प्रति जागरणम् अवलम्बयति। यथा-

**'राजन्प्रजासु ते कश्चिदपचारः प्रवर्तते।**

**तमन्विष्य प्रशमयेर्भवितासि ततः कृती ।।'[21]इति**

वर्णाश्रमव्यवस्थायाः उल्लङ्घनेन समाजे अमङ्गलं दरीदृश्यते इति "शम्भूकचरित्रे"निर्देशितम्। तर्हि एतेषां विधिपूर्वकपालनेन मानवस्य इहलौकिकं पारलौकिकं च कल्याणं वर्धते इति निरुपयति कविः।

- **राज्यव्यवस्था-**

समाजेराज्यपालकस्य राज्ञः योग्यान् गुणान् सूचयति कविः।यथा-

**'ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**

**गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव।।'[22]इति**

अर्थात्, राजानः परवृत्तान्तज्ञाने सत्यपि मौनिनः, प्रतिकारसामर्थ्यैऽपि क्षमाशीलाः ,दानाधिक्येऽपि आत्मप्रशंसारहिताः भवेयुः। अपि च निर्भीकः सन् आत्मानं रक्षेत्,रोगविहीनोऽपि धर्मनिष्ठः स्यात्, लोभहीनोऽपि धनसंग्राहकः स्यात्,सङ्गहीनोऽपि सुखी च स्यात्।राजा धर्मे आसक्तः सन् अर्थं कामं च न त्यक्त्वा धर्मार्थकामानां एकदा समव्यवहारं प्रदर्शयेत्। पुनः धर्मानुकूलं अर्थोपार्जनं कामसम्पादनं चकुर्यात्।यथा-

**'न धर्मर्थकामाभ्यां बबाधे न च तेन तौ ।**

**नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ।।'[23]इति**

राज्यपालकः सर्वदा ज्ञानेन वृद्धो भवेत् यतो हि " **न ज्ञानवृद्धेषु वयः समीक्ष्यते**।"पुनः रक्षणेन पितुः कार्यं निर्वहेत्। यथा-'**प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।**

**स पिता पितरस्तासां केवलं जन्महेतवः ।।'[24] इति**

[20]रघुवंशम्-14.67
[21]रघुवंशम्-15.47
[22]रघुवंशम्-1.22
[23]रघुवंशम्-17.57
[24]रघुवंशम्-1.24

अपि च शासकस्य प्रमुखं दायित्वमस्ति राज्यस्य सप्ताङ्गरक्षणम्(स्वामी, अमात्यः, राष्ट्रः,दुर्गः, दण्डः, कोशः मित्रं चेति) इति कालिदासः स्पष्टी करोति एवम्-'**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।**

**दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम्।।'**[25]इति

नृपः सामदानदण्डभेदादि उपायचतुष्टयस्य तथा सन्धिविग्रहयानासनसंश्रयद्वैधीभावादिः षड्गुणानां विनियोगं साध्येष्वर्थेषु प्रयोक्तुं कुशलो भवेदिति कविः निर्देशति ।

**'स गुणानां बलानां च षण्णां षण्मुखविक्रमः।**

**बभूव विनियोगज्ञः साधनीयेषु वस्तुषु।।'**[26] इति

राज्यव्यवस्थाऽपि वर्णाश्रमजीवनमूल्येन सह युक्तमासीत् । यथा-

**'रेखामात्रमपि क्षुण्णादमनोर्वर्त्मनः परम्।**

**न व्यतीयुः प्रजास्तस्य नियन्ता शास्त्रमाददे।।'**[27]इति

अस्माकं संस्कृतिं चिरस्थायीकर्तुं कुशलराज्यव्यवस्था संचालनार्थं अपरिहार्यानि सर्वाणि जीवनमूल्यानि प्रतिपादितानि काव्येऽस्मिन्।

- **कर्मवादः**-'कर्म' हि जगत्सृष्टेः आदिकारणम् । यथा बीजेन सह वृक्षस्य सम्बन्धस्तथैव मानवेन साकं कर्म आविनाभूतम्। रघुवंशे सर्वे पात्रभूताः सत्कर्मनिरताः। फलैः एव तेषां कर्मं पस्फुटितम्।

**'फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।'**[28]इति

ते यत् कामयन्ति तथैव परिपूरयन्ति। अतः तेषां कृतानां कर्मणां फलप्राप्तिः अपिदृश्यते। यथा-

**'भव्यमुख्याः समारम्भा प्रत्यवेक्षा निरत्ययाः ।**
**गर्भशालिसधर्माणस्तस्य गूढं विपेचिरे।।'**[29]इति

[25]रघुवंशम्-1.60
[26]रघुवंशम्-17.68
[27]रघुवंशम्-1.17
[28]रघुवंशम्-1.20
[29]रघुवंशम्-17.53

अर्थात्, धान्यं यथा पूर्वमेव सम्यक् पक्त्वा निर्गच्छति तथैव कार्यस्य यथा आरम्भः भवति तथैव फलबाप्तिः।

स्वकर्मानुसारेण मानवानां गतिः भिन्ना भवेत्। यथा-

**'परलोकजुषां स्वकर्मभिर्गतया भिन्नप्रथा हि देहिनाम् ।'**[30] **इति**

कृतस्य कर्मणः फलप्राप्तिः सुनिश्चिता।अतः मनुष्येण सदाऽनासक्तिभावनया कर्म कार्यमिति वर्णयति कविः।

- **संस्कारः-**

भारतीयसंस्कृतेः प्रारम्भं संस्कारात् अभवत्।रघुवंशे संस्कारस्य स्वरूपं कालिदासेन प्रोक्तम्-

**'निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्।'**[31]अपि च-**'प्रयुत्तसंस्कारः इवाधिकंबभौ।'**[32] **इति**

रघुवंशे महाकविकालिदासः स्मृतिशास्त्रमाश्रित्य संस्काराणां निपुणवर्णनं कृतवान्। यथा- सुदक्षिणायाःगर्भाधानं तथा पुंसवनसंस्कारवर्णनं,रघोः जातकर्म-नामकरणं-चूडाकरणं-उपनयनं तथा केशान्तसंस्कारवर्णनम्। अपि च इन्दुमत्याः विवाहः तथा अन्त्येष्ठिसंस्कारः वर्णितमस्ति।

चूडाकरणम्-**'स वृत्तचूलश्चलकाकपक्षकरैमात्यपुत्रैः सवयोभिरन्वितः ।**

**लिपेर्यथावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्।'**[33] **इति**

उपनयनसंस्कारः-**'अथोपनीतं विधिवाद्विश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।**

**अवन्ध्ययत्नाश्च बभूवूरत्र ते क्रिया हि वस्तूपहिता प्रसीदति।'**[34]**इति।।**

अत्र जीवनस्य प्रत्येकक्षेत्रे समयानुसारं संस्काराः अनुष्ठीयन्ते इति कविः निरुपयति।

- **पितृमातृगुरुणां भक्तिः-**

---

[30] रघुवंशम्-8.85

[31]रघुवंशम्-3.35

[32]रघुवंशम्-3.18

[33]रघुवंशम्-3.28

[34]रघुवंशम्-3.29

**"मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव"**[35]इत्येतेषां देववत् पूज्यत्वमाख्यायते।ते एवमानवस्य सर्वोत्तमं शुभचिन्तकाः। मानवः मातृभक्त्या भूलोकं, पितृभक्त्या अन्तरिक्षं, गुरूशुश्रूषया ब्रह्मलोकं चाप्नोति। तेषां आशीर्वादेव अस्माकं रक्षामन्त्रः। यथा-

**'आशिषं प्रयुयुजे न वाहिनी सा हि रक्षणविधौ तयोःक्षमा।'**[36] इति

यथा चतुर्दिग्षु विद्यमानः अर्णवः स्वरत्नेन प्रेरयामासुः तथैव एते रघुवंशजाः रत्नसदृशाः गुणरत्नैः एतान् गुरूवर्यान् आराधायमासुः। यथा- **'गुणैराराधयासुस्ते गुरूं गुरूवत्सलाः**

**तमेव चतुरन्तेशं रत्नैरिव महार्णवा।'**[37] इति

एतेषां सेवा मनुष्यस्य साक्षात् परमोधर्मः तेषामाज्ञानुसारं व्यवहर्तव्यमिति रघुवंशे बहुत्रं प्रतिफलितम् ।

- **पारलौकिकभावना-**

पारलौकिकीभावनाभावितोभारतीयसमाजः सिद्धान्तस्य एवऽऽपातरमणीयताऽचारविचारपरक पाश्च्यात्यसभ्यतायाः भिद्यते। विषयेऽस्मिन् कालिदासः स्पष्टम् एव जीवनमरणयोरन्तरं प्रतिपादयन् उल्लिखति यत्-'**मरणं प्रकृतिः शरीरिणा विकृतिर्जीवनमुच्यते बुधै।**

**क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ।।'**[38]**इति**

अत्र मानवस्य मृत्युः सार्वकालिकं सत्यं इति ज्ञात्वा यदि कश्चित् क्षणम् अपि जीवन ईश्वरप्राप्यार्थं यतते मानवः लाभवान् भवति एव। यथा-**"विषमप्यमृतं क्वचित् भवेत् अमृतं वा विषमीश्वरेच्छयाः"**।[39]**इतिसः** तु वर्तमानजीवनं तपसः श्रेयसश्च कारणं मनुते।रघुवंशे कविना प्रोक्तम्-

'**लोकन्तरसुखं पुण्यं तपोदनसमुद्भूतम् ।'**[40]

अर्थात्, तपसा दानेन चोत्पन्नं पुण्यं परलोके सुखप्रदानकारकम्।

ईश्वरानुभूतिद्वारा स्वात्मोपलब्धप्रयत्ने प्रतिजनं जीवनं साधनभूतम् इति कवेः भावना वर्त्तते।

- **गोसेवायाः महत्वम्-**

परमपूज्यायाः गोमातुः स्थानं सनातनधर्मे स्वतन्त्रम्।यथा-

---

[35]तैत्तरीयोपनिषद-1.11

[36]रघुवंशम्-11.6

[37]रघुवंशम्-10.85

[38]रघुवंशम्-8.87

[39]रघुवंशम्-8.46

[40]रघुवंशम्-1.69

'गोषु भक्तिर्भवेदस्य निर्ममे च ह्यमतिः।

जन्मान्तरेचविश्वासः स एव हिन्दुर्भविष्यति।।'[41]इति

दिलीपस्य गोसेवया पुत्रं लभतेइति वचनेन कविना भारतीयसंस्कृत्यांगोः महत्वंप्रतिपाद्यते। गां रक्षणार्थं स्वजीवनसमर्पणभावरुपं अस्माकं धर्मं संस्कृतिञ्च प्रकाशयति कविः। यथा-

**'प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।**

**निष्णायां निषीदास्यां पीताम्भसि पिवेदपः ।।'[42] इति**

पुनः गोसंचारणं सूर्यसदृशंमहीमण्डलं पवित्रयति।यथा-

**'सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।**

**प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः।।'[43] इति**

आर्यसाहित्येतिहासे एतादृशी गोभक्तिः अन्यत्र दुर्लभा।

- **पुनर्जन्मवादः-**

संसारेऽस्मिन् कर्मानुरूपं सर्वस्यऽपि जीवस्य पुनर्जन्म भवति। गीतायाम्-**"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च"**इति। यः पूर्वजन्मनि यादृशं कर्म कुरुते, सोऽस्मिन्जन्मनि तादृशं फलं लभते ।

महाकविकालिदासेन प्रोक्तम्-

**'तदलं तदपायचिन्तयाविपदुत्पत्तिमतामुपस्थिता'** ।[44]

इन्दुमत्याः एवं अजस्य चपुनर्जन्मवर्णनात् भारतीयसंस्कृतिः तत्र पस्फुटिता विद्यते।

## उपसंहारः-

महाकविकालिदासः विश्वकविः अतः काव्येऽस्मिन् सार्वकालिकः सार्वदेशिकःच धर्मसंस्कृतिविषयः प्रतिफलितः। यतो हि धर्मसंस्कृती समाजस्य मूलमेव। भारतीयसमाजस्य यत् समुज्वलरूपः महाकविकालिदासस्य रघुवंशमहाकाव्ये प्राप्यते तद् अद्यपर्यन्तं अस्माकं संस्कृतेः धर्मस्य चआदर्शः अस्ति। भौतिकविज्ञानं,कर्तव्यनिष्ठता,मानवतावादःइत्यादयः अस्माकं धर्मं संस्कृतिञ्च प्रकाशयन्ति ।

[41]विद्यामार्तण्ड

[42]रघुवंशम्-1.89

[43]रघुवंशम्-2.27

[44]रघुवंशम्-8.83

एतानि तत्वानि च उपनिबद्धानि कालिदासस्य सर्वश्रेष्ठमहाकाव्ये रघुवंशे।विनिष्टे सत्यपि महती वैभवे कालिदासकृतिषु रघुवंशे सामाजिकानि प्राणतत्वानि सुरक्षितानि सन्त्येव। भविष्यत्काले च तानि सुचिरं प्रतिष्ठास्यन्ति एव।

अतः इदं कथ्यते- **"राष्ट्रेषु भारतं रम्यंरम्यः संस्कृतवाङ्मयः।**

**तत्रत्या संस्कृतिर्रम्या धन्याः संस्कृतसाधका।।**

**मूर्धन्यः सुरभारत्याः कालिदासो महाकविः।**

**कृतित्त्वयशसस्तस्य शोभते सुरभारती।।" इति**

**कार्तज्ञनिवेदनम्-**

ममशोधप्रबन्धमार्गनिर्देशकेभ्यः सहृदयेभ्यः आचार्यः के.इ.धरणीधरन्महोदयेभ्यः(**Prof.K.E.Dharaneedharan**) हार्दिकं कार्तज्ञं समर्पयामि । यस्य प्रेरणया मार्गनिर्देशेन च मदीयशोधपत्रं लिखितम्।

**संदर्भग्रन्थसूची-**

१.महाकविकालिदासः,२०७३. रघुवंशमहाकाव्यम्,डॉकपिलदेव गिरि,चौखम्भासंस्कृत भवन, वाराणासी.

२.डॉ पि.वि काणे,१८९३. धर्मशास्त्रस्येतिहासः. डॉ जयकृष्णमिश्रः.चौखम्वा संस्कृत सिरीज,वाराणासी.

३.मनुः, १८८३.मानवधर्मशास्त्रम्. विश्वनाथनारायणं. गणपतिक्रिष्णाजीमुद्रायन्नालयम्,वम्बे.

४.डा. ब्रजकिशोरस्वाईं,२००६ . स्मृतिमीमांसा. चौखम्बासंस्कृत संस्थान, वाराणासी.

५.लक्ष्मीनारायण अग्रवाल, भारतीय सभ्यता तथा संस्कृति का विकास, वी. एन. लुणिया,प्रिन्टवैल,धूलिया गंज. इन्दौर(म.प्र.)

६.सत्यव्रतशर्मा, धर्मशास्त्र के मूल तत्त्व, न्यू भारतीय बुक कारपोरेशन,नई दिल्ली

७. शङ्कराचार्यः,२०१०. ईशादि नौ उपनिषद्.हरिकृष्णदास गोयन्दका.गीताप्रेस,गोरखपुर.

# पाणिनीयव्याकरणागमे वर्णोच्चारणप्रयत्नविवेकः

डॉ.जयप्रकाशसाहु
EE,VSSUT, Burla, Sambalpur,
Pin-768017(Odisha)

"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति प्रसिद्धा गभिरार्थवती लोकोक्तिरियं पाणिनीयव्याकरणस्य सर्वजनीनं महत्वं प्रतिपादयति।वस्तुतः पाणिनेरष्टाध्यायी ग्रन्थो वैज्ञानिकविवेचनया निकषोपलो विद्यते ।पाणिनीय - अष्टाध्यायी -( i) सूत्रक्रमानुसारिणी ( ii ) प्रक्रियाक्रमानुसारिणी (शब्दरूप- धातुरुपादि - साधनोपयोगि - सन्ध्यादिक्रमेण ) चेति द्विधा विभज्यते। भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी किञ्च वरदाराजाचार्य -विरचित -लघुसिद्धान्तकौमुदी प्रक्रियाक्रमानुसारिणी वर्तते।

**सन्दर्भः-** भट्टोजिदीक्षितविरचित- सिद्धान्तकौमुद्यां संज्ञाप्रकरणे ' **तुल्यास्य प्रयत्नं सवर्णम्** ' इति सूत्ररत्नम् अवधार्यते। सूत्रव्याख्यानवेलायां सूत्रवृत्तिः, अकारादीनाम् उच्चारणस्थानानि उच्यन्ते ,ततः प्रयत्नविचारः क्रियते । भट्टोजिदीक्षितशिष्यः वरदराजः सिद्धान्तकौमुदीसूत्राणि न्यूनीकृत्य सूत्रवृत्यादीनि अविकलरूपेण लघुसिद्धान्तकौमुद्यां सन्निवेशयति। आभ्यन्तरप्रयत्नः चतुर्धा इति भट्टोजिदीक्षितः, वरदराजस्तु पञ्चधा इति विवेचयति।

**स्पष्टीकरणम्-** विश्वस्मिन् विश्वे मनुष्य एव एतादृशः प्राणी वर्तते यस्य कण्ठे अनन्त - ध्वनीनाम् उच्चारणसामर्थ्यं वर्तते इत्यत्र नास्ति कस्यापि संशितिलवः। एतेषां ध्वनीनां वर्गीकरणे आधारत्रयं स्वीक्रियते।तद् यथा-( i ) स्थानं ,(ii ) यत्नः(प्रयत्नः),(iii ) करणं (इन्द्रियं) चेति । भाषाविज्ञानिनः एनं वर्गीकरणम् आङ्ग्ले **classifications of sounds** नाम्ना चर्चन्ति।

**स्थानम्**- कायाग्निना प्रेरितः प्राणवायुः उरःस्थले ऊर्ध्वं सञ्चरन् मुखे आगते सति येन कण्ठताल्वादिध्वनियन्त्रेण वाधितस्सन् ध्वनिं जनयति,तद् स्थानं तस्य वर्णस्य उच्चारणस्थानम् इत्युच्यते। यथा - ' **अ** ' इत्यस्य उच्चारणं कण्ठात् भवति। अत अकारस्य उच्चारणस्थानं कण्ठः भवति । विषयेऽस्मिन् विशदविवेचनं वै.सिद्धान्तकौमुद्यां लघुसिद्धान्तकौमुद्यां च क्रियते।

**प्रयत्नविचारः-** वर्णोच्चारणवेलायां मुखविवरम् आरभ्य कण्ठपर्यन्तं यः प्रयासः क्रियते, सः यत्नः प्रयत्नो वा अभिधीयते। यत्नोऽयं मुखस्य अन्तः बहिश्च जायते इति प्रकारद्वयम् आभन्तर - बाह्यश्चेति । पाणिनीयशिक्षायां तु आभ्यन्तरयत्नः - बाह्ययत्नश्च इत्थं स्पष्टीक्रियते ----------

**स्वरतः कालतः स्थानात्**

**प्रयत्नानुप्रदानतः।**

**इति वर्णविदः प्राहुः**

**निपुणं तं निबोधतः।।** **(पा.शि.१६)**

## प्रयत्नानुप्रदानम् (यत्नः/प्रयत्नः)




( **आवश्यकता -** आभ्यन्तरप्रयत्नज्ञानस्य उपयोगिता सन्धिप्रकरणे सवर्णसञ्ज्ञायां भवति ।)

(**आवश्यकता -** बाह्यप्रयत्नज्ञानस्य उप - योगिता वर्णेषु अत्यन्तसामिप्यता विचारसन्दर्भे भवति।

- ध्वनीनां स्थानप्रयत्नविवेचनं ध्वनिविज्ञानदृष्ट्या अति महत्त्वपूर्णम् । "आस्यभववायुव्यापाराः तत्प्रयोजकव्यापारा आत्मनिष्ठा वा व्यापारा यत्ना **आभ्यन्तरा** इत्युच्यन्ते ।" - **लक्ष्मीटीका - वै.सि. कौमुदी ।**
- ध्वनेः उत्पन्नात् प्राक् वागिन्द्रियेण कृतः प्रयत्नः आभ्यन्तरः इत्युच्यते । लघुसिद्धान्तकौमुद्यानुसारम् आभ्यन्तरप्रयत्नः पञ्चधा विभज्यते।

## आभ्यन्तरप्रयत्नः




1) **स्पृष्टं प्रयत्नं स्पर्शानां** - कादयो मावसानाः स्पर्शाः। वर्गीयव्यंजनवर्णाः ककारतः मकारं यावत् पञ्चविंशतिवर्णाः स्पर्शसंज्ञकाः भवन्ति । एतेषां स्पर्शानां स्पृष्टप्रयत्नसंज्ञा भवति ।

**विवरणम्**- स्पर्शसंज्ञकवर्णस्य उच्चारणेन साकं वागिन्द्रियेण उच्चारणस्थानस्य स्पर्शः भवतीति स्पर्शसंज्ञा यस्यार्थं भजते। उदाहरणं यथा - ककारस्य उच्चारणेन साकं वागिन्द्रियेण कण्ठस्थानस्य स्पर्शो जायते।

2) **ईषत्स्पृष्टमन्तस्थानम्** - यणोऽन्तस्थाः। यण् प्रत्याहारः(य्, व् , र्, ल् ) ईषत्स्पृष्टसंज्ञको भवतीति पूर्वोक्तवाक्यार्थः घटते।

**विवरणम्**- ईषत्स्पृष्टसंज्ञकवर्णस्य उच्चारणवेलायां वागिन्द्रियम् ईषत् पीहितं भवतीति सार्थकाभिधेयः ईषत्स्पृष्टमिति।

3) **ईषद्विवृतम् उष्मणाम्** - शल ऊष्माणः। उष्मसंज्ञकः शल्प्रत्याहारः(श्,ष्,सः,ह्) ईषद्विवृत प्रयत्नवान् भवति।

**विवरणम्**- ईषद्विवृतसञ्ज्ञकवर्णस्य उच्चारणवेलायां वागिन्द्रीयाणि ईषदुद्घाटितानि भवन्ति।

4) **विवृतं स्वराणाम्** - अचः स्वराः। अच् प्रत्याहारः (अ,आ,इ,ई,उ,ऊ,ऋ,ऌ,ए,ओ,ऐ,औ) विवृतप्रयत्नवान् भवति।

**विवरणम्**- स्वरवर्णस्य उच्चारणकाले वागिन्द्रियम् उद्घाटितं भवति।विवृतम् उद्घाटितम्।

5) **ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्** - ह्रस्वः अकारः वाक् व्यवहारसमये (वार्त्तलापवेलायां) संवृतप्रयत्नवान् भवति।

**विवरणम्**- शास्त्रीयप्रक्रियाभिः परिनिष्ठितानां रामः,कृष्णः इत्यादिशब्दानां प्रयोगे कृतैव ह्रस्वस्य अवर्णस्य संवृतत्वम् इत्यर्थः ।( **वालमनोरमा टीका ,वै.सि. कौमुदी श्री वासुदेवदीक्षितः** )

6) **प्रक्रियादशायां तु विवृतमेव** :-

**विवरणम्**- शास्त्रीयकार्यवृत्तिसमये तु ह्रस्वस्य अवर्णस्य विवृतत्वमेव इत्यर्थः।**(वै.सि.कौमुदी ,**

**वालमनोरमा टीका)**

गुरुमुखात् यः व्याकरणम् अनधीत्य लघुसिद्धान्तकौमुदीं पाठयति,सः अवैयाकरणः विवृतमेव इति पदस्यार्थः=विवरणं दत्तमेव इति व्याख्याति । वैयाकरणस्तु विवृतप्रयत्नवान् भवति इति व्याख्याति।

## आभ्यन्तर - यत्न - बोधक - चक्रम्

| स्पृष्टम् | ईषत्स्पृष्टम् | ईषद्विवृतम् | विवृतम् | संवृतम् |
|---|---|---|---|---|
| क् ख् ग् घ् ङ्<br>च् छ् ज् झ् ञ्<br>ट् ठ् ड् ढ् ण्<br>त् थ् द् ध् न्<br>प् फ् ब् भ् म् | य् र् ल् व् | श् ष् स् ह् | अ आ इ ई उ ऊ<br>ऋ ऌ ए ऐ ओ औ | ह्रस्वस्य वर्णस्य<br>उच्चारणकाले<br>केवलम् |

- मुखादधस्थे व्यापारास्ते तत्प्रयोयका वा बाह्यप्रयत्नाः इत्युच्यन्ते। वर्णानाम् उच्चारणे मुखस्य बाह्यप्रयासः बाह्यप्रयत्नः इत्युच्यते। बाह्यप्रयत्नस्तु एकादशधा -

## बाह्यप्रयत्नः



| | | | | |
|---|---|---|---|---|
| क्,ख्,ख्,घ्,ङ्<br>च्,ख्,ज्,झ्,ञ्<br>ट्,ठ्,ड्,ढ्,ण्<br>त्,थ्,द्,ध्,न्<br>प्,फ्,ब्,भ्,म् | स्पर्शः | कण्ठः<br>तालु<br>मुर्धा<br>दन्तः<br>ओष्ठः | स्पृष्टः | क्,च्,ट्,त्,प्,ख्,ख्,ठ्,थ्<br>फ् ,श्,ष्,स्<br>विवारः, स्वासः,अघोषः |
| य् ,व्, र्,ल्<br>(यण्) | अन्तःस्थः | य् = तालु<br>र् = मूर्धा<br>ल्= दन्तः<br>व्= दन्तोष्ठः | ईषद्विवृतः | ग्,ज्,ड्,द्,ब्<br>घ् ,झ् , ढ् ,ध् ,भ्<br>संवारः,नादः,घोषः |
| श्,ष्,स्,ह्<br>शल् | उष्माः | श्=तालु<br>स्=दन्तः<br>ष्=मूर्धा<br>ह्= कण्ठः | ईषद्विवृतः | अ.प्रा.-क्,ग्,ङ्,च्,ज्,<br>ञ् ,ट् ,ड् ,ण् ,त्,द्,न्,प्<br>ब्,म्। म.प्रा.-ख्,घ्,छ्<br>झ् ,ठ् ,ढ् ,थ्,ध्,फ्,भ् |

## उपसंहारः-

अत्र आभ्यन्तरप्रयत्न - बाह्यप्रयत्नश्च विस्तृततया विविच्य अभिज्ञायते।पाणिनीरेव विश्वस्य सर्वोत्कृष्टः वैयाकरणः । अष्टाध्याय्यां भाषाशास्त्र - सम्बद्धाः सर्वेऽपि विषयाः समासतः प्राप्यन्ते,यतः ध्वनीनां स्थानप्रयत्नविवेचनं ध्वनिविज्ञानदृष्ट्या अतिमहत्त्वपूर्णम् । एलन् महोदयस्य कथनम् अत्र स्वारस्यं भजते -

Our phonetic categories and terminology owe more than is perhaps generally realised to the influence of Sanskrit phoneticians.

( **phonetics in ancient India ,W.S.Allen, P.3**)

i) **विवारः , स्वासः , अघोषः= खर् प्रत्याहारः**

- एतेषां वर्णानाम् उच्चारणकाले केवलं स्वासस्य योगदानं भवतीति स्वाससंज्ञकाः एते। कण्ठः उद्घाटितस्सन् तिष्ठतीति विवारसंज्ञकाः अपि भवन्तीति ।

ii) **संवारः, नादः, घोषः= हश् प्रत्याहारः**

- एतेषां वर्णानाम् उच्चारणवेलायां नादस्य योगदानं भवति तथा कण्ठः पीहितं भवति , अतः संवारः,नादसंज्ञा च एतेषाम् ।

iii) **अल्पप्राणः= वर्गाणां प्रथम - तृतीय - पञ्चमवर्णाः यण् प्रत्याहारश्च**

- एतेषां वर्णानाम् उच्चारणसमये अल्पः प्राणवायुः प्रयोगः भवतीति अल्पप्राणः सार्थकसंज्ञा ।

iv) **महाप्राणः= वर्गाणां द्वितीय - चतुर्थवर्णाः शल् प्रत्याहारश्च**

- एतेषां वर्णानाम् उच्चारणकाले अधिकः प्राणवायुः प्रयुज्यते इति सार्थकाभिधेयः महाप्राणेति।

v) **उदात्तः, अनुदात्तः,स्वरितः= स्वराः**

- वर्णानाम् उच्चारणे ध्वनिः घोषः इत्युच्यते । उच्चारणे ध्वनेः अभावे सति आघोषः कथ्यते ।

## आभ्यन्तरयत्न - बाह्ययत्नयोः बोधक - चक्रम्

| वर्णः | नाम | उच्चारणस्थानम् | आभ्यन्तरायत्नः | बाह्ययत्नः |
|---|---|---|---|---|
| **अच्**<br>अ,आ,इ,ई,उ,ऊ,ऋ,<br>ए,ऐ,ओ,औ | **स्वराः** | अ,आ= कण्ठः<br>इ,ई=तालु<br>ऊ,ऊ=ओष्ठः<br>ऋ=मूर्धा<br>ऌ=दन्तः<br>ए,ऐ= कण्ठतालु<br>ओ,औ= कण्ठोष्ठम् | अच्= विवृतम् | अच्=उदात्तः,अनुदात्तः<br>स्वरितः |

**<u>अनुशीलितग्रन्थाः</u>**

1) वैयाकरणसिद्धान्तकौमुदी - लेखकः (भट्टोजीदीक्षितः)

(i) लक्ष्मी टीका

(ii) वालमनोरमा टीका

(iii) तत्त्वबोधिनी

2) लघुसिद्धान्तकौमुदी - लेखकः (वरदराजाचार्यः)

(i) भौमी व्याख्या

(ii)श्रीधरमुखोल्लासिनीव्याख्या

(iii)चन्द्रकला व्याख्या

(iv) श्रीधरी टीका

(v)प्रकाशिका व्याख्या

3) श्लोकसिद्धान्तकौमुदी - लेखकः (सुरेश झा)

4) पाणिनीयशिक्षा, शाम्भवीव्याख्या (डॉ. शम्भुदयाल पाण्डे एवं डॉ सत्यप्रकाश दुवे)

5) कौमुदीकल्पलतिका - लेखकः(शुक्लश्रीवेणीमाधवशास्त्री)

6) भाषाविज्ञान एवं भाषाशास्त्र- लेखकः (डॉ. कपिलदेव द्विवेदी)

7) संस्कृतज्ञाननिधि -लेखकः (डॉ. रामविलास चौधुरी एवं डॉ.ध्रुवकुमारी चौधरी)

# सत्सङ्गदीक्षा

डा. दिनेश पां. रसाळ:
सहयकप्राध्यापकः, संस्कृत-प्राकृतभाषाविभागः,
सावित्रीबाई फुले पुणे विद्यापीठम्, पुणे

'अध्यात्मविद्या विद्यानाम्' इति भगवदुक्तिसारं विज्ञाय सर्वेऽपि ऋषयः अध्यात्मज्ञानमेवाश्रियन्ते। 'द्वे विद्ये वेदितव्य' इति श्रुतिरपि विद्यायाः द्वैविध्यं प्रतिपाद्य अध्यात्मविद्यैव परविद्या इति उद्घोषयति। सेयमध्यात्मविद्या, तत्स्वरूपं, तत्प्रभावश्चैतत्सर्वमपि परीक्ष्य वेदान्तविज्ञानसुनिश्चितार्थाः महर्षयः मोक्षप्रदायिनीमध्यात्मविद्यामधिगन्तुं शास्त्रविस्तारमकुर्वन्।अस्यामेव अद्यात्मविद्याशास्त्रपरम्परायां श्रीस्वामीनारायणाचार्यैः प्रस्थापितः स्वामीनारायणसम्प्रदायः अन्यतमः वर्तते। सहजानन्दस्वामिनः जगदुद्धारार्थं वेदान्तस्य अभिनवं तथा परिपक्वं च पन्थानं स्वामीनारायणसम्प्रदायमाध्यमेन उपस्थापयामासुः। अस्य सम्प्रदायस्य सिद्धान्तप्रकटनाय आचार्यैः स्वामीनारायणमतानुसारं नैके ग्रन्थाः रचिताः।तत्र सत्सङ्गदीक्षा इति स्वामीनारायणसम्प्रदायस्य अक्षरपुरुषोत्तमसंहितान्तर्गतं अल्पाक्षरं असन्दिग्धं च ग्रन्थरत्नं वर्तते। भगवतः स्वामीनारायणस्य उत्तराधिकारिणः आचार्याः प्रकटब्रह्मस्वरूपाः श्री महन्तस्वामिनः सत्सङ्गीक्षा इति ग्रन्थं गुर्जरभाषया व्यरचयन्। अत्र स्वामीनारायणाचार्यैः प्रबोधिता आज्ञा तथा उपासनासिद्धान्ताः विशेषत्वेन चर्चिताः सन्ति। ग्रन्थस्य विषयसौष्ठवं विज्ञाय ग्रन्थोऽयं न केवलं गुर्जरभाषाविदामपि तु सर्वेषामपि उपकाराय भवतु इति धिया आचार्याः भद्रेशदासस्वामीवर्याः अमुं गुर्जरग्रन्थं देववाण्या अनूदितवन्तः।अल्पेनैव कालेन ग्रन्थोऽयं बुधान् रञ्जयन् संस्कृतसाहित्ये राराज्यते।

यद्यपि सत्सङ्गदीक्षा सम्प्रदायसिद्धान्तप्रतिपिपादयिषया रचितः ग्रन्थः वर्तते तथापि ग्रन्थस्थविषयावलोकनेन नूनमिदं स्पष्टं भवति यत् ग्रन्थोऽयं न केवलं सम्प्रदायिकानुयायिनां कृते अपि तु सकलल्लोकस्यैव उद्धाराय एवं समाजस्य सर्वाङ्गीणविकासाय च उपयुक्तः वर्तते।ग्रन्थेऽस्मिन्

सम्प्रदायिकसिद्धान्तैः सह मनुष्यजीवनस्य उत्कृष्टता कथं सम्पादनीया, अस्माकमाचरणं शुद्धं कथं भवेत्, जीवनस्य परमं लक्ष्यं कथं वा सम्पादनीयमिति नैके विषयाः प्रतिपादिताः सन्ति। अतः ग्रन्थोऽयं न केवलं दार्शनिकमेव तत्त्वमुपदिशति अपि तु तेन सह सामाजिक-नैतिक-आध्यात्मिक-पारिवारिक-शैक्षिकादीनि नैकानि मानवीयमूल्यानि उपदिश्य समग्रं मानवसमुदायमेव उपकरोति। ग्रन्थस्थं विषयवैविध्यं महत्त्वं च परीशील्य ग्रन्थोऽयं भगवद्गीतासादृश्यं भजते इति नातिशयोक्तिः।

भगवान् श्रीकृष्णः शोकमोहाभ्यामभिभूतविवेकविज्ञानमर्जुनं समस्तवेदार्थस्य सारं सप्तशतश्लोकेषु उपदिष्टवान्। शोकमोहाभ्यां हि विवेकज्ञानस्य लोपः जायते विवेकज्ञानस्य लोपे सति मनुष्यः स्वधर्मं, स्वभावं च परित्यज्य अधर्ममेवाचरति तथा भ्रष्टमेव जीवनं जीवति। एवं शोकमोहाभ्यां विवेकनाशे मानवस्य सर्वनाशः भवति। अतः विवेकज्ञाननाशकयोः शोकमोहयोः नाश एव मानवजीवनस्य परमकल्याणावाप्तेः द्वारम्। तदिदं रहस्यं भगवान् श्रीकृष्णः गीताशास्त्रेण उद्घाट्य प्रत्यपादयन्। सत्सङ्गदीक्षा इत्ययं ग्रन्थः भगवद्गीतायाः उपर्युक्तं प्रयोजनमलम्ब्यैव प्रवर्तते अतः सत्सङ्गदीक्षा इति ग्रन्थः आधुनिकगीताशास्त्रमिति कथने नातिशयोक्तिः इति मे मतिः।

स्वामीनारायणसम्प्रदायः जीवेषु भेदं न पश्यति। मुक्तेः, अध्यात्मविद्यायाश्च सर्वे जीवा अधिकारिणः सन्ति इति आचार्यमतम्। जातिभेदं, वर्णभेदं, लिङ्गभेदं वा अत्र नाङ्गीकुर्वन्ति आचार्याः। सत्सङ्गदीक्षा इति ग्रन्थः इमामेव समानतां प्रतिपादयन् ग्रन्थस्य अधिकारिणमेवं दर्शयति यत्-

मनुष्यरूपेण लब्धजन्मा प्रत्येकं जीवः सम्प्रदायस्य तथा सत्सङ्गीक्षाग्रन्थस्य अधिकारि वर्तते । प्रत्येकं मनुष्यस्य अत्र सुखसम्पादने, ब्रह्मविद्यायां, सत्सङ्गे तथा शिक्षायाम् अधिकारः वर्तते। अत एव अधिकारिवर्णनावसरे 'सर्वे अधिकारिणः' इति विशेषरूपेण उच्यते।

**सत्संगाधिकृतः सर्वे सर्वे सुखाधिकारिणः। सर्वेऽर्हा ब्रह्मविद्यायां नार्यश्चैव नरास्तथा।**
**सर्ववर्णगता सर्वा नार्यः सर्वे नरास्तथा। सत्संगे ब्रह्मविद्यायां मोक्षे सदाधिकारिणः।**
**जात्या नैव महान कोऽपि नैव न्यूनस्तथा यतः। जात्या क्लेशो न कर्तव्यः सुखं सत्संगमाचरेत।**[1]

जीवस्य भगवत्प्राप्तीति सकलशास्त्रोक्तं परमं लक्ष्यमस्ति । तदेव लक्ष्यमत्रापि स्वामीनारायणसम्प्रदाये उच्यते। शङ्कराचार्या: विवेकचूडामणौ जीवानां भगवत्प्राप्तीति लक्ष्यमुक्त्वा तादृशभगवत्प्राप्त्यर्थं दुर्लभं मार्गत्रयं प्रतिपादयन्ति।

**दुर्लभं त्रयमेवैतत् दैवानुग्रहहेतुकम्**

**मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रय:।**[2]

यद्यपि भगवत्प्राप्तीति सकलशास्त्रोक्तं परमं लक्ष्यमस्ति तथापि तादृशभगवत्प्राप्त्यर्थं मनुष्यत्वं, मुमुक्षुत्वं तथा महापुरुषसंश्रय इत्येषां त्रयाणां प्राप्तावेव भगवत्प्राप्ति: सम्भवति इति सिद्धान्त:। तत्रापि आद्यं दुर्लभं तत्त्वमस्ति मनुष्यत्वमिति। मनुष्यत्वमिति न केवलं मानवशरीरमिति अर्थ: अपि तु मानवीयसंस्कारसहित: मनुष्य: इत्यर्थ:।मानवीयसंस्काराणां भगवत्प्राप्तौ महद्योगदानमस्ति। तादृशसंस्कारसहितस्यैव जीवस्य मोक्षे अधिकार: वर्तते।अत: मानवीयसंस्कारस्यास्ति प्राधान्यम्। ग्रन्थोऽयं मनुष्यं मानवीयसंस्कारान् तथैव शास्त्रोपदिष्टं शरीरस्य मुक्तिसाधनत्वं बोधयति।

**देहोऽयं साधनं मुक्तेर्न भोगमात्रसाधनम्। दुर्लभो नश्वरश्चायं वारं वारं न लभ्यते।**[3]

यद्यपि शरीरं भोगायतनमित्युच्यते तथापि न केवलं भोगायतनमेव अपि तु मुक्तिसाधनमप्यस्ति। इदं मुक्तिसाधनीभूतं शरीरमत्यन्तं दुर्लभमिति शंकराचार्या: कथयन्ति। तदेव शास्त्रसम्मतम् आचार्योपदिष्टं शरीरस्य दौर्लभ्यमत्र प्रतिपाद्य तस्य नश्वरत्वमपि संसूच्य शीघ्रातिशीघ्रं मनुष्य: यथा मोक्षमार्गमनुसरेत् तथा बोधयति। तत्र च शरीरस्य प्रयोजनमेवमुच्यते –

**लौकिको व्यवहारस्तु देहनिर्वाहहेतुक:। नैव स परमं लक्ष्यम् अस्य मनुष्यजन्मन:।**[4]

केवलं देहस्य निर्वहणमेव शरीरस्य कार्यं वा प्रयोजनं वा नास्ति अपि तु अनेन शरीरेण साधनीयं प्रयोजनं तु भिन्नमेवास्ति। तदेव शरीरस्य परमं प्रयोजनम्। तत्प्रयोजनं बोधयति ग्रन्थ: -

**नाशाय सर्वदोषाणां ब्रह्मस्थितेरवाप्तये।कर्तुं भगवतो भक्तिम् अस्य देहस्य लम्भनम्।**[5]

सकलदोषाणां निवृत्ति: ब्रह्मस्थिते: प्राप्त्यर्थं च मुख्यं यद् साधनमुच्यते तत् साधनं भक्तिरेव।

परम पुरुषार्थ प्राप्त्यर्थं अपेक्षितां भगवद्भक्तिं कर्तुमेव शरीरस्य प्राप्तिं इत्यस्माभि: ग्रन्थेण अनेन ज्ञातुं शक्यते। ब्रह्मस्थितिप्रदायिका भगवद्भक्ति: कथं कुत्र च लब्धव्या इत्यत्र उच्यते –

**सर्वमिदं हि सत्संगाल्लभ्यते निश्चितं जनै:।अत: सदैव सत्संग: करणीयो मुमुक्षुभि:।**

तथैव देशेऽस्मिन् यद् कर्म अस्माभि क्रियते उद्योगश्च क्रियते तत् सर्वमपि निष्ठया स्वधर्माचरणमिति विचिन्त्य कर्तव्यम्। भ्रष्टाचारः सम्प्रति सर्वत्रापि प्रसृतः महान् रोगः वर्तते। अनेनैव देशस्य नैकाः समस्याः प्रादुर्भूताः सन्ति। उत्तमनागरिकेण देशस्य प्रतिष्ठारक्षणाय नीत्या व्यवहारः कर्तव्यः। सेवाभावनया कर्म कर्तव्यम्। तत्र उत्कोचादि भ्रष्टाचरणं सर्वथा त्याज्यमेव।

**लुंचा कदापि न ग्राह्या कैश्चिदपि जनैरिह। नैव कार्यो व्ययो व्यर्थः कार्यो स्वायानुसारतः॥**
**कर्तव्यं लेखनं सम्यक् स्वस्यायस्य व्ययस्य च। नियमाननुसृत्यैव प्रशासनकृतान् सदा॥**

**स्वोपयोगानुसारेण प्रकुर्यात् संग्रहं गृही। अन्नद्रव्यधनादीनां कालशक्त्यानुसारतः॥**[10]

प्रत्येकं जनः स्वकीयं आयव्ययादिकं परीक्षेत् तदनुसारमेव जीवनं च यापयेत्। अल्पाययुक्तेन जनेन अधिकव्ययः क्रियते चेत् तत्पूरणार्थं तेन भ्रष्टाचरणं कर्तव्यं भवति। तेन च देशे भ्रष्टाचारस्य पिरसारः भवति। भ्रष्टाचारस्तु देशं रसातलं नयति। देशस्य सर्वतः हानिः जायते। अतः कदापि लुंचा न ग्राह्या एवं च स्वायानुसारमेव व्ययः कर्तव्यः इति उपदेशः अत्र कृतः।
सम्प्रति समाजे आत्महत्या अत्यन्तं वर्धिता वर्तते। परिस्थित्या खिन्नाः जनाः तस्माद् बहिरागन्तुमशक्ताः सन्तः आत्महत्यामेव कुर्वन्ति। अस्माकं शास्त्रं आत्महत्यां महत्पातकमिति चिन्तयति। तमेव उपदेशं सत्संगदीक्षा ददाति।

**आत्मघातोऽपि हिंसैव न कार्योऽतः कदाचन। पतनगलबन्धादैर्विषभक्षादिभिस्तथा।**
**दुःखलज्जाभयक्रोधः रोगाद्यापत्तिकारणात्। धर्मार्थमपि कश्चिद्धि हन्यान्न स्वं न वा परम्।**[11]

एतेन विचारेण आत्मघातः हिंसैव इति ग्रन्थकारः सूचयति। दुःखेन, लज्जया, भयेन, क्रोधेन अथवा रोगेण पीडितः कोऽपि जनः आत्मघातं म कुर्यात्। एवमेव धर्मस्य नाम्नापि सम्प्रति लोके जनाः अन्यान् घ्नन्ति अथवा स्वात्मानं हन्ति। उभयमपि कर्म सर्वथा त्याज्यमेव। लोके न कोऽपि धर्मः आत्मघातं स्तौति। अतः उग्रविचारेण स्वकीयं जीवनं अथवा अन्यस्य जीवनं न नाशयेत् इत्यंय उपदेशः अत्र विहितः।

**एवं हि सत्संगस्य महत्त्वमत्र प्रतिपाद्यते। तर्हि अत्र सत्संग: नाम किमिति पृच्छायामुच्यते-**

**सत्यस्य स्वात्मन: संग: सत्यस्य परमात्मन:।सत्यस्य च गुरो: संग: सच्छास्त्राणां तथैव च॥**

**विज्ञातव्यमिदं सत्यं सत्संगस्य हि लक्षणं। कुर्वन्नेवंविध दिव्यं सत्संगं स्यात् सुखी जन:॥** [6]

एवं रूपेण सत्संगं कुर्वन् जीव: सुखमाप्नोति इति प्रतिपाद्यते। सत्संग: मानवं पापात् निवारयति तथा सत्कर्मणि प्रेरयति। सा च प्रेरणा कथं भवति इति ग्रन्थाध्यनेन प्रत्यक्षं भवति। भगवत्प्राप्त्यर्थं प्रथमं सदाचरणसंपन्नं चरितं भवेत्। स च सदाचार: तथा मनुष्यधर्मा: अत्र उपदिष्टा: सन्ति।

शरीरमाद्यं खलु धर्मसाधनम् अंत: मुक्तिद्वारभूतं इदं शरीरं सर्वैरपि रक्षणीयमेव। अस्य नाश: यथा भवेत् तथा नाचरणीयम्। तत्रादौ व्यसनस्य दुष्प्रभावमुक्त्वा तस्मात् निवारयति ग्रन्थ:।

**सर्वं दुर्व्यसनं त्याज्यं सर्वै: सत्संगिभिस्सदा।अनेकरोगदुखानां कारणं व्यसनं यत:॥**

**सुराभंगातमालादि यद् यद् भवेद्धि मादकम्।तद् भक्षयेत् पिबेन्नैव धूम्रपानमपि त्यजेत्॥** [7]

एवमेव प्रत्येकं मनुष्य: उत्तमं जीवनं कथं व्यवहरेत् इत्यत्र उच्यते।

**शुद्धि: सर्वविधा पाल्या बाह्या चाभ्यान्तरा सदा।शुद्धिप्रियं प्रसीदेच्च शुद्धिमति जने हरि:॥**

**सत्संगिभि: प्रबोद्धव्यं पूर्वं सूर्योदयात् सदा।तत: स्नानदिकं कृत्वा धर्तव्यं शुद्धवस्त्रकम्॥**

**स्वधर्मं पालयेन्नित्यं परधर्म् परित्यजेत्। स्वधर्मो भगवद्गुर्वोराज्ञाया: परिपालनम्॥**

**विवाद: कलहो वापि नैव कार्यो कदाचन। वर्तितव्यं विवेकेन रक्ष्या शान्तिश्च सर्वदा॥** [8]

इति बहुभि: श्लोकै: मानवीय सद्गुणान् बोधयति ग्रन्थकार:।

सत्संगदीक्षा ग्रन्थः आध्यात्मिक- सासांरिक- नैतिक सद्गुणैः सह राष्ट्रभक्तिगुणानपि बोधयति। यद्यपि अयं वेदांतग्रन्थः तथापि अत्र सज्जनै राष्ट्रविषये कथं भवितव्यमित्यपि सूचयति।

**यद्देशे हि स्ववासः स्यात् तद्देशनियमाश्च ये।सर्वथा पालनीयास्ते तत्प्रशासनसंमतः॥**

**संजाते देशकालादेर्वैपरीत्ये तु धैर्यतः।अन्तर्भजेत् सानन्दं अक्षरपुरुषोत्तमम्॥** [9]

अत्र उत्तमः नागरिकः कथं भवेत् एतद्विषये उक्तमस्ति यत् सर्वैरपि देशस्य प्रतिष्ठा रक्षणीया। प्रशासनेन निर्मिताः नियमाः सर्वथा पालनीया एव। यदि वयं देशस्य उत्तमनागरिकाः भवितुं नार्हामः तर्हि उत्तम वेदान्तानुयायी भवितुं न शक्नुमः इति अत्र उच्यते।

एवं प्रकारेण उत्तमसमाजस्य निर्माणार्थं उत्तम मनुष्यस्य निर्माणं भवेत्। मनुष्याणां समष्टिरेव समाजः भवति। अतः समाजस्य उन्नतये तद्व्यष्टिभूतस्य मनुष्यस्य चिन्तनं तथा व्यवहारः उन्नतिं गच्छेत् इति मनसि निधाय सत्संगदीक्षा इत्यस्मिन् ग्रन्थे ग्रन्थकारः सदाचारसंपन्नता कथं भवेत्, कथं च सद्गुणसंपत् रक्षणीया, कथं च वर्धिता भवेत् इति विषये सविस्तरं प्रतिपादयति। एतादृशग्रन्थाध्यनेन अवश्यमेव समाजस्य चिन्तनपरिवर्तनं भवितुमर्हति। भगवत्पादशंकराचार्यैं दैवानुग्रहहेतुकं रत्नत्रयं उल्लिखितमस्ति। तत्र प्रथमं रत्नं मनुष्यत्वमेवोक्तम्। यदि मनुष्यत्वमस्ति तदैव दैवानुग्रहस्य योग्यता जीवे भवति। केवलं मनुष्यशरीरं प्राप्यापि केचन मृगाश्चरन्ति इति सुभाषितं वर्तते। अतः मनुष्यशरीरेण साकं मनुष्यत्वं नाम मानवीयधर्माः अपि भवेयुः। ते च धर्माः ग्रन्थेऽस्मिन् अत्यन्तं सरलया शैल्या बोधिताः सन्ति। तेषु केषांचन धर्माणामत्र स्थालीपुलाकन्यायेन विस्तरभयात् चिन्तनं मया कृतमस्ति। वस्तुत: सर्वोऽपि ग्रन्थ: चिन्तनयोग्य: वर्तते। एतादृश: ग्रन्थोऽयं मानवसमाजस्य उन्नत्यर्थं सर्वदा सहायको भवति इति मे मतिः।

सन्दर्भा:


1. सत्संगदीक्षा, page 4
2. विवेकचूडामणि:, page 2
3. सत्संगदीक्षा, page 1
4. तत्रैव, page 1
5. तत्रैव, page 2
6. तत्रैव page 3
7. तत्रैव page 9
8. तत्रैव page 17
9. तत्रैव page 68
10. तत्रैव page 64
11. तत्रैव page 14

सान्दर्भिकग्रन्थसूचिः -

1. सत्संगदीक्षा, ग्रन्थकारः- प्रकट्ब्रह्मस्वरूप श्रीमहन्त स्वामीमहाराजः, संस्कृतानुवादकः महामहोपाध्यायः आचार्यभद्रेशदासः, स्वामीनारायण अक्षरपीठम्, अहमदाबाद, 2020

2. विवेकचूडामणिः,आद्यशंकराचार्यविरचितम्, सम्पादकः स्वामी माधवानन्दः, अद्वैताश्रमः, मायावती,1921

# शब्दशक्तिस्वरूपविमर्शः

शिवदत्तत्रिपाठी
शोधच्छात्रः,
संस्कृतविद्याधर्मविज्ञानसङ्कायान्तर्गतव्याकरणविभागे
का. हि. वि.वि, वाराणसी

**सर्वविकल्पशून्यत्वाच्छब्दब्रह्मेति शब्दितम्**
**लोकव्यवहृतेः सिद्धौ पदवाक्यादिभाग्भवेत् ।।१।।**

**यस्माज्जातमिदं सर्वं व्यवहारात्मकं जगत् ।**
**यत्र स्थितं लयं याति शब्दब्रह्म नमाम्यहम् ।।२।।**

**शब्दसम्बन्धितोऽर्थो व्यवहाराय युज्यते ।**
**अर्थसंभिन्नशब्दोऽसौ जगत्कारणमुच्यते।।३।।**

**शब्दार्थसङ्गतिर्लोके शब्दशक्तिर्मताबुधैः ।**
**तस्याः स्वरूपबोधाय लेखो निबध्यते मया ।।४।।**

**शास्त्रान्तरेषु यद्रूपं यथाश्रुतं यथामति ।**
**शास्त्रसम्मतमेवात्र शब्दशक्तिं वदाम्यहम् ।।५।।**

अर्थात्मकलोकव्यवहारस्य ज्ञातविषयकत्वात् ज्ञानं व्यवहारप्रवर्तकमुच्यते। व्यवहारो द्विविधः सम्वादिप्रवृत्तिरूपः, विसम्वादिप्रवृत्तिरूपश्च। अन्यं ज्ञात्वाऽन्यविषयकप्रवृत्तिर्विसम्वादिव्यवहारः। यथा इदं रजतमित्यत्र शुक्तिं ज्ञात्वा रजतविषयकप्रवृत्तिः। तस्याः प्रवृत्तेर्जनकं ज्ञानं भ्रमः। यद्विषयकज्ञानं तद्विषयकप्रवृत्तिः सम्वादिप्रवृत्तिरूपो व्यवहारः, तस्य प्रवर्तकं ज्ञानं प्रमा। यथा रजतं ज्ञात्वा रजतविषयकप्रवृत्तिरिति। तच्च ज्ञानं शब्दार्थसंसर्गजन्यमस्ति। अतः शब्दार्थसंसर्गस्य सकलव्यवहारप्रवर्तकज्ञानजनकत्वाच्छब्दो व्यवहारप्रवर्तक उच्यते। व्यवहारप्रवर्तकज्ञानहेतुत्वेन शब्दो व्यवहारकारणमुच्यते।

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।**[१]

विपश्चितां पामराणां पशुपक्षिणाञ्च व्यवहारः शब्दज्ञानपूर्वक एव प्रवर्तते। अतः शब्दज्ञानमेव व्यवहारप्रवर्तकमिति। ''पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते, ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते। तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहार-स्तत्कालः समान इति निश्चीयते''[२] अत्र पक्षे व्यवहारसम्पादकज्ञानजननद्वारा शब्दो व्यवहारहेतुरुच्यते।

यद्वाऽर्थक्रियाकारित्वरूपोऽर्थो व्यवहारस्तस्य साक्षाज्जनकत्वेन शब्दो व्यवहारकारणमिति। घट इति शब्दः, घट इत्यर्थः, शब्दार्थयोस्तादात्म्य-दर्शनाच्छब्दतादात्म्यापन्नोऽर्थः क्रियाकारित्वव्यवहारं भजते। तत्र परावाग्रूपेण शब्दो नित्योऽनादिश्च गीयते। ततो जगतो व्यवहारात्मिका प्रक्रिया प्रवर्तते। एकमेव शब्दतत्त्वं तत्तदर्थात्मकव्यवहाराय तत्तर्थबोधकशब्दात्मना परिणमते। स च परिणामः शब्दसत्ताभिन्नसत्ताको नास्तीति अतात्त्विकः। शब्दरूपोपादान-विषमसत्ताकत्वेन विवर्त इत्युच्यते।

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।**[३]

अक्षरस्वरूपं शब्दतत्त्वमुत्पत्तिविनाशरहितमस्ति। तस्माच्छब्दतत्त्वादतात्त्वि-काऽर्थात्मक व्यवहाररूपाजगतः प्रक्रिया त्रिकालाबाध्यशब्दसत्तातो भिन्नाव्या-वहारिकसत्तात्वेन कार्यात्मना प्रतीयते। प्रवृत्तिनिवृत्तिव्यवहारप्रयोजिका वाग् उत्पत्पतिविनाशशून्या सत्यपि पदवाक्यरूपमापन्ना व्यवहारसम्पादिका भवति।

**अनादिनिधना दिव्या वागुत्सृष्टा स्वयंभुवा ।**
**आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः ।।**[४]

---

१. वाक्यपदीये १/१२३ २. अध्यासभाष्ये ३. वा०प० १/१

४. शा०भा०ब्र०सू० १/२/२८ स्मृतिः

सर्वेऽप्यर्थाः परायां वाचि उपसंहरन्ति। शब्दार्थयोरुपसंहारात्मिका परावाक् सकलविकारशून्यत्वान्नित्येति गीयते। सैवार्थबोधकशक्तिमत्पदवाक्यात्मना विवर्ता सत्यर्थात्मकव्यवहारायोपयुज्यते। यतश्शक्तिमन्ति पदानि वाक्यानि चार्थात्मकव्यवहारोत्पादकानि, अतश्शब्दशक्तिस्वरूपं जिज्ञास्यम्।

## शब्दशक्तिस्वरूपम्

अस्ति कश्चिच्छब्दार्थयोः सम्बन्धविशेषो येन शब्दः स्वार्थमेव बोधयति। येन सामर्थ्येन शब्दः स्वार्थबोधने क्षमते, तत्सामर्थ्यं शब्दशक्तित्वेनोच्यते। सा च शक्तिः शब्दादर्थाच्च भिन्ना सती अर्थबोधात्मककार्यं जनयति। शक्तिरेवार्थ-बोधात्मकार्यजनने हेतुः। शक्तिमत्त्वाच्च शब्दस्यार्थबोधकमुच्यते। यथा चक्षुरा-दीन्द्रियेषु रूपादिविषयप्रकाशनयोग्यता विद्यते। तथैव शब्देष्वपि अर्थप्रकाशना-योग्यताऽस्ति। सा योग्यता शक्तिपदेनाभिधीयते।

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः सम्बन्धः शब्दानां योग्यता तथा।।**[१]

शब्दानामर्थैः सह योऽनादिसम्बन्धः स एवार्थप्रकाशनयोग्यता शक्तिः। अत आह ''शब्दार्थयोर्वाच्यवाचकभावरूपापरपर्यायः सम्बन्धः शक्तिः। शक्तिपक्षे वाच्यवाचकभावः लक्षणापक्षे लक्ष्यलक्षणभावः, व्यञ्जनापक्षे च व्यङ्ग्यव्यञ्जक-भावसम्बन्धः शक्तिरिति। अर्थो वाच्यः शब्दश्च वाचकः, तयोः सम्बन्धः शक्ति। शब्दार्थयोः सम्बन्धं विनाऽर्थप्रकाशस्यासम्भवात्। सा शक्तिः शक्तिलक्षणा-व्यञ्जनाभेदेन त्रिधा। वृत्तिस्त्रिधेति पक्षे शक्ति अभिधाव्यञ्जनाभेदश्चेति। लक्षणाव्यञ्जनाभेदः। शक्तिर्द्विधेतिपक्षे अभिधालक्षणाभेदः।

## अभिधाशक्तिस्वरूपविचारः

साक्षाच्छक्यार्थबोधिका शक्तिरभिधेत्युच्यते। योऽर्थः सङ्केतादिना शब्देन साक्षाद् गृह्यते, तदर्थबोधाय शब्दे प्रथमो व्यापार उपजायते स व्यापारोऽभिधा-शक्तिपदेनाभिधीयते। सङ्केतितार्थाभिधानमभिधाशक्तिः। तत्र वैयाकरणाः ''पद-

---

१.वा०प० २/३/२९

पदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया''[१] शब्दः स्वसङ्केतितार्थमविलम्बेन बोधयति। अतोऽस्ति कश्चिच्छब्दार्थयोः सम्बन्ध इति। तस्याः शब्दार्थसम्बन्धरूपायाः शक्तेर्ज्ञानं विनाऽर्थबोधो न सम्भवतीति शब्दार्थयोरितेराध्यासमूलं तादात्म्यं शक्तिग्राहकत्वेन सङ्केत उच्यते। तादात्म्यस्य भेदाभेदरूपत्वात् तात्त्विकत्वमनुपपन्नमत आह अध्यासः। सत्त्वानृतमिथुनीकरणमध्यासः। यथा इदं रजतमित्यत्र लौकिकपारमार्थिकशुक्तिपदार्थेन सह मिथ्याभूत रजतपदार्थस्य संसर्ग इति। तद्वदत्रापि शब्दार्थयोर्भेदस्तात्त्विकोऽभेदश्च प्रातिभासिकः।

तादात्म्यरूपसम्बन्धस्याध्यासिकत्वे ''सङ्केतस्तु पदपदार्थयोरितदेतराध्यासरूपः स्मृत्यात्मकः, योऽयं शब्दः सोऽर्थो योऽर्थः स शब्दः''[२] तस्य तादात्म्यस्य पदनिष्ठशक्तेरुपकारकत्वेन शक्तिपदाभिधानम्, शब्दार्थयोस्तादात्म्यं शक्तिरिति। तत्र शब्दार्थयोस्तात्त्विकत्वे सम्बन्धस्यापि तात्त्विकत्वेन भाव्यम्। तात्त्विकयोरतात्त्विकः सम्बन्धो न सम्भवति। सम्बन्धस्यातात्त्विकत्वे कस्यचित् सम्बन्धिनोऽतात्त्विकत्वमभ्युपेयम्। यथा शुक्तिरजतयोरतात्त्विकसम्बन्धस्याऽन्यथानुपपत्त्या रजतस्यातात्त्विकत्वं कल्प्यते। अत आह भेदस्तात्त्विकोऽभेदश्चातात्त्विक इति। उभयोः शब्दार्थयोस्तात्त्विकत्वपक्षेऽभेदस्य निरासः कृतः सिद्धान्ते।

शब्दस्तात्त्विकोऽर्थश्च शब्दविवर्तरूपत्वादतात्त्विक इति शब्दार्थयोरध्यासपक्षे तादात्म्यस्यातात्त्विकत्वेऽपि न काचित् क्षतिः। शब्दार्थयोरतात्त्विकसम्बन्धस्यान्यथानुपपत्त्याऽर्थस्य मिथ्यात्वं निश्चीयते। यथा शुक्तिरजतमधिष्ठानशुक्तिसत्ताभिन्नसत्ताकत्वाभावान् मिथ्या। तथैवार्थोऽपि शब्दसत्ताभिन्नसत्ताकत्वाभावेन मिथ्या। राम इति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः, इत्यत्र नामार्थयोरभेददर्शनाच्छब्दार्थयोरतात्त्विकसम्बन्धरूपोऽध्यासोऽभिमन्यते। तत्र शब्दोऽधिष्ठानमर्थश्चाध्यस्तः। तथा चोक्तम्—

**बुद्धिप्रवृत्तिरूपं च समारोप्याभिधातृभिः।**
**अर्थेषु शक्तिभेदानां क्रियते परिकल्पना।।**[३]

तत्र प्राचीननैयायिकाः अस्माच्छब्दादयमर्थो बोध्य इत्याकारा पदप्रकारकार्थ-

---

१. लघुमञ्जूषा २. वा०प० ३/७/६ ३. महाभाष्य १/१/१

 ISSN 2320-2025

विशेष्यिकेश्वरेच्छा। यद्वा इदं पदमिममर्थं बोधयत्विकारा पदविशेष्यकार्थप्रकारिकेश्वरेच्छा शक्तिरिति स्वीकुर्वन्ति। तस्याश्च यद्यपि विषयत्वलक्षणः सम्बन्धः पदे चार्थे च तथापि बोधजनकत्वेन बोधनिष्ठजन्यतानिरूपकत्वेन वा विषयो वाचकः। बोधविषयत्वेन तस्या विषयो वाच्यो भवति। तेन शब्दार्थयोर्वाच्यवाचकभावो न सङ्गच्छते। तेषां मते आधुनिकसङ्केतेऽपि शक्तिरस्त्येव। एकादशेऽहनि पिता नाम कुर्यात् इति ईश्वरेच्छायास्तत्रापि सत्त्वात्। सम्पादविदस्तु आधुनिकसङ्केते न शक्तिं स्वीकुर्वन्ति। गदाधरभट्टाचार्यश्च इच्छामात्रं शक्तिः न त्वीश्वरेच्छा, तेनाधुनिकसङ्केतेऽपि शक्तिरस्त्येव।

ईश्वरेच्छारूपां शक्तिं निराकुर्वन् वैयाकरण आह शब्दार्थयोः सम्बन्धः शक्तिः सर्वैरभिमन्यते। स चेश्वरेच्छाया न सम्भवति। सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामको भवति। इच्छायाः सम्बन्धिनोराश्रयतया विशिष्टबुद्धिनियामकत्वाभावात् । तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम् । तदेव सम्बन्धः। उभयनिरूपिततादात्म्यवानुभय इत्यर्थपदयोर्व्यवहारात् । शक्तिरपि स्वकार्यजनने सम्बन्धमापेक्षते। स च सम्बन्धः शक्तितत्कार्ययोर्नियामको भवति। दीपादिगतप्रकाशकत्वशक्तिरपि आलोकविषयसम्बन्धे सत्येव विषयं प्रकाशयति। मीमांसकाश्च शक्तिः पदार्थान्तरमिति स्वीकुर्वन्ति। तत्र शब्दश्रवणानन्तरं प्रतीतिविषयोऽर्थः प्रत्याय्यः, शब्दश्च प्रत्यायकः। प्रत्याय्यप्रत्यायकभावसम्बन्धः। लक्षणाव्यावृत्त्यर्थमव्यवधानेन शब्दजन्यप्रतीत्यनुकूला वृत्तिः शक्तिरित्यभिधीयते। शब्दश्रवणोत्तरं लक्षणागम्यार्थस्यापि प्रत्ययो भवति। परन्तु तत्राभिधाव्यापारस्य व्यवधानमस्तीति न लक्षणायां शक्तिलक्षणस्यातिव्याप्तिः।

## शक्तिग्रहोपायविचारः

नोपायमन्तरा शक्तिग्रहो भवति। अतः शक्तिग्रहोपायानाह।

**शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च ।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।**

शक्तिग्राहकोपायेषु व्याकरणमन्यतम उपायोऽस्ति। अभ्यर्हितत्वात्तस्य प्रथमोपदेशः। व्याकरणं साक्षाच्छब्दार्थयोः सम्बन्धबोधकत्वात् प्रधानोपायोऽस्ति। अतो व्याकरणशास्त्रबोधिता शक्तिरेव गरीयसी। अयं पिण्डो गोसदृश इति ज्ञानोत्तरं गवयो गोसदृशो भवतीति गवयपदार्थाभिज्ञवाक्यस्मरणं ततश्चायं पिण्डो गवयपदवाच्य इति गृहो भवति। आप्तवाक्यन्तु व्याकरणेन गृहीतशक्तिमत् शक्तिग्रहोपायः। तथैव कोषोऽपि। उत्तममध्यमवृद्धव्यवहारो यद्यपि जिज्ञासु-बालस्य शक्तिगृहोपायोऽस्ति। तथापि वृद्धयोः शब्दार्थसम्बन्धज्ञानमेव व्यवहार-सम्पादकमस्ति। तच्च ज्ञानं व्याकरणशास्त्राधीनमिति व्याकरणस्य शक्तिग्राहकेषु प्राधान्यमस्ति।

## उपभ्रंशानां वाचकत्वविचारः

गावी गोणी आदि असाधुशब्दा गवादिपदार्थस्य साक्षाद्बोधकाः सन्तीति वैयाकरणाः। साधुशब्दस्मरणपूर्वकमर्थबोधका इति नैयायिकाः। समानायामर्था-वगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देनेति''[1] शिष्टा यथा साधुशब्दैरर्थव्यवहारं कुर्वन्ति। तथैव पामरा अपशब्देनार्थव्यवहारं कुर्वन्ति। शास्त्रेण धर्मनियमः क्रियते, साधुशब्दैरेवार्थ-व्यवहारः करणीयो नापशब्दैरिति। एवं क्रियमाणमभ्युदयकारि भवति।

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्।।**[2]

येषां मतेऽसाधुशब्दाः साधुशब्दस्मरणपूर्वमर्थबोधकास्तेषां मतेऽपभ्रंशशब्दाः साक्षादर्थबोधका न सन्ति। असाधुशब्दश्रवणोत्तरें तदर्थबोधकसाधुशब्दोऽनुमीयते स्म्रियते वा तेन स्म्रियमाणसाधुशब्देनार्थबोधो जायते।

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।**
**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः।।**[3]

तत्र साधुशब्दस्मरणपूर्वकार्थव्यवहारपक्षेऽर्थबोधो विलम्बेन जायते। ''तेन

---

१. पस्पशाह्निके महाभाष्ये २. वा०प० १/१४८ ३. तत्रैव १/१५०

भिमन्यते। यथा त्वचा ज्ञातमित्यत्र त्वक्पदेन त्वगिन्द्रियबोधः। चर्मार्थबोधकं त्वक्पदं निरूढ्या शक्त्या त्वगियार्थबोधकं भवति। तत्र त्वक्पदस्य त्वगिन्द्रियबोधे निरूढाशक्तिरभिमताऽलङ्कारकैः। निरूढाऽपराशक्तिरेव शब्दशास्त्रविदः।

यत्र शक्यार्थगतसादृश्यादिगुणसाम्येन शक्यार्थभिन्नार्थस्य प्रतीतिस्तत्र गौणी लक्षणाऽभिमता। यथा सिंहो माणवक इत्यत्र केशरीरूपार्थबोधकः सिंहशब्दः शौर्यादिगुणसाम्येन माणवकार्थबोधको भवति। शक्यार्थलक्ष्यार्थयोर्भेदे सत्येव गौणव्यवहारः सम्पद्यते। तथा चोक्तं भामत्याम् ''माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः''[१] स्वशक्यगुणसमानजातीयगुणयोगनिमित्तत्वं गौणत्वम्।

**अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।**
**लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता।।**[२]

गौणीलक्षणाऽपि शुद्धानिरूढाभेदेन द्विधा पूर्वोक्ता शुद्धा निरूढास्वरूपमुच्यते। तिलविकारस्तैलमिति। सार्षपादिषु स्नेहगुणसाम्येन गौणः। तथापि निरूढाशक्त्या तैलपदस्य तत्रापि शक्तिरभिमताऽस्ति। ''स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानो नत्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः।''[३] पुनश्च सहत्स्वार्थाजहत्स्वार्थभेदेन लक्षणा द्विधा। जहति पदानि स्वीयान् शक्यार्थान् यत्र सा जहत्स्वार्था। तद्यथा ''विषं भुङ्क्ष्व'' इति वाक्यं विष भोजनप्रवर्तनारूपमर्थं परित्यज्य शत्रुगृहे भोजननिषेधार्थबोधकम्। न जहति स्वीयान् शक्यान् यस्यां वृत्तौ साऽजहत्स्वार्था लक्षणा कथ्यते। तद्यथा ''काकेभ्यो दधिरक्ष्यतामित्यत्र काकपदं स्वार्थं पक्षिविशेषार्थं बोधयन् दध्युपघातकत्वधर्ममहिम्ना काकाकसकलदध्युपघातकार्थान् बोधयति। काकार्थस्य दध्युपघातकत्वेऽपि दधिरक्षणविधानस्यान्यथाऽनुपपत्त्या काकशब्दो दध्युपघातत्वेन विडालादिदध्युपघातकार्थान् लक्षणावृत्त्या बोधयति। यदि काकशब्दः विशेषार्थमेव बोधयेत् तदा विडालादिभ्यो दधिरक्षणमप्राप्तं स्यात्। अप्राप्तस्य प्राप्तिप्रवर्तनं विधिरुच्यते। तस्य विधेः प्रतिपत्तिस्तदैव सम्भवति, यदा काकशब्दस्य दध्युपघातकार्थः स्वीक्रियेत्।

---

१. अध्यासभाष्यभामती २. त०वा० पृ० ३५४ ३. अध्यासभाष्यभामती

साधुव्यवहितः कश्चिदर्थोऽभिधीयते''[१] असाधुशब्दश्रवणोत्तरमविलम्बेनार्थबोधो भवतीति गावी गोण्याद्यसाधुशब्दानां साक्षादर्थबोधकत्वमभ्युपेयम् । अथ च ये साधुशब्दस्वरूपानभिज्ञाः पामरा असाधुशब्दैरेवार्थबोधकुशलास्तेषां साधुशब्दैः साक्षादर्थबोधो न जायते। अतस्तेऽसाधुशब्दस्मरणपूर्वकं साधुशब्दैरर्थबोधं कुर्वन्ति। तेषामभिलषितविषयेषु ये घडा घोडा आदयोऽपभ्रंशा रूढ्या शक्त्या शक्तास्तेष्वर्थेषु घटः, घोटकः, आदयो साधुशब्दा न रूढाः सन्ति। अतस्तेऽ-साधुशब्दस्मरणपूर्वकं साधुशब्दैरर्थबोधमिच्छन्ति।

**पारम्पर्य्यादपभ्रंशा विगुणेष्वभिधातृषु ।**
**प्रसिद्धिमागता येषु तेषां साधुरवाचकः ।।**[२]

तदित्थमसाधुशब्दानामर्थबोधकत्वे शास्त्रविदा वैमत्यमस्ति। तथाप्यसाधु-शब्दैरर्थ बोधो भवतीत्यनुभवसिद्धम् । तत्र घडा घोडा आद्यसाधुशब्दानां श्रवणा-व्यवहितार्थबोधस्य जायमानत्वात्तेषां साक्षादर्थबोधकत्वपक्षः श्रेयान् ।

## लक्षणास्वरूपविचारः

यत्र मुख्यार्थबाधे सति शब्दः प्रयोजनवशाद् रूढ्या शक्त्या वा यः शक्यार्थसम्बन्धितभिन्नोऽर्थो लक्ष्यते तत्र शब्दस्य लक्षणाव्यापारो हेतुः ।

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ।।**[३]

शक्यार्थस्य बाधिते सति प्रयोजनवशाद् रूढ्या शक्त्या वा यः शक्यार्थसम्बन्धितभिन्नोऽर्थो लक्ष्यते तत्र शब्दस्य लक्षणाव्यापारो हेतुः। सा लक्षणा द्विधा शुद्धा गौणी च। शुद्धाऽपि प्रयोजनवती निरूढाभेदेन द्विधा। तद्यथा गङ्गायां घोष इत्यत्र शीतत्वपावनत्वप्रतीतिवशाद् भगीरथरथखातावच्छिन्नचलज्जल-प्रवाहरूपमुख्यार्थसम्बन्धितीरार्थस्य बोधः। तत्राधाराधेयभावसम्बन्धस्यानुपपत्त्या तात्पर्यानुपपत्त्या वा मुख्यार्थस्य बाधे सति मुख्यार्थसम्बन्धी तीरार्थो बोध्यते। प्रयोजनाभावेऽपि यत्र शक्यार्थभिन्नार्थप्रत्ययस्तत्र निरूढालक्षणाव्यापारः कारणम-

---

१. वा०प० १/१५३ २. तत्रैव १/१५४ ३. का०प्र० का० ९

ननु पदस्यैव शक्तत्वेन तदर्थस्य शक्यतया तत्सम्बन्धिन एव लक्ष्यत्वात् कथं वाक्यवृत्तिलक्षणाविषयत्वं वाक्यार्थसम्बन्धिन इति चेत्, न। शक्त्या यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा। पदसम्बन्धेन शक्त्या यद्वस्तु ज्ञाप्यते तत्सम्बन्धो लक्षणा। शक्तिज्ञाप्यो यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः। तथा च शक्त्या साक्षाज्ज्ञाप्यस्तु पदार्थ एव परन्तु तज्ज्ञानद्वारा वाक्यार्थोऽपि ज्ञाप्यत एवेति परम्परया ज्ञाप्यस्तु वाक्यार्थोऽपि भवति। अतः पदार्थस्येव वाक्यार्थस्यापि शक्तिज्ञाप्यत्वरूपशक्यत्वात् तत्सम्बन्धरूपा लक्षणा सम्भवत्येवेति न काचिदनुपपत्तिः।

**लक्षणाबीजविचारः**

अत्र केचिदन्वयानुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजमिति स्वीकुर्वन्ति। तद्यथा गङ्गायां घोषः इत्यत्र गङ्गापदाद् भगीरथरथखातावच्छिन्नो जलप्रवाहविशेषरूपोऽर्थ उपतिष्ठते। तत्र घोषपदेनोपस्थितस्याभीरपल्लीरूपार्थस्यान्वयोऽनुपपन्नः। घोष-निष्ठाधेयतानिरूपिताधारता गङ्गायां न सम्भवतीति तत्रान्वयोपपादनाय लक्षणा-वृत्तिराश्रीयते। तया वृत्त्या च शक्यार्थसम्बन्धिनस्तीरस्योपस्थितौ ततश्च गङ्गा-सम्बन्धितीरवृत्तिघोष इति बोधो जायते।

तदन्ये तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति स्वीकुर्वन्ति। यदि अन्वयानुप-पत्तिरेव लक्षणाबीजं मन्येत् तदा गङ्गायां घोषः इत्यत्र घोषपदस्य मीनशैवालादिषु लक्षणां विधायान्वयोपपत्तिसम्भवात्। अथ च काकेभ्यो दधि रक्ष्यतामित्यत्र काकावधिकदधिरक्षणप्रवर्तनायामन्वयोपपत्तौ लक्षणाबीजाभावात् काकपदस्य दध्युपघातके लक्षणा न स्यात्। गङ्गायां पापी गच्छतीत्यादौ गङ्गापदस्य नरके लक्षणयाऽन्वयोत्पत्तिसम्भवात्। तात्पर्यानुपपत्तिपक्षे पापिपदस्य भूतपूर्वपापाव-च्छिन्ने लक्षणा कर्तव्या, तेनैव तात्पर्योपपत्तिसम्भवात्। नक्षत्रं दृष्ट्वा वाचं विसृजेत् इत्यत्र सत्यप्यन्वये तात्पर्यानुपपत्तिवशाद् नक्षत्रपदेन नक्षत्रोपहितकालो लक्ष्यते। अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति।

**लक्षणाविषये वैयाकरणमतम्**

वैयाकरणास्तु लक्षणावृत्तिं न स्वीकुर्वन्ति। सर्वे शब्दास्तात्पर्यानुसारं

 ISSN 2320-2025

सा च लक्षणा शुद्धा, गौणी, सारोपा, साध्यवसाना, उपादानलक्षणा लक्षितलक्षणेतिभेदेन षड्विधाऽलङ्कारिकैरभिमता। वेदान्तपरिभाषाकारस्तु लक्षणावृत्तेर्द्वैविध्यमेव स्वीकरोति। ''लक्षणा च द्विविधा केवललक्षणा लक्षितलक्षणा चेति''[१] यत्र शक्यार्थेन सह लक्ष्यार्थस्य साक्षात्सम्बन्धस्तत्र केवललक्षणा। यथा गङ्गायां घोष इत्यत्र चलज्जलप्रवाहरूपगङ्गापदशक्यार्थेन सह तीररूपलक्ष्यार्थस्य साक्षात् सम्बन्धः। यत्र शक्यार्थेन सह परम्परया लक्ष्यार्थस्य सम्बन्धस्तत्र लक्षितलक्षणा। केवललक्षणाभिन्नानां लक्षणानां लक्षितलक्षणायामन्तर्भावः। यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिरिति। लक्षितलक्षणायां सिद्धपदान्तरसमवधानरूपप्रकरणमपि सहकारिकारणम्। अन्यथा द्वौ रेफौ यस्मिन् तद्द्विरेफपदम्, तथा च द्विरेफपदस्य रेफद्वयत्पदेषु भ्रमररन्ध्ररात्र्यादिषु शक्ततया रन्ध्रादिपदानामपि रन्ध्रादिपदघटितपरम्परासम्बन्धेन मधुकरे वृत्ति स्यात्। गौण्यपि लक्षितलक्षणैव। शक्यस्य सादृश्यरूपः सम्बन्धो गुणः, गुणाधीना वृत्तिः गौणलक्षणाऽभिधीयते। यथा सिंहशब्दशक्यः केशरादिमान् मृगविशेषः तत्सम्बन्धिक्रौर्यादिगुणः तस्य माणवकवृत्तित्वात् सिंहशब्दो गौण्या वृत्त्या माणवकप्रत्यायको भवति।

सा च लक्षणा पदवृत्तिवत् वाक्यवृत्तिरपि। लक्षणायाः पदमात्रवृत्तित्वे गम्भीरायां नद्यां घोष इत्यत्र लक्षणावृत्त्या तीरार्थबोधो न स्यात्। गम्भीराभिन्ननदीसम्बन्धितीररूपलक्ष्यार्थबोधाय गम्मीरायां नद्यामिति पदद्वयसमुदायस्य लक्षणा। ननु लक्षणा पदमात्रवृत्तिर्वृत्तिस्तत्वात् शक्तिवत्, शक्तिः पदमात्रवृत्तिरस्ति। अथ च वृत्तित्वधर्मोऽप्यस्ति। एतेन वृत्तित्वरूपहेतौ पदमात्रवृत्तित्वरूपसाध्यस्य व्याप्तिः दृष्टान्ते गृहीता। पदमात्रवृत्तित्वव्याप्यवृत्तित्वरूपहेतुर्लक्षणायामप्यस्ति। अतो वृत्तित्वहेतुना लक्षणायां पदमात्रवृत्तित्वमनुमानेन सिद्ध्यतीति चेत् न। अत्रानुमाने शक्तित्वमुपाधिः। तथा हि दृष्टान्ते शक्तौ साध्यमस्ति शक्तित्वमप्यस्तीति शक्तित्वं साध्यव्यापकं जातम्। पक्षभूताया लक्षणावृत्तित्वरूपं साधनमस्ति शक्तित्वं नास्तीति साधनाव्यापकं शक्तित्वमिति। सोपाधिकत्वेन व्याप्यत्वासिद्धौ वृत्तित्वहेतुः स्वसाध्यसाधने न क्षमते।

---

१. वेदान्तपरिभाषा आगमपरिच्छेद

सर्वमर्थमभिदधते, इति भाष्यवचनात् सति तात्पर्ये सर्वे शब्दाः सर्वार्थवाचका भवन्ति। वृत्तिद्वयस्वीकारेऽवच्छेदकद्वयकल्पने गौरवात् । जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च। लक्षणास्वीकारे शाब्दबोधं प्रति शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणं वाच्यमिति कार्यकारणभावद्वयकल्पने गौरवं स्यात् । ''तथा हि शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम् । सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्''[१] तथा च गङ्गायां घोष इत्यत्र भगीरथरथखातावच्छिन्नप्रवाहे गङ्गापदस्य प्रसिद्धा शक्तिः । तीरादौ चाप्रसिद्धा शक्तिरस्ति। यतः सामान्यजना गङ्गापदेनोक्तजलप्रवाहरूपमर्थमेवागच्छन्ति। अतस्तत्र गङ्गापदस्य प्रसिद्धा शक्तिरभिमता। सहृदयास्तु तात्पर्याद्यनुपपत्तिप्रतिसन्धानपूर्वकं तीरार्थमपि अवगच्छन्ति, अतो गङ्गापदस्य तीरार्थेऽप्रसिद्धा शक्तिः।

ननु सर्वे सर्वार्थवाचका इति पक्षे घटपदात् पटार्थप्रत्ययोऽपि स्यात्? तत्समाधत्ते सति तात्पर्ये सर्वे सर्वार्थवाचका इत्युक्तत्वात् घटपदं न कुत्रापि पटतात्पर्येणोच्यते। तात्पर्यञ्चात्रेश्वरसङ्केतितं देवतामहर्षिवृद्धपरम्परातश्च प्रसिद्धमस्मदादिभिरवगतं मन्तव्यम् । लघुमञ्जूषायां नागेशेन लक्षणायाः शब्दतः खण्डनं न कृत्वा आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धशक्यार्थभिन्नार्थबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहार इत्युक्तम् ।

**व्यञ्जनास्वरूपविचारः**

लक्षणयैव व्यञ्जना गतार्थेति व्यञ्जनाशक्तिलक्षणाभ्यां भिन्ना नास्तीति नैयायिकमतनिरासाय व्यञ्जनालक्षणमुच्यते। मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिविशिष्टज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना। लक्षणावृत्तौ मुख्यार्थबोध आपेक्ष्यते। अथ च लक्षणावृत्तिः शक्यार्थसम्बद्धमेवार्थं बोधयतीति लक्षणावृत्तितो व्यञ्जनावृत्तिर्भिन्नाऽस्ति।

**वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।।**

**प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।**

---

१. प०ल०म० लक्षणानिरूपणे

**योऽर्थस्यान्यार्थधीहेतुव्यापारो व्यक्तिरेव सा ।।**[१]

वक्त्रादेर्यद्विशिष्टज्ञानं तेन जायमाना या प्रतिभा ते आदिनी यस्य समुदायस्य तेन समुदायभूतेन कारणेनोद्बुद्धो यः संस्कारविशेष एव व्यञ्जनेति गीयते। तत्र वक्तृबोद्धव्यः काकुध्वनेर्विकारः, प्रकरणम्, विजनादिदेशः, वसन्तादिकालः, आदिपदेन चेष्टादिसंग्रहः, एतेषां वैशिष्ट्यात् सम्बन्धाद्वैलक्षण्याद्वा काव्यवासना-परिपक्वबुद्धीनां या व्यङ्ग्यार्थप्रतीतिः, तस्या हेतुर्व्यञ्जनेति गीयते। तस्योदाहरणम्—

**रतिकाले विलोक्य श्रीर्नाभिपत्रे पितामहम् ।**
**रत्याकुलाच्छादयते दक्षिणं नयनं हरेः ।।**

तथाहि हरेः दक्षिणं नयनमित्यत्र दक्षिणनयनेन सूर्योऽर्थो व्यज्यते। तन्निमीलनेन सूर्यास्तार्थो व्यज्यते, तेन पद्मसङ्कोचस्तेन पद्मे पितामहस्य तिरोधानं ततश्चाप्रतिबद्धविलास इति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थानां प्रतीतेर-नन्तरमेव व्यङ्ग्यार्थप्रतीतिर्भवति। अर्थस्यापि व्यञ्जकत्वस्वीकारात् ।

यद्यपि वैयाकरणाः व्यञ्जनावृत्तिं नाभ्युपगच्छन्तीति आशाधरभट्टेन कोविदानन्दे त्रिवेणिकायामुक्तम् ''शक्तिरेव शब्दवृत्तिः तस्याः प्रसिद्धाप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः, व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारात्[१], तथाहि भाष्यादिप्राचीनतमेष्वाकरग्रन्थेषु क्वचिदपि व्यञ्जनाविषयको विशिष्टविचारो नोपलभ्यते। टीकादिग्रन्थेषु च ''वृत्तिश्च शक्तिलक्षणाऽन्यतररूपा''[२] इत्येव लिखितमस्ति। लक्ष्यार्थस्य तीरादेर्नियतोपस्थितिकत्वाभावेन गङ्गादिपदरूप-प्रातिपदिकार्थत्वाभावमशङ्क्य ''अन्वयानुपपत्तिपूर्विका लक्षणा पदे एव''[३] इत्येव शेखरकारेणोक्तम्, न तु व्यञ्जनाविषये शङ्कासमाधाने समुद्भाविते।

तथापि स्फोटस्य व्यङ्ग्यत्वस्वीकारेऽवश्यं व्यञ्जनाऽङ्गीकर्तव्या। अन्यथा सकलशाब्दिकाभिमता तस्य व्यङ्ग्यता नैव सिद्ध्येत् । अत एव नागेशभट्टेन व्यञ्जनास्वरूपं प्रदर्श्योक्तम्—''अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता

---

१. का०प्र० ३ का० २१-२२ २. त्रिवेणिकायां पृ० ३६-३७

३. प्रौढमनो० शब्दरत्नटिप्पणे पृ० २५, पा०स२० १/२/४५

च हर्यादिभिरुक्ता। द्योतकत्वञ्च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामपि तत्स्वीकार आवश्यकः''[१] अत्र केचित् तार्किकविरोधिनां शाब्दिकानां तार्किकमतप्रत्याख्यानमात्रफलको व्यञ्जनासमर्थनप्रयास इति। व्यञ्जनया यावानर्थो व्यङ्ग्यो भवति, तावान् सर्वोऽप्यप्रसिद्धया शक्त्या व्यक्तो भविष्यति। तदित्थं यथाशास्त्रं यथामति शक्तिस्वरूपं निरूपितमिति शम्।

# ग्रन्थसमीक्षाः-




**Reviewer: Dr.Buddheswar Sarangi**

Name of the Book- THE BAPS SWAMINARAYAN RESEARCH JOURNAL( बी.ए.पी.एस स्वामिनारायण शोधपत्रिका)

Type: Research Journal.

ISSN: 2583-4029

Editor-in-Chief: Mahamahopadhyaya Dr. Swami Bhadreshdas

Total Page: 227

Annual Subscription: Rs-3000/-

Available at: BAPS Swaminarayan Research Institute., Swaminarayan Akshardham, NH 24, New Delhi.

The Research journal of BAPS is an ISSN marked research journal depicting the thoughts of SWAMINARAYAN philosophy. The new arrival of this journal is an unique contribution of this organisation to Indian philosophy. Five Papers are selected to publish in current issue. All papers are praise worthy and reflecting the Indian knowledge system. The chief editor Swami Bhadreshdas has properly guided the editors to design the papers with new research methodology which gives proper information in concern area and also guide researchers in proper way for conducting their research in particular area.

In introduction page he declares the aim and objective of the research Institute. The BAPS Swaminarayan Research Institute encourages in-depth, cross-disciplinary scholarly research of Indian culture, its religions, philosophies, languages, sacred art-architecture, and rich collection of literature.

Committed to the promotion of reverent scholarly research, the Institute nourishes a unique atmosphere allowing for researchers and practitioners to work together to produce informative, practical, and rigorous academic research.

A brief note has been prepared by Swamiji on all articles which focusing the thrust area of the papers as follows:

The first work in this issue, titled "An Introduction to Parabrahman Svāminārāyaṇa's Vacanāmṛta," presents a succinct overview of the Vacanāmṛta. It is an excellent starting point for those who are unfamiliar with the Aksara-Puruṣottama Darsana and the Vacanāmṛta, one

of the darśana's foundational sacred texts. The work covers a myriad of subjects, including the significance of the Vacanāmṛta within the tradition, its creation, brief biographical accounts of its compilers, the text's organization and structure, its presentation and pedagogy, authenticity, audience, and contemporary readership. By covering these topics, the work lays the necessary foundation for further inquiry into the content of the sacred text.

The second piece in the issue, the "Siddhantapatram," is an English translation of Pramukh Swami Maharaj's own exposition of Bhagavan Svāminārāyaṇa's core teachings. As the guru of the Aksara-Puruṣottama Darśana, Pramukh Swami Maharaj possessed unique insights into the teachings of the Darśana and unparalleled authority to its adherents. In this work, his detailed description of the foundational principles of the darśana elaborates on the darśana's unique metaphysics and soteriology. For this reason, it is an essential read for those seeking to become familiar with the Darśana's philosophical positions. By defining the necessary framework for understanding Svāminārāyaṇa's teachings, this work also serves as a requisite reading to explore the revelations of the Vacanāmṛta.

After that, Dr. Swami Shrutiprakashdas, the head of the AARSH research institute in Gandhinagar, Gujarat, presents his paper in Sanskrit titled: "वचनामृतशीर्षकदर्शनम्" His work discusses the nature and significance of the various titles assigned to each "Vacanāmṛta." It also categorizes the titled used within the text and highlights the nomenclature behind their creation.

The fourth article: "The Vacanāmṛta: A Unique Praśnopaniṣad" is authored by Dr. Madan Mohan Agrawal, professor emeritus from the Department of Sanskrit at Delhi University. His work discusses pedagogical methods used by Svāminārāyaṇa in the Vacanāmṛta and compares them with those of other sacred texts. Focusing specifically on the question-and-answer dialogue within the Vacanāmṛta, he elaborates on its distinctive features and demonstrates the nuances of Svāminārāyaṇa's use of questioning to convey teaching. The article demonstrates that Svāminārāyaṇa's use of learning through questioning introduces novel features while remaining committed to the Upaniṣadic pedagogic style.

This issue then concludes with Dr. Swami Aksharananddas' piece on "The Art of

Upholding Nivṛtti in Pravṛtti and Pravṛtti in Nivṛtti: Reconciling the Dichotomy Between Two Forms of Dharma." In analyzing Svāminārāyaṇa's understanding of pravṛtti dharma and nivṛtti dharma, the work reconsiders the prima facie rapture between pravṛtti and nivṛtti. In doing so, it elaborates how, according to Svāminārāyaṇa, it is possible not only to have nivṛtti in pravṛtti and pravṛtti in nivṛtti but also for both pravṛtti and nivṛtti to share equal merit. The work continues by exploring the sociological and interpretive significance of understanding pravṛtti and nivṛtti in the proposed manner.

The bi-annually journal is a great wealth of our nation and depicts the nectar of Indian philosophy. The scholar may contact the editor to collect the valuable your journal via email-journal@research.baps.org.

**Writer's World**


**1. Saha Subrata**

Research Scholar, Raiganj University. Uttar Dinajpur

**2. Das Subhasree & Dalai Chandini**

Assistant Professor in Sanskrit Ravenshaw University, Cuttack & Research Scholar, Ravenshaw University, Cuttack.

**3. Mondal Anusrita**

Assistant Professor, Department of Sanskrit, Surendranath College, Kolkata.

**4. Chakraborty Shewli**

Village - Milan Nagar, P.O- kazipara, P.S- Madhyamgram, North 24 Parganas, Pin- 700125

E-mail- shewlicharkraborty12@gmail.com

5. **Sarkar Ananya**

Research scholar, Calcutta University, Kolkata

**6. Tripathy Ramkishore**

Professor of Vedanta, Sampurnanand Sanskrit University, Uttarpradesh, Varanasi.

**7. Ramkrishna D**

Department of Sanskrit, Marris Steela College, Vijayawada, AP

**8. Mishra Saileshkumar**

Assistant Professor, Rajkiya Sanskrit Mahavidyalaya.

**9. Banerjee Moumita**

English Bazar, Malda

**10. Monika Singhania & Depti Vajpayee**

Research Scholar Mayabati. Km. Mayawati Government Girls P.G. College is a girl's college

**11. Das Santigopal**

Assistant Professor, Buniyadpur Mahavidyalaya, Dakshin Dinajpur

**12. Dash Prashant Kumar**

Assistant Professor, Department of Sanskrit (FACIS), Sri Sri University, Govindpur , Cuttack – 754006

**13. Panda Sankarshan**

Assistant Professor, Kaliachack Bikram Kishore Adarsha Sanskrit Mahavidyalaya

**14. Rath Bharat Bhushan**

Assistant Professor, Department of Sahitya, National Sanskrit University, Tirupati: - A.P, Mobile - 8897426243

**15. Padhy Kadambini**

Assistant Professor, Sri Sri Ananta Narayan Sanskrit College

**16. Adhya Atanu**

Assistant Professor, Department of Sanskrit, Raiganj University, Email I'd - atanuadhya1988@gmail.com , Mobile :- 9382272006

**17. Burman Bablu**

Research Scholar, Raiganj University. Email - bablubarman0205@gmail.com , Phone no - 7797910656

**18. Murthy Dattatreya G.S.V**

Department of Vyakaran a, Shri Jagannath Sanskrit University, Shri Vihar, Puri, Email - dattatreyamurthy10@gmail.com

**19. Boruah Jewti**

Assist. Professor, Department of Sanskrit, Jhanji H.N.S. College, Jhanji, Sivasagar Assam, India. PIN: 785683.

**20. Panda Krishnachandra**

khorda, Odisha.

**21. Barik Radhesyam**

Research Scholar, Dept. of Sanskrit, Pondicherry University.

**22.Sarangi Laxmikant**

Dept. of Sanskrit, HOD, Yogoda satsanga palpara Mahavidyalaya.

**23. Nanda Satyabrata**

National Institute of Indian Medical Heritage, Hyderabad, Telangana

**24. Tiwari Anjana**

Assistant Professor, The Maharaja Sayajirao University, Vadodara, Gujarat

**25. Ruidas Bapan**

Ramakrishna Mission Vivekananda Educational and Research Institute, formerly Ramakrishna Mission Vivekananda University, Belur, Howrah.

**26. Pujara Preeti**

Asst. Prof. DCM Arts & Commerce College, Viramgam, Ahmedabad-
preetirpujara@gmail.com.

**27. Banerjee Pralay**

Assiostant Professor, Panchmura Mahavidyalaya, Panchmura, Bankura.

**28 Parvin Husna**

Assistant Professor, Department of Sanskrit, University of Gour Banga, Malda - 732 103, West Bengal, India e-mail: hparvin.sept85@gmail.com.

**29. Mishra Shibani**

**30. Bhattacharya Pratim**

Assistant Professor in Sanskrit, Sukumar Sengupta Mahavidyalaya, Keshpur, Paschim Medinipur.

**31.Nayak Gitanjali**

Assistant Professor, Dept. of Sanskrit, Villa Marie Degree College for Woman, Hyderabad – 500 082

**32. Guru Nrusingha**

Assistant Professor, Kaliachack Bikram Kishore Adarsha Sanskrit Mahavidyalaya, Purba Medinipur.

**33. Mondal Debdas**

Assistant professor, Department of Sanskrit, Yadavpur University

**34. Mondal Bhupen**

Yogoda satsanga palpara Mahavidyalaya, Palpara, Purba Medinipur 721458, West Bengal

**35. Mallik Mrimay**

Assit. Professor, Dept. of Sanskrit, Sri Chaitanya College, Habra, North 24 Pargana.

**36. Prakash Gogikar**

Assistant Professor, Dept. of Sanskrit, osmania university.

**37. Mishra Priyabrata**

Associate Professor, Shree Jagannath Sanskrit University.

**38. Panda Swapan kumar**

Assistant Professor, Department of Veda, Shaskiya Sanskrit College. M.P

**39. Mahala Prasanta Kumar**

Professor in Sanskrit, Raiganj University, Uttar Dinajpur, West Bengal.

**40. Mami Mahanta**

Research Scholar, Depart of Sanskrit, Pondicherry University.

**41. Sahu jayprakash**

C/O - Dr.Raseswari Pradhan, EE, VSSUT, Burla, Sambalpur ,Pin- 768017.(Odisha)

**42. Rasal Dinesh P**

Assistant Professor, Department of Sanskrit, Savitribai Phule Pune Vidyapeeth, Pune

**43. Tripathy Shivdutta**

Research Scholar, Kashi Hindu University, Varanasi.

**44. Sarangi Buddheswar**

Associate Professor in Sahitya, SSVASM, Kolkata-700035